145

THE

SATHADUSHANI.

BY

SRI VEDANTA DESIKA,

With

CHANDAMARUTHA

By

THODDAIA'CHARIA.

EDITED BY

P. B. ANANTHACHARIAR

PRINTED AT THE
SRI SUDARSANA PRESS
Conjeeveram.

Vol. 1.

1901.

Price Rs. 3-8-0.

श्रीः ।

शास्त्रमुक्तावळी — ९

॥ शतदूषणी ॥

श्री कवितार्किक सिंहेन सर्वतन्त्रस्वतन्त्रेण

श्रीमद्वेदान्ताचार्येण विरचिता

वाधूलकुलतिलक श्रीमहाचार्यविरचितया

चण्डमारुताख्यया व्याख्ययासह

श्री काञ्ची प्रतिवादिभयंकर अनन्ताचार्येण परिशोधिता

श्री सुदर्शनमुद्राक्षरशालायां

॥ अमुद्रत ॥

प्रथमसंपुटः—पंचदशस्कन्धान्तः ।

॥ श्रीकांची ॥

इदानी मेतन्मूल्यम् — ३ - ८ - ०

१९०१

श्रीः ।

श्रीमच्छरणतार्ति हर वरद परब्रह्मणे नमः ।

श्रीमते हयग्रीवाय नमः ।

श्रीमते निगमान्त महादेशिकाय नमः ।

श्रीमद्वेदान्तदेशिक विरचिता

शतदूषणी ।

श्रीमान्वेंकटनाथार्यः कवितार्किक केसरी ।
वेदान्ताचार्यवर्योमे सन्निधत्तां सदाहृदि ॥

श्रीः ।

श्रीमते रामानुजाय नमः ।

महाचार्यविरचितः - चण्डमारुतः ।

विश्वंविभ्रति वीर्यखण्डितमहादैत्ये समस्तात्मनि
ज्योतिर्मण्डलभासितत्रिभुवने सर्वं स्वतोद्रष्टरि ।
अस्तुश्रीनृहरौ स्वभीतिविहितस्वाज्ञानिलार्कानले
श्रीरु स्त्वाश्रित मृत्युभंगचतुरे धीर्मे सदा ब्रह्मणि ॥ १ ॥
प्रायश्छादयितुं विनम्रजनता नानापराधव्रजां
वात्सल्यैक वशंवदेन कुहना निद्रां दध द्धर्मणा ।
धाम्ना सह्यसुतान्तराळ पुळिनं रंगेशयं काशयत्
लक्ष्मीभूमिनिषेव्यमाणचरणं तत्वपरं मन्महे ॥ २ ॥
पद्मावीरुदुपाश्रय स्स्तबकित स्स्रग्भूषणाम्बरै-
र्भास्वत्पाण्यधरांघ्रिपल्लवधरो दोस्स्कन्धविभ्राजितः ।
भक्तानांफलितोर्थितै र्मरतकश्यामत्विषापत्रळो-
भद्रायास्तुमुकुन्दकल्पविटपी शेषाद्रिसंगी स नः ॥ ३ ॥

तापघ्नाय तटित्वतेकमलया नित्यानपायध्वंचे
भक्ताना मभिलाषपूर मखिला न्संवर्धुकायार्थितान् ।
वेतंडाचलशृंगसंगिवपुषे भव्याय कृष्णात्मने
जीमूताय चतुर्मुखाध्वर फलीभूताय तस्मै नमः ॥ ४ ॥

चरणयुगळमेव यस्यलब्ध्वा धनमनपायि सुनिर्वृतामहान्तः ।
तृणमिवविजहुः पुरान्यदर्थां नवतु समां घटिकाधराध रेन्द्रः ॥ ५॥

सीदन्तीनां श्रुति परिषदां स्वाभुतत्वावबोधे
पीडांलुंप न्कुमतिकलितां भाष्यपीयूषवर्षैः ।
विश्वत्राणेहरि मभिमुखं सत्यकामं वितन्वन्
पायादस्मा न्यतिपरिवृढ श्श्रेयसामेकसूतिः ॥ ६ ॥

तुरगवदनतेजो वृंहिताश्चर्यशक्तिः
कथिकथकमृगेन्द्र स्सर्वतन्त्रस्वतन्त्रः ।
जयतिगुरु रबाधां वेदचूडार्यसंज्ञा
मनितरजनलभ्यां लम्भितो रंगभर्त्रा ॥ ७ ॥

अव्याजसौहृद मशेष जनेषुसाक्षा न्नारायणो नरवपुर्गुरुरित्यृषीणाम् ।
वाचंसमर्थयितुमच्युतमेवजातं श्रीश्रीनिवास गुरुवंचमहंभजामि ॥८ ॥

वेदान्तार्योक्तिभावं भवदुदितचरं कृत्स्नशोनेश्वरोहं
वक्तुंवोब्धुंच भेको नहिजलधिगतोप्यस्यपारंक्रमेत ।
आज्ञा त्वद्व्याक्रियायां तदपिशिरसिमे विश्वतोऽध्यास्वमेधां
सूक्ष्मार्थे ष्वादधान स्समुपकरणैः श्रीनिवासार्य ! चेतः ॥ ९॥

क्ववेदान्ताचार्यः क्वचपुनरहं क्वास्यधिषणा
परिच्छेदातीता क्वममतिरेषाल्पविषया ।
क्वगंभीरातद्गीः क्वममपृथुकानामिववचः
परन्तद्भक्तिर्मां त्वरयतिगिरांतस्यविवृतौ ॥ १० ॥

चिकीर्षितस्य ग्रन्थस्य कुदृष्टिजनोद्भावित चित्तान्धतमस विध्वंस-
नार्थत्वा त्तस्य च तत्वज्ञानद्वारकत्वा त्तत्वज्ञानस्य च भगवत्प्रसादाधीन

समाहारस्साम्नां प्रतिपदमृचां धाम यजुषां
लयः प्रत्यूहानां लहरिविततिर्बोधजलधेः ।
कथादर्पक्षुभ्यत्कलिकथककोलाहलभवं
हरत्वंतर्ध्वान्तं हयवदनहेषाहलहलः ॥ १ ॥

तया तेन विना स्वग्रन्थेनाप्युत्पादयितुमशक्यत्वाच्च छात्रानुजिघृक्षया तेषु तत्वज्ञानोत्पादनद्वारा कुदृष्टिजनसन्धुक्षितान्धतमसविध्वंसनं भगवन्तं प्रार्थयते (समाहार इति)जगदुज्जीवनाय भगवता स्वयमेव वेदस्य प्रवर्तितत्वात्तत्साध्यतत्वज्ञानहेतुभूतः प्रसाद स्स्वप्रार्थनया भगवतो युज्यतएवेत्यभिप्रायेण समाहार इत्यादिविशेषणानि । हयवदनो दीरिता स्सर्वे शब्दा हलहलत्वेन विवक्षिताः । तदेकदेशा स्सामादय इतिभावः । सामशब्दो गीतिविशेषवचनः –" गीतिषुसामाख्या " इति जैमिनिना सूत्रितत्वात् । अत स्सामाधिकरणभूतो वेदस्सामवेद इति व्यवह्रियते । एवंच सामवेदस्य सामनिरूपणीयत्वात्तन्निर्वाहकत्वं निरूपकमुखेनाह (साम्नांसमाहार इति) " तेषामृग्यत्रार्थवशेन पादव्यवस्थे " ति ऋग्लक्षणाभिधानेनार्थस्य ऋग्वेदनिरूपकत्वात्तत्प्रवचनमुखेन तन्निर्वाहकत्वमाह (प्रतिपदमृचामिति) " शेषेयजुश्शब्द " इति यजुर्लक्षणे निरूपकान्तराप्रतीते र्यजुषांधामे त्युक्तम् । समुदायस्यैकदेशाधारता विवक्षिता । एषांविशेषणानां कृत्स्नस्यापिं वेदस्य स्वरूपतो धर्मतः फलतश्च भगवदधीनत्वे तात्पर्यं । ऋगादौ धर्मा श्चातुर्मास्यादयः , फलं ज्ञानं, तत्प्रतिपदमित्यत्र विवक्षितं । ज्ञानोत्पत्तिप्रतिबन्धक निरासोपि ततएवेत्यभिप्रायेणाह (लयः प्रत्यूहानामिति) फलितमाह(लहरिविततिरिति)बोधः–धर्मभूतज्ञानं, सएव जलधिः, तस्य लहरिविततिः–भगवत्स्वरूपरूपगुणविभूतिविषयकज्ञानावस्थाः । तद्धेतुरितियावत । आवृत्तमितिवद्व्यपदेशः (कथेति) कथायां प्रवृत्तायां, निरर्थकदर्पेण, क्षुभ्यन्तः– न्यायापरामर्शनिबन्धन मिथ्यादर्शनवन्तः , कलिकथकाः – पापस्वरूपाः कुदृष्टयः , तेषां , कोलाहलः – निरर्थकशब्द समुदायः , तेहि

इदंप्रथम सम्भव त्कुमति जाल कूलंकषा-
मृषामतविषानल ज्वलितजीव जीवातवः ।
क्षरन्त्यमृतमक्षरं यतिपुरन्दरस्योक्तय-
श्चिरन्तनसरस्वती चिकुरबन्ध सैरन्ध्रिकाः ॥ २ ॥

प्राचीमुपेत्य पदवीं यतिराजदृष्टां तत्सन्निकृष्ट मपि वा मतमाश्रयन्तः ।
प्राज्ञा यथोदितमिदं शुकवत्पठन्तः प्रच्छन्नबौद्धविजये परितोयतध्वं ॥३॥

प्रतिज्ञां स्पष्टमुद्घोषयन्त स्तत्साधकाना मपन्यायतया स्पष्टमुदीर यितुमशक्नुवन्तः " वशिकतटिनी वर्षारम्भ प्रवाह विडम्बकै रल-घुभि रपभ्रंश्य ड्रुम्भोपलम्भित डम्बरैः । उपकरणयन्त्येते बाला नुद-ग्रकुतूहला नुपल निकर ग्रास प्रायै रुपन्यसनक्रमैः " इतिन्यायेना ऽऽहो पुरुषिकया डिम्भान्प्रलोभ्य तेषां स्वान्ते ध्वान्तमुत्पादयन्ति । अनेन परदेवता स्तुत्यात्मकं प्रार्थनात्मकंच मंगळं कृतं भवति ॥१॥

वक्ष्यमाणार्थानां भगवद्भाष्यकाराभिमततया दुपादेयतमत्वं विषयंच दर्शयन् गुरुस्तुत्यात्मकं मंगळ माचरति (इद मिति) अमृतशब्देन स्वप्रतिपिपादयिषिता अर्था उच्यन्ते । चिरन्तनसरस्वती- वेदः, चिकु-राः – वेदान्ताः । चिकुराहि मालिन्येन जटीभूता अविविक्ता स्तिष्ठ-न्ति, वेदान्ताअपि परापादितमालिन्या अविविक्ताः स्थिताः, चि-कुरा स्सैरंन्ध्रिकाभि र्विविच्यन्ते, वेदान्ताअपि भगवदुक्तिभि र्भेदाभे-दघटकरूपेण तत्वहितपुरुषार्थ प्रतिपादनरूपेण स्वरूप गुणविभू-ति प्रतिपादनरूपेण तत्तदर्थ प्रतिपादनरूपेणच विविच्यन्ते । य-द्वा – सैरन्ध्रिका विप्रकीर्णा न्केशा नेकीकृत्य बध्नन्ति, भगवदुक्त यो प्यापाततो विरुद्धतया प्रतीयमानानि वेदान्तवाक्या न्येककण्ठी कृत्य ब्रह्मणि बध्नन्ति । अनेन कुदृष्टि निरसनार्थ भाष्यतात्पर्य विषया अर्था स्स्वग्रन्थस्य विषय इत्युक्तं भवति ॥ २ ॥

चिकीर्षितस्य प्रयोजनं दर्शयति (प्राचीमिति) परमतनिरसनं

वादाहवेषु निर्भेत्तुं वेदमार्गविदूषकान् ।
प्रयुज्यतांशरश्रेणी निशिता शतदूषणी ॥ ४ ॥

तत्र तावच्छास्त्रारम्भे—

विचारविषयत्वेन सूत्रकृचदसूत्रयत् ।
परोक्ता ब्रह्मशब्दस्य वृत्ति रत्र निरस्यते ॥

प्रयोजनं । मतान्तरनिरसनस्य तुल्यन्यायसाध्यतया ऽर्थज्ञानाधीनत्वेऽपि योगाचारछात्र निरसने ना र्थज्ञानापेक्षेत्यर्थः ॥ ३ ॥

ज्ञानवद्भिस्तु मतान्तरनिरसनमपि सुकरमेवे त्यभिप्रायेणाह (वादाहवेष्विति) बाह्या वेदवाक्यानि दूषयन्ति नत्विशि· ष्य, कुदृष्टयस्तु प्रतिवाक्यं दुरर्थकथनेन विशिष्य दूषयन्ती त्यभिप्रायेण वि शब्दप्रयोगः । यद्यप्येकैकस्मिन् वादे बहूनि दूषणा नि प्रतिपाद्यन्ते, तथापि निरसनीयैक्येन दूषणाना मैक्यं विवक्षितम् । तेन शतदूषणीत्युपपद्यते ॥ ४ ॥

(तत्रेति) तत्र – ग्रन्थे, तावत् - प्रथमवादे, इदं निरस्यत इत्यनेन सम्बध्यते । शास्त्रारम्भइत्येत दसूत्रय दित्यनेन । अयं प्राथम्ये हेतुः । (विचारविषयत्वेनेति) विचारो विषयो यस्य त- द्विचारविषयं । यदिति सूत्रं परामृश्यते । (असूत्रयदिति) सूत्रशब्दात्प्रा- तिपदिकात् तत्करोतीत्यस्मिन्नर्थे " प्रातिपदिकाद्धात्वर्थे " इति णि- चि यदसूत्रयदिति प्रयोगः पाकं पचतीतिवत् द्रष्टव्यः । यद्वा- य दसूत्रयत् । असूत्रयदितियत् - यत्सूत्रणमस्तीत्यर्थः । अत्र सूत्रणे । अथवा – यदसूत्रयदिति माणवकम्मुण्डयतीति वत् । यदिति पदजातं परामृश्यते । यत्पदजातं सूत्रत्वेनाकरोदित्यर्थः । अत्र –पदजाते । अथवा-विचारविषयत्वेनेति षष्ठीतत्पुरुषः, यदिति ब्रह्म , असूत्रय दिति - सूत्रेण प्रत्यपदाय दित्यर्थः , पर्यायेणातिक्रामति पर्याययति दात्रेण लुनाति दात्रयतीतिवत् प्रातिपदिका द्धात्वर्थे णिज्विधानात् । यद्वा-" सूत्रविमोचन " इति धातोर्वा चुरादि णि चयेतद्रूपं । अत्र प्र-

निर्विशेषब्रह्मवादे ब्रह्मशब्दस्य क्वचि न्मुख्यवृत्तित्वमस्तिनवा ।
न चेत् ; असाधुत्वापत्तिः ।

काशनं विवक्षितम् । अत्र - ब्रह्मणि । विचारविषयत्वेन यदसूत्र यदित्यनेन निर्विशेषब्रह्मणो जिज्ञास्यत्वस्य निरसिष्यमाणत्वा जिज्ञासाविषयोपस्थापनपरत्वात् ब्रह्मपदस्य न निर्विशेषब्रह्मलक्षणात्र युज्यत इति सूच्यते । परोक्तवृत्तिप्रद्वेषे निमित्तान्तरमाह (सूत्रकृदिति) परोक्तवृत्त्यंगीकारे " अथातो ब्रह्मजिज्ञासे " त्यारभ्य - " अनावृत्तिश्शब्दा दनावृत्तिश्शब्दात् " इत्यन्तं सूत्र मसंगतं स्यादिति भावः । निर्विशेषब्रह्मण स्स्वप्रकाशत्वेना भ्युपगमा दजिज्ञास्यत्वादाद्यं सूत्रमनुपपन्नं । अनवधारणत्वापरोक्षवृत्तिकल्पनादीनिच डिम्भप्रलोभनानि निरसिष्यन्ते । जिज्ञासाभावा न्निर्विशेषब्रह्मस्वरूपविरुद्ध सविशेष प्रतिपादना च्चोत्तरसूत्राणि व्यर्था न्यनुपपन्नानिच । " परं जैमिनिर्मुख्यत्वात् " इति सूत्रासांगत्यंच । तस्मादेवं सूत्रं कुर्वतः परोक्तवृत्ति र्नेष्टेति भावः । " शास्त्रारम्भ " इत्यनेन " प्रणवएव विस्वर " इति न्याय स्सूचितः ॥

(ब्रह्मशब्दस्य क्वचिदिति) ब्रह्मपदेन निर्वचनविरोध स्सूच्यते । शब्दपदेन प्रसंजनीयस्या साधुत्वस्यानिष्टत्वं द्योत्यते । " योहि शब्दान् जानाति अपशब्दानप्यसौ जानाति " " यथैवहि शब्दज्ञाने धर्मः ; एव मपशब्दज्ञाने ऽधर्मः " " एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः " " किंशब्दोपदेशः कर्तव्यः, अत्होस्वि दपशब्दोपदेशः " इत्यादौ शब्दशब्दस्य साधुशब्दे प्रयोगात् । (असाधुत्वापत्तिरिति) साधुत्वंहि शक्तिमूलकप्रयोगविषयत्वं , वृत्तिमत्वं वा , अन्यस्यानिर्वचनात् । न ताव दनादि प्रयोगविषयत्वं साधुत्वं, " तेसुरा हेलयोहेलयइति कुर्वन्तः पराबभूवुः " इत्यत्रा नुकार्ये अरिशब्दापभ्रंशे - अलिशब्दे गतत्वा त्तस्य सादित्वे वेदस्यानित्य संयोगप्रसंगात् । नापि यज्ञप्रयोगार्हत्वं , " साधुभिर्भाषितव्य " मिति साधुत्वस्यैव तन्निमित्तत्वात् । अतएव न धर्मजनकत्वम् , साधुत्वस्यैव तन्नि-

मित्तत्वात । अतएव न धर्मजनकतावच्छेदकरूपत्वं साधुत्वं , तद-वच्छेदकश्च घटविषयघटशब्दत्वादिकं , तदवगम श्चानुशासनादिति निरस्तं , घटशब्दः प्रयोक्तव्य इत्यादिरूपेण विधानस्या नन्त्येना स म्भवेन साधुत्वपुरस्कारेणैव विधानस्य वाच्यत्वात् । नापि व्याक रणव्युत्पाद्यत्वं , तत् किंविधेयत्वम्? साधुत्वेन प्रतिपाद्यमानत्वंवा? ना द्यः , प्रातिपदिकाना मसाधुत्वप्रसङ्गात् । नद्वितीयः , आत्माश्र-यात् । तस्मा च्छक्त्यभावे तन्मूलकप्रयोगाभावा त्तन्मूलकवृत्त्यन्त-राभावाच्च ब्रह्मशब्दस्य न साधुत्वम् । अनादिप्रयोगविषयत्वं य-ज्ञप्रयोगार्हत्वम् , अनाद्यनपभ्रष्टत्वं , व्याकरणव्युत्पाद्यत्वं वा साधुत्व मित्यभ्युपगमेपि शक्त्यभावे वृत्त्यन्तरस्या प्यभावेन प्रयोगस्यैवा सं-भवा त्तदसम्भवेन व्युत्पाद्यत्वासम्भवाच्च शक्तिशून्यस्या साधुत्वमे-व । किंच - मुख्यवृत्त्यभावे न साधुत्वसिद्धिः , अनुशासनापरिगृहीतत्वात् । तथाहि । " सिद्धे शब्दार्थसम्बन्ध " इत्यर्थसम्बन्धिनएव शब्दस्या नुशासनीयतया प्रतिज्ञानात् लक्षणायाश्च शब्दार्थसम्बन्ध त्वस्य तवा संप्रतिपत्तेः । अन्यथा " अप्राप्यमनसा सहे " तित्व-न्मते लक्षणाया अपि निषेधे वेदान्तानां मूकत्वप्रसंगात् , श-ब्दस्यार्थेन सह शक्ते रेव प्राप्तित्वादिति त्वया भिधानाच्च । लक्ष णाया स्सम्बन्धत्वेपि मुख्यवृत्त्यभावे न साधुत्वसिद्धिः । तथाहि " सि द्धे शब्दार्थसम्बन्ध " इत्यादिना शब्दार्थसम्बन्धानां नित्यत्वएवा नु शासनं प्रतिज्ञातम् । " सिद्धे शब्दे र्थे सम्बन्धे चेति , अथ सिद्धश-ब्दस्य कः पदार्थः? नित्यपर्यायवाची सिद्धशब्दः, ... तद्यथा " सि-द्धाद्यौः ... ' इति । ... अथवा - सन्त्येकपदा न्यप्यवधारणानि । तद्य था ' अब्भक्षो वायुभक्ष ' इत्यपएव भक्षयति वायुमेव भक्षयतीति... एवमिहापि सिद्धएव नसाध्य इति । अथवा पूर्वपदलोपोत्र द्रष्ट-व्यः । अत्यन्तसिद्ध स्सिद्धइति । तद्यथा ' देवदत्तोदत्तः ' ' स त्यभामाभामे ' ति " इति शब्दार्थतत्सम्बन्धविशेषणीभूतस्य सिद्धपद-स्य नित्यवाचित्वप्रतिपादनात् । तत्र किम् मुख्यस्सम्बन्धो मुख्यश्चा र्थो विवक्षितः , उता मुख्योपीति विमर्शे , सर्वत्र मुख्यार्थस्य तत्स-म्बन्धस्यच स्वरूपेण प्रवाहरूपेण वा नित्यत्वात , मंचाः क्रोशन्ती

त्यादौ मंचविशेषस्थपुरुषाणां तत्सम्बन्धस्यचा नित्यत्वदर्शनेन लाक्षणिकार्थ तत्सम्बन्धयो रतथात्वा न्मुख्य एवेति निश्चिन्वन्ति विपश्चितः । ननु स्यादेवं यदि प्रकरणादिना मुख्यार्थ विशेषोपस्थित्यनन्तरं तत्सम्बन्धिनि लक्षणा स्यात , नचैवम् , किन्तु शक्यतावच्छेदकावच्छिन्नमात्रोपस्थितौ सत्यां तत्सम्बन्धि नरसामान्येच लक्षणयोपस्थिते प्रकरणादिना लक्ष्यव्यक्तिविशेषलाभः , तस्मा ल्लाक्षणिकस्यापि प्रवाहरूपेण नित्यत्वमिति चेत् । न । अनन्तव्यक्तिषु लक्षणाकल्पनापेक्षया प्रकृतव्यक्तिविशेषएव लक्षणाकल्पने लाघवात । किंच – अपूर्वव्यक्तिलाभानुरोधेन शक्ते स्सामान्यतः कल्पनायामपि तात्पर्यानुसारेण कल्पनीयाया लक्षणाया स्तात्पर्यविषयीभूत व्यक्तिविशेषातिरिक्तविषयत्वकल्पने मानाभावात् । किंच मुख्ये ऽमुख्ये वा शब्दप्रत्याय्याकारेण प्रवाहानादिता वाच्या, अन्यथा प्रमेयत्वरूपेण प्रवाहनित्यताया स्सर्वत्र वक्तुं शक्यत्वात् । एवंच व्यक्तिविशेषमात्र नियताकारविशिष्ट लक्ष्यार्थविवक्षायां तत्पुरस्कारेण प्रवाहानादित्वं वक्तु मशक्यम् । किंच सामान्यत स्सर्वशक्तस्यापि यदृच्छाशब्दस्य पुरुषेच्छया व्यक्तिविशेषे संकुचितशक्ते स्तद्व्यक्तिमात्रो पस्थापकस्य तत्सम्बन्धिनि लक्षणया प्रवृत्तौ तद्व्यक्तिमात्रस्यैव लक्ष्यतया तत्रानित्यत्वं सिद्धमेव । ननु – अपभ्रंशानुकरणस्या साधुत्वं स्यात , तदर्थस्या पभ्रंशस्य सादित्वात , नचेष्टापत्तिः – कुमार्य्लृतकइत्याहेत्यादा वपभ्रंशानुकरणे साधुत्वसमर्थना दिति चेत ; न, कुमार्य्लृतकइत्याहेत्यत्र पदानुकरणाभावात । वर्णा एवहि तत्र क्रमेणा नुक्रियन्ते । एवंच भाष्ये प्रकृतिव दनुकरणं भवतीत्यपशब्दानुकरणस्यापशब्दत्व माशंक्या पशब्दत्वस्या ननुशिष्यत्वा न्नातिदेशइति पदानुकरणांगीकारेण परिहारः प्रौढवादेनेति बोध्यम् । नचैवं सति सर्वत्र वर्णानुकरणप्रसंगः, बाधकबलेन क्वचि त्पदानुकरणतया गमात्रेण तदभावेपि तत्त्यागस्यनिर्मूलत्वात् । यद्वा – अत्रानुक्रियमाणानुकरणयो रनादित्वमेव, भाष्यकारवचनप्रामाण्यात । शब्दार्थसंबन्धनित्यत्वस्या नुशासननिमित्ततां वदन्नेवहि भाष्यकारो लृतकशब्दानुकरणस्य साधुत्व माह । अतएवोक्तं कैयटे “ अशक्ति

जात्यनुकरणस्य जातिशब्दत्व मिच्छन्ति, यस्मा दनुक्रियमाणे श-ब्दे या जाति स्समवेता, तत्संबद्ध मनुकार्य मनुकरणं प्रत्याययती" ति । ननु " द्रव्यंहि नित्य " मित्यारभ्य " हिरण्यं कयाचि दाकृत्या युक्तं पिण्डो भवति, पिण्डाकृति मुपमृद्य रुचकाः क्रियन्ते, रुचकाकृति मुपमृद्य कटकाः क्रियन्ते, कटकाकृति मुपमृद्य स्वस्तिकाः क्रियन्ते, पुनरावृत्त स्सुवर्णपिण्डः खदिरांगारसवर्णे कुण्डले भवतः, आकृति रन्या चान्याच भवति, द्रव्यं पुनस्तदेव, आकृत्युपमर्देन द्रव्यमेवा वशिष्यत " इत्यादिना संस्थानस्या नित्यत्वेपि द्रव्यस्य स्वरूपतो नित्यत्वप्रतिपादना न्मतभेदेन तदपि नित्यत्व मनुशासन निमित्तं प्रतीयते, तथाच लाक्षणिकेपीदं नित्यत्वं नास्तीति कथं नानुशिष्यत इतिचे न्न; शब्दप्रयोगस्य तत्प्रयोगविषयस्यचा नादित्वे प्रकरणतात्पर्यात । उदाहृतभाष्येच गुणादा वुक्तनित्यत्वाभावा दुक्तयुक्तेश्च नैत न्नित्यत्व मनुशिष्यत्वनिमित्ततयोक्तम्, किन्तु प्रवृत्तिनिमित्तविशिष्ट तत्तद्व्यक्त्यविनाशित्वमेव नित्यत्वमितिन – किन्त्वन्यदपीति नित्यत्वप्रकारभेदमात्रनिदर्शनतयै त न्नित्यत्व मुक्तम् । अतः प्रवृत्तिनिमित्तविशिष्टस्य स्वरूपेण प्रवाहरूपेण वा नित्यत्व मनुशिष्यत्व निमित्तमिति । किंच " कंपुनः पदार्थं मत्वैषविग्रहः क्रियते, सिद्धे शब्देर्थे सम्बन्धेचेती " ति प्रश्नो मुख्यार्थस्यैवा नुशासननिमित्ततां साधयति । " सिद्धे शब्दार्थसम्बन्ध " इत्यत्रा नुशासननिमित्ततयोक्तोऽर्थो यदि मुख्योऽमुख्यश्च, तदा कंपदार्थ मितिव्यक्त्याकृत्यो रन्यतरव्यवस्थाविषयः प्रश्नो नोपपद्यते । अन्यतरस्य मुख्यार्थत्वे इतरस्य लक्ष्यार्थत्वेना क्षेप्यत्वेनवा उभयोर प्यर्थत्वात् । एवं व्यवस्थानुपपत्तेरेव "आकृतिमित्याह"त्युत्तरवाक्यं मतांतरावष्टंभेन । "द्रव्यएवपदार्थएषविग्रहोन्याय्य" इति वाक्यंच मुख्यार्थस्यैवानुशासननिमित्ततां साधयति । किंच " कंपदार्थ " मित्यत्र द्रव्यस्यैव पदार्थत्वा त्तस्यचा नित्यत्वा दर्थनित्यत्व न्नोपपद्यत इतिहि प्रष्टुरभिप्रायः । यदिचा मुख्यार्थो प्यनुशासननिमित्तस्स्या त्तदा द्रव्यार्थत्वे प्याकृतिलक्षणाया स्सम्भवेनार्थ नित्यत्वोपपत्तेः प्रश्नो नोपपन्नः । अतएव द्रव्यपदार्थकत्वे अर्थानित्यत्वासम्भवं मत्वा आकृत्यर्था

साधुत्वस्य मिथ्यात्व मभ्युपगच्छता मसाधुत्व मिष्टमितिचेत् ; हन्त तर्हि

वलम्बनेन "आकृतिमित्याह" इति परिहारश्चनोपपद्यते । एतेन मंचाः क्रोशन्तीत्यादौ लाक्षणिकार्थसम्बन्धस्या नित्यत्वेपि ब्रह्मणो नित्यत्वा त्तत्सम्बन्धस्यापि नित्यत्वात ब्रह्मशब्दस्य केवल लाक्षणिकत्वेप्यनुशासन मुपपद्यत एवेतिनिरस्तम् ; शब्दार्थसम्बन्धविभाजकोपाध्यवच्छेदेन सम्बन्धावच्छिन्नार्थ नित्यत्वस्य विवक्षितत्वात। अन्यथा अर्थनित्यत्वमात्रविवक्षायां द्रव्यानित्यत्वेना र्थानित्यत्वशंकानुपपत्तेः , द्रव्यार्थत्वे प्याकृति लक्षणाया स्सम्भवात् । भवतिच शक्यत्वावच्छेदेनैव तत्तद्बोध्यप्रकारेण नित्यत्वं, लक्ष्यार्थेतु नैवं, सम्बन्धविभाजकोपाधिभूतलक्षणात्वेन नित्यत्वानवच्छेदकत्वात्, मंचविशेषसम्बन्धि पुरुष विशेषस्या नित्यत्वेन तत्रापि लक्षणाया विद्यमानतयाऽतिप्रसक्तत्वात । नच-प्रश्नस्य कथं व्यवस्थाविषयता , अर्थमात्रस्य नित्यत्वाक्षेपसंभवा दितिवाच्यम् । "अथवा-किं न एतेन इदं नित्य मिदमनित्यमिति, यन्नित्यं, तंपदार्थ म्मत्वैष विग्रहः क्रियत" इत्युत्तरभाष्यस्वारस्यानुरोधेन प्रश्नस्य व्यवस्थाविषयत्वा वगमात् । किंच-त्रयी शब्दानां प्रवृत्तिः , जातिशब्दाः-गुणशब्दाः-क्रियाशब्दाः – न सन्ति यदृच्छा शब्दा इति पक्षे, चतुष्टयी शब्दानां प्रवृत्तिः, जातिशब्दाः-गुणशब्दाः क्रियाशब्दाः-यदृच्छाशब्दा श्चतुर्था इति पक्षेपि, ब्रह्मशब्दस्य कुत्रा प्यनंतर्भावा च्चानुशिष्यतासम्भवः । अपिच-"बृंहेरंच " त्यत्रोणादित्वेन संज्ञाधिकारात् ब्रह्मशब्दस्य संज्ञायामेवा नुशिष्टत्वात् केवल लाक्षणिकत्वेच संज्ञात्वाभावा दनुशासनं नस्यादिति । (साधुत्वस्येति) कृत्स्नमिथ्यात्वादितिभावः । व्यावहारिकमर्यादया कृत्स्नव्यवस्था मभ्युपगच्छत स्तव व्याहत मिदं वचनमित्याह (हन्तेति) शक्त्यभावात् ब्रह्म शब्दे साधुत्वस्य तुच्छत्वमेवा स्माभिरापादितं; मिथ्यात्वांगीकारमात्रेण ब्रह्मपदे साधुत्वस्य तुच्छत्वम प्यंगीकृत मिति यदिमन्यसे, तदा शब्दान्तरेपि तथैव स्यादिति व्यावहारिकव्यवस्थाभंग इतिभावः । यद्वा-

सर्वशब्दासाधुत्वम् । साध्वसाधुविवेकाभावेच कृतं साङ्गोपाङ्गैर्वेदैः । मुख्यार्थशून्यस्य तन्मूलवृत्त्यन्तरे लिंगत्वेचासम्भवति कथं क्वचि द्बोधकत्वमपि ।

किमयं मिथ्याशब्दो ऽनिर्वचनीयवचन उत तुच्छतावचन इति विकल्पमभिप्रेत्य आद्ये दोषमाह (हन्तेति) इदं सर्वेषामपि शब्दानां साधारणं, नचैत दस्माभि रापाद्यते, किन्तु शब्दान्तरेषु क्लृप्तप्रयोजकस्याभावा त्तुच्छत्वमेव ब्रह्मशब्दे साधुत्वस्या पाद्यते, नचात्रेष्टापत्त्या परिहारस्संभव इत्यर्थः । द्वितीय न्दूषयति (साध्वसाध्विति) यद्वा-प्रथमशिरसो दूषणं बहिरेवोक्त प्रकारेणानुसन्धेयं, द्वितीये दोषमाह (हन्तेत्यारभ्य वेदैरित्यन्तेन) (सर्वशब्दासाधुत्वमिति) साध्वसाधुविवेको नस्यादित्यर्थः । नचात्रेष्टापत्ति रित्याह (साध्वसाध्विति) साधुत्वप्रतिपादनार्थत्वात् व्याकरणस्य तत्तावत् व्यर्थंस्यात् , दृष्टप्रयोजनद्वारां गत्वेन संप्रतिपन्नस्य व्याकरणस्य तत्प्रयोजनानंगीकारे तुल्यन्यायतयां गान्तर प्रयोजनानाम प्यसिद्धौ तेषामपि व्यर्थता , तुल्यन्यायेनैव साध्वसाधु विवेकव त्प्रमाणाप्रमाणविवेकाभावा द्वेदस्यापि प्रमितिजनन लक्षणप्रयोजनाभावा द्वैयर्थ्यमेवेतिभावः । यद्वा-साध्वसाधुविवेकाभावे "एकश्शब्दः...स्सुष्टुप्रयुक्त स्स्वर्गेलोकेकामधुग्भवति" "आहिताग्नि रपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वती मिष्टि न्निर्वपेत्" "तेसुरा हेलयो हेलयइतिकुर्वन्तः पराबभूवुः तस्मात् ब्राह्मणेन नम्लेच्छितवै नापभाषित वैम्लेच्छोहवा एष यदपशब्द" इति साधुशब्दविधिः प्रायश्चित्तविधि-रपशब्द प्रयोगनिषेधो निन्दार्थवादाश्चा प्रमाणमिति वेदप्रामाण्यो पपादकापौरुषेयत्वादे स्तदंशे प्रामाण्यानुपपादकत्वे अन्यत्रापि तथेति-कृत्स्नवेदाप्रामाण्ये वेदस्य व्यर्थता, प्रमितिजनन लक्षणप्रयोजनाभावा दिति तदंगानामपि वैयर्थ्यमेवेति भावः । 'हेलयोहेलय' इतिच "हैहेप्रयोगेहैहयो" रितिविहितप्लुतस्य प्रकृतिभावस्य चाकरणा त्पदद्विर्वचनेकर्तव्ये वाक्यद्विर्वचनात रस्थाने लकाराच्चा पशब्दः । दूषणान्तरमाह (मुख्यार्थेति) तर्हि धूमादिव लिङ्गविधया बोधकत्वं स्यात कथ मबोधकत्व मित्यत्राह (लिंगत्वइति) व्याप्तिग्रहाद्यसम्भवादिति-

नच सांकेतिकोऽय मपभ्रंशोवा, येन वाचकत्वाभिमाना द्बोधकत्वं स्यात् । यस्यायमपभ्रंश श्शंक्येत, सोपि तथा वृत्ति विकल्पेन निर्भूयेत ।

ननु ब्रह्मशब्दस्याय म्माहिमा - यन्मुख्यार्थ विरहेपि नित्यं लक्षणया ब्रह्म बोधयतीति, तदिदं वन्ध्यायाः पौत्रदर्शनम् । मुख्यार्थ सम्बन्धि न्यमुख्यवृत्तिर्हि लक्षणा, तदभावेपि तद्वृत्ति भावानेवभाषेत ।

किंचैव म्मुख्यार्थ शून्या स्सर्वेशब्दा स्तं तमर्थं लक्षयन्तीति स्वीक्रियेत महामीमांसकेन । कोहि त्वदुक्तन्यायवि त्कुत्रापि शक्ति-क्लृतिगौरवं मृष्येत्, मुख्यार्थशून्येन ब्रह्मलक्ष्यमितिवदता तदपि

भावः । यद्वा- एतानिपदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि आकांक्षादिमत्पदकदम्बकत्वा दिति वैशेषिकाद्युक्तरीत्या लिंगविधया बोधकत्वं स्यादित्यत्राह (लिंगत्वइति) अयंभावः - वाक्यार्थरूपसंसर्गस्य तथा नुमाना त्सिद्धावपि न पदार्थभूत ब्रह्मण स्तथानुमानसम्भवः, सिद्धसाधनात्, ब्रह्मपदस्य वृत्त्यभावेन स्मारकत्वासिद्धे स्तत्रबाधः, अर्थाभावे तन्निबन्धनाकांक्षादे रभावा द्धेत्वसिद्धिश्चेति । (नचेति) अपौरुषेयत्वादितिभावः । (वाचकत्वाभिमानादिति) वाचकत्वभ्रमादित्यर्थः । यस्तु सांकेतिकत्व मपभ्रंशत्वं वा जानाति, तस्या क्षिनिकोचादिव त्सुचकस्सांकेतिकः, अपभ्रंशाच्चस्मृत स्साधुशब्दो बोधकइति भावः । (वृत्ति विकल्पेनेति) किम्मूलभूतश्शब्दो मुख्यः उतापभ्रंशः ? आद्ये ब्रह्मशब्देन कि मपराद्धम् । अवाच्यत्व वचन विरोधश्चोभयत्रतुल्यः । मूलमूलित्वयोर्वैपरीत्यापत्तिश्च । द्वितीये अनवस्थेतिभावः । (नन्विति) ब्रह्मशब्दस्या न्यत्रा मुख्यत्व स्मरणात् ब्रह्मणश्चा वाच्यत्व समर्थनाच्चेतिभावः । (भवानेवेति) प्रमाणपथविभ्रष्ट इतिभावः (किंचैवमिति) एवंसति-मुख्यवृत्तिविनापि क्वचि ल्लक्षणांगीकार इत्यर्थः । अविशेषादितिभावः । (महामीमांसकेनेति) त्वत्तो प्युत्कट मीमांसकाभिमानेन केनाचिदित्यर्थः । तदेवोपपादयति (कोहीति) ब्रह्मणो मुख्यार्थत्वं सिद्धवत्कृत्य मौढवादेनोपालभते (मुख्यार्थेति) मुख्यार्थस्य शून्यत्वोक्तेः

मुखान्तरेण संवृतिमुखे निक्षिप्तं । अवाच्यवादाश्च वाच्यंवादेन निरसिष्यन्ते । अस्तित्वे त्किं मन्यस्मि न्विचारविषयेवा, नाद्यः ; निर्निमित्तत्वे पुन रसाधुत्वापातात । यदृच्छाशब्दोपिहि स्वरूपनिमित्तक श्शास्त्रज्ञै शिक्षितः । नचायं सः ; मानाभावात , निरुक्तिविरोधाच्च । सनिमित्तत्वेच यः प्रकृत्यादि ष्वस्य प्रयोगः, स ब्रह्मगुणलेश योगा दौपचारिक इत्यभाषि, अनुवृत्तस्या कृति रूपस्य निमित्तस्यासिद्धेः, वृहत्वब्रह्मणत्वमात्रस्य वृहदादिशब्दव दति प्रसङ्गित्वात , अनेकशक्ति

प्रतीतिविषयत्वोक्तेश्चेतिभावः । यद्वा-मुख्यार्थाभावे तन्मूलवृत्त्यंतरस्या प्यभावेन बोधकत्वानुपपत्तेः ब्रह्मणो मुख्यत्वा भावोक्तौ प्रमा णाभावस्यैव पर्यवसानात् ब्रह्मण स्तुच्छत्वमेव समर्थितंस्या दित्याह (मुख्यार्थेति) (मुखान्तरेणेति) शब्दान्तरेणेत्यर्थः । महिमकल्पनंनिरस्यति (अवाच्येति) " अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः" इति वचनं स्मार्यते । अत्रचा वाच्य वादाः-गर्हावाक्यानि, तेन परब्रह्मणि द्वेषादेवा वाच्यमित्यादि गर्हारूपाः प्रलापाः कृता इति ध्वनितं । (निर्निमित्तत्वइति) निमित्तंविना मुख्यवृत्त्ययोगादिति भावः । यदृच्छाशब्दस्य निर्निमित्तत्वाभ्युपगमे प्यस्य तद्बहिर्भावा न्न निर्निमित्तत्वसंभवइत्याह (नचायमिति) (मानाभावादिति) तथा व्यवहाराभावादित्यर्थः । (निरुक्तिविरोधाच्चेति) अपौरुषेयत्व विरोधादिति चकारस्यभावः , पुरुषसंकेताधीन शक्त्यवच्छेदाभावात् । (ब्रह्मगुणलेशयोगादिति) तथाच निमित्ततयोक्त बृहत्व बृंहणत्वे तत्र नस्त इतिभावः (अभाषीति) अतो ऽसंभवो दोषइति शेषः । प्रकृत्यादौ ब्रह्मशब्दस्य गौणत्वस्य भाषितत्वात ब्रह्मणो न्यत्र सनिमित्तत्वपक्षे असंभव एव दोषइत्यर्थः । गौणत्वेहेतुमाह (अनुवृत्तस्येत्यादि) (बृहदादिशब्दवदिति) सप्तम्यन्तात् " तत्र तस्येवे " तिवतिः । बृहत्वबृंहणत्वे बृहदादिशब्देष्विव ब्रह्मशब्देपि ब्रह्मव्यतिरिक्तेपि प्रयोग मापादयतइत्यर्थः । आदिशब्देन बृंहकादिशब्दपरि-

कल्पने गौरवात् , लोकोत्तरबृहत्वादिमात्रस्यतु भगवच्छब्दनया दुपचार द्वारत्वात्। अन्यथा गौणवृत्तिर्लुप्येत। "यत्साक्षादपरोक्षाद्ब्रह्मे" ति विशेषणंचान्यत्रामुख्यतां व्यनक्ति। "तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तोमहामुने" इतिचस्मर्यते। "द्वेब्रह्मणी वेदितव्ये" इत्यादिकमपि "त्रीणि-

---

ग्रहः। यद्वा-तृतीयान्तात् "तेन तुल्यं क्रियाचेद्वति" रिति वतिः। बृहदादिशब्दो यथा तिप्रसक्तः - एवं बृहत्वब्रह्मणत्वयोर प्यतिप्रसक्तत्वा दित्यर्थः। अतिप्रसंगविषयनिर्देशार्थं बृहदादिशब्दवदि त्युक्तम्। बृहदादिशब्दो येषु प्रयुज्यते - तेषु बृहत्त्वादिक मतिप्रसक्त मित्यर्थः। (भगवच्छब्दनयादिति) आचार्यै र्हि "उत्पत्तिं प्रळयंचैव भूताना मागतिं गतिम्। वेत्ति विद्या मविद्यांच स वाच्यो भगवानिती" त्यादिना अलौकिकार्थसाक्षात्कर्तृत्वमेव भगवच्छब्दप्रवृत्तिनिमित्तमित्याशंक्य समाधिपर्यन्तयोगकाष्ठानिष्ठ केशिध्वज खाण्डिक्यादिभ्यः प्रयोगाविषयेभ्यो व्यावृत्तत्वाभावा त्तदुपचार द्वारमात्र न्नप्रवृत्तिनिमित्त मित्यनुगृहीतम्। तन्न्यायेनात्रापि ब्रह्मशब्दप्रयोग विषयाकाशादिष्वपि लोकोत्तरबृहत्वस्य सत्वेन न प्रवृत्तिनिमित्तत्वं, किन्तूपचारद्वारत्वमेवेतिभावः। अनुवृत्तस्येत्यादिहेतूना मभाषीत्यनेनान्वयः। एतत्सर्वमभिप्रेत्याभाषीतिभावः (अन्यथेति) न्यायमतिलंघ्यापि शक्तिकल्पने। (यत्साक्षादिति) "ब्रह्मशब्दस्य परमात्मासाधारणत्वेपि प्रत्यगात्मन्यपि कदाचि दुपचरित प्रयोगदर्शना त्तद्व्यावृत्त्या परमात्मप्रतिपत्त्यर्थं 'यत्साक्षात् ब्रह्मे' ति विशेषणंक्रियत" इतिभाष्येण साक्षात्पदस्य मुख्यार्थतावगमादितिभावः। ननु "द्वेब्रह्मणी" इति परमात्मा त्मनो र्ब्रह्मशब्दप्रयोगा द्युगपत् वृत्तिद्वयासम्भवा त्सर्वत्रैकप्रवृत्तिनिमित्तपुरस्कारेण मुख्यवृत्ति रेष्टव्येत्यत्राह (द्वेब्रह्मणी इति) "गामश्वंब्राह्मणंचैवे" ति त्रीणी त्यादेः पूर्वःखण्डः। आत्मत्वब्रह्मशब्दप्रयोगविषयत्वादिना गौणवृत्त्यैवोभयमुपस्थाप्यत इति भावः। ननु कथं वृत्तिद्वयविरोधः, "सरूपाणामेकशेष एकविभक्तौ"

वित्यत्र तत्समावेशप्रतीतेः , तथाहि – " सरूपाणा " मित्यत्र सरूपत्वंहि समानरूपत्वं, तत्र ' समानानामित्येवास्तु , किंरूपग्रहणेने ' त्याशंक्य (१) " अक्रियमाणे रूपग्रहणे यत्र सर्वं समानं शब्दोऽर्थश्च , तत्रैवस्यात् वृक्षौ वृक्षा इति , इहनस्यात् - यत्र शब्द स्समानो नार्थः , अक्षाः पादा माषाइति , क्रियमाणेपुना रूपग्रहणे यत्र रूपं समानं तत्र सर्वत्र स्यात वृक्षा वक्षाविती " त्युक्तम् , एवंच - अक्षा वित्यत्र श्लिष्टेन वृत्तार्थाभिधानं शक्त्यन्तरेणैव वाच्यम् , य द्यक्षपदप्रयोगविषयत्वादिना लक्षणया ऽभिधानं स्या त्तदा एकार्थत्वादेवै कशेष स्सिद्धइति नार्थो रूपग्रहणेन , अतो नवृत्तिद्वयविरोधइति । मैवं – इन्द्रियत्वविभीतकत्व प्रवृत्तिनिमित्तपुरस्कारेण प्रवृत्ता क्षपदद्वय द्वंद्व निवृत्त्यर्थतया एकशेषविधानोपपत्तेः । अथवा - अस्तु शक्तिद्वयसमुच्चयः , नैतावता विळम्बिताविळम्बितवृत्तिद्वयसमुच्चयः , अतएव " पितामात्रे " त्यादिकं प्रत्याख्यातं । तत्रहि लाक्षणिके नैकेनैव प्रवृत्तिनिमित्तेना र्थद्वयबोधन मुपपाद्य विशेषप्रतीतेः प्रकरणादिना ऽन्यथासिद्धि मुक्त्वा प्रत्याख्यानं कृतं । एवं भिन्नार्थ विरूपैकशेषप्रत्याख्याना द्भिन्नार्थसरूपैकशेषविधानार्थस्य रूपग्रहणस्या प्रत्याख्यानाच्च उभयशक्ते न लक्षणा - गौरवात् , शक्याशक्ययो श्शक्तिलक्षणाभ्यां बोधने विळम्बिताविळम्बितवृत्तिद्वय विरोधा दृशक्योपस्थापनाय लक्षणाया आवश्यकत्वे सति तयैवा र्थद्वयबोधनोप-

---

(१) यद्यपी दानीन्तन मुद्रितमहाभाष्यपुस्तके – " रूपग्रहणं किमर्थम् , समानानामेकशेष एकविभक्ताविती यत्युच्यमाने यत्रैव सर्वं समानं शब्दोर्थश्च तत्रैवस्यात् – वृक्षाः प्लक्षा इति, इहनस्या दक्षा पादा माषाइति, रूपग्रहणेपुनः क्रियमाणे न दोषो भवति , रूपंनिमित्तत्वेनाश्रियिते, श्रुतौचरूपग्रहणम् " इत्येतादृशी भाष्यपङ्क्ति र्दृश्यते । तथापि नात्र भाष्यपङ्क्तेरवा नुवादः । किन्तु तदर्थानुवादएवेति नदोषः । यद्वा – एतद्ग्रन्थरचनसमये तादृशएवपाठ आसीत् , ततश्च देशकालयो र्भेदा त्पाठभेदो जातइति नदोषइति ज्ञेयम् ॥

तेजांसि नस्पृशेत् " इत्यादिव न्मुख्यामुख्यसमुच्चयाभिप्रायं । नद्वितीयः; शुद्धोपहिताविकल्पासहत्वात ; नहि निर्विशेषतयाभिमतेशुद्धे " बृहतिबृ-ह्मयती " ति श्रत्युक्तानिमित्तमस्ति । अधिष्ठानत्वेन सर्वविवर्तमूलतया च तत्स्यादितिचेन्न; तत्र तदुभया नभ्युपगमात् ;

पत्तौ शक्तेरपि व्यापारकल्पनायां गौरवाच्च शक्याशक्ययो रेकेनैव निमित्तेन लक्षणे त्यवगम्यते। अतो विजातीयवृत्तिद्वयविरोधएव । ननु , कथ मप्रत्याख्यानं, प्रत्याख्यातंहि " सरूपाणा " मितिसूत्रं। किंतेन। नहि रूपग्रहणमात्रं प्रत्याख्यातं - किन्तु सूत्रमेव। अत स्सू-त्रस्थापनपक्षे व्यर्थस्य " पितामात्रे " त्यादेः प्रत्याख्याना द्रूपग्रहण स्या प्रत्याख्यानाच्च नोक्तार्थस्य विरोधः । प्रत्याख्यानेपि ' अभिधानम् पुन स्स्वाभाविक ' मिति यत् प्रत्याख्यानं तस्मिन् पक्षेपि नोक्तविरोधः । यच्चाकृतिपक्षाश्रयणेन प्रत्याख्यानं ' व्यर्थेषुच सामान्या त्सिद्धं अक्षोतेरक्षः पद्यतः पाद ' इति - तत्र शक्तिद्वयस्य समावेशा भावसिद्धावपि विळम्बिताविळम्बितवृत्तिद्वय समावेशाभावोक्ते र्न- विरोध स्सिध्यतीति । (शुद्धेति) किं स्वरूपातिरिक्त प्रवृत्तिनिमि-त्ताविशिष्ट मुत तद्विशिष्टमिति बिकल्पोऽभिप्रेतः । प्रथमकोटिं विवृण्व न्नेव दूषयति (नहीति) शुद्धइत्येतद्विवरणं (निर्विशेषतया भि मतइति) स्वरूपातिरिक्त प्रवृत्तिनिमित्ताविशिष्टतया भिमतइत्यर्थः । प्रवृत्तिनिमित्तमपिहि वाच्यमेव , ततश्च स्वरूपस्यैव वाच्यत्वपक्षे श्रु त्युक्तप्रवृत्तिनिमित्तस्य स्वरूपान्तर्गतत्वाभावे वाच्यत्वाभावेन प्रवृ-त्तिनिमित्तत्वमेव नस्यादिति स्वरूपान्तर्गतत्वं वाच्यं, तच्च नास्ती त्यर्थः । शुद्धे निमित्त न्नास्तीति - शुद्धे स्वरूपे निमित्तं नान्तर्गत-मित्यर्थः । अधिष्ठानत्वसर्वविवर्तमूलत्वे एव बृहत्वबृह्मणत्वे , ते च स्वरूपान्तर्गते एवेति शङ्कते (अधिष्ठानत्वेनेति) अधिष्ठानत्वं-भ्रमधर्मित्वं , विवर्तमूलत्वं - विवर्तोपादानत्वं , अधिष्ठानत्वेन सर्वता दात्म्या त्तदेव बृहत्त्वं, सर्वविवर्तमूलत्वस्य भूतभौतिकरूपेणा विद्या विस्तारयितृत्वरूपत्वा त्तदेव बृह्मणत्व मित्यर्थः। (तत्रेति) तयो

अन्यथा मुक्तावपि तद्योगात् मुक्तेरेवमुक्तेः ।

उपलक्षणार्थं निर्वचनमितिचेन्न; विशेषणार्थत्वे बाधाभावात्, 'तस्मादुच्यते परं ब्रह्मे' ति प्रवृत्तिनिमित्ततयैव बृहत्त्वादिश्रुतेः, "बृहत्त्वाद्ब्रह्मणत्वाच्च तद्ब्रह्मेत्यभिधीयत" इतिस्मृतेश्च, "गोत्वाभिसम्बन्धाद्गौ" रितिवत् ।

अस्तु व्यावहारिकं तद्वैशिष्ट्यं; कथन्तर्हिशुद्धेवृत्तिः । तदपि तद्द्वारा गम्यत इतिचेत्; तर्हि त न्न मुख्यम् । उपहितम्मुख्यमितिपक्षस्तु श्रुतिसिद्ध-स्वाभाविक सार्वज्ञ्याद्युपहितत्वविवक्षायां स्वमतविरोधा दपास्तः । स्वाभिमताज्ञानादिदोषोपहितत्वं त्वनाक्ष मलैंग मश्रौत मस्मार्त मसौत्रंचेति स्थाप

स्स्वरूपान्तर्गतत्वा नभ्युपगमा दित्यर्थः। (अन्यथेति) तयो स्स्वरूपान्तर्गतत्व इत्यर्थः । (मुक्तावपीति) स्वरूपस्या नपाया दिति भावः । सर्वतादात्म्यस्य स्वरूपत्वे तस्य मुक्ता वनपाया त्तस्यच सर्वविनानुपपत्तेश्च मुक्तावपि सर्वं स्यात्, सर्वविवर्तमूलत्वस्य स्वरूपत्वेतस्य मुक्तावपि सत्त्वात मुक्तौ सर्वस्यात् । ननु - न प्रवृत्तिनिमित्तप्रदर्शनार्थं निर्वचनम्, किन्तु वाच्योपलक्षकधर्मप्रदर्शनार्थं, गोसदृशोगवय इति गवयत्वप्रवृत्तिनिमित्तक गवयशब्दवाच्योपलक्षक गोसादृश्यप्रतिपादकवाक्यव दिति शंकते (उपलक्षणार्थमिति) अस्तु- तर्हि प्रवत्तिनिमित्त प्रदर्शनमेव, तच्च स्वरूपाद्भिन्नमेव, नचैवं सद्वितीयत्वप्रसंगः; तस्य व्यावहारिकत्वादिति गूढाभिसन्धि श्शंकते (अस्तिवति) दूषयति (कथन्तर्हीति) स्वरूपातिरिक्त प्रवृत्तिनिमित्ताविशिष्ट स्वरूपमात्रपरत्वं न सिध्यतीत्यर्थः । अभिसन्धिमुद्घाटयन् शंकते- (तदपीति) प्रथमं प्रवृत्तिनिमित्तविशिष्टरूपेणो पस्थापितंस त्पश्चात्स्वरूपेणोपस्थाप्यतइत्यर्थः । (तर्हीति) लाक्षणिकत्वमेव स्यादितिभावः । स्वरूपातिरिक्त प्रवृत्तिनिमित्ताविशिष्टमेव मुख्यमिति द्वितीयं कल्प मनूद्य दूषयति (उपहितमिति) सत्यसार्वज्ञ्या द्युपहितं मुख्यार्थः, उत मिथ्याभूता विद्या तत्कार्योपहितं, इति विकल्प मभिप्रेत्य प्रथमं शिरो दूषयति (श्रुतीति) द्वितीय न्दूषयति (स्वाभिमतेति) यद्वा- शुद्धोपहितेत्यत्र किं चैतन्यमात्रं मुख्यार्थः, उत बिम्बभूतमिति वि-

कल्पो विवक्षितः । आद्यन्दूषयति (नहीति) निर्विशेषत्वा न्न-चैतन्ये निमित्त मस्तीत्यर्थः । व्यावहारिकधर्मा अपि बिम्ब प्रतिबिम्बयो-रेवेति भावः। सार्वज्ञ्यादे श्चैतन्यमात्रे ऽभावे प्यधिष्ठानत्व विवर्त मूलत्वे तत्रैव स्यातां , ते एव बृहत्वब्रह्मणत्वे इति शंकते (अधि ष्ठानत्वेनेति) अधिष्ठानत्वं विवर्तोपादानत्वंच बिम्बस्थानीय ब्रह्मण एवेति येषाम्मतं - तान्प्रत्याह (तत्रेति) येतु चैतन्यमात्रएवा धिष्ठान त्व सर्वविवर्तमूलत्वे इच्छन्ति - तान्प्रत्याह । (अन्यथेति) व्याव-हारिकस्यैव प्रवृत्तिनिमित्तत्वे प्रातिभासिकस्य रजतादिपदवाच्यत्वाभा-वापत्तेः, सत्तादिविशेषमनपेक्ष्य धर्ममात्रस्य प्रवृत्तिनिमित्तत्वे प्राति भासिकपीतत्वाश्रय शंखादेः पीतादिपदवाच्यतापत्तेश्च , धर्मिस-मानसत्ताकस्यैव प्रवृत्तिनिमित्तत्वा द्धर्मिणश्च पारमार्थिकतया तयो रपि पारमार्थिकत्वे ज्ञाना न्निवृत्त्यसम्भवेन ब्रह्मव्यतिरिक्त कृत्स्ननि-वृत्तिरूप मुक्ति र्नस्यादित्यर्थः । नन्वस्तु व्यावहारिकमेव सार्व-ज्ञ्यादिकं प्रवृत्तिनिमित्तं , तस्यच ज्ञाना न्निवृत्तिसम्भवा न्न मुक्तेर्मुक्ति रिति गूढाभिसन्धि श्शंकते (अस्त्विति) दूषयति (कथमिति) धर्मिसमानसत्ताकस्यैव प्रवृत्तिनिमित्तत्वा त्प्रवृत्तिनिमित्तस्यच मि-थ्यात्वे पारमार्थिकस्वरूपगतत्वं न स्यादिति न स्वरूपस्य मुख्यते त्यर्थः । अभिसन्धि मुद्घाटयति (तदपीति) शुद्धम प्यशुद्धान्तर्भा-वा दशुद्धे प्रतीयमाने प्रतीयत इत्यर्थः । (तर्हीति) नायं केवल शुद्ध मुख्यवृत्तिपक्षइत्यर्थः । तदपीत्यादेः पूर्ववदेवार्थः । यद्वा - मुक्तावपी त्यत्र सत्यत्वसाधनं न विवक्षितं , किन्तु - सत्यत्वाभिमानमात्रं , स-म्भवतिहि यावन्मिथ्यात्वोक्ति सत्यत्वाभिमानः , एवंचोत्तरत्र न-गूढाभिसन्धिता । बिम्बत्वोपहितं मुख्यमिति द्वितीयं पक्षं दूषयति (उपहितमिति) किं न्तद्बिम्बस्थानीयं ब्रह्म सत्यप्रवृत्तिनिमित्त विशिष्टं ! उत मिथ्याभूत प्रवृत्तिनिमित्त विशिष्टं ! इति विकल्पमभिप्रे-त्याद्यं दूषयति (श्रुतीति) द्वितीयं दूषयति (स्वाभिमतेति) यद्वा - स्वरूपमेव मुख्य मुताविद्योपहितमिति विकल्पार्थः । शेषं द्वितीय व्याख्यानवदेव । यद्वा - अनुपहित म्मुख्य मुत यत्किंचिदुपहितमिति

यिष्यते । तत्रच्च शुद्धे परे ब्रह्मणि निर्दोषभव्यगुणविशिष्टविषयभगवच्छब्द-मुख्यवृत्तिनिरुक्तिविरोधः , " परंब्रह्म परन्धाम पवित्रंपरमम्भवा " नितिस्तुत्यनुपपत्तिः । पवित्रंपरममित्यादि समभिव्याहार वैयर्थ्यंच । निर्विशेषलक्षणायांतु स्तुति र्नकथंचिदपि सम्भवति; गुण्यवच्छिन्न गुणाभिधानरूपत्वा त्तस्याइति । पूर्वापरादिविसंवादाच्च न कुत्रापि निर्गुणसिद्धिः ।

विकल्पार्थः । अज्ञानादी त्यादि पदेन तत्कार्यं विवक्षितं । अविद्याद्युपहितं मुख्यमिति द्वितीयपक्षे दोषान्तरमाह (तत्रचेति) तत्र - अज्ञानादिदोषोपहितत्वे , ब्रह्मशब्दमुख्यार्थो न दोषोपहितः – 'शुद्ध' इति त मर्थं मनूद्य तत्र निर्दोषत्वपुरस्कारेण भगवच्छब्द निर्वचन विरोधात , नच ब्रह्मपदलक्ष्ये तन्निर्वचनम् , गुणविशिष्टविषयत्वा- त्तस्य , भगवच्छब्दस्यापि तत्र मुख्यत्वायोगाच्चेति भावः । (परंब्रह्मेति) नहि दोषवैशिष्ट्याभिधानं स्तुतिः , प्रत्युत निन्दैवेति भावः । (पवित्रमिति) दोषोपहितस्या पवित्रत्वा दिति भावः । ' परं ब्रह्मे ' त्यत्र - ब्रह्मपदेन शुद्धं लक्ष्यत इत्यत्राह (निर्विशेषेति) (कथंचिदिति) दोषाभावाभिधानादपि न स्तुतिः · स्वरूपमात्रपरत्वा देवेत्यर्थः । (गुणाभिधानेति) निर्दोषत्वमपि गुणान्तर्भूतम् , किंच - मुख्यार्था नुपपत्त्यभावा न्न लक्षणा । ननु निर्गुणत्वस्य श्रुतिस्मृति सूत्रैः प्रतिपन्नत्वा द्गुणानां मिथ्यात्वेन हेयत्वा त्तद्वैशिष्ट्याभिधाने निन्दैवेति मुख्यार्थानुपपत्त्या लक्षणायुज्यत इतिचे त्तत्राह (पूर्वेति) चेति प्रमाणान्तर विसंवाद न्यायोपेत स्वपदविरोधौ समुच्चीयेते । यद्वा · दोषाभावमुखेनापि लोकवेदयोः स्तुतिदर्शनात " यदाह्येवैष - एतस्मिन्नुदरमन्तरं कुरुते , अथ तस्य भयं भवति " इत्यादिभि र्भेददर्शनस्य दोषत्वावगमात् निर्गुणवाक्यै स्तद्बुभुत्सोर्यस्य स्वरूपेऽ वगमा द्भवान्ब्रह्मेति सामानाधिकरण्येन तादृशस्वरूपेणो पहितस्या भेदबोधना द्दोषाभावस्यात्र कण्ठरवेण प्रतिपादनेपि निर्गुणवाक्ये निर्दोषतया प्रसिद्धस्वरूपैक्य बोधमात्रेणापि गुणाबोधनेपि · प्रसिद्धगुणक सम्राडभेदबोधनेनेव स्तुत्युपपत्तौ रुपहितैक्य बोधनस्यबाधेन भवानित्यस्यापि लक्षणया स्वरूपपरत्वेपि तस्यो पहितसम्बन्धस्य शब्दादर्थाद्वा

अपिच-अविद्यानिवृत्त्यर्थ मिहज्ञातव्य मुपहितं निरुपाधिकंवा; आद्ये तत्त्वावेदक तटस्थस्वरूपलक्षणादिभि रपि तद्ब्रह्म दविशिष्ट ब्रह्मणि वृत्त्यसिद्ध्यास्म दिष्टसिद्धिस्स्यात । स्याच्चातत्त्वज्ञानादेव मोक्षसिद्धिः , तस्य मिथ्यात्वेनैव-युष्माभिरंगीकारात् । द्वितीये त्वतद्वृत्पन्नेन तदुक्तयोग एव । तल्लक्षितं तज्जिज्ञास्यते लक्ष्यते शोध्यतेचेतिचेत्; ततएव निर्विशेषलक्षकब्रह्म-शब्दात् ज्ञातत्व लक्षितत्व शोधितत्व सिद्ध्या जिज्ञासा द्यनेपक्षा स्यात् ।

प्रतीत्या मुखादिप्रतीकस्तुत्या ऽ वयविस्तुतिवत् अष्टाकपालादिस्तुत्या द्वादशकपाल स्तुतिवच्चो पहितस्तुतिसिद्धेश्च निर्विशेषलक्षणयापि - स्तुति नंविरुद्ध्यतइति तत्राह (पूर्वेति) एवमपि न स्तुतिसिद्धिः - ब्रह्माभेदमात्रस्य सर्वचेतनसाधारणत्वा दित्यपि भावः । यद्वा – निर्विशेषस्वरूपस्यैवा सिद्धे नं तल्लक्षणे त्यभिप्रायेणाह (पूर्वेति) ...

एवमेतावता मुख्यवृत्त्यभावा त्र लक्षणेति लक्षकत्वाभिमत शब्द-स्वरूप पर्यालोचनया निर्विशेषलक्षणा निरस्ता , इदानीं लक्ष्यत्वाभिमत जिज्ञास्यस्वरूप पर्यालोचनयापि निर्विशेष लक्षणां निराकरोति - (अपि चेति) लक्षणेति वाक्यपरं , प्रथमसूत्रस्थ ब्रह्मशब्देनापीत्यर्थः । उपहितस्य ज्ञेयत्वेन तस्य जिज्ञास्यत्वे जिज्ञासात्मक लक्षणादिलक्षणानां तदारम्भप्रतिपादक प्रथमसूत्रस्यचोपहितपरत्वेन न ब्रह्मशब्दे लक्षणा श्रयणीया । तत्त्वावेदकाना मुपहित परत्वां गीकारे ऽ प-सिद्धान्त इति द्योतयति (तत्त्वावेदके ति) (अत द्वृत्पन्नेनेति) ब्रह्मणो न्यत्र मुख्यवृ त्त्यसम्भवस्यो क्तत्वेन - ब्रह्मबोधकस्य तच्छक्तत्वमेव वक्तव्य मितिभावः । एवंच प्रतिज्ञालक्ष-णशोधनानि न सम्भवन्तीति तात्पर्यम् । अत्र ततो न्यत्रा मुख्यस्य तद्बोधकत्वम् तन्मुख्यवृत्त्यैवेति नियमो विवक्षितः। अन्यत्रामुख्यत्वेप्युपहिते मुख्येन तत्संबन्धा दनुपहितं लक्ष्यता मिति शंकते (तल्लक्षित-मिति) (जिज्ञास्यतइति) जिज्ञास्यतया प्रतिज्ञायते । लक्ष्यते. " जन्माद्यस्ययत " इति । शोध्यंत - उत्तर सूत्रैः । (ज्ञातत्वेति) ज्ञातत्वपदंनिर्णयपरं , तस्य सिद्धत्वा लक्षणशोधनेऽपि सिद्धप्राये । एवंच लक्षणशोधनाभ्यां साध्यस्य निर्णयस्य ब्रह्मपदादेव सिद्ध्या प्रतिज्ञालक्षणशोधनानां वैयर्थ्यमेवेत्यर्थः । विलीनविलापनन्यायमाशं-

नच जिज्ञासादौविधिः, अदृष्टार्थत्वाभावात्; येनपिष्टपेषणंसहेम। निरुपाधिके ब्रह्मशब्दवृत्तिमविदुषः प्रतिबोधनेन सर्वं सार्थमितिचेत्; किम्मुख्याममुख्यांवा। पूर्वत्र प्रस्तुतव्याघातः, सर्वस्योपहित मुख्यवृत्ति विषयबोधनोप

क्याह (नचेति) जिज्ञासादौ - सूत्रकारस्य जिज्ञास्यत्वप्रतिज्ञायाम्, श्रोतुर्विचारेच । नविधिरित्यर्थः । ननु शास्त्रस्य श्रवणात्मकत्वे मननात्मकत्वेवा "श्रोतव्योमन्तव्य" इतिविधाना त्तदर्थत्वाच्च प्रतिज्ञायाः कृत्स्नं शास्त्रं सार्थकमेवेत्यत्राह (अदृष्टार्थत्वाभावादिति) त्वयापिहि श्रवणादे र्दृष्टद्वारत्वमेवेष्यते, नतु केवलादृष्टद्वारत्वमित्यर्थः । यद्वा (अतद्व्युत्पन्नेनेति) ततश्च सामान्यतोपि ज्ञानाभावा त्तज्ज्ञानेच्छालक्षणशोधनानि न सम्भवन्तीत्यर्थः। (जिज्ञास्यतइति) ज्ञातुमिष्यतइत्येवार्थः । "लक्ष्यतेशोध्यत" इत्येत च्छ्रुत्यादिसाधारणं। जिज्ञासाद्यनपेक्षास्यादित्यत्रापि जिज्ञासापदं ज्ञानेच्छापरमेव, जिज्ञासादिविषयि ण्यपेक्षाप्रत्याशा तव नोपपद्यतइत्यर्थः । विध्यभावे हेतुमाह (अदृष्टार्थत्वाभावादिति) विषयवैलक्षण्याधीनाया इच्छाया विध्ययोग्यत्वंच विवक्षितं । येन-विधिना। (सहेमेति) अनुदात्तेत आत्मनेपदविधानस्य चक्षिङो ऽनुदात्तत्वेपि ङित्करणेना नित्यत्वज्ञापना त्परस्मैपदम्। यद्वा- "आधृषाद्वे" ति विकल्पितणिच स्सहे रेतद्रूपं, सहिसहिः परस्मैपदी । निर्विशेषलक्षक ब्रह्मशब्दा ज्ज्ञातत्वसिद्ध्या जिज्ञासाद्यनपेक्षास्या दित्यत्र शंकते। (निरुपाधिकइति) निरुपाधिक इत्येत त्सार्थमित्यनेन सम्बध्यते, ब्रह्मशब्दवृत्ति मविदुषः प्रतिबोधनेन . निरुपाधिक एव विषये लक्षणशोधनात्मकं शास्त्रं सार्थमित्यर्थः । विषयभेदमनादृत्य ब्रह्मशब्दमात्रे वृत्तिविकल्पयति (किमिति) (पूर्वत्रेति) मुख्यवृत्त्याबोधनस्यो त्तरशास्त्रसार्थक्यार्थता शास्त्रस्य मुख्यवृत्तिविषयगोचरत्व एवस्यात्, मुख्यवृत्तिविषयश्चो पहित एवेति शास्त्रस्य तद्बोधनोपक्षीणत्वेना नुपहितस्या जिज्ञास्यत्वा न्निरुपाधिके सर्वं सार्थमित्यस्य व्याघातइत्यर्थः, अनुपहिते मुख्यवृत्त्यङ्गीकारेण सार्थक्यापादनं न सम्भवति, अपसिद्धांतादित्याह (अनुपहितइति) यद्वा - कथं व्याघातः किंच प्रस्तुतमित्यत्राह (सर्वस्येति) शास्त्रस्यो पहितविषयत्वेना नुपहितस्या जिज्ञास्यत्वा न्न

क्षीणत्वात्, अनुपहिते हि लक्षणामेव वदसि, अभिधानांगीकारेवा किं-सार्वज्ञ्यादि विशिष्टपरब्रह्माभिधान प्रद्वेषेण। उत्तरत्र "अधीहि" त्यादि-वैयर्थ्यं; ब्रह्मशब्दस्य मुख्यार्थमधीहीत्युक्ते लक्ष्यार्थ लक्षणोपदेशस्यासंगतेः। लक्ष्यार्थ मधीहीतितु निरुत्थानम्, कारणाभावात्; मुख्यार्थबाधादि निश्च-यपूर्वकत्वा दमुख्यवृत्तिविज्ञप्तेः तन्निश्चयस्यचात्र ततः प्रागसिद्धेः, तत्सिद्धौ वा निर्विशेषावगमे किं प्रश्नेन प्रत्युक्त्यावा।

मुख्यार्थबाधोनिश्चितः, लक्ष्यार्थ विशेषश्च नविदितः, अस्मिन्नवसरे-प्रश्नाद्यस्तु । माभूत् । किं प्रत्यक्षेण बाधः! किं वानुमानेन !

तत्र लक्षणा श्रयणीयेति प्रक्रान्ता नुपहितलक्षणा व्याघात इत्यर्थः। (अभिधानेति) सिद्धान्त मुल्लंघ्य स्वरूपमात्रशक्त्यंगीकारे न किञ्चि त्प्रयोजनम्, नहि विशेषणस्या शक्यतामात्रेण शक्ये स्वरूपे लक्षणो पपादिता भवति, नाप्यवाच्यत्वश्रुतिः, प्रत्युत विशिष्टश-क्त्यंगीकारएव विशेष्ये लक्षणा भवति, अतो न निर्विशेषलक्षणा सिद्ध्यतीत्यर्थः। यद्वा - ननु लक्षणशोधनादेः प्राग्ब्रह्मपदेन निरु-पाधिकस्वरूपस्योक्तिं नांगीकुर्मः, येना तद्व्युत्पन्नेन तदुक्त्ययोगः, लक्षणया तदुक्तौ जिज्ञासालक्षणादि वैयर्थ्यञ्च स्यात, किन्तु निरुपा-धिके ब्रह्मशब्दवृत्ति मविदुषः प्रत्येव लक्षणशोधनादिकम् सर्वं प्रव-र्तत इत्यंगीकुर्मः, ततश्च न पूर्वोक्तदोषाविति शंकते (निरूपाधि कइति) निरूपाधिकशब्दस्य ब्रह्मशब्दवृत्ति मि त्यनेनैवा न्वयः, निरूपाधिके स्वार्थं मित्येत दर्थसिद्धम् । किंच तत्र कारणं - कथं च तदभाव इत्यत्राह (मुख्यार्थेति) मुख्यार्थबाधो मुख्यार्थानुपप-त्तिः - आदिशब्देन सम्बन्धः परिगृह्यते, इदं पदं मुख्यवृत्तमिति निश्चयः कारणम्, तत्रच मुख्यार्थबाधादिनिश्चयो हेतुः, तदभावा त्तदभावइत्यर्थः । (ततइति) उपदेशादित्यर्थः । (तत्सिद्धावि-ति) उपदेशा त्प्रागिति शेषः । (निर्विशेषावगमइति) जातइ-ति शेषः (मुख्यार्थबाधइति) मुख्यार्थस्य बृहत्त्वस्य बाधितत्वेन मिथ्यात्वा त्तस्य मुमुक्षुजिज्ञास्यत्व मनुपपन्नतया वगत मिति भा-वः । (लक्ष्यार्थेति) अनेन लक्ष्यसामान्यज्ञानम् लक्ष्यविशेषजि-ज्ञासाच व्यज्यते । (प्रत्यक्षेणेति) स्वमतेनेदं, परमतेऽनुपलब्धिनिरा-

अथतर्केण, अथवा तादृशेनागमेन । नाद्यः । अतींद्रियेप्रत्यक्षबाधायोगात् । नद्वितीयतृतीयौ । अनुमानस्यतर्कमात्रस्यच नित्यागमैःस्पर्धितुमशक्तेः । नचतुर्थः । नबृहतिनवृंहयतीतिचवाक्यान्तराभावात् । निर्गुणादिवाक्यैस्तत्सिद्धिरितिचेत्, तथापि निर्मूलःप्रश्नः, तैरेवबुभुत्सितबोधात् । नचतैरपितत्सिद्धिर्न्याय्या, अविरुद्धविषयसिद्ध्यातेषामन्यान्यपर्यस्यवक्ष्यमाणत्वात् । आपातविदितार्थश्रुतिविप्रतिपत्त्यासन्दिहानः कीदृग्भूतंब्रह्मशब्दविवक्षितमितिपृच्छतीतिचेत्, नैवं; तटस्थस्वरूलक्षणाभ्यामपि कारणत्ववैलक्षण्यविषयाभ्यांसन्देहस्यैवस्थापनप्रसङ्गात् । नचनिर्विशेषंसविशेषंवेतिविमृशतोजगत्कारणत्वोक्त्यानिर्विशेषत्वनिश्चयस्सिध्येत् । अपितुसर्वकारणत्वाक्षिप्तंसर्वज्ञसर्वविदादिशब्दकण्ठोक्तञ्च सर्वज्ञत्वादिकंबृहत्त्वमेवनिर्धार्येत । ....

नन्वविदितमुख्यलक्षकविभागः शिष्योमुमुक्षुर्भिजिज्ञास्यंब्रह्मेतिसामान्यतउपश्रुत्यतल्लक्षणं पृच्छति; ....

सत्याद्युपलक्षणं । प्रश्नवैयर्थ्यपरिहारमाशङ्कते (आपातविदितार्थेति) श्रुती-द्वैताद्वैतश्रुती, तएवविप्रतिपत्तिः - विरुद्धार्थप्रतिपादकवचनद्वयी . (कीदृग्भूतमिति) निर्विशेषंसविशेषंवेत्यर्थः . (पृच्छतीतिचेदिति) तत्तश्चलक्ष्यार्थनिर्विशेषोपदेश उपपन्नइतिभावः . (लक्षणाभ्यामिति) वाक्यपरम् । वैलक्षण्यं-अनृतादिव्यावृत्त्यात्मकंस्वरूपं । तटस्थलक्षणेन सविशेषत्वकोटिः स्वरूपलक्षणेन निर्विशेषत्वकोटिश्चसिद्धा, स्वरूपलक्षणस्य तेननिर्विशेषपरत्वस्याभिमानादित्यर्थः । नसन्देहमात्रं प्रत्युतविपरीत निश्चयएवेत्याह (नचेति) (सर्वकारणत्वाक्षिप्तमिति) कर्तृत्वाक्षिप्तमित्यर्थः . उपादानत्ववन्निमित्तत्वस्यापि तत्र विवक्षितत्वात् . (सर्वज्ञेत्यादि) कारणत्वानुपपत्ति लक्षणन्यायसाचिव्या त्सविशेष श्रुतेस्सविशेषमेव निर्धार्येतेत्यर्थः . (ब्रहत्त्वमेवेति) निर्वचनोपबृंहित ब्रह्म शब्दावगतश्चेतिभावः । यद्वा नत्वदभिमतंनिर्विशेषं ब्रह्मशब्दविवक्षित मितिसिद्ध्यति , किन्त्वस्मदभिमतं बृहत्त्वविशिष्टमेवेत्याह (बृहत्त्वमेवेति) सत्यज्ञानादिवाक्येनापि सत्यत्वादिकमेव निर्धार्येतेतिभावः । वैयर्थ्यपरिहारान्तरमाशङ्कते (नन्विति) अत्रप्रश्नस्य सन्देहमूलत्वानुक्तेर्नपूर्वोक्तदोषइतिभावः . (तल्लक्षणमिति) ब्रह्मशब्दविवक्षितस्य लक्षणं

आचार्यस्तु कृत्स्नविद्ब्रह्मशब्दलक्ष्यनिर्विशेषवस्तुलक्षणमुपदिशतु । तदपिन, मुमुक्षुभिर्जिज्ञास्यंनिर्विशेषमित्यस्यैवनिर्मूलत्वात्; प्रत्युत "तमेवंविद्वा" नित्यादिभिर्विभूतिगुणविग्रहव्यापारविशिष्टमहापुरुषवेदनस्यैवामृतत्वप्राप्त्युपायत्वश्रवणादबाधाच्च । अतोयथाश्रुतएवब्रह्मशब्दार्थः । निर्वक्तिच-यास्कः । "ब्रह्मपरिवृढंसर्वत" इति । ....

पृच्छतीत्यर्थः । "ब्रह्माधीही" त्यस्य ब्रह्मशब्दविवक्षितमधीहीत्यर्थइतिभावः । पूर्वमनुपाहितस्य जिज्ञास्यत्वमङ्गीकृत्य लक्षणशोधनादि वैयर्थ्यप्रसङ्गान्नतत्रलक्षणेत्युक्तं । इदानीमनुपाहितस्य जिज्ञास्यत्वमेवासिद्ध-मतस्तत्रनलक्षणेत्याह (तदपिनेति) यद्वा यदिमुमुक्षुभिर्ज्ञातव्यं ब्रह्म निर्विशेषमिति निर्धारितंस्यात्तदा जिज्ञासावाक्यस्य तदानुगुण्येन वर्णनीयतया ब्रह्मपदमुख्यार्थप्रश्नस्य तदननुगुणत्वान्मुमुक्षुज्ञातव्य ब्रह्मशब्दार्थःकइति लक्षणयाप्रश्नसमर्थनंस्यात्, नचैतत्सिद्धं, अतः "अधीहि भगवोब्रह्मे" तिपदंमुख्यार्थस्यैवप्रश्नपरम्, तथाचोक्तप्रकारेण प्रश्नोनुपपन्नइत्यभिप्रायेण परिहरति (तदपिनेति) (तमेवंविद्वानिति) आदिशब्देन "तमेवविदित्वाअतिमृत्युमेती" त्यादिविवक्षितं । "तमसस्तुपारे सर्वाणिरूपाणी" त्यादिभिर्विभूतिः, "महान्त" मित्यादिभिर्गुणः, "आदित्यवर्ण" मितिविग्रहः, "विचित्यकृत्वे" तिव्यापारः प्रतिपाद्यते. (विशिष्टेति) तत्पदेन एवमितिच प्रस्तुतविभूत्यादि वैशिष्ट्यपरामर्शादितिभावः. (महापुरुषेति) "पुरुषम्महान्त" मिति वाक्यार्थउक्तः । एवञ्जिज्ञास्यपर्यालोचनया निर्विशेषस्य जिज्ञासानर्थक्यादिभिर्जिज्ञास्यत्वासम्भवादुपाहितस्यैव जिज्ञास्यत्वे ननिर्विशेषलक्षणेति. (अतइति) यतोलक्षकत्वाभिमत शब्दस्वरूपपर्यालोचनया मुख्यवृत्त्यभावे साधुत्वानुपपत्ते स्त्वन्मते मुख्यवृत्तेः क्वाप्यसम्भवाच्च तन्मूललक्षणायाअनुपपत्तिः, यतश्च लक्ष्यत्वाभिमत जिज्ञास्यस्वरूप पर्यालोचनयोपहितस्यैव जिज्ञास्यत्वे लक्षणायाअसम्भवः, अतः । "बृहति बृंहयति तस्मादुच्यतेपरंब्रह्मे" तिश्रुत्युक्त प्रकारएव ब्रह्मशब्दार्थइत्यर्थः । सर्वतः - सर्वस्मात्, अनवधिकातिशय बृहदित्यर्थः । यद्वा सर्वतः - सर्वप्रकारेण, स्वरूपतोगुणतो विभूतितश्चेत्यर्थः । अत्र तत्वटीकायामुक्तं "यत्त्वाथर्वणिकी निरुक्तिर्बृंहणत्वमप्याह" बृहतिबृंहयति त-

इदंसर्वमभिप्रेत्याभाष्यत " ब्रह्मशब्देनचस्वभावतो निरस्तनिखिलदोषोऽनवधिकातिशयासंख्येयकल्याणगुणगणःपुरुषोत्तमोऽभिधीयत " इति। अभिधीयते - मुख्ययावृत्त्याबोध्यते। अनेवंनामकमनेवंविधञ्चकिमपिब्रह्मेतिवदतांसर्वेषा मप्यत्र निरासोभाव्यः। विशेषणद्वयेनचब्रह्मपुरुषोत्तम-

---


स्मादुच्यतेपरंब्रह्मे " ति. पौराणिकीचप्रसिद्धिः " बृहत्वाद्बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयत " इति,तद्गोबलीवर्दन्यायादिति नविरोधः, तेनानवधिकातिशय बृहत्त्वमेव ब्रह्मशब्दार्थइत्येके, अपरेतु बृहत्त्ववत् बृंहणत्वमप्यनवधिकातिशयं ब्रह्मशब्दार्थः " बृहतिबृंहयतो " तिपृथगभिधानस्वारस्यात्, " बृहत्वाद्बृंहणत्वाच्चे " ति समुच्चयस्वारस्याच्चेत्याचक्षते, वयन्तुब्रूमः विरोधाभावादुभयथाप्याचक्ष्महे " इति। अत्रबृंहणत्वं बृहत्वान्तर्गतमेवार्थो नपृथगितिप्रथमपक्षः, बृहत्त्वं तदनन्तर्भूतं बृंहणत्वञ्च समुच्चितमर्थइति द्वितीयः, बृहत्वान्तर्भावेनापि बृंहणत्वमर्थः स्वरूपेणापि तत्रापि समुच्चितमर्थइति तृतीयः, प्रतिपाद्याकारभेदान्नपौनरुक्त्यम्, नच गोबलीवर्दन्यायात्सङ्कोचः, तस्य पदान्तरविषयत्वात्, अतउभयथा प्यर्थो बृंहणत्वमितिभावः। " क्षरन्त्यमृत " मित्युक्तनुपपादयन्नेतद्वादमूलभूतं भाष्यमाह (इदंसर्वमिति) यथाश्रुतएव ब्रह्मशब्दार्थः. इदंसर्वमभिप्रेत्याभाष्यतेति वाक्याभ्यामयमर्थश्श्रुतो मतश्चेतिगम्यते। इदञ्चभाष्यं प्रकाशितमाचार्यैः, " प्रथमविशेषणेन स्वभावतोनिरस्त निखिलदोषत्वादयमेव ब्रह्मशब्दवाच्यः नान्यः। नहिकारागृहनिगळितएव तन्मोचनार्थमभ्यर्थनीयः, अतोमुमुक्षूपास्यपर जिज्ञासासूत्रस्थ ब्रह्मशब्देन पुरुषोत्तमएवार्थ सामर्थ्यादभिधीयत इत्यवगम्यते। द्वितीयविशेषणेन " यस्मिन्प्रयुज्यमानेतु गुणयोगस्सुपुष्कलः। तत्रैवमुख्यवृत्तोयमन्यत्रह्युपचारत " इतिन्यायेन गुणतोपि बृहत्त्वेशब्दशक्तेरसङ्कोचास्सिध्यतीति शब्दशक्तेः पुरुषोत्तमएवाभिधीयत इत्यवगम्यत " इति. (अनेवन्नामकमिति) तन्निरासप्रकारस्तु वेदान्तविजये प्रपञ्चितोऽस्माभिः. (विशेषणद्वयेनेति) " ब्रह्मपरिबृढंसर्वत " इतिब्रह्मशब्दनिरुक्तिः, " यस्मात्क्षरमतीतोह मक्षरादपिचोत्तमः। अतोस्मिलोकेवेदेच प्रथितःपुरुषोत्तम " इतिपुरुषोत्तमशब्दनिरुक्तिः। एतेन पुरु-

शब्दयोः निरुक्तिरपिव्यज्यते ॥ ....

इति कवितार्किकसिंहस्य सर्वतंत्रस्वतंत्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां ब्रह्मशब्दवृत्त्यनुपपत्तिवादः प्रथमः ॥

मोत्तमशब्दो नकर्मधारयः, उत्तमशब्दस्य पूर्वनिपातप्रसङ्गात् । नचष ष्ठीसमासः, "नानिर्धारणे" इतिनिषेधात् । नापिसप्तमीसमासः, "न निर्धारणे" इतिनिषेधादेव । नचवाच्यं षष्ठ्याएवायं समासनिषेधोन सप्तम्याइति विशेषाभावेन सप्तम्याअपि निषेधात् । अन्यथाषष्ठीसप्तमीसमासयो रूपतोर्थतश्चभेदाभावेन निषेधानर्थक्यात्, अतोत्रावयवार्थ निरुक्तेरसम्भवा त्केवलरूढएवायमश्वकर्णादिवत् । तदिदमाह "रूढ्यात्तु कामंपुरुषोत्तमोस्तु" इतिनिरस्तम्, "यस्मात्क्षरमतीतोहमक्षरादपिचोत्तम" इत्यादि निरुक्त्यनुसारेण "पंचमीविभक्ते" इतिविहितपंचम्याः "पंचमीभयेनेत्यत्र" पंचमीतियोगविभागात्समासोपपत्तेः । योगविभागश्च "तादपिपरस्तत्पर" इतिभाष्यवाक्यादवगम्यते । विस्तरस्तुवेदान्तविजयेद्रष्टव्यः । ... ...

इतिश्रीवाधूलकुलतिलक श्रीनिवासाचार्य पादसेवासमधिगत परावरतत्वयाथात्म्येन तदेकदेवतेन तच्चरणपरिचरण परायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्यायां चण्डमारुताख्यायां ब्रह्मशब्दवृत्तिनिरूपणन्नामप्रथमःस्कन्धः ।



|| श्रीमते रामानुजाय नमः ||

|| श्रीमते निगमान्तमहादेशिकाय नमः ||

द्वितीयवादः

अथस्वात्मैकभासस्य निर्विशेषस्यदुष्यतः । विशुद्धस्यापिजिज्ञासा-
परेष्टाप्रतिषिध्यते ||.... ....
यदाहुः - ब्रह्मशब्दनिर्दिष्टं विचार्यं, ...

पदार्थनिरूपणानन्तरं वाक्यार्थनिरूपणस्यौचित्यं भाष्यक्रमस्यानुरोद्धव्यत्वंचाभिप्रेत्याह (अथेति) वादार्थसंगृह्णाति (स्वात्मेति) कर्मत्वाभावात्सामान्यविशेष वेदनद्वयविषयत्वाभावेन हेतुफलाभावाज्जिज्ञासानो पपद्यतइत्याह (स्वात्मैकभासस्येति) स्वप्रकाशस्यैव स्वगतसामान्यविशेषविषयत्वेन हेतुफलत्वेस्तामित्यत्राह (स्वात्मेति) स्वयमेवात्मा स्वात्मा जिज्ञासासमानाधिकरणयोरेव सामान्यविशेषज्ञानयोः हेतुफलभावात्स्वप्रकाशस्यैवात्मत्वेन सामानाधिकरण्यासम्भवात्साध्यत्वासम्भवाच्च नहेतुफलभावः । किञ्च निर्विशेषत्वाच्च सामान्यविशेषयोरभावेन नजिज्ञासाहेतुफल सम्भवइत्याह (निर्विशेषस्येति) किमविद्योपहितस्यजिज्ञास्यता उत विशुद्धस्य, नाद्यइत्याह (दुष्यतइति) मिथ्याविषयकज्ञानस्य निवर्तकत्वासम्भवेन दुष्यमाणत्वासम्भवादितिभावः । द्वितीयन्दूषयति(विशुद्धस्येति) विशुद्धस्यज्ञप्तिविषयत्वाभावादितिभावः । निर्विशेषस्येत्यनन्तरं ब्रह्मणइतिशेषः । स्वात्मैकभासस्य निर्विशेषस्य ब्रह्मणो जिज्ञासा या परेष्टा सादुष्यतोविशुद्धस्यापि प्रतिषिध्यतइत्यन्वयः । जिज्ञासामात्रं खण्डयतः ब्रह्मजिज्ञासाखण्डनं नानिष्टमित्याशंक्याह (परेष्टेति) यथालोकंब्रह्मण्यपि तस्याइष्टत्वात्, अन्यथानारम्भेण शास्त्रोच्छित्तेरिति भावः । अस्मिन्वादे जिज्ञासानुपपत्तिर्विचारानुपपत्तिर्वा प्रतिपाद्या, अन्यतरार्थत्वे अन्यतरनिरसनमार्थं । अत्रच विचारानुपपत्तिपक्षे जिज्ञासापदं विचारपरम् । हेतुफलाभावाज्जिज्ञासानुपपत्ते नंतत्साध्यविचारसम्भवइतिवा तात्पर्यं । ब्रह्मपदादेवब्रह्मणः प्रतीतेः विचारानुपपन्नइत्यभिप्रायेणोक्तं (शब्दनिर्दिष्टमिति) (विचार्यमिति) जिज्ञासानुपपत्तिपक्षे विचारफलक जिज्ञासाविषयइत्यर्थः । विचारानुपपत्त्या तत्फल

अनुदितान स्तमितस्वरूपैकप्रकाशमशेषविशेषशून्यमनाद्यविद्यान्धकारि- तं नित्यशुद्धश्चेति । तत्रविचित्रोव्याघातः । यद्वि नवित्तिकर्म कथंतत्र- जिज्ञासा । सामान्यतोविदितेविशेषतश्चवेदितव्येतत्प्रवृत्तेः । अन्यथा हेतुप्रयोजनविरहेतदयोगात् । नचब्रह्मणितथाविधवेदनद्वयविषयत्वंपरिशिष्य ते । जिज्ञासापूर्वकंपरीक्षणमत्रप्रक्रम्यते, ...

कजिज्ञासानुपपत्ते र्जिज्ञासापूर्वकमित्यादिना वक्ष्यमाणायाः प्रदर्शनार्थं- विचारफलकत्वोक्तिः । व्याघातस्फोरणार्थं तदभिमतार्थान्तराण्यप्यनुवद ति (अनुदितेत्यादिना) ब्रह्मशब्दनिर्दिष्टस्य विचारविषयत्व मनुदिता नस्तमितस्वरूपैक प्रकाशत्वादिकञ्चाहुरित्यर्थः । चकारेणवि चार्यत्व- स्यानुदितानस्तमित स्वरूपैकप्रकाशत्वादेश्च विरोधस्सूच्यते । विचित्रो विविधः । व्याघातश्चोत्तरत्रानुसन्धेयः । अनुदितेत्यादिपदचतुष्टयेन स्वा त्मैकभासस्येत्यादि श्लोकगतपदचतुष्टयं क्रमाद्विवृतम् । "अनुदितानस्त मिते" ति स्वात्मेतिप्रतिसन्नात्मत्वाक्षिप्तार्थउक्तः । स्वरूपैकप्रकाशमित्यने नसूचितंव्याघातं दर्शयति (यद्धीति) (सामान्यतइति) इदञ्चप्रायि- काभिप्रायम् । शब्दत्वादिनाज्ञाते गुणत्वद्रव्यत्वादि सामान्याकार जि ज्ञासादर्शनात् ततश्च केनचिदाकारेणज्ञाते केनचिदाकारेणाज्ञाते जिज्ञा सेत्येवविवक्षितम्,अतएववक्ष्यति "विदिताविदिताकारभेदोदुस्त्यज" इति. (अन्यथेति) सामान्यविशेषवेदनयोरभावे । सामान्यविशेषवेदनयोर्जिज्ञा साहेतुफलभावस्य लोकसिद्धत्वादितिभावः. (तदयोगादिति) जिज्ञा सायोगादित्यर्थः । तथाविधवेदनद्वयविषयत्वाभावेपि वृत्तिद्वयविषयत्वं- सम्भवत्येवेत्यत्राह (नचेति) अन्यत्र वेदनद्वयविषयएव जिज्ञासादर्शना द्वृत्तेश्चा वेदनत्वादितिभावः । एवं कर्मत्वाभावे सामान्यविशेषवेदनयोर- भावेन हेतुफलयोरभावा जिज्ञासानुपपन्नेत्युक्तं । इदानीं दृश्यत्वादिप्रस ङ्गेनप्रमाणविषयत्वानुपपत्त्या विचारासम्भवेन जिज्ञासानुपपत्तिमाह - (जिज्ञासापूर्वकमिति) दृश्यत्वेत्यनेन अनुदितानस्तमित स्वरूपैकप्रका शमित्यत्र एकपदलब्धावित्तिकर्मत्वेन व्याघातः प्रदर्शितः । मिथ्यात्वेत्य नेन ज्ञाननिवर्त्यत्वपरेण अनस्तमितपदोक्तानिवर्त्यत्वेन व्याघातःप्रकाशि तः । जडत्वेत्यनेनास्वप्रकाशत्वपरेण स्वरूपप्रकाशमित्यनेन व्याघातो-

तच्च तत्रप्रमाणोपक्षेपेण । प्रमाणञ्च निर्विषयं न निरूप्यं। सविषयत्वेतु तद्विषयत्वाद्दृश्यत्वमिथ्यात्वजडत्वादिस्वोक्तानिष्टापत्तिः। स्वरूपप्रकाशएवहेतुः फलञ्चजिज्ञासायाइतिचेन्न; तस्यास्तदुभयसामानाधिकरण्यनियमदृष्टेः। स्वरूपप्रकाशस्यच तदेकाधारताभावात् । अनादेः प्रकाशस्यचानिरपेक्षहेतुत्वे जिज्ञासानादित्वप्रसक्तेः ।.... ....

दर्शितः। आदिपदेन प्रकाशानात्मकत्वंगृह्यते, तेनस्वरूपैकप्रकाशमित्यत्र प्रकाशत्वेन व्याघातः प्रदर्शितः। विचारानुपपत्तिपक्षेतु अस्तु जिज्ञासानुपपत्तिः विचारानुपपत्तौ किमायातमित्यत्राह (जिज्ञासापूर्वकमिति) तथाच जिज्ञासायाअसम्भवे तत्साध्यविचारो नोपपद्यतइतिभावः। विचारानुपपत्तौ हेत्वन्तरमाह (तच्चेति) माभूद्ब्रह्मणोवित्तिकर्मत्वम्माच सामान्यविशेषवेदनद्वयविषयत्वं, तथापि स्वरूपप्रकाशस्यैव स्वगतसामान्यविशेषविषयत्वेन हेतुफलभावाज्जिज्ञासोपपद्यतइति पूर्वोक्तव्याघातपरिहारंशङ्कते (स्वरूपेति) ज्ञानमात्रस्यैव हेतुत्वंफलत्वञ्च, नतुसामान्यविशेषज्ञानयोर्गौरवादित्येव काराभिप्रायः. (नेति) अन्यथा यज्ञदत्तीयसामान्यज्ञाना द्देवदत्तीयविशेषज्ञानफलक जिज्ञासाया विष्णुमित्रेजननापत्तिरितिभावः। यद्यपि हेतुभूतज्ञानस्य जिज्ञासासामानाधिकरण्यनियमोनास्ति अहमितिस्वप्रकाशादेव नित्यत्वादिजिज्ञासादर्शनात्, अथापि अहमितिप्रतीतिरन्तःकरणाकारवृत्तिरिति यन्मतं तदनुसारेण तदुभयेत्युक्तं। स्वभिन्नविषयजिज्ञासाभिप्रायेणवा तदुक्तम्। हेतुफलत्वयोस्सामान्यतो दूषणमुक्त्वा प्रातिस्विकन्दूषणमाह (अनादेःप्रकाशस्येत्यादिना अनादित्वभङ्गादित्यन्तेन) किंस्वरूपप्रकाशो निरपेक्षएवहेतुरुतागन्तुक सहकारिणमपेक्ष्येति विकल्पमभिप्रेत्य प्रथमेदूषणमाह (अनादेरिति) अत्रजिज्ञासायदि निरपेक्षा अनादि प्रकाशजन्यास्यादनादिस्स्यादित्यापादनं विवक्षितम्, तेन नापाद्यापादकयोर्वैयधिकरण्यम्। ननुजन्यत्वानादित्वयो र्विरुद्धत्वेनव्याप्त्यभावात् कथमापाद्यापादकभावः, नच प्रवाहानादित्वमापाद्यम्, क्रमिकोत्पत्तौहिप्रवाहः, निरपेक्षजन्यत्वेच विलम्बहेतोरभावेन एकव्यक्त्युत्पत्तिकालएवयावद्व्यक्त्युत्पत्तेरावश्यकत्वेन प्रवाहस्यैवासिद्धेः। नच निरपेक्षजन्यत्ववादिनो धारावाहिकस्थले पूर्वज्ञानस्येव उत्तरज्ञानम्प्रतिपूर्वजिज्ञासाया उत्तरहेतुत्वं व

सापेक्षत्वेयथादर्शनम् स्वाविषयवेदनापेक्षणात् । ....

कतुंशक्यमितिचेन्न, जिज्ञासा यदि प्रकाशानन्तरभाविनिरपेक्षप्रकाशजन्यास्यात्तर्हि प्रकाशसमवधानक्षणोत्तरक्षणवर्ति प्रागभावप्रतियोगिनीस्यात्, योयदनन्तरभावि निरपेक्षयज्जन्यः सतत्समवधान क्षणोत्तरक्षणवर्ति प्रागभावप्रतियोगी नभवतीतिव्याप्तेरिति तात्पर्यात् । तस्यचप्रकाशस्यानादित्वात् तत्समवधानक्षणोत्तरक्षणवर्ति प्रागभावप्रतियोगित्वाभावे अनादित्वंपर्यवस्यती त्यभिप्रायेणानादेः प्रकाशस्येत्युक्तम् । प्रकाशोयदि जिज्ञासासामग्रीत्व पर्याप्तयधिकरणंस्यात् स्वाधिकरणक्षणान्यूनसङ्ख्याकजिज्ञासाधिकरण क्षणकःस्यात्, जिज्ञासाप्रागभावाधिकरण क्षणपूर्वक्षण वर्तीनस्यात्, जिज्ञासाप्रागभावाधिकरण क्षणद्वयवर्तीनस्यात्, यद्यत्सामग्रीत्वपर्याप्तयधिकरणं तत्स्वाधिकरणक्षणान्यून सङ्ख्याकतदधिकरणक्षणकं, तत्प्रागभावाधिकरण क्षणपूर्वक्षणवर्तिनभवति, तत्प्रागभावाधिकरणक्षणद्वयवर्ति नभवतीतिच व्याप्तेरितिवातात्पर्यं । अत्रच द्वितीयाद्यस्तर्काः प्रतिबन्धकाभाव कारणत्वमतेन । अनादिपदस्य पूर्ववदवप्रयोजनम्, तथाच निरपेक्षस्यप्रकाशस्यानादेः कारणत्वमेव नस्यादितिभावः । यद्वा प्रकाशोत्तरजन्य जन्यत्वाभावे अनादित्वंस्यादिति विवक्षितं, तत्कुतइत्यपेक्षायामुक्तं (अनादेरिति) ततश्चानाद्युत्तरजन्य जन्यत्वाभावे अनादित्वमितिव्याप्ते रात्मादौदृष्टत्वेन अनादिप्रकाशोत्तरभावि (जन्य) जन्यत्वाभावे अनादित्वंस्यादिति । नचजन्यत्वाभावस्यैव व्याप्यत्वेशेषवैयर्थ्यम्, अखण्डाभावे तदभावात् । यद्वाजन्यत्वाभावे प्रयोजकोजन्यजन्यत्वाभावः, तत्रानाद्युत्तरजन्य जन्यत्वाभावइतिभावः । यद्वानिरपेक्षानादिजन्यत्वोक्तिर्जिज्ञासाया अनादित्वेपर्यवस्यति, यस्मिन्कालेकार्योत्पत्तिरभिमता ततःप्रागपिकार्यंस्यात् कालयोर्विशेषाभावात । एवंपूर्वपूर्वकालेपीत्यापादिते निरपेक्षानादिजन्यत्ववादिना पूर्वकारणाभावोनवक्तुंशक्यइति अस्यापादनस्यानुद्धारादित्यर्थः । एवंचानादित्वेसिद्धेजन्यत्वमेवनसंभवतीतितात्पर्यं . (यथादर्शनमिति)जिज्ञासायास्समानविषयधर्मिज्ञानजन्यत्वस्य लोकेदर्शनादितिभावः । ननु यद्यपिधर्मिविषयज्ञानं लोकेदृश्यते तथापितस्य धर्मिविषयज्ञानत्वेन नहेतुत्वं किन्तुधर्मिज्ञानत्वमात्रेण लाघवात्, तथाचस्वरूपप्रकाशएव हेतुः, नचानादित्वप्रसक्तिः सापे-

प्रागसिद्धस्य तुच्छत्वकार्यत्वयोरन्यतरप्रसङ्गात् प्राक्सिद्धस्यफलत्वा - योगात् । फलत्वेचानादित्वभङ्गात् । उपहितरूपेणवेदनद्वय- विषयत्वाज्जिज्ञासास्यादितिचेन्न; हेतोरुपहितविषयत्वाभ्युपगमेऽपिफल - स्यतथात्वेभ्रान्तित्वापातात्. भ्रान्तेश्चासंपाद्यत्वान्नतदर्थप्रेक्षावतांप्रारंभः । भ्रान्तिमेवप्रमितिंमन्यमानैस्सासंपाद्येतिचेन्न; परीक्षकेभ्योऽपिप्राथमिकभ्रा- न्तिप्रमात्वव्यवसायिनामेवप्रागल्भ्यप्रसङ्गात् । स्वरूपव्यतिरिक्तंकृत्स्नंमिथ्ये ति प्रयोजकशिक्षणविरोधाच्च -

---

क्षस्यैवतस्यजिज्ञासाहेतुत्वात , अपेक्षणीयश्चसंशयएवेतिचेन्न, स्वरूपप्र काशेनैवतस्यज्ञातत्वेन संशयस्यैवानुपपत्तेः। फलत्वेदूषणमाह (प्राग- सिद्धस्येत्यादि) प्रागसिद्धस्योत्तरकालमसत्त्वेतुच्छत्वं सत्त्वेकार्यत्वमिति भावः। प्राक्सिद्धत्वपक्षे सिद्धत्वफलत्वयोः परस्परव्याघातमाह (प्रा - क्सिद्धस्येत्यादिना) अनादिपदंप्राक्सिद्धपरम् । यद्वा स्वरूपप्रकाशस्य फ लत्वेदूषणमाह (फलत्वइति) अनादित्वभङ्गाच्चेत्यन्वयः । एतेनानुदित पदसूचितव्याघातोदर्शितः । एवंस्वरूपप्रकाशस्यैव हेतुफलभावासम्भ वेऽन्वयव्यतिरेकाभ्यां जिज्ञासासमानाधिकरणयो स्सामान्यविशेषज्ञान योर्हेतुत्वंफलत्वञ्चेतिस्थितम् , तत्रशङ्कते (उपहितरूपेणेति) अविद्योपहि- तरूपेण . (वेदनद्वयेति) मुमुक्षूपास्यत्वेन सामान्यवेदनं, जगत्कारणत्वा दिनाविशेषवेदनम् , (नेति) निर्विशेषस्य जिज्ञास्यत्वभङ्गापत्तेरितिभावः. (अभ्युपगमेपीति) फलस्यानुपहितविषयत्वावश्यम्भावात सामान्यविशे षवेदनयोस्समानविषयत्व नियमाच्च हेतोरप्यनुपहितविषयत्वमेव वक्त - व्यम् . धर्म्यैक्यमात्रेण समानविषयत्वाद्धेतोः उपहितविषयत्वाभ्युपगमे पीत्यर्थः . (भ्रान्तेश्चासम्पाद्य त्वादिति) तत्वज्ञानसाध्यत्वान्मोक्षस्येतिभा वः। परीक्षकाः-विचारशास्त्राधिकारिणः। प्राथमिकभ्रान्तिः-प्रपञ्चभ्रमः । (प्रागल्भ्यप्रसङ्गादिति) निरर्थकायासवैधुर्यादधिक भ्रान्त्यसम्पादनाच्चेति भावः . (स्वरूपेति) प्रमात्वबुद्ध्याविचारप्रवृत्तावपि विचारदशायामेव कृत्स्नमिथ्यात्वस्य शिक्षितत्वेन तत्रप्रमात्वबुद्धिनिवृत्ते स्तदुत्पादनार्थमन ननिदिध्यासनादौ प्रवृत्तिर्नस्यादितिभावः । यद्वा त्वन्मते नित्यानित्यव- स्तुविवेकदशायामेव ब्रह्मातिरिक्तमिथ्यात्वज्ञानस्य जातत्वात् श्रवणादौ-

नित्यभूतेऽपिसमाश्रिवत् स्वमात्रसाक्षित्वंवैशद्यमात्रंवासाध्यमितिचेन्न; तयो रपितत्स्वरूपत्वेसिद्धत्वात् । धर्मत्वेसत्यत्वमिथ्यात्वविकल्पक्षोभात् ।

प्रवृत्तिनस्यादितिभावः । स्वरूपस्यैवफलत्वे प्राक्सिद्धस्य फलत्वायोगा-दितियद्दूषणमुक्तं तत्रपरिहारंशङ्कते (नित्येति) ज्ञानस्यसिद्धत्वेपि तद्रू-पावच्छिन्नस्यासिद्धत्वा जिज्ञासासम्भवत्येवेतिभावः । प्राप्ताप्राप्तविवेके नधर्मस्यैवेच्छा, साचनजिज्ञासा, समाधत्तेतुतादृशज्ञानस्यासिद्धत्वा जि ज्ञासेत्यभिप्रेत्याह (नेति) (सत्यत्वेति) धर्मस्य सत्यत्वेऽद्वैतहानिः, मि थ्यात्वेतदर्थप्रेक्षावत्प्रवृत्त्यनुपपत्तिः, नहिमिथ्यावस्तुवस्तुसहमानोमुमुक्षुर्मि-थ्योत्पादनाय प्रवर्तेत । नचवैशद्यादेरविद्यानिवर्तकत्वा त्प्रवृ-त्त्युपपत्तिः, तस्यजडत्वेनानिवर्तकत्वात् । ज्ञानमेवाज्ञाननिवर्तकमि तिहियुष्माकमुद्घोषः । तन्मात्रविषयकज्ञानमेव निवर्तकं नतुधर्मइत्तिचेत्त-र्हि तस्यज्ञानस्यानादित्वादनादि निवृत्त्यापत्तिः । स्वमात्रसाक्षिज्ञानं पूर्वं नास्त्येव सर्वसाक्षित्वादितिचेत्, हन्तकिमिदानीं तादृशज्ञानमुत्पद्यते । स्व मात्रसाक्षित्वमुत्पद्यतइतिचेत्, तर्हितदेवाविद्यानि वर्तकमितिपर्यवसित म् । ननुस्वमात्रसाक्षित्वमविद्या निवर्तकतावच्छेदकमितिचेत्? शुक्त्या दिज्ञानस्याधिष्ठानातिरिक्त विषयस्यापि निवर्तकत्वदर्शनेन अधिष्ठानमा त्रविषयत्वस्य निवर्तकतानवच्छेदकत्वात् । अधिष्ठानतत्वज्ञानत्वेन निवर्त कत्वेवाच्ये प्रकृतेचाधिष्ठानतत्वज्ञानस्यानादित्वेनाध्यासएवनस्यात् । न नुतत्वसाक्षात्कारमात्रं ननिवर्तकं, तीरस्थवृक्षादावूर्ध्वाग्रत्व साक्षात्कारेवि द्यमानेपि जलेऽधोग्रत्वभ्रमात् । तथाचारोप्याविषयकाधिष्ठान तत्वसा-क्षात्कारत्वमेव निवर्तकतावच्छेदकमितिचेन्न, तत्रोर्ध्वाग्रत्वतत्वज्ञानानिवर्त्य-त्वादधोग्रत्वभ्रमस्य, उपाधिनिवृत्त्यैवतन्निवृत्तेः, अन्यथापूर्वमूर्ध्वाग्रत्वमा त्रसाक्षात्कारसम्भवेन तदनन्तरमधोग्रत्व भ्रमाभावप्रसङ्गात्, विशेषाद र्शनजभ्रमस्यैव तत्वज्ञाननिवर्त्यत्वात् । किञ्चारोप्याविषयकाधिष्ठानसाक्षा त्कारत्वमात्रं निवर्तकतावच्छेदकं? उतारोप्याविषयकाधिष्ठान तत्वसाक्षा-त्कारत्वं? नाद्यः, इदमितिधर्मिज्ञानानन्तरं रजतभ्रमानुदयप्रसङ्गात् । द्वि तीयेकिमधिष्ठानतत्वन्नाम? किमधिष्ठानस्वरूपमेव, उतारोप्यविरोध्याका

अतिरिक्ताकाशप्रकाशएव चेद्वैशद्यं, तस्मिन्नप्याकारेसएवविकल्पः नित्यस्व-साक्षिणिनिरंशेनिर्विशेषेचक्व इदानींप्रकाश्यआकारः-कथंचजिज्ञासा । इदं किमितिवाक्यमितित्रासास्यात् , सर्वत्रयथायथंविदिताविदिताकारभेदोदु स्त्यजः, कृत्स्नावग त्यनवगत्योर्नैष्कल्यानिर्हेतुकत्वाभ्यांतदयोगात्

रः? नाद्यः उक्तदोषादेव । नद्वितीयः निर्धर्मकेब्रह्मणिविरोध्याकाराभावात्. ननुस्वरूपमेव ब्रह्मणिविरोध्याकारइतिचेत् । किंविरोधित्वंवैयधिकरण्यं-तदभावरूपत्वंवा? नाद्यः ब्रह्मणोनिरधिकरणत्वेना विरोधितापत्तेः । नद्वि तीयः शुक्तित्वादेरविरोधितापत्तेः । ननुतत्राप्यधिष्ठानस्वरूपारोप्याभावए वविरोधीतिचेत्? तर्हीदन्त्वेनाधिष्ठानज्ञानेसति अध्यासाभावप्रसङ्गात् । कि ञ्च स्वमात्रसाक्षित्वंहीतरासाक्षित्वेसति स्वसाक्षित्वं, तथाचेतरेषामभास मानतया प्रपञ्चएवनस्यात् , अतिभासमानसत्ताकत्वान्मिथ्यापदार्थस्य । ननुयुगपदेव सर्वमुक्तेस्तद्दशायां प्रपञ्चाभावइष्टइतिचेन्न , इतराविषयत्व - स्यापिमिथ्यात्वेन तद्बाधावश्यकतया इतराविषयत्वस्यैव व्याघातात् । इतराविषयत्वोत्पत्तिकालएवाविद्यादेर्निवृत्ततया विचारसाध्यज्ञानस्य वैयर्थ्य प्रसङ्गाच्च । वैशद्यपक्षे दूषणान्तरमाह (अतिरिक्तेति) अत्रातिरिक्तपदंज्ञा तातिरिक्तपरम् । ब्रह्मणः स्वतोपरोक्षतया प्रत्यक्षस्य तत्समानाकारत्व-स्यच साध्यत्वायोगादितिभावः (सएवेति) स्वरूपधर्मविकल्पएवेत्यर्थः । स्वरूपपक्षे किञ्चिद्विशेषज्ञानाभावेन ज्ञातातिरिक्तता उतांशभेदेनेतिवि कल्पमभिप्रेत्य प्रथमपक्षेदूषणमाह (नित्येति) द्वितीयेदूषणमाह (निरं शइति) धर्मपक्षेदोषमाह (निर्विशेषइति) मिथ्याभूतविशेषपक्षस्तु " फ लस्यतथात्वेभ्रान्तित्वापातादि " त्यनेननिरस्तइतिभावः । एवमियताग्रन्थे न अनुदितानस्तमितस्वरूपैक प्रकाशमित्यनेन सूचितव्याघातोदर्शितः । अथस्वमात्रसाक्षित्वस्य वैशद्यस्यवासाध्यत्वेपि जिज्ञासानोपपद्यतइत्युपपा-दयन्नशेषशून्यमित्यनेन सूचितंव्याघातंदर्शयति (कथञ्चेत्यादिना) जि-ज्ञासाहीदंकिमित्याकारावा कथमित्याकारावाभवति; एतदाकारप्रश्नयो र्यविषयाभवतीत्यर्थः . (सर्वत्रेति) प्रश्नद्वयविषयेपीत्यर्थः । विदिताविदिताकारभेदाभावेपि इदंकिमित्यादिप्रश्नोस्त्वित्यत्राह " (कृत्स्नेति) कृत्स्ना वगतौज्ञातव्यांशाभावेन नैष्कल्यात्प्रश्नोनोपपद्यते । कृत्स्नानवगतौहेत्व भावेन धर्मानिर्देशोनुपपन्नः । (तदयोगादिति) इदंकिमित्यादिप्रश्नस्यायो-

गात् । एवं कृत्स्नावगत्यनवगत्यो र्नैष्फल्यनिर्हेतुकत्वप्रसङ्गेन इदंकिमित्यादिप्रश्नस्थले विदिताकारभेदआवश्यके तादृशप्रश्नप्रयोजक जिज्ञासायाअपितन्नैयत्यात् स्वमात्रसाक्षित्वस्य वैशद्यस्यवासाध्यत्वेपि नतन्मात्रेणजिज्ञासोपपत्तिरितिस्थितं । जिज्ञासासमर्थनार्थमतत्रयमाहुनवीनः । सत्वविशिष्टज्ञानंहेतुः, अखण्डविषयज्ञानं फलं, तद्विषयेच्छा जिज्ञासेत्येकं । प्रतिबद्धःप्रथमोत्पन्नोऽद्वैतसाक्षात्कारएवहेतुः. अप्रतिबद्धज्ञानंफलं, तदिच्छाजिज्ञासेत्यपरं । प्राथमिकज्ञानमनवधारणत्वादविद्याया अनिवर्तकं तदेवचहेतुः, अवधारणरूपश्चरमसाक्षात्कारःफलं, तदिच्छैवजिज्ञासेतिचापरं तत्राद्यमुत्तरत्रनिरसिष्यते । इतरमतद्वयमनेननिरस्यते । तथाहि– वेदान्तवाक्याद्द्वैतसाक्षात्कारएव प्रथममुत्पद्यते। तच्चापातरूपम् । आपातत्वञ्चप्रतिबद्धफलत्वम् । प्रतिबन्धश्चानादिप्रवृत्त दृढतरभेदवासनाभ्यएव । ताश्च श्रवणमननादिभिः क्षीयन्ते, ततोवाक्यादुत्पन्नात्मसाक्षात्कारादविद्यानिवर्तते । अतोप्रतिबद्धापरोक्षज्ञानेच्छासंभवति, सैवजिज्ञासेतियन्मतं , तत्तावदनुपपन्नं — विदिताविदिताकारभेदाभावात्प्रश्नानुपपत्ते स्तत्प्रयोजकजिज्ञासानुपपत्तेः । ब्रह्मजिज्ञासायाःप्रश्नप्रयोजकत्वञ्च " अधीहिभगवोब्रह्म " "किंभगवन्तःपरमंवदन्ति" " सोहंमन्त्रविदेवास्मिनात्मविद्भूमानंभगवोविजिज्ञासे " इत्यादिभिरवगम्यते । ननु अद्वैतस्यप्रथमतोदर्शनेपि द्वैतवाक्यदर्शनात्सन्देहेसति जिज्ञासोपपद्यतइतिचेन्न, द्वैतवाक्यदर्शनेपि धर्मिनिश्चयस्यनिष्प्रत्यूहत्वात् । अद्वैतानन्दत्वादेश्चतदभिन्नत्वात्सन्देहोनोपपद्यते । नचाद्वैतादेर्निश्चयेप्यद्वैतत्वादिप्रकारकनिश्चयाभावात्सन्देहोपपत्तिः, तस्यविचारानन्तरमप्यभावेनसन्देहानिवृत्तिप्रसङ्गात् , निष्प्रकारकज्ञानस्यैवविचारजन्यत्वाङ्गीकारात् । नचाप्रतिबद्धेन विचारानन्तरभाविज्ञानेनाज्ञाननिवृत्तेरेव संशयनिवृत्तिरितिवाच्यं । संशयाविरोधिज्ञानस्यैवाज्ञाननिवर्तकत्वात् । संशयनिवृत्त्यनुकूलस्वरूपविशेषवतएव त्वयानिश्चयत्वोक्तेः । नचनिश्चयेसत्यपि प्राथमिकज्ञानेनप्रतिबंधादज्ञानानिवृत्तेः संशयसंभवइतिवाच्यं, अज्ञानानिवृत्तावपि श्वैत्यानुमित्या शङ्खपीतत्वभ्रमदशायां श्वैत्यसंशयनिवृत्तिदर्शनात् । विपरीतभ्रमरूपनिश्चयेनापि संशयनिवृत्तिदर्शनाच्च । नचाद्वैतं स्वरूपाद्भिन्नमेवेतितत्कोटिकसंशयोपपत्तिः,तस्यद्वैतकोट्यन्तर्भावेनकोट्यन्तरत्वानुपपत्तेः । किञ्च सत्यत्वेअद्वैतहानिः । मिथ्यात्वे प्रतियोगिसमानसत्ताकस्यप्रतियोगिकालेप्रति-

योग्याश्रयेब्रह्मण्यसंभवः । किञ्चब्रह्मणिजगत्कारणत्वादिद्वैतनिश्चयादेवनद्वैतकोटिकसन्देहः । नचपारमार्थिकद्वितीयवत्त्वादिनासन्देहः । कोट्यप्रसिद्धेः प्रपञ्चेसत्यत्वमिथ्यात्वकोटिकत्सन्देहेपि नब्रह्मजिज्ञासायाइदंकिमित्यादिप्रश्नस्यच ब्रह्मण्युपपत्तिः, तस्यब्रह्मविषयकसन्देहाभावात् । तदेतत्सर्वमभिप्रेत्योक्तं - कथञ्चजिज्ञासेत्यादि ।

किञ्च प्राथमिकाद्वैतसाक्षात्कारादेवाविद्यानिवृत्तौकुतस्सन्देहः . ननुभेदवासनयाप्रतिबन्धान्नप्राथमिकसाक्षात्कारादविद्यानिवृत्तिरितिचेन्न , ज्ञानस्याज्ञाननिवर्तकत्वेहि ज्ञानेनाज्ञानंनिवृत्तमित्यनुभवोमानं । ततश्चवेदान्तवाक्याद्ब्रह्मज्ञानेजाते ब्रह्मज्ञानेनब्रह्माज्ञानंनिवृत्तमित्यनुभवस्य दुरपह्नवत्वेन प्राथमिकब्रह्मज्ञानस्यप्रतिबन्धासंभवात् । प्राथमिकब्रह्मज्ञानमात्रात्संसारनिवृत्तेरदर्शनेन तदनुवृत्तये तदुपादानाज्ञानानुवृत्ति राश्रयणीयेतिचेत्, त्यज तर्हि संसारस्याज्ञानोपादानत्वं । यच्च तत्वज्ञानस्यप्रतिबंधादज्ञानानिवर्तकत्वेनिदर्शनं विशेषदर्शनं प्रतिबन्धान्नप्रतिबिंबभ्रमंनिवर्तयतीति, तन्न, तत्रविशेषदर्शनस्यतन्निवर्तनायोग्यत्वात् । ननुविशेषदर्शनविषयविरुद्धविषयभ्रमत्वमेवनिवर्त्यतावच्छेदकं, विशेषादर्शनजन्यभ्रमत्वापेक्षयालघुत्वात् . विरोधस्यनियमघटितत्वेपि जन्यत्वस्यानन्यथासिद्धत्वादिघटितत्वेन ततोपिगुरुत्वादितिचेन्न, चंद्रप्रादेशिकत्वदूरस्थपर्वताल्पपरिमाणादिभ्रमेव्यभिचारात् . तद्भ्रमस्यसोपाधिकत्वाभावेनोपाधिरूपप्रतिबन्धकाभावात् । नन्ववच्छेदकलाघवानुसारेण तत्रापिदूरस्थत्वादेःप्रतिबन्धकत्वंकल्प्यतइतिचेत्तन्न, विशेषदर्शनमन्तरेणोपाधिनिवृत्त्याव्यासङ्गादिनावानिवृत्तिस्थलेव्यभिचारेण तस्यतवच्छेदेन निवर्तकत्वाभावात् नचोपाधिनिवृत्त्याद्यनिवर्त्यत्वेनविशेषणान्नव्यभिचारइतिवाच्यं, उपाधिनिवृत्त्याद्यनिवर्त्यसोपाधिकभ्रमस्यासत्त्वेन तदर्थं प्रतिबन्धककल्पनावैयर्थ्यात् . किञ्च उपाधिनिवृत्तीत्यादिना उपाधिनिवृत्त्यनिवर्त्यत्वव्यासङ्गानिवर्त्यत्वादिकंहिविवक्षितं, तत्रचोपाधिनिवृत्त्यानिवर्त्यत्वस्थानेविशेषादर्शनजन्यत्वमेवनिवेश्यतां लाघवात्, उपाधिनिवृत्त्यनिवर्त्यत्वस्य उपाधिनिवृत्तिजन्यनिवृत्तिप्रातियोगित्वाभावात्मकतया निवृत्तिप्रतियोगित्वाभावप्रवेशेन गौरवात् । किञ्चैवं विशेषदर्शनविषयविरुद्धविषयभ्रमत्वमिति विशेष्यभागोपिनवक्तव्यइतिलाघवं । ननुच पक्षद्वयेपिव्यासङ्गादि तत्तदनेकानिवर्त्यत्वविशेषणेगौरवा द्विशेषदर्शनासमवहितसामग्र्यनिवर्त्यत्व-

मेव विशेषणं । ततश्च पूर्वोक्तलाघवं स्थितमेव । नचैवमपि प्रतिबन्धककल्पनावैयर्थ्यं, सोपाधिकभ्रमस्योपाधिनिवृत्तिनिवर्त्यत्वादितिवाच्यं, यत्र विशेषदर्शनसमकालोत्पत्तिकोपाधिनिवृत्त्याभ्रमनिवृत्तिः तत्र विशेषदर्शनासमवहितसामग्र्यनिवर्त्यभ्रमत्वस्यसत्त्वेन उपाधिकालीनविशेषदर्शनादनिवृत्त्यर्थंप्रतिबन्धकल्पनात् । नचविशेषदर्शनस्य विद्यमानस्याभ्रमनिवर्तकत्वे विप्रतिपत्ते स्तदसमवहितसामग्र्यनिवर्त्यत्वानिश्चयान्न प्रतिबन्धकल्पनेतिवाच्यं, विशेषदर्शनासमवहितत्वेन विशेषदर्शनासमानकालीनत्वस्यविवक्षितत्वादितिचेन्न, विशेषदर्शनकालीनविशेषादर्शनजभ्रमत्वस्यैव विशेषदर्शनासमवहितसामग्र्यनिवर्त्यविशेषदर्शन विषयविरुद्धविषयभ्रमत्वापेक्षायालघुत्वेनावच्छेदकत्वात् । ननु तर्हि विशेषदर्शनकालीनविशेषदर्शन विषयविरुद्धविषयभ्रमत्वमेवावच्छेदकमस्तुलाघवादितिचेन्न, विशेषदर्शनोत्तरकालोत्पन्नसोपाधिकभ्रमस्य विशेषदर्शनंविनाप्युपाधिनिवृत्त्यैवनिवृत्तिदर्शनेन व्यभिचारेण तस्यानवच्छेदकत्वात्तदर्थमुपाधिनिवृत्त्यनिवर्त्यत्वेनवा विशेषदर्शनासमानकालीन सामग्र्यनिवर्त्यत्वेनवा विशेषणेगौरवात् । किञ्च विशेषदर्शनविषयविरुद्धविषयभ्रमत्वस्यावच्छेदकत्वे संयोगाद्यवच्छेदकमूलाद्यवच्छेदेन संयोगाभावभ्रमस्य तदवच्छेदेन संयोगवत्त्वव्याप्यदर्शनानिवर्त्यत्वापत्तेः, विशेषदर्शनविषयमूलादिगतधर्मविरोधित्वाभावाद्भ्रमविषयसंयोगाभावस्य । आमवटे रक्तभ्रमस्यच रक्तत्वाभावनिरूपितकालिकव्याप्तिमादाय यदामत्वादि विशेषदर्शनं तेनानिवर्त्यत्वापत्तिः, विशेषदर्शनविषयामत्वादिविरोधित्वाभावाद्भ्रमविषयरक्तत्वस्य । पाकानन्तरं तत्रैवरक्तत्वोत्पत्तेः । विशेषादर्शनजन्यत्वंतु तत्राप्यस्तीतिनास्मन्मतेदोषः । नचविशेषदर्शनविषयेणसहैकस्मिन्काले एकावच्छेदेन सहानवस्थायिविषयकभ्रमत्वमेवावच्छेदकमितिदोषद्वयनिस्तारः, एतद्वृक्षत्वादेर्मूलावच्छेदेन संयोगव्याप्यत्वग्रहे तद्दर्शनस्यमूलावच्छेदेन संयोगाभावभ्रमविरोधित्वात्, तत्रचैकावच्छेदेनसहानवस्थायित्वस्याप्यभावात् । घटत्वस्यचदशाविशेषे रक्तत्वाभावव्याप्यत्वग्रहे तद्दर्शनस्यतद्दशायां रक्तत्वभ्रमविरोधित्वात्, तत्रचैककाले सहानवस्थायित्वस्याप्यभावात् । किञ्च त्वन्मते स्फटिकत्वादिविशेषदर्शनेन लौहित्यभ्रमस्यप्रतिबिंबस्थलइव निवर्त्यत्वंवाच्यं, तत्रच

परंपरासंबंधेन लौहित्यस्यस्फटिकेसत्त्वाद्विरोधाभावान्ननिवर्तकतास्यात्। ननूपाधिनिवृत्त्याद्यनिवर्त्यत्वादिना नविशेष्यते, किन्तु विशेषदर्शनाव्यवहितपूर्वक्षणवर्तित्वेन, अतोनगौरवं। यदप्युक्तं "विशेषदर्शनविषयविरुद्धविषयभ्रमत्वस्यावच्छेदकत्वइत्यादि" तदपिन, विशेषदर्शनविषयपदेन व्याप्यत्वेन गृह्यमाणव्यापकस्य विवक्षितत्वात्, एतद्वृक्षत्वस्यसंयोगविशेषोव्यापकः। यदपि "किञ्चत्वन्मते" इत्यादि, तदपिन भ्रमविषयसंबधेनाविरोधित्वस्यविवक्षितत्वात्, भ्रमविषयसाक्षात्सम्बन्धेन लौहित्यस्यापिस्फटिकत्वादिविरुद्धत्वाक्षितिचेत्। उच्यते, यत्रसोपाधिकभ्रम द्वितीयक्षणोत्पन्नोपाधिनिवृत्तिमात्रेण तृतीयक्षणेभ्रमनिवृत्तिः तत्क्षणएवविशेषदर्शनं-चोत्पद्यते तद्भ्रमेउक्तनिवर्त्यतावच्छेदकस्य सत्त्वेनव्यभिचारात्, तदर्थविशेषदर्शनाव्यवहित पूर्वक्षणोत्पत्तिकत्वंवक्तव्यम्, उत्पत्तिश्चस्वसमानकालीनपदार्थ प्रतियोगिकध्वंसानाधारसमय सम्बधः। अव्यवहितत्वंचवि विशेषदर्शनानधिकरण क्षणानन्तरितत्वम्। पूर्वक्षणश्चप्रागभावावच्छिन्नक्षणः। व्यापकत्वंच प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्न स्वसमानाधिकरणात्यन्ताभावा प्रतियोगित्वम्। तथाचविशेषदर्शन क्षणाव्यवहितपूर्वक्षणोत्पत्तिकत्वे सति विशेष (दर्शनविषय) व्यापकेनसहैकस्मिन्कालएकावच्छेदेन भ्रमविषयसम्बन्धेन सहानवस्थायिविषयकभ्रमत्वापेक्षया विशेषदर्शनकालीन विशेषादर्शनजन्यभ्रमत्वस्यैव लघुत्वेनावच्छेदकत्वात्। किंचविशेषदर्शनंविना प्युपाधिनिवृत्तया निवृत्तिदर्शनेन सोपाधिकभ्रमत्वावच्छेदे नोपाधिनिवृत्तेर्निवर्तकत्वकल्पनात् तदभावादेवभ्रमानिवृत्त्युपपत्तौ नतत्रप्रतिबन्धकल्पना। नचव्यासङ्गादिनापिसोपाधिकभ्रमनिवृत्तेर्व्यभिचारः, व्यासङ्गाद्यजन्यत्वेन विशेषणात्। किंचविशेषदर्शनस्यप्रतिबिम्बभ्रम निवर्तकत्वे श्वैत्यानुमितेरपि 'शङ्खपीतत्वभ्रमनिवर्तकत्वापत्तिः। नचततस्तन्निवृत्त्य दर्शनादेवानिवर्तकत्वं, लाघवाद्विशेषदर्शनविषयविरुद्धविषय भ्रमत्वेननिवर्त्यत्वकल्पनात् तदनुसारेणप्रतिबिम्बस्थलइवात्रापि विशेषसाक्षात्कारत्वापेक्षया विशेषज्ञानत्वेन निवर्तकत्वकल्पनेलाघवात् तदनुसारेण प्रतिबन्धककल्पनोपपत्तेः। नचेष्टापत्तिः, प्रपंचभ्रमनिवृत्त्यर्थं शाब्दापरोक्षाङ्गीकार विरोधात्। नचापरोक्षेत्र ह्मणिपरोक्षज्ञानासम्भवा च्छाब्दज्ञानस्यापरोक्षत्वाङ्गीकारः अपरोक्षेपिव ह्नौसिषाधयिषयानुमितिदर्शनात्। विस्तरस्तु शब्दजन्यापरोक्षभङ्गे द्रष्टव्यः। तस्माद्विशेषदर्शनकालीन विशेषादर्शनजन्य भ्रमत्वमेवावच्छेदकं।

ननुमूलावच्छेदेन संयोगभ्रमे अग्रावच्छेदेन तदभावव्याप्यदर्शने तद्भ्रम निवृत्त्यापत्तिरितिचेन्न, स्वाभावजन्यभ्रमंप्रति विशेषदर्शनस्यनिवर्तकत्वात् । नचविशेषादर्शनस्य हेतुत्वेमानाभावः । विशेषादर्शनहेतुदोषाणामेव-भ्रमहेतुत्वादितिवाच्यम्, विशेषदर्शनस्य प्रतिबन्धकत्वेन तदभावस्य-कारणत्वावश्यम्भावात् । प्रतिबन्धकाभास्य कारणत्वाभावमतेच विशेषादर्शनप्रयोज्यत्वंविवक्षितम् । यत्तूक्तंविशेषादर्शनं नकारणं,स्वनृत्तिविशेषदर्शनस्यासार्वत्रिकत्वेन तदभावस्यापि सर्वत्रभ्रमस्थलेऽसम्भवात् । परकीयविशेषदर्शनाभावस्याति प्रसक्तत्वादिति, तन्न, सिषाधयिषाविरहावाच्छिन्नसिद्ध्यभावस्यानुमिताविव :अप्रामाण्यशङ्काशून्यविशेष दर्शनत्वावच्छिन्नसामान्याभावस्यैव हेतुत्वात् । अप्रामाण्यशङ्काक्रान्त विशेषदर्शनेसत्यपि भ्रमानिवृत्तेः । अथवा विशेषदर्शनप्रतिबन्धक दोषजन्यत्वमेवावच्छेदकमस्तु । ननुप्रतिबन्धकत्वस्य कारणीभूताभाव प्रतियोगित्वात्मकतया कारणत्वस्यचानन्यथा सिद्ध्यादिघटितत्वेनगौरवम् । विशेषदर्शनाविषयेत्यादि मदुक्तावच्छेदकन्तु लघ्विितिचेन्न । प्रकृतेकारणत्वस्य नियत-पूर्ववर्तित्वस्य विवक्षितत्वात् । कार्यानुत्पादव्याप्यत्वंवा प्रतिबन्धकत्वम-त्रविवक्षितम् । तथाचोपाधिनिवृत्त्याद्यनिवर्त्यत्वादि विशिष्टत्वदुक्ताव-च्छेदकापेक्षया लाघवादिदमेवावच्छेदकमस्तु । वस्तुतस्तुपूर्वभ्रमोविशेष दर्शनेन विरोधिगुणतया निवृत्तइतिनतत्रप्रतिबन्धः । अतोविशेषदर्शनस्योत्तरज्ञानप्रतिबन्धकत्व मुपाधेश्चोत्तेजकत्वमिति पर्यवसितम् । तथाचनेदं प्रकृतार्थनिदर्शनम् । यदप्युक्तं परेषामप्यात्मनि शरीराभेदबुद्धिर्निरुपा-धिकभ्रमएव, उपाध्यन्तराभावात् । तथाच यदितत्वज्ञानम्प्रातिबन्धान्नभ्रमं निवर्तयतीतिनोच्येत तदाकथंपरेषां शास्त्रारम्भस्स्यात् । नचेश्वरसाक्षा-त्काराभावात्तत्र भ्रमोननिवर्तते ननुप्रतिबन्धादितिवाच्यम्, ईश्वरसाक्षात्कारस्यभिन्नविषयस्य साक्षात्तदनिवर्तकत्वात् । जीवसाक्षात्कारस्त्विदा-नीमपिविद्यतएव । ईश्वरसाक्षात्कारस्याप्यलौकिकस्य इदानीमपिसत्त्वात् । लौकिकस्यपश्चादप्यभावात् । तस्मात्तत्रात्मज्ञानं केनचित्प्रतिबद्धं सन्नभ्रमं निवर्तयतीति वक्तव्यमित्यस्मन्मतेपि तत्तथेति । अत्रब्रूमः, स्वात्मतत्वसा-क्षात्कारोमिथ्याज्ञान प्रागभावासहवृत्ति मिथ्याज्ञाननिवृत्तिहेतुः , ईश्वर-साक्षात्कार आत्मतत्वसाक्षात्कारद्वारा मिथ्याज्ञान निवृत्त्युपयोगीत्येकन्मतं

अदृष्टद्वारात्मतत्वसाक्षात्कारस्य सहकारीत्यपरम्, मतद्वयेपीदानीं-विशेषदर्शनस्य सत्त्वेपि मिथ्याज्ञानप्रागभावासहवृत्ति मिथ्याज्ञानध्वंसत्वा वच्छेदेन देहादिभेदप्रकारकात्मतत्वसाक्षात्कारत्वावच्छिन्नस्य कारण-त्वोपगमेन तादृशसाक्षात्कारस्य श्रवणादिसाध्यस्य ततः प्रागसिद्धेः सा क्षात्परम्परयावा मिथ्याज्ञाननिवृत्तिप्रयोजकीभूतस्येश्वर साक्षात्कारस्याभा-वाच्च तादृशमिथ्याज्ञानानिवृत्त्युपपत्तौ नात्रप्रतिबन्धकापेक्षा । नचेश्वर-साक्षात्कारोऽलौकिक इदानीमप्यस्ति, लौकिकः पश्चादपिनास्तीतिवाच्य म्। श्रवणादिपर्वक्रमोत्पन्न योगजधर्मजन्यसाक्षात्कारस्य तद्धेतुत्वात्, इदा-नींचतदभावात्। किंच-भेदवासनायाः कथमविद्यानिवृत्ति प्रतिबन्धकत्वं मानाभावात्, प्रहरपर्यन्तं रजतवासनानुवृत्तावपि शुक्तिज्ञानेनशुक्त्य-ज्ञाननिवृत्तिदर्शनात्। कथञ्चश्रवणादीनां भेदवासनानिरासकत्वं माना भावात्, रजतज्ञानानन्तरं बहुतरशुक्तिज्ञान सन्तानेसत्यपि शुक्ति-संस्कारानुद्बोधदशायां तद्रजतमितिस्वरूपस्मृति दर्शनेन ध्यानसन्तान-स्यविपरीतसंस्कारनिवर्तकत्वासिद्धेः । किंच किंनिदिध्यासनस्या दृष्ट द्वाराभेदवासनानिरासकत्व मुतआहत्य, नाद्यः- त्रिचतुरस्मृतिसन्तानेनैव-तत्सिद्धौ बहुकालध्यानवैय्यर्थ्यप्रसङ्गात्, अपसिद्धान्ताच्च । नद्वितीयः-प्राथमिकस्मृतिव्यक्त्यैव तद्विपरीतवासनानिरासे उत्तरवैय्यर्थ्यप्रसङ्गात्। नचैकव्यक्तेरेकवासना निवर्तकत्वमेवेतिवाच्यम्, तथासत्यनादिभ्रमवा सनानामानन्त्येन कदाप्यनिवृत्त्यापत्तेः। किंचप्रतिबन्धनिरासार्थत्वे किं म्मानम्, अप्रतिबद्धज्ञानोद्देशेन श्रवणादिविधानमितिचेन्न, "द्रष्टव्य" इतिद र्शनमात्रस्यैवोद्देश्यत्वप्रतीतेः। किंचाप्रतिबद्धज्ञानार्थत्वं श्रवणस्य नप्राप्तं, नापिद्वैतवाक्यविचारादि साधनान्तरस्येति नियमविधिर्नस्यात। किंच अप्रतिबद्धज्ञानंफलमित्यत्र किंप्रतिबन्धकाभावविशिष्टं फलत्वेनविवक्षितम्, उत प्रतिबन्धकाभावकालीनत्व मवच्छेदकमिति, नाद्यः । सविशेषणेही तिविशेषणमात्रपर्यवसानात्। नद्वितीयः। प्रतिबन्धकाभावकालीनत्वस्य -प्रतिबन्धकाभावसामग्रीमहिम्नैवोपपत्तौ सामग्र्यन्तरानपेक्षणात् । तथा चप्रतिबन्धकाभावोद्देशेन विधाने श्रुतहानाश्रुतकल्पनाप्रसङ्गइति ॥

यच्चतृतीयम्मतम् - ": यद्यपि प्रथमंनिर्विशेषब्रह्मसाक्षात्कारश्शब्दान्निष्प न्नः, तथापिसोनवधारणएव अग्रेसंशयदर्शनात्। नन्वेककोटिकज्ञानमात्रं नि-

श्चयएवेति न संशयस्स्यादितिचेन्न, नतावन्निश्चयत्वं जातिः चाक्षुषत्वादि-नासाङ्कर्यात् । त्वन्मतेजातेरव्याप्यवृत्तित्वाभावेन धर्मिज्ञानांशेतदभाव प्रस-ङ्गाच्च । धर्मिज्ञानांशेतदभावप्रसंगादेव नसंशयान्यज्ञानत्वम् । अतएवनसं-शयत्वाभाववत्त्वं, धर्मिज्ञानस्य संशयाभिन्नत्वेन तदभावात् । न.पिधर्म्यंशे तदभावः, ज्ञानेंशाभावात् । नचधर्मिविषयत्वावच्छेदेन तदास्तिता, ज्ञान स्वरूपस्याविषयित्वस्य ज्ञानमात्रतया विरुद्धधर्मद्वयासम्भवात् । अन्यथा-संशयेप्येकैककोट्यंशे परस्परविरुद्धोभयप्रकारकत्व लक्षणसंशयत्वाभावे नानिश्चयत्वापत्तेः । नचस्वप्रकारीभवद्धर्म विरुद्धप्रकारक ज्ञानाभिन्नज्ञान-त्वंसंशयत्वं, तच्च तत्राप्यस्तीतिवाच्यम् । संशयाभिन्नधर्म्यंशज्ञानेपि त त्सत्वात् । नचतद्विरुद्धप्रकारक ज्ञानत्वेसतीति विशेषणान्नातिप्रसङ्गइति-वाच्यं । समूहालम्बनव्यावृत्त्यर्थमेक विशेष्यकत्वस्याप्यावश्यकत्वे एक-विशेष्यकत्वेसति स्वप्रकारीभवद्धर्मविरुद्ध प्रकारकज्ञानाभेदेसति त-ज्ज्ञानप्रकारविरुद्ध प्रकारत्वापेक्षया लाघवेनस्वविषये स्वाकारतद्विरु द्धद्वयवैशिष्ट्यावगाहिज्ञाना विरोधिज्ञानत्वस्यैव संशयशब्दार्थत्वात् । ननुस्वप्रकारकोटिक संशयान्यत्वं निश्चयत्वं, तच्चकोट्यंशेनास्ति, धर्म्यं शेत्वस्तीतिसनिश्चयइति, तन्न परमते इदन्त्वस्य केवलान्वयितया तत्प्रका रकसंशयाप्रसिद्धेः । तस्मात् यज्ज्ञानंयत्संशयनिवृत्त्यनुकूल स्वरूप-विशेषवत् तत्तन्निश्चयः इतरत्तुनतथेत्येककोटिकमपिकिंचि त्पुरुषदोषाद नवधारणं, किंचित्तु तर्कादिकारणमहिम्नातदनतिरिक्तविषयमपिनिश्चय-इत्यनवद्यम् । नन्वेवमपि न निर्विशेषब्रह्मजिज्ञासाभवितुमर्हति संश-यविरोधिज्ञानंहीष्यते, तच्च संशयसमानप्रकारकं । निर्विकल्पकादिद्वमि-तिज्ञानाच्चसंशयानिवृत्तेः, निर्विशेषेब्रह्मणितदभावात् । नच कल्पितप्र-कारोस्तीतिवाच्यम् । तत्रावेदकश्रुतिजन्यज्ञानस्यतदविषयत्वादितिचेत् मैवं ज्ञानंहिसमानविषयतयावधारणात्मकं संशयंनिवर्तयति, नतु समा नप्रकारकतया , अन्यविषयात्तददर्शनात् । समानविषयत्वमप्यपे क्षणीयमितिचेत् संशयादपिप्रसंगः । निश्चयत्वमप्यपेक्षितमितिचेत् , त र्हि समानविषयनिश्चयोनिवर्तकः लाघवात् , निर्विकल्पकन्तुनास्त्येव, अनवधारणत्वादपिनतन्निवर्तकं । इदमितिज्ञानं तु घटत्वादिवैशिष्ट्याविषयकत्वान्न तत्संशयंनिवर्तयति । अन्यथा अयंघटइति ज्ञानात्तद्दोचरेव-

ष्टत्वे इदंघटत्वंनवेतिसंशयोननिवर्तेत । तस्मिन् घटत्वव्यतिरिक्तप्रका-
राभावात् । अनभ्यासदशायां जलेसंशयोऽपिनस्यात् । किंचैवंप्रमेयवा-
निति ज्ञानात्त्वदभिमतनिश्चयाद्घटत्वप्रकारकसंशयनिवृत्त्यापत्तिः। तत्र-सा
मान्यधर्मप्रकारकत्वं प्रतिबन्धकंचे दिदमितिज्ञानेऽपि तथाभविष्यती "ति।

तदप्यनेननिरस्तं - विदिताविदिताकारभेदाभावात् । नहिकेनचिदा
कारेणधर्मिनिश्चयाभावे अविदिताकारज्ञानस्येष्यमाणत्वाभावेच इदं कि-
मित्यादिप्रश्नहेतुजिज्ञासासंभवः । नचब्रह्म केनचिदाकारेणनिश्चितम् ।
किंच नित्यानित्यवस्तुविवेकं साधयन्नयायोपबृंहितवाक्येनैव नित्यानं
दत्ववधारणमवोचः । आप्रनुष्यादाब्रह्मलोकं कर्मकार्यं " कर्मणापितृ
लोकोविद्ययादेवलोक " इतिश्रुतेः । विद्याचात्मोपासना । साचविहि
ततयाकर्तृपरतंत्राक्रियैव । कार्यंसर्वमनित्यमेव घटादिवत् । " तद्यथेह
कर्मचितोलोकःक्षीयते एवमेवामुत्रपुण्यचितोलोकःक्षीयते " इतिश्रुतेश्च ।
आत्माचनित्योमोक्षवादिभिस्सर्वैरभ्युपेयः । सचपरमप्रेमास्पदत्वात् " ए-
षोस्यपरमआनंदः " इतिश्रुतेश्चानन्दइति । तेनहिश्रवणादेः प्रागुत्पन्न-
ज्ञानस्यानवधारणत्वकथनंविरुध्यते । अथ नित्यानंदाद्यंशावधारणत्वांगी
कारेऽपि तेनाभेदाद्वितांशानवधारणं न विरुध्यतइतिचेत् । हन्त किंब्र-
ह्मणस्सावयवत्वमवयवसंघातात्मकत्वं सधर्मकत्वंवांगीकरोषि, येनै
वंब्रूयाः । अपिच नित्यानंदात्मकत्वं किंजीवस्य उतब्रह्मणः, नाद्यः - त-
दभेदस्यासाध्यत्वात् अपुरुषार्थत्वात्तद्दर्शनेनेतर वैराग्यासिद्धिप्रसंगात् ।
" ब्रह्मवेदब्रह्मभवती " तिब्रह्माभेदस्यैव पुरुषार्थत्वश्रुतेश्च । द्वितीये जी
वब्रह्मणोरभेदज्ञानेन भवितव्यमेव । तच्चाभेदज्ञानमज्ञस्य सर्वज्ञत्वादिभे
दज्ञाने जाग्रतिनोत्पद्यतइति, तन्मिथ्यात्वज्ञानमपि तदानीं मावश्यकमेव ।
ननु विद्यतएवाभेदज्ञानंमिथ्यात्वज्ञानंच । तदनवधारणरूपमित्युक्तमिति
चेन्न - ततोमुमुक्षानुपपत्तेः । अनवधारणादपि मुमुक्षाभवत्येवेतिचेत्,
तर्हि नित्यत्वानन्दत्वादिज्ञानमप्यनवधारणमेवास्तु । तथैवेष्यतइतिचेत्.
तर्हि नित्यानित्यवस्तुविवेकस्यन्यायसाचिव्योक्तिविरोधः । नचन्यायसा
च्यस्यापिज्ञानस्य संशयनिवर्तकस्यानवधारणत्वं वक्तुंशक्यम् । किंच यथा-
नन्दत्वादौन्यायावतारः तथा अभेदमिथ्यात्वयोरपि श्रवणात्प्रागेव स्वंकु,
मतिकल्पितदुर्न्यायावतारस्सुलभ इति तदवधारणंच स्यादेव । किंचास्मि

न्यक्षेमननानन्तरभाविज्ञानस्यैव संशयविरोधित्वयावधारणत्वा ततएवा विद्यानिवृत्तौ किंनिदिध्यासनेन । अवधारणस्योत्पन्नत्वेन तत्प्रतिबन्धक-कल्मषनिवर्तकत्वेनोपयोगस्य वक्तुमशक्यत्वात् । कल्मषनिवृत्तेर्ज्ञानात्पूर्वमेवभावात् । नचात्रापिपक्षे जातेप्यवधारणेऽविद्यानिवृत्त्यनुत्पत्ते स्तत्प्रतिबन्धकभेदवासनानिरासकत्वेनोपयोगोवक्तुं शक्यः । तथात्वे प्राथमिकज्ञानस्यावधारणत्वेपि मननानन्तरमिव प्रतिबन्धाद्ज्ञानानिवृत्त्युपपत्त्या तदनवधारणत्वकल्पनवैयर्थ्यात् । नचानवधारणत्वकल्पनं नप्राथमिकज्ञाना दविद्यानिवृत्त्यभावाय, किंत्वनभ्यासदशायां जलादिज्ञानस्थलइवोत्तरकालं संशयोपपत्तयइति वाच्यम् । तत्र तथात्वेप्यनाहितसन्देहोपपत्तेरनवधारणत्वाकल्पनात्, वाक्यान्तरात्प्रमाणान्तराद्वाभेददर्शनस्यतदाधायकत्वात् । भेददर्शनाभावेच संशयस्यैवासिद्धेः । जलादिज्ञानस्थलेप्याहितसन्देह इतिवक्ष्यते । नचाहितसन्देहस्यैवापह्नवश्शक्यः, अप्रयोजकत्वसंदिग्धोपाध्यादीनां संशयाधायकत्वात् । निश्चयेसत्यपित्वस्यदोषजन्यत्वाद्विशंकयार्थसंशयस्यानुभवसिद्धत्वाच्च । किंच एककोटिकज्ञानस्य निश्चयत्वानवधारणत्वमनुपपन्नं । अत्र यदुक्तं – नलावन्निश्चयत्वं जातिरित्यादिना संशयनिवृत्त्यनुकूलस्वरूपविशेषत्वातिरिक्तस्य जात्यादिरूपस्य निश्चयत्वस्य स्वविषये स्वाकारतद्विरुद्धद्वयवैशिष्ट्यावगाहिज्ञानाविरोधिज्ञानत्वातिरिक्तस्य संशयत्वस्य च वक्तुमशक्यत्वात्, प्राथमिकज्ञानेनिश्चयत्वाभावस्या नवधारणत्वात्मकसंशयत्वस्य चोपपत्तिरिति, तन्न–निश्चयत्वस्य जातित्वेबाधकाभावात् । नचचाक्षुषत्वादिना सांकर्य । कत्वादि व्याप्यतारत्वादिवदुपपत्तेः । नन्वेवं निश्चयपदं नानार्थंस्यात्, तारपदस्यतुननानार्थता, सजातीय साक्षात्कारप्रतिबन्धकतावच्छेदकरूपत्वेनानुगतीकृतजातीनां प्रवृत्तिनिमित्तत्वादितिचेन्न, इष्टत्वात् । अत्राप्येककोटिकत्वाद्यभिव्यंग्यजातित्वादि तादृशधर्मान्तरसंभवाच्च । नचसंशयेधर्म्यंशे निश्चयत्वाभावप्रसंगः, जातेरव्याप्यवृत्तित्वाभावादितिवाच्यम् । निश्चयत्वस्य तत्रसत्वेप्यव्याप्यवृत्तित्वप्रसंगाभावात् । नहि संशयत्वसामानाधिकरण्यमात्रादव्याप्यवृत्तित्वं, किंतु स्वात्यन्ताभावसामानाधिकरण्यात् । ननुकोट्यंशेसंशयत्वात्तदंशेनिश्चयत्वाभावात् स्वात्यन्ताभावसामानाधिकरण्यंस्यादितिचेन्न, संशयत्वनिश्चयत्वयोर्द्वैरूप्यत्वघ-

ष्टत्ववद्देवत्रवृत्तेरिष्टत्वात् , संयोगतदभावयोरिवावच्छेदकभेदेनवृत्त्यंगीक राात् । यद्येवंधर्म्यंशेनिश्चयइति व्यवहारोनस्यात् , किंच संशयानन्तरं संशयोनस्यात् , पूर्वसंशयस्यैवतन्निश्चयत्वादितिचेन्न । धर्मितावच्छेदक-विषयत्वाभिव्यंग्य जातिमत्त्वेन तन्निश्चयत्वव्यवहारात् । ननु धर्मितावच्छेदकविषयत्वंननिश्चयत्वाभिव्यंजकं, एककोटिकत्वंह्यभिव्यंज-कमुक्तं, तच्चैकमात्रकोटिकत्वमेव अन्यथा एकशब्दवैयर्थ्यात् । तथाच संशयेतदभावात्कथंतदभिव्यक्तिरितिचेन्न, एकमात्रकोटिकत्वंहि – किंचि त्प्रकारकत्वेसति तद्विरुद्धाप्रकारकत्वं । तथाच संशयस्यापिधर्मितावच्छे दकप्रकारकत्वेसति तद्विरुद्धाप्रकारकत्वस्य सत्त्वान्निश्चयत्वाभिव्यक्तिस्सं भवत्येव । यद्वा – धर्मितावच्छेदकैककोटिरेवविषयतयासंबन्धाभिव्यंजि-का, इतरनैरपेक्ष्येणाभिव्यंजकत्वमेकशब्देनविवक्षितम् , ततश्च धर्मिता-वच्छेदककोट्यभिव्यंग्यत्वात्तन्निश्चयत्वव्यवहारः । संशयत्वंच – स्वप्रकार-विरुद्धप्रकारकत्वाभिव्यंग्यनिश्चयत्वव्याप्यजातिविशेषः । सच यत्प्रका-रविरुद्धप्रकारकत्वाभिव्यंग्यस्तत्संशयइतिव्यवहारः । यद्वा –निश्चयत्वंध-र्मितावच्छेदकावच्छिन्न धर्मितत्संबन्धितावच्छेदकं , संशयत्वन्तु विरु द्धकोटिसंबन्धितावच्छेदकं । तेन यत्संबन्धितावच्छेदकं निश्चयत्वं त न्निश्चयत्वव्यवहारः । यत्संबन्धितावच्छेदकं संशयत्वं तत्संशयत्वव्यवहा रः । तथाच न संशयानन्तरं संशयानुत्पत्तिप्रसंगोऽपि तन्निश्चयस्यैव तत्सं शयनिवर्तकत्वात । संशयान्यत्वं निश्चयत्वमित्यत्रापि नकिंचिद्बाधकम् । नच धर्म्यंशे निश्चयत्वाभावप्रसंगः, त्वयैव वृक्षादावप्यौपाधिकभेदेन त दुभयप्रतीतेरित्यादिनाऽवच्छेदकभेदादवच्छिन्न भेदांगीकारात् । तद्वदे व धर्मिविषयत्वावच्छेदेन संशयान्यत्वोपपत्तेः । संशयत्वाभाववत्त्वं नि श्चयत्वमित्यत्रापि नदोषः, ज्ञानेंऽशाभावेनांशभेदेन वृत्त्यसंभवेपि धर्मिवि षयत्वाद्यवच्छेदेन संशयत्वतदभावोपपत्तेः । नच विषयित्वस्य ज्ञानमा त्रतया विरुद्धधर्मद्वयासंभवा दवच्छेदासंभवः । घटादेराकाशसंबन्धमात्रे णाकाशावच्छेदकत्ववद्विषयस्यैव ज्ञानसंबन्धिनो ज्ञानेऽवच्छेदकत्वोपप त्तेः । धर्म्यवच्छिन्नएव संशयत्वात्यन्ताभावसंभवात् । यद्येवमवच्छेदक भेदेन वृत्तिरिष्यते तर्हि विरुद्धोभयप्रकारकत्व लक्षणसंशयत्वाभावएकै ककोट्यंशेऽपि स्यादितिचेन्न । स्वप्रकाराभिवद्धर्मविरुद्ध प्रकारकज्ञानाभि

त्रज्ञानस्यैवसंशयत्वात् । नच समूहालंबनेतिव्याप्तिः,एकविशेष्यकत्वेन वि
शेषणात् । नन्वेवमपि धर्म्यंशेतिव्याप्तिवारणाय तज्ज्ञानप्रकारविरुद्धप्रका
रकत्वमपिवाच्यम् , तथाचैकविशेष्यकत्वेसति स्वप्रकारीभवद्धर्मविरुद्ध
प्रकारकज्ञानाभेदेसति तद्विरुद्धप्रकारकत्वापेक्षया, लाघवात् स्वविषये
स्वाकारतद्विरुद्धद्वय वैशिष्ट्यावगाहिज्ञानाविरोधि ज्ञानत्वमेवसंशयत्वमि
तिचेन्न,तदपेक्षया एकविशेष्यकत्वेसति स्वप्रकारीभवद्धर्मविरुद्धप्रकारकज्ञा
नाभिन्नत्वस्यैवलघुत्वात् । उभयत्रज्ञानपर्यंततुल्यम् । अविरोधित्वस्याप्रतिबंध
कत्वात्मकत्वेऽनिवर्तकत्वात्मकत्वेच तदपेक्षया भेदाभावमात्रंलघुभवत्येव ।
ननुतत्रधर्म्यंशेऽतिव्याप्तिवारणार्थं तद्विरुद्धप्रकारकत्वं विशेषणंदेयमित्युक्त-
मितिचेन्न । स्वशब्दोहि नज्ञानपरः, किन्त्वभिन्नपरः, ततश्च नधर्म्यंशेतिव्या
प्तिः । किंच त्वयापि धर्म्यंशेतिव्याप्तिवारणार्थं विशेषणंदेयमेव, तस्य स्वप्र
कारीभूत किंचित्कोटि तद्विरुद्धकोट्यन्तर वैशिष्ट्यावगाहि ज्ञाना
विरोधित्वात् । यदिच तत्र धर्मिज्ञानस्य संशयाभिन्नत्वादनातिप्रसंगं प
श्यसि, कुतस्तर्हि तस्मिंल्लक्षणेतच्चक्षुर्निमीलयसि । नहि क्वचिल्लक्षणेम
न्मतानुसारः कार्यः, क्वचित्त्वन्मतानुसारइति क्वचिद्विधिमर्यादा । यद्वा
स्वाभिन्नप्रकार विरुद्धप्रकारकत्वमेव लक्षणमस्त्विति नकश्चिद्दोषः । किं
च स्वविषये स्वाकारेत्यत्र स्वशब्दद्वयं ज्ञानपरं, तदविरोधिपरंवा? पूर्वस्वप
दमविरोधिपरमुत्तर स्वपदं ज्ञानपरमितिवा? नाद्यः – स्थाणुत्वादि संशया
विरोधिन्ययं घट इति ज्ञानेतिव्याप्तेः । नच तस्यापि तादृशघटत्वादिसंश
यविरोधित्वान्न तत्रातिव्याप्तिरितिवाच्यं । अयं क्षणिकोवा क्षणिकविशेष
गुणवान्वेति संशयेव्याप्तेः । नच स्वविषये स्वाकारतद्विरुद्धद्वय वैशिष्ट्या
वगाहिज्ञानाविरोधित्वं यदंशे तदंशे संशयत्वमितिवाच्यम् । केवलान्वयि
प्रमेयत्वादि प्रकारकज्ञानस्य प्रमेयत्वाद्यंशे संशयत्वापातात् तत्कोटिकसं
शयाभावादन्यकोटिक संशयंप्रत्यविरोधित्वात् । कथंचित्तत्कोटिक संश
योपपादनेच स्वप्रकारकोटिकसंशयान्यत्व लक्षणस्याप्रसिद्ध्या दूषणा
नुपपत्तेः । यत्प्रकारकसंशयः कदापि नास्ति तादृशोत्पन्नविनष्टादिव्य
क्तिविशेषनिष्ठ धर्मविशेषप्रकारक निश्चयेऽतिव्याप्तेः । अतएव नतृती-
यः । नापिद्वितीयः – प्रमेयमिदंजलमित्यनवधारणात्मकत्वदभिमतसंशये
प्रमेयांशेतिव्याप्तेः । व्यक्तिविशेषनिष्ठ यद्धर्मप्रकारकद्विकोटिसंशयः

कदापि नास्ति तद्धर्मप्रकारकत्वदभिमतैक कोटिकसंशयेऽव्याप्तेः । तस्या नवधारणत्वंच त्वद्रीत्याउत्तरकालं प्रामाण्यसंशयाद्वगम्यते । किंच पर्वतोवह्निमानित्यत्र स्वविषयेवह्नौ स्वप्रकारीभूतवह्नि तद्विरुद्धवह्न्यभाव प्रकारक ज्ञानाविरोधित्वात्संशयत्वापत्तिः । तदनन्तरं वह्निर्वाह्निमान्नवेति संशयदर्शनात् । ननु तस्य पर्वते वह्निसंशयविरोधित्वात् स्वप्रकारवि रुद्धप्रकारकज्ञानविरोधित्वस्य सत्त्वान्नतद्भावइतिचेत्तर्हि अयंक्षणिको-वाक्षणिकविशेषगुणवान्वेति सन्देहेऽव्याप्तेः । तस्य विशेषगुणक्षणिकत्व संशयविरोधित्वात् । ननु यदंशेस्वाकारतद्विरुद्धाकारद्वय वैशिष्ट्याव गाहिज्ञानाविरोधित्वं तदंशे संशयत्वं, तेन विशेषगुणांशे क्षणिकत्वसंश यविरोधित्वान्न संशयत्वं । आत्मादिधर्मिणिच संशयत्वमितिचेत् , एवं त र्हि पर्वतोवह्निमानिति ज्ञानस्य वह्न्यंशे वह्निसंशयत्वापत्तिः, तत्र वह्निप्रका रकसंशयाविरोधित्वात् । स्वाकारविशेष्ये तदाकारतद्विरुद्धद्वय वैशि ष्ट्यावगाहिज्ञानाविरोधित्वं तदंशेसंशयत्वमितिचेन्न । एवंसति निर्विशेष ब्रह्मसाक्षात्कारस्य निष्प्रकारकतया विशेष्याभावेन उक्तलक्षणस्य त त्रासंभवात् । किंच द्वितीयपक्षे आकारः किंप्रकारोविवक्षितः, उतघटा-कारकवृत्तिरित्यादि त्वद्रीतिसिद्धज्ञानाकारोवा, नाद्यः – ब्रह्मसाक्षात्कारत दसिद्धेः । नान्त्यः– स्वविषये स्वाकारावगाहनस्याभावात् .

वस्तुतस्तु वस्तुतोविरुद्धप्रकारकत्वविवक्षाया मविरोधभानदशायां स्थाणुः पुरुषश्चेति निश्चयस्यापि संशयत्वापत्तेः, भासमानविरोधाश्रयप्र कारकत्वेविवक्षणीये असंभवएवस्यात् । विरोधेभासमाने एकत्रधर्मद्वय वैशिष्ट्यावगाहिज्ञानायोगात् । अन्यथा संशयसामग्रीतएव परस्परविरु द्धस्थाणुत्वपुरुषत्ववानिति प्रतीत्यापत्तेः । किञ्चानुमित्युपनीत श्वैत्यवि षयकस्य शङ्खपीतत्वज्ञानस्य श्वेतश्शङ्खःपीतइत्याकारकस्य विरोधविषयक स्यापि संशयत्वप्रसङ्गात् । तर्हि किंकुर्मः किंचिद्विरुद्धविषयं किंचिद्वा विरुद्धविषयमनुभूयतइतिचेत् । विरुद्धविषयत्व तदयोग्यत्वोपपादकं इक्षुक्षीरादिमाधुर्यवदनुभवसाक्षिको विषयीकरणविशेषएव वैलक्षण्यमि त्यंगीकुरुतं । ततश्च विषयीकरणविशेषावेव संशयत्वनिश्चयत्वे । किंच एककोटिकज्ञाने संशयत्वानुभवः कस्यापि नास्त्येव , प्रत्युतएककोटि कज्ञानानन्तरं द्विकोटिकसंशयोत्पत्तिपर्यन्तम्मम निश्चयोजातइत्येव व्य

वइरति । द्विकोटिकसंशयोत्पत्त्यनन्तर मेतावन्तंकालमेत न्निश्चयएवं-मम्स्थितः, इदानीं सन्देहोजातइतिच । ततश्च प्रमाणबलसिद्धसंशय-निश्चयविभागानुरोधेन जातिरुपाधिः स्वरूपंवा लक्षणमेष्टव्यम्, ननु-स्वाभिमतलक्षणानुसारेण लक्ष्यनिर्णयः अतिप्रसङ्गादिति । यद्वा स्वप्रकारकोटिकसंशयान्यत्वमेव निश्चयलक्षणमस्तु । यदुक्तं – परमते इदन्त्वस्यकेवलान्वयितया तत्प्रकारकसंशयाप्रसिद्धिरिति, तन्न– इदन्त्वस्य तत्तद्व्यक्तिपर्यवसिततया नानात्वेन केवलान्वयित्वाभावात् । केवलान्वयित्वव्यवहारश्चेदं शब्दप्रयोगविषयत्वविषयः । ननु इदं प्रमेयं स्थाणुः पुरुषोवेतिसंशयः प्रमेयत्वांशे निश्चयोनस्यात्, तत्प्रकारकसंशयस्याप्रसिद्धेरितिचेन्न । अभावे प्रमेयत्वप्रतियोगिकत्व भ्रमदशायामिदं प्रमेयत्ववत्प्रमेयत्वाभाववद्वेति संशयोपपत्तेः । अत्र - केनचिद्यदुक्तं - एवमभावे प्रमेयत्वप्रतियोगिकत्वप्रसिद्धावपि संशयकोटिभूताखण्ड प्रमेयत्वाभावाप्रसिद्धिरेवेति, तन्न - अखण्डप्रमेयत्वाभावस्यैव कोटित्वासिद्धेः । प्रमेयत्वप्रतियोगिकत्वभ्रमविषयस्य प्रसिद्धाभावस्यैव संशयकोटित्वात् । इष्यतेचशुक्तौ रजतत्वभ्रमानन्तरमिदं रजतमिहनास्तीति रजतत्वभ्रमविषयस्य पुरोवर्तिनस्तदभावाधिकरणे आरोपः आरोप्यनिषेधइत्यभ्युपगमात् । किंच यस्य देवदत्तस्य रजतमेवनास्ति तदीयत्वस्य रजतेऽनाप्तवाक्याद्वगमे-यस्मिन्भूतले रजतं देवदत्तीयपटश्चास्ति तत्र देवदत्तीयं रजतमिहनास्ति इदं भूतलं देवदत्तीयरजतवद्वानवेति संशयविपर्ययदर्शनाच्च । अस्तुवा अखण्डप्रमेयत्वाभाव कोटिकसंशयः सच समवायाद्यवच्छिन्नः प्रसिद्ध-एव । तेन च प्रमेयत्वस्य विरोधभ्रमदशायां संशयस्संभवत्येव । प्रमेयत्वद्रव्यत्वयोर्विरोधभ्रमदशायां तदुभयकोटिक संशयोपिसंभवति, विरोधभ्रमदशायांब्रह्मणि सविशेषत्व निर्विशेषत्वसंशयवत् । नन्वेवमपि ज्ञानवानात्माज्ञानं नवेत्यादिसंशये ज्ञानवानितियर्थ्यंशाव्याप्तिः स्वप्रकारीभूतस्य ज्ञानस्य तादात्म्येन संशयकोटित्वादितिचेन्न । येनसंबन्धेनप्रकारत्वं तत्संबन्धघटितप्रकारताकतत्कोटिक संशयान्यत्वस्य विवक्षितत्वात् । यदुक्तं - यद्यत्संशयनिवृत्त्यनुकूल स्वरूपविशेषवत् तत्तन्निश्चयइति, तन्न – स्वरूपप्रकाशस्याद्वैतानन्दा चनन्यारणत्वांगीकारात्, तस्यच नित्यत्वाच्चरमाद्वैतसाक्षात्कारेण तदनिवृत्तेश्चरमसाक्षात्कारस्यानिश्चयत्वापत्तेः । नच तदनिवर्तकत्वेप्यहमानन्दो नवेत्यादि द्विकोटिकसंशयनिवर्तकतया-

निश्चयत्वोपपत्तिः, तथासत्युत्तरसंशयस्यापि यत्किञ्चित्पूर्वसंशयनिवर्तकत्वेन निश्चयत्वप्रसंगात् । इदं जलमित्यनभ्यासदशोत्पन्नैककोटिकसंशयानन्तरमुत्पन्नस्य इदं जलं नवेतिसंशयस्य एककोटिकसंशयनिवर्तकत्वेन निश्चयत्वप्रसंगात् । किंच स्थाणुत्वनिश्चयस्य स्थाणुत्वाभावसंशयनिवृत्त्यनुकूलस्वरूपविशेषवत्त्वेन तन्निश्चयत्वापत्तिः, पुरुषत्वव्याप्यकरादिदर्शनस्य पुरुषत्वसंशयनिवर्तकत्वेन तस्य पुरुषत्वनिश्चयत्वापत्तिः । किंच मुक्तिकालीनानन्दावधारणरूपे ब्रह्मस्वरूपेऽव्याप्तिः, तस्य संशयविरोधित्वे इदानीं संशयानुपपत्तेः, तदेवहिसंसारेपि ब्रह्मस्वरूपं । प्रतिबन्धादिदानीं संशयंननिवर्तयतीति चेत्तदाऽनवधारणत्वांगीकारविरोधः । प्रतिबिंबभ्रमस्थलीयतत्त्वसाक्षात्कारवद्विरोधिनोपि प्रतिबन्धादेवानिवर्तकत्वात् । किंच चरमसाक्षात्कारस्य स्वरूपानन्दप्रकाशस्यच तद्धर्मिकसंशयविरोधित्वं तत्कोटिकसंशयाविरोधित्वंवानास्त्येव, स्वरूपमात्रगोचरत्वात् । नहि घटमात्रगोचरंज्ञानं तद्धर्मिकस्यवातत्कोटिकस्यवासंशयस्यविरोधिभवति । दृश्यतेच प्रकृष्टप्रकाशश्चन्द्रइति चंद्रस्वरूपेऽवधृतेऽपि तत्कोटिकोदेशकालविशेषादिधर्मिकः देशकालविशेषादिकोटिकस्तद्धर्मिकश्चसंशयः । चन्द्रः प्रकृष्टप्रकाशोनवेत्यादिसंशयाभावस्तु प्रकृष्टप्रकाशवैशिष्ट्यनिश्चयात् । अन्यथा प्रादेशपरिमितश्चन्द्रइत्यादिलक्षणलक्षणेन चन्द्रस्वरूपावधारणेपि प्रकृष्टप्रकाशोनवेत्यादि संशयनिवृत्तिप्रसंगात् । ननु स्वरूपमात्रगोचरस्यापि चरमसाक्षात्कारस्य एककोटिकसंशयविरोधित्वमस्तीतिचेत्, द्विकोटिकसंशयाविरोधितया तस्यापि प्राथमिकापातप्रतीतिवदनवधारणत्वेन कस्यापिसंशयस्यतेनाविरोधात् । किंचायंघटइत्यादिनिश्चये घटोरक्तः कृष्णोवेत्यादि संशयानिवर्तकत्वादव्याप्तिः । यत्किञ्चित्संशयनिवर्तकत्वेतु स्थाणुर्वापुरुषोवेति संशयेपि पुरुषत्वस्थाणुत्वयोः परस्परविरोधभानात् स्थाणुत्वं पुरुषवृत्तिनवा पुरुषत्वसमानाधिकरणं नवेत्यादि स्थाणुत्वसंशयनिवर्तकत्वादतिव्याप्तिः । नचेष्टापत्तिः संशयनिश्चयविभागानुपपत्तेः । यच्चैककोटिकज्ञानस्य संशयत्वसमर्थनार्थमुक्तं - अनभ्यासदशापन्न जलज्ञानानन्तरमिदंजलं नवेति संशयदर्शना तत्संशयकोटिनिक्षिप्तं, निश्चिते संशयायोगादिति, तदपिन - ज्ञानप्रामाण्याप्रामाण्यसन्देहादर्थसन्देहोपपत्तेः । यदि

तस्यार्थसन्देहपर्यवसानंब्रूषे तर्हि, दोषजन्यत्वतदभावसन्देहादर्थसन्देहोऽस्तु । यद्वा प्रामाण्यतदभावकोटिकः संशयोऽस्तु, तदानीं जलेजलत्वाभावावगाहनाभावेन विरोधाभावात् । विशेष्यवृत्तिप्रकारकत्व-तदभावसन्देहाद्वासंशयोऽस्तु । यद्वा तद्वतितत्प्रकारकं तदभाववति तत्प्रकारकंवेत्येव प्रामाण्याप्रामाण्यसंशयोऽस्तु । नच तद्वत्त्वस्य-गृहात्तत्संशयासंभवः । इदंजलमितिनिश्चये इदंत्वावच्छेदेन इदंजलंन-वेतिसंशयोमाभूत् । ज्ञानेप्रामाण्याप्रामाण्यसंशयेकोविरोधः । अप्रामाण्य-स्य तदभाववत्त्वघटितत्वात्तद्ग्रहे कथंतदभाववत्त्वग्रहइतिचेन्न – इदंत्वावच्छेदेन तद्वत्त्वगृहात्तदवच्छेदेन तदभाववत्त्वाग्रहाद्विरोधाभावात् । यदवच्छेदेन यत्र यद्ग्रहः तदवच्छेदेनैव तत्र तदभावग्रहोविरुध्यते, न तुतत्र तदभावग्रहमात्रम्, तथासति शुक्तीरजतंनभवतीति शुक्तित्वावच्छेदेन रजतत्वाभावगृहे इदंरजतमितिभ्रमाभावप्रसंगात् । तस्मात्प्रामाण्यसंशयायीनार्थ संशयस्य सार्वलौकिकत्वात् स्वयं तदुपपादनासामर्थ्यमात्रेण तदपह्नवस्स्वाकौशलाविष्करणमेव । किंच फलाभावाज्जिज्ञासानोपपद्यते । नचाद्वैतसाक्षात्कारएव फलं, तस्य संशयानिवर्तकत्वेनेष्यमाणत्वासिद्धेः । समानप्रकारकत्वेनैव निश्चयस्य निवर्तकत्वात् । ननूक्तं "ज्ञानं समानविषयतया संशयनिवर्तकं नतु समानप्रकारकतया अन्यविषयात्तदर्शनात् । समानविषयत्वमप्यपेक्षणीय मितिचेत् संशयादपि प्रसंगः । निश्चयत्वमप्यपेक्षितमिति चेत्तर्हि समानविषयनिश्चयोनिवर्तकः लाघवादिति"मैवं – आत्माश्रयप्रसंगात्, संशयनिवृत्त्यनुकूल स्वरूपविशेषवत्वंनिश्चयत्वमितिहित्वयोक्तं । इदमितिज्ञानानन्तरमयं घटोनवेतिसंशयाभावापत्तेश्च ! ननूक्तं "घटत्वादिवैशिष्ट्यविषयत्वाभावा त्समानविषयत्वाभावेन नतत्संशयंनिवर्तयतीति " तत्किं यावत्संशयविषय विषयकत्वेन निवर्तकत्वं, तन्नसंभवएव स्थाणुत्वादिनिश्चयस्य पुरुषत्वविषयकत्वाभावात् । तस्मात्संशयधर्मितावच्छेदकावच्छिन्न धर्मिताकसंशयकोटिविरुद्धप्रकारकज्ञानं संशयनिवर्तकम् । अत्र यदुक्तं - "एवंसत्ययंघटइति ज्ञानात्तद्गोचरे घटत्वे इदंघटत्वं नवेतिसंशयोनानिवर्तेत तस्मिन्घटत्वातिरिक्तप्रकाराभावादिति " तन्न – इष्टापत्तेः । अयंघटइतिनिश्चयेसत्यपि संस्थानवादिभिस्तत्र तत्संशयस्य जातिवादिभिस्तत्र तत्संशयस्यांगीकारात ।

किंकथमित्यत्र कागतिरितिचेत्, न तत्रापिसामान्यतः प्रतीतसमुदा यान्तर्गत विशेषनिर्धारणार्थत्वात्किमादेः । एतेषु किंकथमित्येवहि तत्राकांक्षा ।

किंच समानविषयावधारणस्य निवर्तकत्वेपि तत्रसंशयोननिवर्तेत, घटत्ववैशिष्ट्याविषयत्वेन समानविषयत्वाभावात् । किंचायंघटइतिज्ञानस्य घटत्वविषयसंशयनिवर्तकत्वे एकस्मिन्घटेघटत्वेन ज्ञाते घटान्तरेअयंघटोनवेतिसंशयोनस्यात् । यदुक्तं - "समानप्रकारकज्ञानस्य निवर्तकत्वे सन्निकृष्टेघटे घटत्वसामान्य प्रत्यासत्तिजन्यज्ञानेन घटान्तरेपि संशयोनिवर्तेतेति" तन्न - तथापिघटोरूपीति वाक्याद्घटत्वावच्छेदेन रूपसंसर्गेज्ञाते अयं घटो नवेति संशयोनस्यात, समानविषयकत्वात । यदिच समानवधारणत्वं तदा घटोरूपीनवेत्यपि सन्देहप्रसङ्गः । यदिच घटत्ववैशिष्ट्यांशेऽनवधारणत्वंतदाघटत्वंरूपसमानाधिकरणं नवेति सन्देहप्रसङ्गः । अयंघटइत्यनिश्चयादयं घटइतिसन्देहोभवतीतिचेत्, तर्हि प्रकृते सामान्यासत्तिस्थलेपितथैवभावय । अयञ्च परिहारोऽस्मन्मतएव संभवति,नतुत्वन्मते, त्वयासमानविषयत्वेनैव निवर्तकत्वस्वीकारात्, तस्यचतत्रापिसत्त्वात् । यदुक्तं " समानप्रकारकस्य निवर्तकत्वे प्रमेयवानितिज्ञानात् स्थाणुत्वादिप्रकारकात् संशयंनिवृत्त्यापत्तिरिति " तन्न–कोटौ कोटिद्वयसामान्य धर्मप्रकारकत्वस्य प्रतिबन्धकत्वात् । नचैवंसति इदमितिज्ञानात्संशय निवृत्तिस्स्यादितित्वदुक्तं भज्येत धर्मिणि सामान्यधर्मप्रकारकत्वस्य प्रतिबन्धकत्वसंभवादितिवाच्यं । इदन्त्वस्य सामान्यधर्मत्वाभावस्योक्तत्वात् । नचैवं स्थाणावयं स्वनिष्ठधर्मवानितिज्ञानादपि निवृत्त्यापत्तिः, प्रतिबन्धकाभावादितिवाच्यं । अन्यतरकोट्यसाधारणत्वेना निर्धारितधर्मस्य सामान्यधर्मपदेन विवक्षितत्वात् । नचैवं प्रमेयस्थाणुत्ववानयमिति ज्ञानात्संशयनिवृत्त्यभावापत्तिः, कोटौ सामान्यधर्ममात्रप्रकारकत्वस्य प्रतिबन्धकत्वात् । यद्वा कोटिद्वयसामान्य धर्ममात्राप्रकारकं समानप्रकारकसमानविषयावधारणं निवर्तकमस्तु । निवर्तकानुपपत्तौच विस्तरोद्रष्टव्य इति । (किंकथमित्यन्तेति) सामान्याकारस्याप्रतीतेरिति भावः । ननु - जिज्ञासामात्रं खण्डयतो ब्रह्मजिज्ञासाखण्डनमिष्टमेवेति शङ्कामनूद्यपरिह

यः पुनर्ज्ञाताज्ञातांशविकल्पेन जिज्ञासास्वरूपमेवखण्डयेत् स ब्रह्मजिज्ञासा ... जिज्ञासतीतिकः प्रकृतोपयोगः । इष्टाचसायथालोकमिहापि,अन्यथाऽनारंभेगशास्त्रोच्छित्तेः । अत्रिहापि सामान्यतः स्वरूपज्ञतिः अध्यासनिरोधिरूपेणविशेषतश्चजिज्ञासा. मैवं, निर्विशेषेसामान्यासिद्धेः निस्सामान्येच विशेषायोगात् । कल्पनयात्तुपपत्तिरितिचेन्न, सामान्यरूपस्य कल्पितत्वे स्वरूपोच्छित्तेः विशेषासंभवाच्च । नह्यकिञ्चिद्रूपोविशेषतः कश्चित् स्यात् - नखलु खरशृंगकुण्ठत्वादिः । नच "अस्तिब्रह्मेतिचेद्वेद सन्तमेनंततोविदुः" रितिश्रावयन्तीश्रुतिः ब्रह्मण स्सामान्यबाधंसहेत । अतएव कल्पितास्तित्वरूपसामान्याकारभ्रमाद्विशेषबुभुत्सेति प्रत्युक्तं, अपसिद्धांताच्च ।

रति (यःपुनरिति) (ज्ञातेति). किंज्ञातांशे जिज्ञासा उताज्ञातांशे, आद्ये वैयर्थ्यम् । द्वितीये ज्ञानाभावादेव न जिज्ञासा तत्साध्यत्वात्तस्याः । (इतीति) इत्यस्येत्यर्थः । (कःप्रकृतोपयोगइति) सर्वखण्डकस्य तत्र उक्तविकल्पेन जिज्ञासायाः पारमार्थिकत्वखण्डनमेवेष्टं नतुव्यावहारिकत्वखण्डनमपि, अस्माभिश्च व्यावहारिक्यपि जिज्ञासाब्रह्मणि न संभवतीति प्रतिपाद्यते, तत्परिहारेच पारमार्थिकत्वखण्डनेष्टत्वोद्भावनस्य कउपयोगइत्यर्थः । व्यावहारिकजिज्ञासापि ब्रह्मणि नाङ्गीक्रियतइतितु त्वयानवक्तुंशक्यतइत्याह (इष्टेति) लोकेहि ज्ञानार्थप्रवृत्त्यनुपपत्त्या जिज्ञासेष्यत इत्याशंक्य तत्प्रकृतेपि तुल्यमित्याह (अन्यथेति) जिज्ञासानंगीकारे आरंभहेतुत्वभावेन शास्त्रमुच्छिद्येतेत्यर्थः । (निर्विशेषइति) निर्धर्मकइत्यर्थः । (विशेषायोगादिति)विशेषस्सामान्यप्रतिसम्बन्ध्यत्र विवक्षितः । प्रतिसंबंधिभूतस्य सामान्य धर्म स्याभावे तस्यासंभवादितिभावः । निर्धर्मकत्वाच्च विशेषोनसंभवतीति च कारस्यभावः । (तदिति) सामान्यज्ञानविशेष ज्ञानाभावयोरुपपत्तिरित्यर्थः । सामान्यप्रमा,विशेष प्रमाविरहश्चन प्रयोजकौ, गौरवादितिभावः । सामान्यशब्देन सत्स्वरूपंविवक्षितं, उतसामान्यधर्ममात्रं, अथवा सत्त्वसामान्यं नाद्यइत्याह (सामान्यरूपस्येति) नद्वितीयइत्याह (नहीति) कृत्स्नस्यापिसामान्यस्य कल्पनायांस्वरूपकल्पनायांच श्रुतिबाधमप्याह (नचेत्यादि) नतृतीयइत्याह (अतएवेति) (अपसिद्धान्तादिति). ब्रह्मणि सत्त्वस्य स्वरूपादनन्यत्वोक्ते

विशेषस्यतु कल्पितत्वे तज्जिज्ञासावैफल्यं ।

रितिभावः। एतेनाद्यंनवीनमतंनिरस्तं, तथाहि–" आपातप्रतीतिरेवधर्मिज्ञानम्, साच विचारात्प्रागेव सांगाध्ययनेन विदितपदार्थसंगतिका द्वाक्यादेवोत्पद्यते। साच ब्रह्मणि सत्त्वप्रकारिका, सत्त्वप्रकारकत्वादेवाखण्डविषयाज्ञानं ननिवर्तयति। तन्निवर्तकंचाखण्डविषयमेव निष्प्रकारकंज्ञानं। तस्यचानुत्पत्तेस्तज्ज्ञानेच्छा संभवत्येव। सैवजिज्ञासेति " हि. त्वन्मतम्, तदनुपपन्नम् – सत्त्वप्रकारकज्ञानस्यापातत्त्वंहि अविद्यानिवृत्त्यनर्हत्वम्। तच्च भिन्नविषयत्वाद्भ्रमत्वाच्चेत्यभिमतं। तच्च नोपपद्यते, स्वरूपोच्छित्ते श्रुतिबाधप्रसंगाच्च। किंच तदेवज्ञानं ब्रह्मविषयं तदज्ञाननिवर्तकंस्यात्। नचाखण्डविषयाज्ञानस्य तज्ज्ञानेनैव निवर्त्यत्वात् सत्त्वविशिष्टज्ञानं ननिवर्तकमितिवाच्यं, सत्त्वविशिष्टविषयस्याप्यज्ञान समानविषयकत्वेन तन्निवर्तकत्वोपपत्तेः। नच भ्रान्तित्वादनिवर्तकता, शुक्तिरजतज्ञानस्य द्रव्यत्वविषयस्य द्रव्यत्वाज्ञाननिवर्तकत्वात्। नचाधिकविषयत्वादनिवर्तकता, शुक्तिज्ञानस्य शुक्तिगतरूपादिविषयत्वेपि शुक्त्यज्ञाननिवर्तकत्वात्। नच विशिष्टविषयत्वादखण्डाज्ञान समानविषयत्वाभावः, जिज्ञासायाअपि समानविषयधर्मिज्ञान साध्यत्वेन सत्त्वविशिष्टज्ञानस्याखण्ड जिज्ञासाजनकत्वोपवर्णन विरोधात्। नचाज्ञानमखण्डत्वविषयं, सत्त्वविशिष्टज्ञानंतु नतथेतिनतन्निवर्तकमिति वाच्यम्, अखण्डत्वस्य स्वरूपातिरेके जडत्वेनाज्ञानाविषयत्वात्। स्वरूपत्वे सत्त्वविशिष्टज्ञानविषयत्वावश्यंभावात्। नचाखण्डत्वप्रकारक ज्ञानमेव तत्प्रकारकाज्ञानंनिवर्तकं, निष्प्रकारकज्ञानस्यैव निवर्तकत्वमिति सिद्धान्तभङ्गात्। स्वरूपातिरिक्ताप्रकारकत्वमेव निष्प्रकारकत्वमिति अखण्डत्वस्य स्वरूपाभेदात्तत्प्रकारकस्यापि निष्प्रकारकत्वान्न सिद्धान्तभङ्गइतिचेन्न अखण्डत्वादिप्रकारक ज्ञानस्यापि सत्त्वविशिष्टज्ञानवद्विदित पदार्थसङ्गतिकस्य विचारात्प्रागेवोत्पत्तेः। नच वाक्यद्वयाद्विरुद्धानेक कोट्युपस्थितौ मानससंशयाज्जिज्ञासोपपत्तिरिति वाच्यम्, अद्वैतवाक्यजन्य प्राथमिकाखण्डत्वप्रकारक ज्ञानादेवाज्ञाननिवृत्तौ कुतस्संशयः, कुतस्तरां जिज्ञासेति। (वैफल्यमिति) इष्यमाणज्ञानस्य भ्रमत्वेन प्रपञ्चभ्रमातिव

नहि ब्रह्मण्यसदपूर्वाकारकल्पनार्थं पूर्वकल्पितमिथ्याकारप्रतीत्यर्थंवा शारीरकमित्यत्रेदत्राह्य: कश्चिदपिक्षमते । कल्पिताकारमिथ्यात्वबोधनार्थमितितुस्यात्, नतर्हिब्रह्मजिज्ञास्यं,अपि त्वयमाकारस्सत्योमिथ्यावेति। ततः किमितिचेत् श्रुति सूत्रस्वरसार्थभंगस्तावत्। ब्रह्मात्मैक्यंशास्त्रवेद्यमिति स्वमतव्याहतिश्च। कल्पितभेदमिथ्यात्वधीरेव तद्धीरितिचेत्; न-माध्यमिकमतेपितद्भावेनत्वदिष्टैक्यलाभे तद्विवादविलयापातात्।

तकत्वादितिभावः। कथं वैफल्यंकल्पितविषयकज्ञानस्यैव फलत्वादित्याशंक्य एवंसति वैदिकत्वभूमिकाकंचुक प्रच्छन्नं बौद्धत्वमेवाविष्कृतंस्यादित्याह (नहीति) वेदान्तवाक्यानां मिथ्यावस्तुविषय तयाऽतत्त्वावेदकत्वांगीकारादितिभावः। तस्यच विशेषस्य प्रातिभासिकत्वं व्यावहारिकत्वञ्च नसंभवतीत्यभिप्रायेणोक्त मसदित्यादि। गूढाभिसन्धिश्शङ्कते (कल्पितेत्यादि) कल्पिताकारः-प्रपञ्चः। मिथ्यावस्तुनो मिथ्यात्वेन बोधनेव नवेदाप्रामाण्यमितितुशब्दार्थः। (अयमाकारइति) प्रपञ्चइत्यर्थः। प्रपञ्चस्सत्योमिथ्यावेति सन्देहात्तस्यैव जिज्ञास्यतास्यादित्यर्थः। (ततःकिमिति) शुक्त्याद्यधिष्ठानतत्त्वज्ञानस्येव रजतमिथ्यात्वज्ञानस्यापि मिथ्यारजतनिवर्तकत्व दर्शनात् प्रपञ्चमिथ्यात्वज्ञानमपि प्रपञ्चनिवर्तकमेवेति जिज्ञासाया अवैफल्यादितिभावः। (श्रुतीति) "तद्विज्ञानार्थंसगुरुमेवाभिगच्छेत् समित्पाणिः" "प्रोवाचतांतत्वतोब्रह्मविद्याम्" "तद्विजिज्ञासस्व" इत्याद्याश्रुतयः। "ब्रह्मजिज्ञासा" "जन्माद्यस्ययत" इत्यादीनिसूत्राणि। श्रुतिसूत्रयोर्यथा कथंचित्प्रपञ्चमिथ्यात्व विषयत्वेन नयने च स्वारस्यभङ्गइत्यभिप्रेत्योक्तं (स्वरसेति) (ब्रह्मात्मैक्यमिति) "आत्मैकत्वविद्याप्रतिपत्तये सर्वेवेदान्ताआरभ्यन्त" इतित्वयैवोक्तेरितिभावः। अभिसन्धिमुद्घाटयञ्छङ्कते (कल्पितभेदेति) तद्धीः-ब्रह्मात्मैक्यधीः। भेदाभावस्याभेदत्वादितिभावः। (तद्विवादेति) तेनेत्यर्थः। तस्मिन्नितिशेषः। अथवा (तदिति) तस्मिन् तेनेतिशेषः। तस्मिन्नित्यस्य ऐक्यांशइत्यर्थः। यदि प्रपञ्चमिथ्यात्वमेव ब्रह्मात्मैक्यंस्यात्, स्याद्विवादविलयः। नचतथाब्रूमः किन्तु भेदमिथ्यात्वज्ञानाधीनं ब्रह्मात्मैक्यज्ञानमिति, तत्र चमाध्यमिकेन भेदमिथ्यात्वाङ्गीकारेपि जीवब्रह्मणोरपि मिथ्यात्वाङ्गीका

यच्च मन्यसे;कल्पिताकारमिथ्यात्वबुद्ध्यापि ब्रह्मणस्तच्छून्यत्वमवसेयमिति त ज्जिज्ञासाद्युपपत्तिरिति; तदपियदिसामान्यवद्विशेषोडाङ्कृतं । तदानजिज्ञास्यं,न हिष्टस्यतत्सत्यत्वे सद्वितीयता। मिथ्यात्वे प्रतियोगिसाहित्यसत्यता। साहित्यरा हित्ययोस्सहजसंवर्षात् । परस्परविरोधेच प्रकारान्तराभावयोगात्।यदिराहि त्यमपिकल्पितं कथंतदा कल्पिताकारराहित्यनिवृत्तिः ।

रेण तदैक्यानङ्गीकारात्, तेन विवादोयुज्यतइत्याशंक्याह (यच्चेति) (तदपीति) कल्पिताकारशून्यत्वमित्यर्थः । (सामान्येति) धर्मिज्ञानेन विषयीकृतमित्यर्थः । (बहिष्ठस्येति) धर्मिज्ञानाविषयस्येत्यर्थः । (मिथ्यात्वइति) आकारशून्यत्वं – आकाराभावः । आकारशून्यत्वमिथ्यात्वमाकाराभावाभावः । सचाकारएववा तत्समनियतधर्मोवा, अतः कल्पिताकारशून्यत्वस्य मिथ्यात्वे कल्पिताकारसत्यता स्यादित्यर्थः । तत्रहेतुमाह (साहित्येति) संवर्षः–विरोधः । गोत्वाश्वत्वयोर्विरोधेपि नान्यतराभावे अन्यतरसत्त्वमिति सहजेत्युक्तं । सहजत्वं-निरुपाधिकत्वं, गोत्वाश्वत्वयोः परस्पराभावव्याप्यत्वाद्विरोधः, भावाभावयोस्तु स्वतइतिभावः । ननु स्वतोविरोधेप्यन्यतरसत्त्वे इतराभावनियमोस्तु अन्यतराभावे इतरसत्त्वनियमः कुतइत्यत्राह (परस्परविरोधइति) अत्र परस्परविरोधपदेन परस्पराभावात्मकत्वंविवक्षितम् । ययोस्स्वाभाविको विरोधःतयोरन्यतरस्सर्वत्रवक्तव्यं । अन्यथाघटाभावोनास्तीत्युक्ते घटार्थप्रवृत्तिर्नस्यात् । "द्वौ नञौ प्रकृतमर्थंसूचयत" इति तान्त्रिकव्यवहार श्चोच्छिद्येतेति भावः। दूषणान्तरमाह (यदीति) (कल्पिताकारराहित्य निवृत्तिरिति) कल्पिताकारराहित्यस्य ज्ञानेन तदितरकल्पिताकारनिवृत्तावपि तदनिवृत्तेः मुक्तेर्मुक्तिरितिभावः । यदि कल्पिताकारराहित्यं तन्निवृत्तिरितिपाठः तदा कल्पिताकारराहित्यमिति हेतुगर्भविशेषणम् । तन्निवृत्तिः- कृत्स्नप्रपञ्चनिवत्तिः । कल्पिताकारराहित्यात्मिका तन्निवत्तिःकथंस्यात् । कृत्स्नप्रपञ्चनिवृत्तिरपि कल्पिताकारराहित्यविशेषः, अतस्सापिकल्पितेति वक्तव्यम्, कल्पितत्वादेव स्वप्रतियोगिकत्वं वक्तव्यम्, तच्च व्याहतम्, अतः कृत्स्नप्रपञ्चनिवृत्तिस्स्वरूपमेव कथंस्यादित्यर्थः । ननु कल्पिताकारराहित्यस्य मिथ्यात्वेपि न तन्निवृत्तेर्मिथ्यात्वम्, "त्रिभेदजनकेज्ञान"

यत्किञ्चिन्निवृत्तिमात्रेतुप्रागपिसुलभमिति कृतं तदर्थविचारव्यसनेन । अ
तःस्वांकुरुवासतस्सत्याकार द्वय वैशिष्ट्यंपरिहरवा तज्जिज्ञासामिति । किंच-
यद्यशुद्धं ब्रह्मजिज्ञासो र्वेदितव्यं, तर्हि दुस्त्यजं नैष्फल्यम्, तथा प्रकाशस्य
संसारभेषजत्वानभ्युपगमात् । अन्यथा प्रागेव मुक्तिसिद्धौ किमर्थाजिज्ञासा ।
कथंचाशुद्धतत्वोपदेशिनश्शास्त्रस्य तत्ववेदकत्वम् । कथन्तरामतत्वज्ञानेन
भ्रान्तिविलयः । ननु भूरन्ध्रभ्रमेण दामदर्वीकर भ्रमनिवृत्तिवत्स्यात् ,नस्यात्-
तद्वदेव भ्रान्त्यन्तरस्थितावात्यन्तिकत्वासिद्धेः । तद्विलापकतत्वज्ञानादे
रुक्तक्रमेणात्रासंभवात् । अहेतुकविनाशादेश्च निरसिष्यमाणत्वात् ।

इत्यादिना मोक्षदशायां भ्रमाभावावगमादितिचेत् , तर्हिकल्पिताकाररा
हित्यमपि श्रुतत्वान्नमिथ्या । यदिच राहित्यस्य स्वरूपान्तर्भावे जिज्ञा
स्यत्वानुपपत्तेः तद्बहिर्भावेच सत्यत्वे ऽद्वैतहानेर्मिथ्यात्वमनुमन्यसे , त
र्हि प्रपञ्चनिवृत्तेरपि स्वरूपान्तर्भावे साध्यत्वानुपपत्तेस्तद्बहिर्भावे वाच्ये
सत्यत्वे अद्वैतहानेर्मिथ्यात्वमनुमन्यस्व । ज्ञाननिवर्त्यस्वाभावात् कथंमि
थ्यात्वं निवृत्तेरितिचेत्, असाध्यत्वा द्वैतहानिप्रसङ्गाभ्यां कथंसत्यत्वं ।
तर्हि किंकुर्मइतिचेत् श्रूयतामयमुपदेशः , परस्परव्याहत वैदिकमाध्य
मिकमतद्वयाशां विहायान्यतरस्मिन्नेव तृप्तोभव । सतः-ब्रह्मणः । एव
मशेषविशेषशून्यमित्यनेन सूचितव्याघातोदर्शितः । इदानीमनाद्यविद्या
न्धकारितमित्यनेन सूचितव्याघातः प्रदर्श्यते । तत्राविद्याश्रयत्वं तदा
वृतत्वंचविवक्षितम्, तत्राश्रयत्वसूचितो व्याघातइदानीं प्रदर्श्यते । कि
मशुद्धं ब्रह्मजिज्ञास्यमुतशुद्धमिति विकल्प्याद्यंदूषयति (किंचेति) (त
थाप्रकाशस्येति) अशुद्धिविशिष्ट प्रकाशस्येत्यर्थः । अत्रचाशुद्धिरेव वे
दितव्याकारइति विवक्षितम् । पूर्वत्र उपहिते उपधानातिरिक्त धर्मवि
शेषइतिभेदः । (प्रागेवेति) अविद्याविशिष्टप्रतीते रनादित्वादितिभावः ।
(कथंचेति) अशुद्धेर्मिथ्यात्वादितिभावः । दामदर्वीकरः - दामाधिष्ठानक
दर्वीकरः (भ्रान्त्यन्तरेति) निवर्तकभ्रमस्यानिवृत्तेरिति भावः । (आ
त्यन्तिकत्वासिद्धेरिति) निवृत्तेरितिशेषः । तन्निवर्तकं तत्त्वज्ञानान्तरम
स्त्वित्यत्राह (तद्विलापकेति) सत्यमिथ्यात्वविकल्प क्षोभादिनेत्यर्थः ।
(अहेतुकेति) आदिशब्देन प्रतियोगिमात्रहेतुक विनाशादिर्विवक्षितः ।

शुद्धंतर्हि जिज्ञास्यमपि न तेस्यात्, ज्ञतया तत्स्वरूपस्पर्शानभ्युपगमात् । शाखाचन्द्रन्यायेन स्वरूपस्पर्शइवेतिमतमिति चेत्, कथंतदधीनबोधविषयतामन्तरेण दृष्टान्तदार्ष्टान्तिकयोस्तदुपलक्ष्यत्वम् । तद्विषयत्वेच कथं तत्प्रयुक्तदोषातिक्रमः । सोपिबोधः स्ववेद्यतायाभ्रान्तिरसत्य श्चेत्यदोषइति चेत्, विलीनंतत्वावेदकवाक्यैः । वेद्यमिथ्यात्वमन्तरेण भ्रान्तित्वायोगात् ।

अविद्याविशिष्टज्ञानस्या विरोधान्न निवर्तकतेत्यपिबोध्यम् । नित्यशुद्धमित्यनेन सूचितंव्याघातं दर्शयितुं द्वितीयंकल्पमाशंकते (शुद्धंतर्हीति) जिज्ञासोर्वेदितव्य मित्यनुषज्यते । दूषयति (जिज्ञास्यमपीति) अशुद्धस्यजिज्ञास्यत्वपक्षे तस्य ज्ञानविषयत्वसंभवेपि फलाभावाज्जिज्ञासा नोपपद्यतइत्युक्तं, शुद्धस्यतु ज्ञानविषयत्वं प्रत्येवायोग्यत्वा ज्जिज्ञास्यत्वं नोपपद्यतइत्यभिप्रायेणाह (अपीति) ननु शुद्धंब्रह्मजिज्ञास्यमित्यत्र शुद्धस्येष्यमाण ज्ञानविषयत्वं नाभिमतं, किन्तु यथाशाखायां चन्द्रसंबन्धाभावेपि तत्संबन्धभ्रमाच्छाखायां चन्द्रमाइत्यत्र शाखा चन्द्रस्योपलक्षणम्, तथा विशुद्धंजिज्ञास्य मित्यत्रापीष्यमाणं ज्ञानमुपलक्षणमेवेतिशंकते (शाखेति) (कथमिति) दृष्टान्तार्थं दृष्टान्तोपादानं । यथादृष्टान्तेशाखालक्षणोपलक्षणजन्यज्ञानविषयतामन्तरेणनोपलक्ष्यत्वं तथा दार्ष्टान्तिकेपीष्यमाणज्ञानलक्षणोपलक्षणाधीन ज्ञानविषयतामन्तरेण नोपलक्ष्यत्वमित्यर्थः । तत्प्रयुक्तदोषः – अशुद्धत्वजडत्वादिः (सोपीति) सः - उपलक्षणाधीनः । सत्यमिथ्याविभागमन्तरेण तदधीनज्ञानविषयतामात्रेणोपलक्ष्यत्वसंभवादितिभावः । उपलक्षणाधीनबोधविषयत्वस्यभ्रान्त्यन्तरसिद्धत्वे तद्भ्रमविषयताया अपि भ्रमान्तरसिद्धतावाच्येत्यनवस्था स्यादिति स्वयमेव 'स्ववेद्यतायाभ्रमइत्युक्तम्' (विलीनमिति) स्ववेद्यतायाभ्रमविषयत्वे स्ववेद्यत्वरूप वेद्यमिथ्यात्वमन्तरेण भ्रान्तित्वायोगेन स्यवेद्यत्वाभावे उपलक्षणत्वेनाभिमत ज्ञानस्योपलक्षणत्वासंभवात् वेदान्तवाक्याना मुपलक्षणीभूतज्ञानजनकत्वमपि न संभवतीति कथञ्चिदप्यावेदकत्वाभावात्, आवेदकत्वेपि फलीभूतज्ञानस्य भ्रमत्वात्तत्त्वावेदकत्वं संभवतीत्यर्थः । भ्रान्तिसिद्धप्रातिभासिक स्वविषयत्वमादायैव उपलक्षणाधीनज्ञानविषयत्वसंभवेनोपलक्षणत्वेनाभिमतज्ञानवि

उपलक्षणपर्यवलंबननैष्फल्याच्च । शुद्धिश्चास्य नित्याऽनित्यावा, आद्ये किमर्था जिज्ञासा, अन्ततस्तस्यास्तादर्थ्यात् । शुद्धता ध्यवसायार्थं सास्यात् नतु शुद्ध्यर्थमिति चेत् न तदध्यवसा येनापि तत्सिद्ध्यर्थेन भवितव्यं, अन्यथा नैष्फल्यात् । आरोपि ताशुद्धिनिरसनात्साफल्यमिति चेन्न, आरोपसंभवे नित्यशुद्ध्ययोगात् । उपरक्तेऽपि स्फटिके शुभ्रत्ववत्तत्संभव इति चेन्न, भावानभिज्ञानात्। न हि वयमारोप्यदोषत्वेनाशुद्धिं प्रसञ्जयामः ब्रह्मण्येव कुदृष्टिक ल्पित त्रिविधदोषदृष्टेरभ्युपगमात्, किन्तु भ्रमाद्याधारतया ।

पयत्वस्यैव प्रातिभासिकस्यवक्तुंशक्यतया उपलक्षणपर्यावलंबन नैष्फ ल्यमित्याह (उपलक्षणेति) स्ववेद्यतायाभ्रान्तिरित्यनन्तर मसत्यश्चेति यदिपाठः तदाज्ञतया तत्स्वरूपस्पर्शानभ्युपगमादित्यस्य शुद्धस्यकेना पि मिथ्यार्थेनासंस्पर्शादितिभावः । भ्रान्तिरसत्यश्चेत्यस्यत्वसत्यत्वेपिभ्रा न्तित्वाद्दोषइत्यर्थः । यद्वा स्वसमानसत्ताकं यज्ज्ञानं तद्विषयत्वमेव जड त्वादिप्रयोजकमित्यसत्यश्चेत्यस्यभावः । स्ववेद्यतायाभ्रान्तिरित्यत्रोत्तरं "विलीनमित्यादि" असत्यश्चेत्यत्रोत्तर मुपलक्षणेति (किमर्थेति) शु- द्ध्यतिरेकेणाविद्यानिवृत्तेरभावादितिभावः । नन्वस्तु ब्रह्माभेदार्था जिज्ञा सा "ब्रह्मवेदब्रह्मैवभवती" तिब्रह्माभेदस्यापि फलतयाप्रतिपादनादि ति तत्राह (अन्ततइति) अभेदस्यनित्यसिद्धतया साध्यत्वायोगात्तत्साध्य तोक्तिरपि शुद्धावेवपर्यवस्यति, सापिचेन्नित्या वैयर्थ्यमेवेतिभावः । (तदध्यवसायेनेति) शुद्धताध्यवसायेनापि शुद्धिसिध्यर्थेन भवितव्य- मित्यर्थः । (आरोपिताशुद्धीति) नित्यशुद्ध्यध्यवसायस्येति शेषः। नि त्यशुद्ध्यध्यवसायेसति प्रतीयमानकलंकत्वादिरूपाशुद्धेर्मिथ्यात्वज्ञाने न साधनानुष्ठानेन तन्निवृत्तेस्साफल्यमिति भावः । नित्यशुद्धेः परमार्थ त्वादारोपिता शुद्ध्यासहनविरोधइति सदृष्टान्तंशङ्कते (उपरक्तइति) (ब्रह्मण्येवेति) "तदिदंविविधकुतर्क कल्ककल्पित" मितिभाष्येणत थावगमादितिभावः । शुक्तिरजतादौ पराभिमतमिथ्यात्वमभ्युपगम्या विशेषात्परोक्षस्थलेपि तदापादनमभिप्रेत्याभ्युपगमादित्युक्तम् । (भ्र माद्याधारतयेति) अशुद्धिप्रसञ्जयामइत्यनुषङ्गः । आदिशब्देनतत्कार्यसु खदुःखशोकमोहादिः । अस्मदभिमताशुद्ध्याश्रयत्वे नायं दृष्टान्तइत्या

न तथास्फटिकस्स्वयं स्वात्मनिरागमध्यस्यति । नच तत्कर्तृकोऽन्य कर्तृकोत्रा रक्तताध्यासस्तच्छ्वेतिमाख्यशुद्धिविरोधी । इहतु स्वदोषेण ब्रह्मणि स्वयमेव वंभ्रम्यमाणे कथं भ्रान्त्यादि प्रत्यनीकतामयी शुद्धिः । नित्या भ्रान्तिरपि स्फटिकरागादिवत्तत्त्वतो नास्तीति निस्तारइतिचेत्, स्थितंतर्हि विचारनैष्फल्यम् । असत्येव भ्रान्तिस्सतीव भातीति तन्निवर्तनंफलमितिचेत् न तत्सत्त्वभ्रमसत्यत्वमिथ्यात्वविकल्पे सद्वितीयत्वानवस्थयोरन्यतरापातात् । स्वरूपेण ब्रह्मनभ्राम्यति, किन्तु जीवेश्वररूपाभ्यामितिचेत्, हन्त एकां व्याहर्तिं परिहर्तुमनेकामुपादत्से, कथमभ्रान्तस्य तस्य तद्भावः,

---

इ (नतथेति) (स्वात्मनीति) इदञ्च ब्रह्मण्यारोपस्य स्वविषयत्वादुक्तं । वस्तुतस्तु स्वविषयत्वे न तात्पर्यं, किन्तु आरोपाश्रयत्वमात्रे, अन्यविषयारोपस्यापि दोषत्वात् । अध्यासस्य सविषयत्वाद्रागस्यच प्रकृतत्वाद्राग मध्यस्यतीत्युक्तं । अन्यारोपस्यापि दोषत्वात् । एवं भ्रमरूपाशुद्ध्यभावाद्दृष्टान्तवैषम्यमुक्तं, इदानीं तदंगीकृत्यापि वैषम्यमाह (नच तत्कर्तृकइति) अन्यकर्तृकइतिदृष्टान्तार्थं । भ्रान्तिरूपाशुद्धिस्सत्यपि नश्वैत्याख्यशुद्धिविरोधिनीत्युक्तं । तर्हि तद्वदेव प्रकृतेपि शुद्ध्यशुद्ध्योरविरोध एवास्त्वित्यत्राह (इहत्विति) (स्वदोषेणेति) अविद्ययेत्यर्थः । इयमप्येका शुद्धिरित्यभिप्रायेण स्वदोषेणेत्युक्तं । यद्यप्यविद्या स्फटिक लौहित्यवदारोपिता, आरोप्यदोषत्वेन नाशुद्धिं प्रसञ्जयामइतिचोक्तं । तथाप्यारोपहेतुत्वेनैव दोषत्वमितिभावः । भ्रमाश्रयत्वं नजीवेश्वररूपाभ्यां, किन्तु स्वरूपेणैवेत्यभिप्रायेण स्वयमेवेत्युक्तं । भ्रान्त्यादीत्यादि शब्देनाविद्यागृह्यते । (विचारनैष्फल्यमिति) सत्त्वाभावेऽसत्त्वनियमा दसतश्च निवृत्त्ययोगादिति विवक्षितं । (तन्निवर्तनमिति) भ्रमसत्त्वगोचर भ्रमनिवर्तनमित्यर्थः (अनवस्थेति) तत्सत्त्वभ्रमस्य मिथ्यात्वे पुनर्निरसनीयाभावान्नैष्फल्यं, तत्सत्त्वभ्रान्तिरप्यसत्येव सतीव भातीतिचेदनवस्थेत्यर्थः । यद्वा आरोपिताशुद्धीति भावप्रधाननिर्देशः, आरोपविषयत्वमितियावत् । (आरोपेति) आरोपस्याशुद्धित्वादिति भावः । उपरक्ते- रक्तिमारोपविषये (आरोप्यदोषत्वेनेति) दोषारोपविषयत्वेनेत्यर्थः । (स्वरूपेणेति) शुद्धेस्स्वरूपगतत्वान्न विरोधइतिभावः । तस्य-ब्रह्मणः । तद्भावः - जीवेश्वरभावः । जीवेश्वरभावयोरपि कल्पितत्वात् कल्पकान्त

कथं सर्वज्ञोपि भ्राम्यतीति विवक्षाप्युत्तिष्ठेत, कथञ्चैकआत्मा युगपत्सर्व ज्ञमज्ञञ्चात्मानमनुसन्दधीत, प्रपञ्चयिष्यतेचैतत् । उत्तरत्रातुनित्यशुद्ध त्वश्रुत्यादि विरोधः । किंचोभयावधिमत्तया तदनित्यत्वं, उत्तरैकाव धिमत्तयावा, पूर्वैकावधिमत्तयावा, नाद्यः — त्रिवर्गापवर्गयोरैक राश्यप्र सङ्गात्; वैराग्योपदेशादि वैयर्थ्यात् ; अपुनरावृत्ति श्रुत्यादिविरो धाच्च । अतएव नद्वितीयः - बन्धमोक्षयोर्व्युत्क्रमता प्रसंगात्, शुद्धेरसाध्यत्वेन विचारादिनैष्फल्याच्च । तृतीयस्तु न शुद्धेर्नि त्यत्वरूपैक्ये स्यात् । निरवधित्वसावधित्वयो र्नित्यवैरात् । अ तिरेकेच सएव सत्यासत्यविकल्पावतार इति । यद्यप्यस्मन्मते नित्य शुद्धईश्वरः साध्यशुद्धिः क्षेत्रज्ञश्च जिज्ञास्येते । तथापि नप्रतिबन्दी, ईश्वरशुद्धेरसाध्यत्वात् । जीवशुद्धेस्साध्याया अपि स्वरूपान्यत्वात्सत्यत्वा च्च। उदारगुणसागरः परमपुरुषः स्वाराधनात्मक शास्त्रार्थसंप्रीतस्त्रि वर्गमपवर्गंच प्रयच्छतीतिहि प्राचीमर्यादा ।

राभावाच्च ब्रह्मस्वयमेव कल्पयतीतिवक्तव्यं, ततश्च ब्रह्मणो भ्रान्तिरनि वार्येतिभावः। ईश्वरस्य सर्वज्ञत्वात्तत्रापि भ्रमोनुपपन्नइत्याह (कथमि ति) जीवेश्वरभावौचानुपपन्ना वित्याह (कथञ्चेति) सर्वज्ञः - ईश्वरः । अ ज्ञोजीवः (उत्तरत्रेति) शुद्धिर्नित्यानित्यावेति विकल्पे द्वितीयकल्पइत्य र्थः । नाद्यइत्यत्र वैराग्योपदेशवैयर्थ्यं हेतुः तत्र हेतुस्त्रिवर्गेति । हेत्वन्त रमाह (बन्धमोक्षयोरिति) (व्युत्क्रमतेति) शुद्धेर्विनाशेसंसारोत्थाना त् शुद्धिकालेचविरोधेन संसारासंभवादितिभावः (अतिरेकेचेति) स त्यत्वे अद्वैतहानिः, मिथ्यात्वे अनुद्देश्यता, नहि मिथ्यावस्त्व सहमा नो मुमुक्षुर्मिथ्योत्पादनार्थं श्रवणादौ प्रवर्ततइतिभावः। ननु अनित्यशु द्धियोगिनो नित्यशुद्धियोगिनश्च जिज्ञास्यतायास्सिद्धान्ते समर्थनात्कथ मयं विकल्पश्शोभते तत्राह (यद्यपीति) आश्रयभेदाच्छुद्ध्य शुद्ध्यो र्नविरोधः, साध्यत्वेनाभिमतशुद्धे स्स्वरूपादन्यत्वान्न साध्यत्वविरोधः, सत्यत्वान्न मिथ्यात्वप्रयुक्त जिज्ञास्यत्वविरोधः । अशेषविशेषशून्यत्वानाद्य विद्यान्धकारितत्वाभ्यां जिज्ञास्यत्वस्य व्याघातं प्रकारान्तरेण दर्शय ति (उदारेत्यादिना) प्राची- वैदिकी । भ्रान्तत्वे कथमजिज्ञास्यतेत्यत्राह

सयदि स्वयमेव भ्राम्येत् स्वाश्रितत्राणौपयिक गुणहीनोवा, न तर्हि जिज्ञास्यः, स्वरक्षणेप्यशक्तस्येति न्यायात् । कल्पितसार्वज्ञ्यादि योगात् तदभावेपि तीर्थादिवद्वातस्य भजनं स्यादिति चेन्न, कल्पितस्य सार्व ज्ञ्यादेर्जिनादिष्वपि सिद्धेः तदुपसत्तिप्रसंगात् । सर्वैस्तेषु न तत्क्लृप्ति रितिचेन्न, अविशेषात् । महाजनपरिग्रहा द्विशेषइतिचेन्न, सर्वेषां सर्वतस्सम्मूढत्वमिच्छतां क्वचिदपि प्रामाणिकत्वादि लक्षणमहत्त्वस्यासिद्धेः, प्राचुर्यस्यवि गानादप्रयोजकत्वाच्च । यत्तुतीर्थादिवदिति तत्तदासद्येत, यदितत्सेवयैवतदुप सत्त्या प्रसाद्योन्यः । नहि क्रियातच्छक्त्यपूर्वाण्येव फलन्तीति नैगमःपन्थाः ।

(स्वरक्षणइति) तत्वतस्सार्वज्ञ्याभावेपि कल्पितसार्वज्ञ्यात्फलप्रदानो पयोगिभूताराधनाराधक तदिष्टपरिज्ञानसंभवात्, तदभावेपि ध्यानादेः पुण्यतीर्थ स्नानादिवद् दृष्टार्थत्वसंभवाच्च कथं ब्रह्मणोनजिज्ञास्यत्वमिति शंकते (कल्पितेति) सार्वज्ञ्यादीत्यादिशब्देन फलप्रदानोपयोगि द यादिगुणान्तरंगृह्यते । (सर्वैरिति) तथाच तत्र नव्यावहारिकं सार्वज्ञ्यमितिभावः । (अविशेषादिति) कैश्चित् ब्रह्मणएवानभ्युपगमादिति भावः । महत्त्वं किंप्रामाणिकत्वं उतप्राचुर्यं, नाद्यइत्याह (सर्वेषामिति) सर्वं सर्वत्रभ्रान्ताइतिहि युष्माभिरिष्यते, सर्वस्य मिथ्यात्वाङ्गीकारात्, ततश्च युष्मन्मते कस्यापि तत्वदर्शित्वलक्षणमहत्त्वंनसिध्यतीत्यर्थः । आदिशब्देन तत्वार्थोपदेशित्वं गृह्यते । तदतिरिक्तं नप्रामाणिकत्वं, भ्रान्तस्यापि प्रामाणिकत्वे शुक्तौ रजतभ्रमवतोपि प्रामाणिकत्वापत्तेरिति भावः । नद्वितीयइत्याह (प्राचुर्यस्येति) (यदीति) यथा तीर्थादिसेवयेश्वरः प्रसाद्यः, तथा यदीश्वरसेवयान्यः प्रसाद्यस्स्यात् स्यात्तीर्थादि तुल्यतेत्यर्थः (क्रियेति) अयं कर्ममीमांसावृत्तिकारान्तर पक्षः । विनष्टमपि कर्म कालान्तरे फलं जनयतीति स्वभावः, अव्यवहितोत्तरकाले यथा कार्योत्पादकत्वं केषाञ्चित्स्वभावइति तेषामाशयः । शक्तिरितिभट्टपक्षः । अपूर्वमितिगुरोः । (नैगमइति) "सएवैनंभूति गमयति" "सएनंप्रीतःप्रीणाति" "इष्टापूर्तंबहुधाजातंजायमानं विश्वंबिभर्तिभुवनस्यनाभिः तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदुचन्द्रमाः" "सवाएषमहानजआत्मान्नादोवसुदान" इत्यादिश्रुतिभिः "लभतेचततःकामान्मयै-

उक्तन्यायेन जैनगन्धिवेदान्तिमतेपि जिज्ञासानुपपत्तिर्द्रष्टव्या । तदेतद खिलमन्तर्निधाय ब्रह्मशब्दाभिधेयमुभय लिंगं सर्वेश्वरं प्रस्तुत्यतस्यैवारं भसूत्रे विवक्षितत्वमाह " तापत्रयातुरैरमृतत्वायसएवजिज्ञास्य " इति ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां जिज्ञासानुपपत्तिवादो द्वितीयः ॥

वविहितान्हितान् " "अहंहिसर्वयज्ञानां भोक्ताचप्रभुरेवचे " त्यादिस्मृतिभिः " फलमतउपपत्ते " रित्यादिसूत्रैः " फलसंबिभत्सयाकर्मभिरात्मानंपिप्रीषन्ति सप्रीतोलंफलाये " त्यादिद्रमिडभाष्यकारादिमहर्षिवचनैश्च ईश्वरस्यैव फलप्रदत्वावगमादितिभावः । भास्करादिमतेपि जिज्ञासानुपपत्तिमाह (उक्तेति) भेदाभेदवादित्वेनानैकांतिकत्ववादित्वाज्जैनगन्धित्वं । ब्रह्मणस्सर्वज्ञत्वात् तदभिन्नजीवस्यापि सर्वज्ञत्वेन विदिताविदिताकारभेदाभावाज्जिज्ञासानसंभवति । ब्रह्मणोनित्यशुद्धत्वे तदभिन्नस्यापि जीवस्यनित्यमुक्तत्वा तदर्थाजिज्ञासानसंभवति । जीवाशुद्ध्या तदभिन्नस्यब्रह्मणोप्यशुद्धत्वात स्वरक्षणेप्यशक्तस्येति न्यायाजिज्ञास्यता नसंभवतीत्यपि द्रष्टव्यमित्यर्थः ॥

इति वाधूलकुलतिलक श्रीनिवासाचार्य पादसेवासमधिगत परावरतत्वयाथात्म्येन तदेकदेवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध महाचार्यापरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्यायां

चण्डमारुताख्यायां जिज्ञासानिरूपणंनाम-

द्वितीयस्कन्धः ॥



॥ श्रीमतेरामानुजायनमः ॥

॥ श्रीमतेनिगमान्तमहादेशिकायनमः ॥

॥ तृतीयोवादः ॥

त्र्यय्यन्ताः कर्मभागेन सौहार्दं समधिश्रिताः ।
मुक्तिं यद्भजना दाहुस्तमनन्तमुपास्महे ॥

(त्र्यय्यन्ताइति) सौहार्दमित्यनेन एकशास्त्रत्वमेकग्रन्थत्वंचोच्यते । एकार्थत्वलक्षणसंबन्धस्य विवक्षितत्वाच्छास्त्रभेदापादकविरोधाभावोऽपिदर्शितः । सौहार्दंसमधिश्रिता यद्भजनान्मुक्तिमाहुरित्यनेन अङ्गप्रधानप्रतिपादकत्वेन पूर्वोत्तरभागयोस्संबन्धोव्यज्यते । एवमैक्ये हेतुमाह (त्र्यय्यन्ताइति) उत्तरभागत्वात्पूर्वभागेनैक्यं युक्तमितिभावः । अनेन व्याख्येयैक्याद्व्याख्यानभूतमीमांसयोरैक्यं सूचितं । मुक्तिमित्यनेन विरुद्धफलत्वान्नैकशास्त्र्यमित्येतत्परिहृतम् । अनन्तशब्देन वस्त्वपरिच्छेदमुखेनान्तर्यामित्वाभिधानात् सर्वकर्मणांतदाराधनात्मकतया उपासनांगत्वसंभवस्सूच्यते । एकव्याख्येयव्याख्यानात्मना विंशतिलक्षणमेकं शास्त्रमित्यैकग्रन्थ्यपर्यंतैकशास्त्र्यं प्रतिज्ञास्यन् तत्रैकग्रन्थव्याख्यानत्वेपि एकैकदेशव्याचिख्यासया प्रवृत्तयोरेकग्रन्थत्वादर्शनादिहापि मीमांसाद्वयस्य तथैवकरणान्नैकग्रंथ्यंयुक्तमित्याशंक्य विचारस्य"स्वाध्यायोऽध्येतव्य" इति विध्यधीनत्वपक्षे. तद्विधिबलात्सामान्येन स्वाध्यायार्थविचारः कर्तव्य इत्येवबुद्धिरुत्पद्यते, रागप्रयुक्तिपक्षेऽपि कृत्स्नस्यापि स्वाध्यायस्याधीतत्वादुक्तरीत्यैव बुद्धिरुत्पद्यते अतःकृत्स्नगोचरविचारः प्रथमंकर्तव्यतयाप्रतिपन्नः, नतु पूर्वभागविचारः कर्तव्यः उत्तरभागविचारः कर्तव्यइत्येवंरूपाबुद्धिः प्रथमत उत्पद्यते, अतोविचारकर्तव्यताबुद्धिमत्पुरुषानुजिघृक्षया प्रवृत्तंविचारशास्त्रं प्राथमिकस्वारसिकबुद्धिमनुसृत्यसामान्येन वेदार्थविचारोद्देशेनप्रवृत्तमितिवक्तुं युक्तमिति पूर्वोत्तरमीमांसयोरैकशास्त्र्यमुचितमित्यभिप्रायेण विचारस्यकृत्स्नविषयत्वं साधयति ।

स्थितं तावदध्ययनविधिनाध्यापन विधिनावा प्रयुक्तमध्ययनंसांग सशिरस्क कृत्स्न स्वाध्यायविषयमिति । रागतोविधितोवा प्रयुक्त स्तदर्थविचारोऽपि कृत्स्नगोचरः, तयोस्संकोचकाभावात् । ननु विधि प्रयुक्तौ माभूत्संकोचः रागप्रयुक्तौतु स्यात् यावद्रागंप्रवृत्त्युपपत्तेः, मैवं विकल्पासहत्वात् । किं ब्रह्मणि विचारसंकोचः किंवा कर्मणि,नाद्यः पुरुषस्य चतुर्ष्वपि पुरुषार्थेषु रागसंभवात्, क्रमेण भोगसंभवे विरो धाभावाच्च । सन्तिह्युभयभावनास्तथाविधाः । यस्यतु क्वाचित्कोरागः तस्यैकदेश विचारेकाविचिकित्सेति चेन्न,

---

(स्थितंतावदित्यादिना) अध्ययनस्यकृत्स्नविषयत्वं विचारस्य कृत्स्नविषयतासाधनार्थं । नन्वध्ययनस्य कृत्स्नस्वाध्यायविषयतानयुक्ता, स्वविधिप्रयुक्तौ "वेदानांकिञ्चिदधीत्य ब्राह्मण"इत्येकदेशाध्ययनप्रतीतेः । अतएव नतद्विध्यधीनविचारोपि कृत्स्नविषयः। परविधिप्रयुक्तौच कृत्स्नवेदाध्यापनासंभवात् स्वाध्यायपदाभावेनाध्यापनस्य तन्मात्रविषयत्वासंभवाच्च । किञ्चिदध्यापनमात्रेणाचार्यकसिद्धेर्नतत्प्रयुक्तमध्ययनं कृत्स्नविषयमित्यत्राह । (अध्ययनविधिनाध्यापनविधिनावेति) स्वविधिप्रयुक्तौ स्वाध्यायशब्दस्य कृत्स्नविषयत्वात् कृत्स्नस्वाध्यायाध्ययनंसिद्धिः, वेदानामित्यस्यसंज्ञापरत्वान्नसङ्कोचकत्वं । अध्यापनविधिप्रयुक्तिपक्षेऽपि अध्यापनविधिना अध्ययनविधिसिद्धस्य व्रतनियमविशेषयुक्तस्य कृत्स्नविषयस्यैवाध्ययनस्य स्वांगभूतोपनयनद्वारतया स्वीकाराद्ध्यापनविधिः कृत्स्नस्वाध्यायाध्ययनं प्रयुङ्क्तइति नतन्मुखेनाप्यध्ययनसङ्कोचावकाशइतिभावः। तयोः - विधिरागयोः । (नन्विति) अध्ययनविधिर्यदार्थज्ञानपर्यन्तः तदा तत्प्रयुक्तविचारस्सर्वत्रसिद्ध्यति, रागप्रयुक्तौतु विचारस्तत्साध्यनिर्णयोवा नस्वतः पुरुषार्थः, अपितु पुरुषार्थसाधनतया, अतो यस्ययत्पुरुषार्थरागसंभवः तस्य तदुपयोगिविचार एवेच्छास्यादितिविचारस्सङ्कोचमर्हतीतिभावः । त्रिवर्गापवर्गयोः परस्पराविरोधादेकस्योभयत्ररागासंभवमाशंक्याह (क्रमेणेति) उभयभावनाः - कर्मब्रह्मोभयभावनाश्चतुर्मुखादयः । (यस्यत्विति) यद्यपि सर्वेसर्वपुरुषार्थ रागयोग्याः तथापि तत्तत्कर्मानुरोधात् कस्यचित्क्वचिदेवेच्छाजायते, अत

यस्य लोकायतोपप्लुतमते द्विवर्गमात्रनिष्ठस्य वेदोदितेषु चतुर्ष्वप्यनास्था, यस्य चाशक्तिरापन्ना, तस्य केति प्रसंगात् । अस्त्वनर्हस्यानधिकारः स्वार्हंप्रति प्रवृत्ता मीमांसेतिचेत् , तुल्यं त्रिकाण्ड्यामपि । तिष्ठतु पुरुषार्थरागः कृत्स्नप्रवचनादिरागादपि कृत्स्नविचारस्समस्ति, तेन न ब्रह्ममात्रे विचारसंकोचः । कर्ममात्रेच विचारं संकोचयन् कवन्धमीमांसकस्तु राहुमीमांसकैरपि प्रतिनक्तव्यः, सिद्धेपि व्युत्पत्तिसंभवात् । अप्राप्तेस्स्वतः पुमर्थेच विषये प्रवृत्त्यनंगत्वेपि, श्रवणादियोगादर्थज्ञानस्य स्वतन्त्रत्वे उपायानुष्ठानशेषत्वेपि,

---

एतदीयप्राथमिकरागानुसारेण विशेषोद्देशेनैव मीमांसाशास्त्रं प्रवर्ततेतिभावः । (यस्येति) द्विवर्गः - अर्थकामौ । वेदोदितेषु - वेदप्रतिपन्नसाधनकेषु । तथाच तादृशपुरुषानुरोधे कर्तव्ये मीमांसायाः प्रवृत्तिरेवन स्यादितिभावः । (तुल्यमिति) उभयार्हानुसारेणैव प्रवृत्तायैकैकाधिकृतपुरुषानुग्रहस्यापि संभवा दुभयार्हानुसारेण मीमांसायाः सामान्योद्देशेनैव प्रवृत्तिरवर्जनीयेतिभावः । एवंचतुर्ष्वपि पुरुषार्थेषु रागसंभवात्तदर्थं कृत्स्नवेदार्थजिज्ञासायां तदनुसारेण सामान्योद्देशेन प्रवृत्तिरुपपादिता । इदानीं कृत्स्नवेदार्थजिज्ञासायां हेत्वंतरमाह (तिष्ठत्विति) रागात्कर्ममात्रेविचारसङ्कोचइतिपक्षेदूषणं सूचयन्नेवकर्ममात्रे विचारसंकोचं प्रकारांतरेणाशंक्यपरिहरति (कर्ममात्रइति) कवन्धमीमांसकस्त्वितितुशब्देन रागात्संकोचयन् प्रथमपक्षदूषणेनैवनिरस्तइतिसूचयति । शंकाचेत्थं - नब्रह्मणोविचारस्संभवति सिद्धेव्युत्पत्त्यभावेन वेदांतानां परिनिष्पन्नब्रह्मबोधनाशक्तेः । तत्सत्त्वेपि प्रवृत्तिनिवृत्त्यविषयस्य ब्रह्मणः प्रतिपादने प्रयोजनाभावादुपासनविधिशेषत्वेचार्थवादत्वेन स्वार्थविवक्षाविरहाच्च वेदांतानां तत्रप्रामाण्याभावादिति । (राहुमीमांसकैरिति) एकशास्त्र्यसमर्थनार्थंप्रयतमानै रपीतिभावः । प्रत्युक्तिप्रकारमाह (सिद्धेपीत्यादिना) (अप्राप्तइति) "अर्थज्ञानस्य स्वतन्त्रत्वे" इत्येतत्पूर्वेण संबध्यते । अर्थज्ञानस्य स्वतन्त्रत्वपक्षे स्वविषयप्रवृत्तिहेतुत्वाभावेपि पूर्वप्रमाणनिरतिशयपुरुषार्थ प्रतिपादनमुखेन तदुपयोगिश्रवणादौ प्रवृत्तिहेतुतया पुरुषार्थपर्यवसानादित्यर्थः . (उपायानुष्ठानेति) तन्निरविध्यपेक्षितफलरूप प्रतिष्ठादिवदुपासन विध्यपेक्षितब्रह्मरूपविषय दा

" तदुपयोगिसिद्धार्थबाधायोगाच्चेति ।

धोपि नयुज्यतइत्यर्थः। वयमप्येवमेव प्रतिब्रूमइतिभावः । इतिप्रतिवक्त व्यइत्यन्वयः । यद्वा (राहुमीमांसकैरिति) अतस्तैर्नेयंशङ्काकार्येतिभावः॥ कबन्धमीमांसकैरेव तथाशंकायां भवद्भिः कथं प्रत्युच्यतइत्याशंकायां प्र त्युक्तिप्रकारमाह (सिद्धेपीत्यादिना अयोगाच्चेतीत्यन्तेन) (स्वतइति) प्रवृत्तिनिवृत्त्यविषयत्वेपि स्वतो निरतिशयपुरुषार्थस्य स्वेनापिलब्धुंयोग्य त्वेनानुसंहितस्य श्रवणं प्रीतिश्चयुज्यतएवेति नप्रयोजनाभावः। ननु य दिश्रवणादेव प्रीत्यर्थं ब्रह्मबोधनं तदाबालोपच्छन्दनादि वाक्यवदयथार्थ त्वेपि प्रीतिसंभवान्नतस्य ब्रह्मणि प्रामाण्यं, अतः प्रामाण्यलाभार्थमुपास नानुष्ठान शेषतया कार्ये प्रामाण्यं वाच्यम् , तथाचारोपितेनाप्युपासन सिद्धेर्न ब्रह्मणिवेदान्तानां प्रामाण्यमित्यत्राह (अर्थज्ञानस्येति) स्वातंत्र्यं- उपायानुष्ठानमनपेक्ष्य प्रयोजनपर्यवसानं । (तदुपयोगीति) तच्छब्देन स्वातन्त्र्योपायानुष्ठाने विवक्षिते । अयंभावः , बालाद्युपच्छन्दनादाव प्यर्थतथात्वज्ञानादेव प्रीतिः। नचात्रापि तादृशभ्रमादेवप्रीतिः; बाध काभावेनौत्सर्गिक प्रामाण्यत्यागायोगात्, वाक्यान्तरेण तत्प्राप्त्युपायवि धानाच्च । उपायानुष्ठान शेषत्वपक्षेप्युपासनापेक्षित फलसमर्पकतया- प्रामाण्यं स्वर्गाद्यर्थवादवत् , विषयसमर्पकतयापि प्रामाण्यं - वाग्धेनु त्वादिवदत्र बाधकाभावात् । " तस्मिन्यदन्त " रितिसिद्धवदनुवादा त्, " ततोमांतत्वतोज्ञात्वा " "विदुःकृष्णंब्राह्मणास्तत्वतोये " इत्यादि ना तत्वज्ञानस्यैव मोक्षहेतुत्वश्रवणाच्च । स्वातन्त्र्यपक्षे तत्प्रेप्सापूर्वकत त्साधनप्रवृत्त्यादि मुखेनापि पुरुषार्थपर्यवसानं द्रष्टव्यम्। अत्रच स्वा तन्त्र्यपक्षे प्रत्यक्षादौ पशुधनादिस्वरूपं प्रतिपाद्य पर्यवसिते तत्प्रेप्सोः " चित्रयायजेत पशुकाम " इत्यादिना तत्साधनविधानवत् ब्रह्मपर वाक्ये ब्रह्मस्वरूपं प्रतिपाद्य पर्यवसिते तत्प्रेप्सोरुपासनादि विधान- मित्येकः प्रकारः , अस्मिन्पक्षे वाक्यभेदः। यद्वा " तपांसिसर्वाणिच यद्वदन्ती " ति सर्वस्य तपश्शब्दविवक्षितस्य वेदान्तस्य ब्रह्मपरत्वाव गमात् " तन्त्वौपनिषद " मितिच तथाऽवगमात् सर्वजगत्कारणत्वस र्वान्तर्यामित्व सर्वशेषित्व सर्वफलप्रदत्व सर्वकर्माराध्यत्व सकलविद्या प्रसाद्यत्वमुक्तप्राप्यत्व निरतिशयानन्दत्वादि विशिष्टब्रह्मस्वरूपं प्रति

कर्मशेषभूतस्यात्मनः शास्त्रान्तराद्विचारइति वदतापि शारीरकं शास्त्रै कदेशइति स्वीकर्तव्यम्, अन्यतस्तदयोगात् । तेनैव दन्तिभुक्तकपित्थन्यायेन निस्सारएव वेदांतइति नास्तिकानां वचनमवधूयते । अस्तु तर्हि ब्रह्मैकविषयतया विचारसंकोचः अतिशयितपुरुषार्थप्रतीतौ " स्थितेऽरविन्दे " इति न्यायावतारादिति चेन्न, कर्मविचारस्य कैश्चिदप्यननुष्ठानप्रसंगात् । अस्त्विति चेन्न, प्रत्यक्षविरोधात् । अतिशयितपुरुषार्थ प्रतीत्यभावात्कस्यचिदुपपत्तिरिति चेन्न । तदभावस्तस्य त्रय्यन्तभागानध्ययनाद्वा तत्सहकारि विरहाद्वा, नाद्यः - विधेः कृत्स्नविषयत्वस्थापनात् । नद्वितीयः - सांगाध्ययनादेव तत्रापि तत्सिद्धेः । नहि सांगाध्ययनविधेस्तत्रैव सर्पमारः, अन्यत्रापि तत्प्रसंगात् । तथात्वेवाक्यशास्त्रारंभः । तत्सिद्धावप्यनादि

पाद्यम्, अत्राप्येतादृशब्रह्मप्रतिपादनेन प्रीत्यर्थतया पुरुषार्थपर्यवसानेऽपि ब्रह्मस्वरूपप्रतिपादने उपसर्जनतया प्रसक्तोपायानुष्ठानेनापि पुरुषार्थपर्यवसानमित्यपरः प्रकारः, अत्रच नवाक्यभेदः । उपायानुष्ठानशेषत्वेतु उपायविध्यपेक्षित विषयफलार्पकतया उपसर्जनतया ब्रह्मप्रतिपादनं, अत्रापि नवाक्यभेदइति । प्रसङ्गात्कर्ममीमांसकैकदेशिनापि - नेयं शंकाकार्येत्याह (कर्मशेषेति) (अन्यतइति) शास्त्रैकदेशादन्यतइत्यर्थः (तेनैवेति) अतस्तन्निरासोपि नास्माकमेव भरइतिभावः । (अस्त्विति) तथाच चतुर्ष्वपि पुरुषार्थेषु रागसंभवान्नेति परिहारोसंगतइतिभावः । तत्सहकारीति व्युत्पत्त्यादिकं विवक्षितम् । (तत्रापीति) कर्मभागइव ब्रह्मभागेपि व्युत्पत्त्यादिसहकारिसिद्धेरित्यर्थः । (तत्रैवेति) त्रय्यन्तभागे । तथाच ब्रह्मणि विचारं संकोचयतस्तवाभिमता ब्रह्ममीमांसापि नस्यादित्यपिहृदयम् । नचायमिष्टप्रसंगइत्याह (तथात्वेवेति) अन्यत्रापिसर्पमारे । (तत्सिद्धावपीति) व्युत्पत्त्यादिसहकारि सिद्धावपीत्यर्थः । तथाच सत्पथवर्त्यनुग्रहाय ब्रह्मविचारार्थमेव शास्त्रप्रवृत्तिर्युक्ता । यद्यप्यन्येप्यनुग्राह्याः तथापि दुर्वासनादाढ्यात्केषाञ्चित्कर्मण्येव जिज्ञासा । तदभावात् " स्थितेरविन्द " इतिन्यायेन केषाञ्चित् ब्रह्मण्येव जिज्ञासेति नैकस्योभयजिज्ञासासंभव इति सामान्यतो जिज्ञासानुरोधेन शास्त्र

दुर्वासना दार्ढ्यादपथे प्रवर्तन्ते कर्ममीमांसका इतिचेन्न, त्वयापि विविदि पासाधनाधिकारे कर्मणां सत्पथत्वस्वीकारात् ।

तथापि तद्विचारश्शारीरक शेषइतिचेत्, सिद्धंशास्त्रैक्यं। कर्मस्वरूपा दिविचारमन्तरेण विविदिषार्थविनियोगायोगात्। वेदनार्थविचारपक्षेपि किंपु नः। भवांतरीय सुकृतविशेषमृदितकषायस्य कस्याचिदयत्नेनविविदिषोत्पत्तौ किंतदर्थकर्मविचारेणेति चेन्न, तथैवकस्यचिदत्यन्तमृदितकषायस्य जाति स्मरणादिवत्सिद्धज्ञानतया शारीरकेप्यनारंभात्। तदर्हस्य तदारंभइतिचेत्,

---

प्रवृत्तिरितिभावः। (त्वयापीति) सत्पथवर्त्यनुग्रहेपि कर्माधिकार्यनुग्र हाय कर्ममीमांसापिकार्येति भावः। (तथापीति) सत्पथत्वस्वीकारेपि विविदिषार्थकर्मणामेव सत्पथत्वं, तानिच यज्ञादिकर्माणि प्रसिद्धयज्ञा दिभ्योभिन्नानि मासाग्निहोत्रवत्, तद्विषयविचारश्च विविदिषार्थत्वादि चिन्तैव, तथाच तद्विचारस्सत्पथत्वेन स्वीकृतकर्मविचार श्शारीरकशे षत्वात्तत्रैव क्रियते, जैमिनीयकर्म विचारश्च प्रसिद्धकर्मविषयः - तेषां चापथत्वात्तद्विचारोपि तथेति नतेनैकशास्त्र्यमित्यर्थः। (कर्मस्वरूपेति) विविदिषार्थकर्मणामन्येषांच मासाग्निहोत्र नैयमिकाग्निहोत्रवद्भेदोवास्तु, नित्यकाम्य ज्योतिष्टोमवद्विनियोग पृथक्त्वमात्रंवास्तु, सर्वथापि कर्म स्वरूपविचारा भावेऽनुष्ठानानुपपत्तेः विविदिषार्थ विनियोगोनयुक्तः, वैयर्थ्यप्रसङ्गात्। अतोवश्यापेक्षितः कर्मविचारइति तेनैकशास्त्र्यमित्यर्थः। भवद्भिर्विविदिषार्थत्वा नङ्गीकाराद्भवत्पक्षे कथं तच्छेषतयैक शास्त्र्य मित्यत्राह (वेदनेति) विविदिषार्थत्वेहि कर्म मीमांसा कथंचिद्ब्रह्मजि ज्ञासोपयोगिनी, वेदनार्थत्वे त्वङ्गविषयत्वादङ्गिशास्त्रेण सुतरामभिन्नेति भावः। (भवान्तरीयेति) तथाच तत्र ब्रह्ममात्रे विचारसंकोचस्संभव तीतिभावः। मृदितकषायस्येत्यनेन "कषाये कर्मभिः पक्व" इतिस्मृ त्यनुसारात् प्रतिबन्धकपापापनोदनेन कर्मणां विविदिषार्थत्वं यज्ञादि वाक्ये विवक्षितमिति सूचितम्। (जातीति) जन्मान्तरसुकृतविशे षाज्जातिस्मरण धर्मरुच्यादिकं यथा सिद्ध्यति तथा ज्ञानमपि येषांसिद्धं "स्वयमागतविज्ञाना" इत्यादिप्रमाणानुसारात तान्प्रत्यनुपयोगात् ब्र ह्ममीमांसापि व्यर्थेत्यनारंभस्स्यादित्यर्थः। तदर्हस्य—ब्रह्मजिज्ञासोः।

एवमुभयार्हस्य उभयारंभइतितुल्यं । नह्यनधिकारिणंविधिःविकुरुते ; रागोऽपितथा । नह्यशकनीयमर्थं वेदोऽपि विदधातीतिन्यायात् । यदा च यावज्जीवमनुष्ठेयं ज्ञानमपवर्गोपायइतिसेत्स्यति तदा तदुपचयार्थं तदर्थविविदिषानुवृत्त्यर्थंवा सत्कर्मणांनित्यानुष्ठेयत्वेन विचारोऽवश्यंभावी ।

(उभयार्हस्येति)कृत्स्नवेदार्थजिज्ञासोः कृत्स्नविचारारंभः । कर्मविचारापेक्षा नियमाभावो नैकशाखाध्ययनभञ्जकः - तथा सति जन्मान्तरीयसुकृतवशा च्छेदग्राह्मण्ये सुदृढविश्वासपुरुषस्य प्रमाणलक्षणस्या नपेक्षितत्वात्तस्या प्युत्तरलक्षणैरैकशाख्यं न स्यादिति भावः । ननु उभयार्हं प्रतिकृत्स्नवि चारारंभोयमिति कुतः, एकैकार्हं प्रत्येकैकारंभइति कुतो नस्यादित्यत्रा ह (नहीति) विचारोहि विधिप्रयुक्तोवा स्यात् रागप्रयुक्तोवा स्यात् , तत्राध्ययनविधे रर्थज्ञानकामाधिकारकत्व पक्षे विचारस्याप्यध्ययनविधि नाक्षेपाद्विधिप्रयुक्तता , नचाध्ययनविधिः कृत्स्नार्थज्ञानकामाधिकारकः, तत्तद्वाक्यार्थज्ञान कामनायास्तत्तद्वाक्या ध्ययनाधिकारत्वे कृत्स्नाध्ययन नियमानुपपत्तेः । तथाच तद्विधिमूलविचारोऽपि तादृशाधिकारि विषय कएव । अतो नैकैकमात्रजिज्ञासुं प्रति विधिः प्रवर्तकः , तस्यानधिकारि णं प्रत्यप्रवर्तकत्वात् । रागप्रयुक्तिपक्षेपि साङ्गाध्ययनविधेः कृत्स्नगोच रतया तदधीनापात प्रतीत्युत्थापित रागोऽपि कृत्स्नार्थज्ञानगोचरोयु क्तइति विध्यधीनस्तदुपाय विचाररागः कृत्स्नार्थज्ञानकामं प्रत्येव प्रव र्तकः , विधिवदेव तस्याप्यनधिकारिणं प्रत्यप्रवर्तकत्वात् । अत्रच फल रागोऽधिकार स्थानीयः तथाच उपायरागः स्वस्मिन्नधिकारिस्थानीयं फ लार्थिनमेव प्रवर्तयति विधिवदित्यर्थः । (नहीति) अशकनीयार्थविधा यकत्वं यथावेदस्य न संभवति , तथानधिकारिप्रवर्तकत्वमपि विधिरा गयोर्नसंभवतीत्यर्थः । एवं विविदिषार्थत्वपक्षे ब्रह्ममात्रेविचारसंकोचं पुरुषविशेषेभ्युपगम्य तदन्यपुरुषविषयतया कृत्स्नविचारारंभस्समर्थितः वस्तुतस्तु सत्कर्मणां ज्ञानार्थत्वे विविदिषार्थत्वेवा ब्रह्ममात्रे विचारसं कोचः क्वापि पुरुषे नसंभवतीत्याह (यदाचेति) यद्यपि वेदनार्थत्वे त दुपचयार्थं कर्मापेक्षा , विविदिषार्थत्वेतुकथम् , उत्पन्नायास्तस्यास्स्वय

नच जन्मांतरकर्मबलाद्यावर्जीतं विविदिषा स्यादितिनिश्चेतुं शक्यं, प्राक्तनैरयतनैर्वा प्रबलैर्विरोधिकर्मभिः तत्प्रतिबन्धशंकयापि नित्यं सत्कर्मणां संग्राह्यत्वात्। अन्यथा प्राक्तनैरेव कर्मभिर्वृष्टिस्स्यादिति कारीर्यादिकं नानुष्ठीयेत। नच नित्यनैमित्तिकविधिःविविदिषोत्पत्त्या निवर्तते, वर्णाश्रमादिनिबन्धनत्वात्तस्य। वर्णाश्रमाद्यभिमाननिवृत्त्या तन्निवृत्तिरितिचेत्, केयमभिमाननिवृत्तिः; किन्तद्भ्रमस्यनिवृत्तिः, उतस्वसमवेतत्व भ्रमस्यानिवृत्तिः, किंवा देहात्मतादात्म्यभ्रमस्य निवृत्तिः, अथवा वर्णाश्रमाद्याश्रय पिण्डसंबन्धभ्रान्तिनिवृत्तिः, अथवा पिण्डस्यैवनिवृत्तिः। नाद्यः - असिद्धेः। नद्वितीयः - कर्ममीमांसकानामपि पारलौकिकात्मविदां वर्णादेस्स्वसमवेतत्वभ्रमाभावेन कर्मणामधिकार्यभावप्रसङ्गात्।

मेवानुवृत्तेः, विविदिषायामुपचया सिद्धेश्चेत्यत्राह (नचेति) हेत्वभावादितिभावः। निश्चये प्रतिबन्धसद्भावादपि न निश्चयसंभवइति हेत्वन्तरोपन्यासपूर्वकं निश्चयाशक्यतामुपसंहरन् तत्फलितं कर्मणां संग्राह्यत्वमाह (प्राक्तनैरिति) प्रतिबन्धशंकयेत्यनन्तरं उक्तनिश्चयाभावेनेतिशेषः। संग्राह्यत्वादिति पञ्चम्या विचारोवश्यंभावी त्यध्याहृतपदेनान्वयः। कस्यचिदुक्तनिश्चय संभवेपि कर्मापेक्षामुपपादयति (नचेति) ततश्च नविचारसंकोचइति भावः। आत्मनि वर्णाश्रमादेरभावात्तदभिमान निबन्धनएव विधिः, नचाभिमानो विविदिषायाःप्रागेव नित्यानित्यविवेकबलान्निवृत्तइति तन्निबन्धनविधिरपि तदानींनिवृत्तइति जन्मान्तरकर्मबलसिद्धविविदिषस्य तदर्थं कर्मविचारापेक्षाया अभावाद्ब्रह्ममात्रे विचारसंकोच इत्याशयेन शंकते (वर्णाश्रमेति) (तद्भ्रमस्येति) तत्स्वरूपाध्यासस्येत्यर्थः। (किंवादेहात्मेति) वर्णाश्रमशब्देनतद्विशिष्टोदेहः, अभिमानशब्देनतादात्म्याभिमानश्च विवक्षितुंशक्यतइतिभावः (पिण्डस्यैवेति) अभिमानशब्देन अर्थाध्यासः तस्यचवर्णाश्रमशब्देनदेहपरेण कर्मधारयोविवक्षितुंशक्यइतिभावः। (असिद्धेरिति)

नहि देहात्मभ्रमवंतंप्रति धर्मोपदेशः । न तृतीयः — भ्रमनिवृत्तिर्हि देहातिरिक्तात्मविस्रंभौपयिकतया पारलौकिककर्मानुष्ठान योग्यतामेवाव ह्येदिति कथंतया सा निवर्तते । न चतुर्थः - तत्संबन्धस्य सत्यत्वेन भ्रमत्वा सिद्धेः । न पंचमः - ब्रह्मविचारस्याप्यनारंभप्रसंगात् प्रत्यक्षादिविरोधाच्च । वास्तवनिवृत्तिमात्रविवक्षाया मविरोधइतिचेन्न , तस्य कर्माधिकारदशा यामपि भवता स्वीकारात् । किंच यावताकर्माधिकारो निवर्ततइति मनुषे तावता वेदान्तश्रवणाद्यधिकारोपि निवर्ततइति ब्रह्ममीमांसैव न स्यात् । नचायमिष्टप्रसंगः , तत्वज्ञानोदयात्पूर्वं तदनभ्युपगमात् । न नु कर्ममीमांसाया वेदान्तविचारानुपयुक्तत्वा न्न तया सहास्यैकशा स्त्रयमितिचेन्न , अनुपयोगासिद्धेः । को सावुपयोगइतिचेत् , न्यायो पजीवनं तावत् । तथाहि - बाह्यान्तरनिमित्ताप्रामाण्य निराकरणेन प्र माणलक्षणं तावत्कृत्स्नोपयुक्तं । भेदलक्षणोपजीवीच गुणोपसंहारपादः ।

मोक्षदशाया मेवतदध्यासनिवृत्ते रिति भावः । (तत्संबं - धस्येति) देहसंबंधस्याप्रातिभासिकत्वेन तज्ज्ञानस्य प्रातिभासिकभ्र- मत्वासिद्धे स्तस्य मोक्षात्प्रागनिवृत्तेरित्यर्थः । (यावतेति) श्रवणविधिर पित्रैवर्णिकाद्यधिकारिकः । तथाचानिवृत्ताभिमानेनुकर्मविचारस्संभवति; ब्रह्मविचारस्तु नित्यानित्य विवेकाधिकारकत्वा न्निवृत्ताभिमानस्यै वेति सकुत्रापि नस्यादितिभावः । एवं विचारसंकोचाभावात्कृत्स्नवे दार्थनिर्णयोद्देशेन शास्त्रप्रवृत्त्यौचित्यादैकशास्त्र्यमिति स्थितं । तत्र विचारशास्त्रयोस्तथापि परस्पराकांक्षाविरहात्कथमैकग्रन्थ्य पर्यन्तैक शास्त्र्यमिति चोदयति (नन्विति) यद्यपि विद्यायां कर्मणामुपयोग उक्तः तथापि विचारयोः परस्परमुपयोगानुक्ते राकांक्षाविरहान्नैकशा स्त्र्यमित्याक्षेपो युक्तः । (न्यायेत्यादि) उपयोगइत्यनुषङ्गः । (बाह्येति) बाह्यहेतुसमुत्थाप्रामाण्यं प्रथमपादे निराक्रियते । आन्तरहेतुसमुत्थाप्रामा ण्यं त्रिपाद्यां । (कृत्स्नेति) पूर्वोत्तरभागविचारात्मके कृत्स्नशास्त्रे उपयु क्तं (भेदेति) " सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषा " दित्यत्र तावत " एकंवा संयोगरूपचोदनाख्या विशेषा " दिति शाखान्तराधिकरण

तार्तीयाश्च श्रुतिलिंगादयस्सार्वत्रिकाः । प्रयुक्तिश्च वर्णाश्रमादिधर्माणां विद्याप्रयुक्तत्वाश्रमप्रयुक्तत्वादिविमर्शे निविशते । गतिचिन्तायांच पाञ्चमिकः क्रमः ।

न्यायव्युत्पादन मुपजीव्यते । नचेदमेव तद्व्युत्पादनमितिवाच्यं, चोदनाद्यविशेषादित्यादि शब्दस्य संयोगरूप चोदनाख्याविशेषादिति पाठापेक्षत्वात् । एकमिति साध्यानिर्देशश्च तन्नयायोपजीवनेन तल्लाभादेव । तथा " गुणश्चापूर्वसंयोगे वाक्ययोस्समत्वा " दित्यधिकरणव्युत्पादितो गुणभेदो " नवाप्रकरणभेदात् परोवरीयस्त्वादिव " दिति च्छान्दोग्य बृहदारण्यकोद्गीथ विद्ययोर्भेदाथमुपजीव्यते । तथा " नानाशब्दादिभेदा " दित्यत्र शब्दान्तराभ्यासादिभि र्भेदव्युत्पादनोपजीवनमादि शब्दात्प्रतीयते । (तार्तीयाइति) " श्रुत्यादिबलीयस्त्वाच्च नबाधः " " लिंगभूयस्त्वात्तद्धि बलीयस्तदपी " त्यादिना तार्तीय न्यायानामेवोपजीवन मितिगम्यते । (प्रयुक्तिश्चेति) " विहितत्वाच्चाश्रमकर्मापी " त्यधिकरणेन विद्यांगत्वाश्रमांगत्व निर्णये कृते चातुर्थन्यायेन प्रयुक्तिस्सिध्यतीत्यर्थः । (गतिचिन्तायामिति) " वायुमब्दादविशेषविशेषाभ्या " मित्यधिकरणे पाञ्चमिकन्याय उपजीव्यते । तथाहि कौषीतकिनः " सएतंदेवयानं पन्थानमापद्याग्निलोकमागच्छति सवायुलोकं सवरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोक " मित्यग्निलोकादनन्तरं वायुलोकमधीयते । वाजसनेयिनस्तु " यदावै पुरुषोस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै सतत्रविजिहीपते यथा रथचक्रस्यखन्वेन स ऊर्ध्वम आक्रमते स आदित्यमागच्छती " त्यादित्यात्पूर्वं वायुमधीयते । तत्र कौषीतकिनां पाठक्रमेणाग्निलोकशब्दोक्तादर्चिषः परत्वेन वायुः प्राप्तः । उक्तवाजसनेयश्रौत क्रमेण पाठक्रमाद्बलीयसा तद्बाधेनादित्यात्पूर्वं वायुर्निविशते । संवत्सरस्तुच्छान्दोग्ये मासात्परं श्रूयते " तेर्चिषमभिसंविशन्ति अर्चिषोहरह्न आपूर्यमाणपक्षआपूर्यमाण पक्षाद्यान् षडुदङ्ङेति मासांस्तान्मासेभ्यस्संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसोविद्युतं तत्पुरुषोमानव-

कर्ताविद्याधिकारिचिन्तने विशेष्यते । अतिदेशादयश्च "तदेव रूपं यदमुष्य रूपम्" इत्यादिषु । ....

स्सएनान्ब्रह्मगमयती" ति । वाजसनेयकेतु "अर्चिषोह" रित्या दिमाशान्तं पठित्वा "मासेभ्योदेवलोकन्देवलोकादादित्य" मिति मासात्प रतो देवलोकश्श्रूयते । तत्र द्वयोःश्रुतिष्वप्यधिककालानांन्यूनकालोत्तरत्वे- नाहःपक्षादिषु दर्शनादर्थक्रमेण संवत्सरस्य मासात्परतोनिवेशस्सिद्ध्यति, तथाचार्थस्यक्रमनियामकत्वं श्रौतक्रमस्यपाठक्रमाद्बलीयस्त्वंच पंचमसि- द्धमुपजीव्याब्दादित्ययोरन्तराळे वायुदेवलोकशब्दार्थनिवेशं सिद्धंकृत्वा "वायुमब्दा" दित्यधिकरणेवायुदेवलोकशब्दयोर्भिन्नार्थत्वं पूर्वपक्षी- कृत्यैकार्थ्यंप्रसाध्यते । एवं "तटितोधिवरुणस्संबन्धा" दित्यधिकरणे पि पांचमिकन्यायउपजीव्यते, तत्रच वरुणस्य कौषीतकिपाठक्रमादादि त्यात्पूर्वत्वेप्राप्ते मेघोदरवर्तित्वलक्षणविद्युत्संबन्धादर्थाद्विद्युत ऊर्ध्वं नि वेशउक्तः । अर्थक्रमस्य बलीयस्त्वंच पञ्चमसिद्धं तत्रोपजीव्यं । (क र्तेति) "फलार्थत्वात्कर्मणश्शास्त्रंसर्वाधिकारं स्यात्" इत्यधिकरणे स मर्थानामेवाधिकारोनान्येषां शक्यांगमात्रोपसंहारेणेति निर्णयमुपजीव्यात्रवि धुरादीनां देवादीनांच किं सामर्थ्यमस्ति उतनेत्यादिचिन्तया अधिका रिविशेषनिर्णयः क्रियते । नैष्ठिकादिभ्रष्टानाञ्च पातित्यस्मरणेन वैदिक कर्ममात्रानधिकारिणामसामर्थ्यात् ब्रह्मविद्यानधिकारश्च प्रतिपाद्यते । ए वं स्वर्गकामाधिकरणेन फलकामस्याधिकारे सिद्धे मोक्षकामानां देवा दीनामप्यधिकारोस्ति नवेति चिन्त्यतइत्यर्थः । (अतिदेशादयश्चेति) "अन्तस्तद्धर्मोपदेशा" दित्यत्रभाष्ये – "अन्तरादित्येन्तरक्षिणिच यःपु- रुषः प्रतीयते सजीवादन्यः परमात्मैव, तद्धर्मोपदेशात्, जीवेष्वसंभवस्त- दुक्तस्यैव परमात्मनोधर्मोयमपहतपाप्मत्वादिः 'सएषसर्वेभ्यः पाप्म भ्य' इत्यादिनोपदिश्यत" इत्युक्तं । अनन्तरं हिरण्मयपुण्डरीकाक्ष त्वादिविशिष्टाप्राकृतदिव्यविग्रहयोगश्च परमात्मनः प्रसाध्य "अतःपर- स्यैवब्रह्मणएवंरूपरूपवत्त्वादयमपि तस्यैव धर्मः, अत आदित्यमण्डलाक्ष्य धिकरणआदित्यादिजीवव्यतिरिक्तः परमात्मैवे" त्युपसंहृतम् । तच्च अक्षिपुरुषेऽपहतपाप्मत्वविलक्षणविग्रहयोरतिदेशतः प्राप्तिमुपजीव्य ।

तत्र विग्रहप्राप्तिः "तदेवरूपं यदमुष्यरूप" मित्यतिदेशात्, अत्ररूप शब्दस्य वर्णपरत्वविग्रहपरत्वसंशये "एककपालानां वैश्वदेविकःप्रकृति" रिति सूत्रोक्तन्यायेन विग्रहस्यातिदेश इति निर्णयः । तथाहि-वैश्वदेवे "द्यावापृथिव्यएककपाल" इतिश्रुतं, अनन्तरं वरुणप्रघासे- "कायएककपाल" इति श्रुतं, अनन्तरं साकमेधे "एतद्ब्राह्मणएककपाल" इति, तत्र किंवैश्वदेविकस्यैककपालस्य ब्राह्मणमतिदिश्यते, किं वावारुणप्रघासिकस्येति संशये - वारुणप्रघासिकेऽल्पं प्राकृतं वैश्वदेविके बहु, अतो भूयोधर्मलाभाद्वैश्वदेविकस्यातिदेश इत्युक्तं । अत्रापि रूपशब्देन वर्णविशेषाभिधानेऽल्पातिदेशाद्विग्रहपरत्वे तच्छब्देन प्रकृतपुण्डरीकाक्षत्वहिरण्यश्मश्रुत्वादि परामर्शाद्भूयोधर्मलाभाद्विलक्षणविग्रहातिदेशइति निर्णयः । यद्यपि तत्रायंपूर्वपक्षः - अव्यवहितत्वादेतच्छब्देन वारुणप्रघासिकस्यातिदेशइति सिद्धान्तितं, तथाप्यत्र तादृशबाधकाभावात्पूर्वपक्षन्यायेनैवार्थनिर्णयः । अपहतपाप्मत्वमपि "यन्नामतन्नामे" त्यतिदेशप्राप्तनामबलात् । उदित्येतन्नामह्यत्रातिदिश्यते, तस्यच "तस्योदितिनाम सएषसर्वेभ्यः पाप्मभ्यउदित" इत्यादित्यपुरुषे प्रवृत्तिनिमित्तं क्लृप्तं । तथाच तदन्यप्रवृत्तिनिमित्तकल्पने गौरवादुपास्यगुणविशेषलाभाच्च तत्प्रवृत्तिनिमित्तस्वीकारा दपहतपाप्मत्वलाभः । यथा 'मासमग्निहोत्रं जुहोती' त्यत्र मासाग्निहोत्रनैयमिकाग्निहोत्रयो रग्निहोत्रशब्दप्रयोगाविशेषादुभयत्रापि मुख्यत्वे प्राप्ते "एकस्यत्वभिधेयत्वे गौणत्वेनापि संभवात् । नान्यस्याप्यभिधेयत्वमनेकार्थत्वदोषतः ॥" इतिएकत्रैव मुख्यत्वमुक्तं । तथात्राप्यनेकार्थत्वपरिहाराय तदेव प्रवृत्तिनिमित्तमिति सिद्ध्यति । अतिदेशादयइत्यादिशब्देन ऊहादयो विवक्षिताः । अयंभावः- "सर्वापेक्षाच यज्ञादिश्रुतेरश्ववत्" दित्यत्र यज्ञादीनां विद्याङ्गत्वं प्रतीयते, यज्ञानाश्चाग्नेयसौर्यादीनामङ्गत्वं साङ्गानामेव, अतो यज्ञांगभूतस्य "अगन्मसुवस्सुवरगन्मे" त्यादिमन्त्रस्य स्वर्गरूपफलप्रकाशकस्य विद्यार्थं यज्ञाङ्गत्वं "अगन्मविद्यांविद्यामगन्मे" त्यूहसापेक्षं, अतस्सांगस्य यज्ञस्य विद्यार्थत्वनिरूपणमूहसापेक्षं, ऊहश्च नावमिकन्यायाधीनः । तन्त्रहि - "फलदेवतयोश्च" इत्यधिकरणे सौर्यादिष्वतिदेशतः प्राप्तस्य- "अगन्मसुव" रितिमन्त्रस्य 'अगन्मब्रह्मवर्चस' मिति सौर्यफलप्रकाशकपद

प्रक्षेपेणोह्युक्तः। तथा "हानौतूपायनशब्दशेषत्वात्" "कुशाच्छन्दस्तु त्युपगानवत्तदुक्त" मित्यत्र शाखान्तराम्नातोपायनवाक्यस्य हानिवाक्यशेषत्वं कुशादिदृष्टान्तेनोपपाद्य एकवाक्यत्वसंभवे हान्युपायनयोश्छिन्नत्वे विकल्पापादकवाक्यभेदो न न्याय्यइत्यत्र "तदुक्त" मिति सूत्रखण्डे दाशमिकपर्युदासाधिकरणसम्मतिप्रदर्शनेन तन्न्यायउपजीव्यते। तत्राहि - "नार्षेयंवृणीत" इति महापितृयज्ञाम्नातं "यजेषुयेयजामहं करोति - नानूयाजेष्वि" त्यनारभ्याधीतश्च वाक्यमधिकृत्य विचार्यते- किं वरणयेयजामहाभ्यां प्रतिषेधस्य विकल्पः, उततयोर्निवृत्तिरिति - त्र प्रतिषेधे नञोमुख्यार्थत्वलाभात् पर्युदासे कात्यायनमते समासप्रसङ्गाच्च प्रतिषेधः, तथाच विकल्पइति "प्रतिषेधः प्रदेशेनारभ्यविधानेच ...प्राप्तप्रतिषिद्धत्वाद्विकल्पस्स्या" दितिसूत्रेण पूर्वपक्षंकृत्वा, "अपितु वाक्यशेषस्स्यादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशस्स्या" दिति सूत्रेण सिद्धान्तितम्। तस्यार्थः-एकवाक्यत्वलाभान्नामान्वयेपि समासविकल्पस्य पाणिनिस्मरणादष्टदोपदुष्टविकल्पस्यान्याय्यत्वाच्च पर्युदासः, तथाच वरणयेयजामहयोर्निवृत्तिरिति। तथा "नस्थानतोपी" त्याधिकरणे "दर्शयतिचाथोअपिस्मर्यते" इत्यादिसूत्रेषु श्रुतिर्दर्शयति गुणमित्युक्तिः - पदाहवनीयन्यायेन विशेषनिषेधस्य विहितविशेषेतरविषयत्वमभिप्रेत्य। सच न्यायोदाशमिकः। तथा अहीनसत्रयोर्लक्षणतोभेदे तदुपजीवनेन "द्वादशाहवदुभयविधंबादरायण" इत्युक्तं। एवं "पूर्वविकल्पःप्रकरणात् स्यात् क्रियामानसवं" दिति विद्यामयमनश्चितादीनां विद्यामयक्रत्वंगत्वसाधनार्थेधिकरणे पूर्वपक्षे विद्यामयस्यापि क्रियामयक्रत्वंगत्वे मानसग्रहोनिदर्शितः। तस्यच द्वादशाहांगत्वं दाशमिके "मानसमहरन्तरं स्यात् भेदव्यपदेशा" दित्यधिकरणसिद्धमुपजीव्यते। एवं तन्त्रन्यायो "विहितत्वाच्चाश्रमकर्मापी" त्यत्रोपजीव्यते। तत्राहि- कर्मणामाश्रमांगत्व विद्यांगत्वसाधनपूर्वक मुभयार्थकर्मणामैक्यसाधनस्य- तन्त्रेणानुष्ठानं फलमित्युक्तम्। पृथक्प्रयुक्तिशक्तिमदुभयगोचरत्वे देशकालाद्यैक्येच सकृत्करणं तन्त्रं, तच्चैकादशेस्थापितम्। विद्यार्थंकर्मणैव प्रसंगान्नित्यासिद्धिरित्याचार्यमेघनादारिसूरयः। तेषामेतद्विचारस्य

अतः कर्ममीमांसानिरूपितस्वरूपैस्तत्तन्न्यायैरेवहिवेदांतार्थोविचार्यते । अपूर्वास्त्वत्रकतिपयेन्यायाः । विद्याङ्गभूतयज्ञादिस्वरूपशिक्षणञ्च । अन्यथा"यज्ञेने"त्यादिवाक्यार्थानवबोधप्रसङ्गात् । नह्यविदितपदार्थविशेषोवाक्यार्थावसायीस्यात् । यज्ञादिकल्पनंच तत्रतत्रक्रियते, तदपि यज्ञादिस्वरूपनिरूपणसापेक्षं । यच्चातिशयितपुरुषार्थप्रतीत्यातदर्थोवेदान्तभागएव प्रवर्ततामिति, तत्रेयं प्रतीतिः किमापातसम्भवा उत निर्णयात्मिका, नप्रथमः "अपामसोमममृताअभूम अक्षय्यंहवैचातुर्मास्ययाजिनस्सु कृतं भवति,, इतिकर्मभागेप्यक्षयफलापातोपलम्भात्, ब्रह्मभागेऽपि "नप्रेत्यसंज्ञास्ती,, त्यादिभिरपुरुषार्थापातोपलम्भात् । ननुपूर्वापरवाक्यानुगुण्यात्तेषां स्तुतिमात्रपरत्वम्, अस्यतुवाक्यस्य तस्मादेवपरमपुरुषार्थ एव तात्पर्यमिति वैषम्यमस्तीतिचेत्; किंतेन, अप्रमितत्वेन विचारनियमं प्रत्यनुपकारकत्वात्। नद्वितीयः — मीमांसयाविनातदसिद्धेः । तत्वविदुपदेशा त्तत्सिद्धिस्संभवतीतिचेत्, तर्हि ब्रह्ममीमांसायाअप्यनारम्भस्स्यात् -तदुपदेशतएव ब्रह्मस्वरूपसिद्धेः, ततएव भ्रमनिवृत्तेश्च । ....

प्रसंगःफलं । उपयोगान्तरमाह (विद्येति) विद्यांगभूतेत्यनेनांगांगिविचारत्वाद्दर्शपूर्णमास प्रयाजादिशास्त्राणामिव परमशास्त्रैक्यमवगन्तव्यमिति सूचितम् । अनेन शारीरकतृतीयाध्यायेनैक्यमुक्तं भवति । 'नही' त्यादिना "सर्वापेक्षाचे" त्यनेन ऐक्यमुक्तंभवति । उपयोगान्तरमाह (यज्ञादीति) अस्तुतर्हि ब्रह्मैकविषयतया विचारसंकोचः, अतिशयितपुरुषार्थप्रतीतौ "स्थितेरविन्द" इति न्यायावतारादित्यत्रचोद्ये, यद्युक्तहेतुना ब्रह्ममात्रे विचारसंकोचः तदा कर्मानुष्ठानस्यैवाभावात्प्रत्यक्षविरोधः, कथंचित्तदुपपादनेच शास्त्रैक्यंसिद्धमित्यनिष्टापादनेन संकोचकत्वासंभवेन परिहार उक्तः । इदानीमतिशयितपुरुषार्थप्रतीतिरूपहेत्वंशं दूषयितुमनुवदति (यच्चातिशयितेति) हेत्वंशानुवादे तात्पर्यम् - (ननुपूर्वापरेति) ततश्च कर्मफलस्य वस्तुतः क्षयिष्णुत्वमेवेति भावः (किन्तेनेति) वास्तववैषम्येणेत्यर्थः । ननु साक्षात्कारस्य भ्रमनिवर्तकत्वात्तस्य च श्रवणादिजन्यत्वान्मीमांसापेक्षेत्यत्राह (ततएवेति) स्वतो परोक्षवि

अत एकस्यैव पुरुषस्य वेदोदितसर्वपुरुषार्थयोग्यतामाश्रित्य एकव्याख्ये
यव्याख्यानात्मना विंशतिलक्षणमेकं शास्त्रमिति । ....

षयेत्वन्मते अविचारितेनापि शब्देन साक्षात्कारस्यैवोत्पादात्, अन्यथा विचारितेनापि तदनुत्पादादिति भावः (अतइति) एकग्रन्थत्वपर्यन्तमैकशास्त्र्यमिहसाध्यं – तस्यैव क्रमहेतुत्वात्, तत्रैकव्याख्येयव्याख्यानात्मत्वं हेतुः । एकव्याख्यानात्मत्वेपि तदंशव्याचिख्यासयैव प्रवृत्तौ नोभयोरेकग्रन्थत्वमित्यत्रोक्तं (एकस्यैवेति) आत्मनेत्यनन्तरं प्रवृत्तमिति शेषः । पूर्वोक्तनीत्या प्राथमिकसामान्यजिज्ञासानुसारेणैव ग्रन्थप्रवृत्तियुक्तेतिभावः । एकव्याख्येयव्याख्यानात्मना प्रवृत्तमित्यत्र "अथातोधर्मजिज्ञासा" इति सूत्रस्वारस्यमभिप्रेतं । तत्राथशब्दः कृत्स्नवेदाध्ययनानन्तर्यपरतया सर्वसम्मतः, अतश्शब्दोपि कृत्स्नवेदाध्ययननिर्वृत्तेर्हेतुत्वपरतया, अत इदं पदद्वयं मीमांसाद्वयस्यापि सामान्येन कर्तव्यतां हेतुपूर्ववृत्तोपन्याससुखेन साधयत् विंशतिलक्षण्यास्सामान्येन वेदार्थविशदीकरणे शिकीर्षामूलतां तन्निबन्धनमैकग्रन्थ्यञ्च स्पष्टमाचष्टे । तथा एतत्सूत्राभिप्रेतौ पूर्वोत्तरपक्षहेतुअपि अविवक्षितार्थत्वविवक्षितार्थत्वे अनवकाशावकाशौ प्रवर्तकाभावतत्सद्भावौ वा साधारण्येन मीमांसामात्रस्यानारंभणीयत्वारंभणीयत्वसमर्थनमुखेन मीमांसायास्सामान्येन वेदार्थविशदीकरणकर्तव्यताबुद्धिनिबन्धनत्वं तन्निबन्धनमैकग्रन्थ्यंच स्पष्टमाचक्षाते । नचैवंसति विंशतिलक्षणीजैमिनिनैवकर्तव्येति वाच्यम् । तत्कर्तव्यतां समर्थितवतैव तत्कर्तव्यमिति नियमे ईश्वरेणैव सकलकर्मानुष्ठानप्रसंगात् । नन्वव्यवहितस्वकृत्यारंभसमर्थनार्थं इदं सूत्रमित्यव्यवधानादवगम्यते, अन्यथा एतत्सूत्रानन्तरं प्रमाणप्रमेयेत्यादिशास्त्रस्यापिप्रवृत्तिप्रसंगात् । अतएवोक्तं –" यदाहि धर्मजिज्ञासाकर्तव्येत्युक्त्वा शास्त्रमारभ्यमाणं दृश्यते तदा नूनमिदंशास्त्रं धर्मप्रतिपादनप्रयोजनमित्यवगम्यत" इति । अतएतत्सूत्रस्य साधारणत्वे जैमिनिनैव सर्वकर्तव्यमितिचेत् ? उच्यते, धर्मजिज्ञासासूत्रस्य मीमांसामात्रसाधारण्यं तावत्सिद्धं, अधीतसांगसशिरस्कस्वाध्यायस्य पुरुषस्य वेदार्थजिज्ञासोदयात्तदनुजिघृक्षया शास्त्रंप्रणेष्यता अविवक्षितार्थत्वादिनानारंभणीयत्वमाशंक्य विवक्षितार्थत्वादिभिरारंभणीयत्वसमर्थनात्, कृत्स्नवेदार्थजिज्ञासुपुरुषानुग्रहा-

र्थत्वञ्च शास्त्रस्य अथातश्शब्दाभ्यामवगम्यते । एवंच शास्त्रप्रवृत्तिनिमित्तजिज्ञासासाधारण्यात्, साधारणजिज्ञासामूलशास्त्रसमर्थनार्थस्य सा धारणविषयत्वौचित्यात्, अथातश्शब्दबलात्पूर्वोत्तरपक्षयुक्तिसाधारण्याच्च, अस्य सूत्रस्य विंशतिलक्षणीसाधारण्यं सिद्धं । तत्र यदि प्रतिज्ञासा धारण्ये सर्वं जैमिनिनैव कर्तव्यं नच तथाक्रियतइति विचिकित्सा जायेत, तदा गुरुशिष्याभ्यां सामान्यचिकीर्षामूलमेकमेव कार्यं परस्प रसम्मत्या प्रत्येकावयवनिर्माणमुखेन निर्वर्त्यतइति समाधानमुचितं । ननु धर्मशब्देविद्यमाने कथं सूत्रस्य वेदान्तसाधारण्यं, धर्मशब्दस्यवे दार्थपरत्वात् । नच धर्मशब्दलक्षणा दोषः, उक्तयुक्तिभिर्वाक्यतात्पर्ये निश्चिते तदनुसारेण लक्षणायाज्यायस्त्वात् । तदुक्तं पूर्वतन्त्रे "अभ्यु दये कालापराधादिज्याचोदनास्याद्यथा पंचशरावे" "यस्यहविर्निरु प्तंपुरस्ताच्चन्द्रमाअभ्युदेति त्रेधा तण्डुलान्विभजेत् येमध्यमास्स्युः ता नग्नयेदात्रेपुरोडाशमष्टाकपालं निर्वपेत् येस्थविष्ठास्तानिन्द्रायप्रदात्रेदधं श्चरुं येक्षोदिष्ठास्तान्विष्णवेशिपिविष्टायशृतेचरुमिति", तत्र संशयः, किं कर्मान्तरमिदमुतप्रक्रान्तस्यैव दर्शप्रयोगस्य पूर्वदेवताभ्योपनयो देवता न्तरसंयोगश्च चोद्यतइति । तत्राग्नेर्देवतायास्तद्गुणस्य दातृत्वस्यच वि धौ वाक्यभेदात्तद्विशिष्टंकर्मान्तरं विधीयते । एवं प्राप्तदधियागोद्देशे न स्थविष्ठानांचरुत्वस्य दध्नोधिकरणत्वस्य इन्द्रस्य देवतायाः प्रदातृ त्वस्य तद्गुणस्यचविधौ वाक्यभेदात्तद्विशिष्टं कर्मान्तरंविधीयते । एवं शिपिविष्टविष्णुदेवताकशृताधिकरणक्षोदिष्ठचरुहविष्कंकर्मान्तरं विधी यतइति पूर्वः पक्षः । प्रकृतप्रत्यभिज्ञानात्तदेवकर्म — नच वाक्यभेदः अ परित्यक्तयागान्वयानामेव सतां दधिस्थविष्ठादीनां देवतान्तरसंबन्धमा त्राभिधानात् । देवतायास्तद्गुणस्यच विधानादपि न वाक्यभेदः, दातृ त्वादिविशिष्टाग्न्यादेरेकस्यैव संप्रदानकारकस्य विधानात् । त्रेधा त ण्डुलानितितु देवतान्तरसंयोगविधानार्थं पूर्वदेवताभ्योपनयो विधीय ते, तत्रच दधिशृतयोरपि देवतान्तरसंयोजनार्थं तण्डुलशब्देन तण्डु लादिप्रकृतहविर्मात्रं लक्ष्यते, तण्डुलविभागमात्रस्य मध्यमादिविनियोगल भ्यस्यात्र विधिवैयर्थ्यात् । तदेवं न कर्मान्तरं । एवं देवतान्तरेण सं योक्ष्यमाणहविषां पूर्वदेवतापनयविधिपरं त्रेधा तण्डुलान्विभजेदिति वा

क्यमिति निश्चिते दध्यादिसाधारण्यार्थं तण्डुलशब्दो हविर्मात्रोपलक्षण मित्युक्तम्। अथवा उपासनरूपधर्मप्रतिपादनात् कात्र कथन्ता। उपासनस्य शाब्दप्राधान्येपि ब्रह्मणआर्थप्राधान्यं नहीयते, ब्रह्मणएव शाब्दप्राधान्येपि न शंकावकाशः। धर्मशब्दोभगवत्प्रीतौ मुख्यः। कर्मव्यापारोहि धर्मशब्दार्थः, सच प्रसादएव। अथवा अत्र सूत्रे धर्मपदमलौकिकश्रेयस्साधनत्वं गुणं निमित्तीकृत्य प्रवर्तते। अतएव "द्रव्यक्रियागुणादीनां धर्मत्वंस्थापयिष्यत" इत्युक्तम्। अतो यागादीनां ब्रह्मणश्च प्रीतिद्वारकश्रेयस्साधनताया अलौकिक्याविद्यमानत्वाद्धर्मशब्द इह यागादिब्रह्मसाधारणः। एतदेवाभिप्रेत्यानुगृहीतमाचार्यैः "अलौकिकश्रेयस्साधनंधर्मः तदनुयायिप्रतिपाद्य" मित्यादि। अत्रत्य धर्मशब्देन कर्मब्रह्मरूपद्वयं साक्षात्परंपरयावा श्रेयउपयोगमात्राद्विवक्षितमितिभावः। अथवा अलौकिकश्रेयस्साधनताया धर्मशब्दप्रवृत्तिनिमित्तत्वात् ब्रह्मणएव तत्साधनत्वात् प्रसादस्यच व्यापारमात्रत्वात्तादृशश्रेयः कर्तृत्वस्य प्रवृत्तिनिमित्तत्वाद्वा ब्रह्मैव धर्मशब्दस्य मुख्यार्थः। "येचवेदविदोविप्रा येचाध्यात्मविदोजनाः। तेवदन्तिमहात्मानं कृष्णं धर्मं सनातनम्॥" इत्युक्तेः। तस्यच साध्यत्वं प्रसादरूपव्यापारविशिष्टवेषेण, तस्माद्धर्मजिज्ञासेत्यस्य ब्रह्मजिज्ञासेत्यर्थः। एतदेवाभिप्रेत्यानुगृहीतमाचार्यैः "अथातोब्रह्मजिज्ञासा" इत्येवोभयभागसाधारणार्थप्रतिज्ञा" इत्यादि। ननु तर्हि कथं ब्रह्ममीमांसायां कर्ममीमांसायाअवकाशः, अत्राप्यनुगृहीतं – "कर्मविचारस्तु ब्रह्ममीमांसातृतीयलक्षणे चतुर्थपादेसङ्गत" इति। अत्रत्यब्रह्ममीमांसाशब्दः "अथातोब्रह्मजिज्ञासा" इतिसूत्रविवक्षितब्रह्ममीमांसापरः – अतस्तृतीयलक्षणइत्युक्तिसंभवः। तृतयिलक्षणचतुर्थपादे "सर्वापेक्षाचयज्ञादिश्रुतेरश्ववत्" इत्यत्रकर्मणामुपासनांगत्वप्रतिपादनात् तत्र संगततया कर्मनिरूपणं युज्यतइति। यद्येवं, तर्हि तत्रैतद्विचार्य, अत्राप्यनुगृहीतं "ब्रह्मविचारान्तर्भावेपि पृथक्करणमुपपद्यते, यथा निग्रहान्तर्गतयोश्छलजात्योराह्निकभेदेन पृथगुक्तिः, यथाचनिग्रहान्तर्भूतहेत्वाभासानामध्यायभेदेन पृथगुक्तिः। पृथक्करणंच बहुग्रन्थप्रतिपाद्यत्वात्, तत्रच पूर्वभावित्वमुपजीव्योपजीवकभावादि वक्ष्यमाणहेतुनिबन्धनं" इति। "अथातोधर्मजिज्ञासा" इतिसपरिकरब्रह्मजिज्ञासां प्रतिज्ञायत्रैवर्गिकमुमुक्षुसाधारणतया मुमुक्षुसाधारणतयाच वि

चारावान्तरभेदं विवक्षित्वा मुमुक्षुसाधारणब्रह्मविचाराधिकारहेतुतया नियतपृथग्भावपूर्वभावं कर्मविचारं सर्वानुग्रहार्थं प्रथमतः पृथङ्निर्वर्त्य अधिकारप्रदर्शनार्थं सिद्धेव्युत्पत्त्यभावलक्षणपूर्वपक्षनिराकरणार्थंच "अथातोब्रह्मजिज्ञासा" इति मुमुक्षुसाधारणब्रह्मविचारंपुनः प्रतिज्ञाय तद्विचारः प्रवर्त्यते मुनिद्वय्या भगवत्येत्याचार्याभिप्रायः । वेदार्थजिज्ञासेतिवा ब्रह्मजिज्ञासेतिवावक्तव्ये धर्मजिज्ञासेत्युक्तिश्श्रेयस्साधनत्वप्रतिपादनेन मीमांसाया रागप्राप्तिसूचनमुखेन प्रवर्तकाभावादनारंभइति पूर्वपक्षनिराकरणाय रागस्यैवप्रवर्तकत्वादारंभइति राद्धान्तसूचनार्था । एतेन शास्त्रैक्ये आदौ साधारणप्रतिज्ञयाभवितव्यमित्येतन्निराकृतम् , प्रतिज्ञायास्सामान्यविषयत्वोपपादनात् । यदिसामान्यविषयत्वं तर्हि कर्मविषयविशेषप्रतिज्ञया भवितव्यं, मैवं – तदसाधारणपूर्वपक्षानुत्थानेन तदर्थमधिकरणानारंभात् । स्वकर्तव्यार्थप्रदर्शनमात्रप्रयोजनप्रतिज्ञाचार्थसिद्धा । पक्षान्तरेपिसार्थसिद्धैव, न्यायपरत्वात्सूत्रस्य तथाविधसूत्राकरणंचन्यायनिबंधनात्मकेशास्त्रेतादृशस्यनिवेशायोगात् । "शब्दाबोध्यत्वशंकापरिजिहीर्षयाचपुनःप्रतिज्ञाकृता" इतिवाक्येनाचार्यैरयमर्थस्सूचितः । अतएववेदान्ताचार्यैः " तस्यनिमित्तपरीष्टिः" इतिसूत्रव्याख्याने –" इदमपिसूत्रंनकेवलंप्रतिज्ञापरं, अपितु प्रमाणमात्रस्यापरीक्षणीयत्वपूर्वपक्षप्रतिक्षेपार्थं " इत्यनुगृहीतं । अर्वाचीनव्याख्यातृभिरपि वेदार्थमात्रविचारप्रतिज्ञारूपत्व मस्यसूत्रस्याङ्गीकृतमेव, परंतु धर्मस्यैवकृत्स्नवेदार्थत्वं वेदान्तभागस्यतच्छेषत्वंचसैरुक्तं, वेदान्तिभिस्तु कर्मब्रह्मरूपार्थद्वयं भागद्वयार्थतयाङ्गीकृतमितीयानेवविशेषः । वेदार्थमात्रविचारप्रतिज्ञारूपत्वे न विवादः । किञ्चैवं, यदिविशेषप्रतिज्ञा तदाह्यनपेक्षितविधानापेक्षित परित्यागयोःप्रसंगः, सामान्यप्रतिज्ञाह्यविवक्षितार्थत्वादिनिराकरणेन विवक्षितार्थत्वादिसमर्थनार्थमपेक्षिता, विशेषप्रतिज्ञातु पूर्वभागविषयेनापेक्षिता, ब्रह्मभागइवकर्मभागासाधारणपूर्वपक्षस्यानुदयात् । अतएवपूर्वतन्त्रे " पानव्यापच्चतद्व " दित्यधिकरणे " यस्सोमवामीस्यात्सश्यामाकंचरुंनिर्वपे " दितिविहितेष्टिः किंलौकिकेवैदिकेचवमनेसर्वत्र उतवैदिकएवेतिविशये अविशेषात्सर्वत्रेतिप्राप्ते, सम्यग्जरणपर्यंतभक्षणस्य विहितत्वाद्वमने तद्वैगुण्यात्तत्समाधानमपेक्षितं, लौकिकंतुभक्षणंवमनार्थमेवेति नतत्रापेक्षेत्यपेक्षितत्वाद्वैदिकएवेष्टिविधिरित्युक्तं । तथा "पत्नीसंया-

एतेनार्थप्रयोजनाधिकारिभेदाच्छास्त्रभेदइतिनिरस्तम्, सामान्यतोवेदार्थपुरुषार्थतदर्थित्वरूपेणतेषांभेदासिद्धेः, अवान्तरार्थभेदादेरशास्त्रैक्येऽप्यविरोधात् । अन्यथा षट्काध्यायादिभेदेऽपि भिन्नशास्त्रत्वप्रसंगात् । नचैवंवेदार्थानुबन्धित्वाविशेषाद्विद्यास्थानभेदविलयप्रसंगइति वाच्यम्, उपकारभेदेन तद्भेदव्यवस्थापनात् । ....

जान्तत्वंस्यैवंसामविशेषात्''इत्यत्र'' पत्नीसंयाजान्तान्यहानिसंतिष्ठन्त '' इति द्वादशाहेश्रूयते,किमिदमह्नामविशेषेण उत्तोत्तमवर्जमितिविशये,अविशेषप्रवृत्तविधेस्संकोचायोगात्सर्वेषां पत्नीसंयाजान्तत्वमितिपूर्वपक्षे, द्वादशयागानां सहकर्तव्यत्वेनचोदितत्वात् पूर्वमहः कस्मिंश्चित्पदार्थेऽवस्थाप्यापरस्यारंभणीयत्वात् कस्मिन्पदार्थेऽवस्थापनमित्यपेक्षायां पत्नीसंयाजान्तेऽवस्थानमित्युच्यते, उत्तमस्यतुनापेक्षा; इतरयागसाहित्यस्यक्वचिदवस्थापनाभावेपिसिद्धेः, अनपेक्षितविधानायोगात्, इत्युत्तमवर्जं पत्नीसंयाजान्तते तिव्यवस्थापितं । अतोपेक्षितत्वात्साधारणप्रतिज्ञैवोचिता । ननु किञ्चित्प्रयोजनसिद्ध्यर्थं तदर्थिनम्प्रत्यर्थविशेषप्रतिपादनार्थंप्रवर्तमानं अर्थप्रयोजनाधिकार्युद्देशैक्यएकं तद्भेदाद्भिन्नंचस्यात्, यथान्यायशास्त्रशब्दशास्त्रे प्रत्येकमर्थोद्देशाद्यभेदादभिन्ने तद्भेदाच्चपरस्परंभिन्ने, इहच कर्मब्रह्मलक्षणार्थभेदात् भोगमोक्षरूपप्रयोजनभेदात् तदर्थि रूपाधिकारिभेदाच्च तदुद्देशाअपिभिन्नाएवेतिकथंशास्त्रैक्यमित्याशंकामनूद्यपरिहरति (एतेनेति) अर्थोद्देशो वेदार्थत्वपुरस्कारेण वेदार्थंप्रतिपादनम्मया कार्यमिति प्रवर्तमानएकएव, प्रयोजनोद्देशोपि प्रयोजनसिद्ध्यर्थमिति प्रवर्तमानएकएव, अधिकार्युद्देशोपि पुरुषार्थार्थिनंप्रतीति प्रवर्तमानएकएव - पुरुषार्थसिद्ध्यर्थं तदर्थिनंप्रति वेदार्थप्रतिपादनंकार्यमितीच्छया - मीमांसाशास्त्रप्रणयनादिति परिहाराभिप्रायः। ननूक्तरूपेणैक्येप्यवान्तरार्थप्रयोजनादिभेदेन तदुद्देशस्यापि भेदाच्छास्त्रभेदस्स्यादित्यत्राह (अवान्तरेति) (नचैवमिति) सामान्यक्रोडीकारमात्रेणैकत्वे वेदार्थानुबन्धित्वाल्लौकिकार्थानुबन्धित्वादिना रूपेणैकोद्देशसंभवाच्छन्दश्शिक्षाप्रभृतीनामेकविद्यास्थानत्वमेव स्यादित्यर्थः । (उपकारेति) उक्तरीत्यासामान्यतः क्रोडीकारसंभवेपि नतथोद्देशेन शास्त्रप्रवृत्तिः, किन्तु वर्णाशि

अतएवहीतिहासपुराणयो रदूरविप्रकर्षादेकविद्यास्थानत्वनियमः । नचधर्मशास्त्रस्यैवात्रमहर्षिभिःपृथक्परिसङ्ख्यानम् । तथापिभिन्नकर्तृकयोःकथमेकप्रबंधत्वमितिचेन्न; एकेनापिकर्त्राऽनेककार्यारंभदर्शनात्, अनेकैरप्येकरथगोपुरप्राकारादिनिर्माणदर्शनाच्च । निबन्धनेष्वयंविशेषइतिचेन्न; तत्राप्येकेनविदुषाऽनेकप्रबन्धकरणदर्शनात्, पाणिनीयवृत्तिकादम्बरीप्रभृतिषुचानेककर्तृकत्वेऽप्येकप्रबन्धत्वसंप्रतिपत्तेश्च । तत्रकर्तृभेदेकिंप्रमाणमितिचेत्, कर्मब्रह्ममीमांसयोरपितार्कि । उपदेशपारम्पर्यमितिचेत्; तुल्यम् । अस्तु तर्ह्यर्थविरोधाद्भेदइतिचेत्; कोसौविरोधः । द्वैताद्वैतगोचरत्वमितिचेन्न, तयोरेकनिष्ठत्वासिद्धेः । नहिकर्मकाण्डनिरूपितफलकरणेतिकर्तव्यतादीनामैक्यं ब्रह्मैक्यादिविषयेषु वेदान्तेष्वभिधीयते । तत्सत्यत्वमिथ्यात्वप्रतिपादनाद्विरोधइतिचेन्न, वेदान्तभागस्यप्रपञ्चमिथ्यात्वतात्पर्याभ्युपगमे कर्मभागस्य तत्सत्यत्वप्रतिपादनतात्पर्यासिद्धेः । सत्यत्वाभावेऽपिहि त्वदुक्तव्यावहारिकमर्यादया फलकरणभावादिकन्निरूपयितुंशक्यते । अन्यथावेदान्तविचारस्यापिप्रमाणतर्कादिभेदसापेक्षत्वेनस्वव्याघातप्रसंगः । सगुणब्रह्मोपासनतत्फलादिचिन्तनमपिशास्त्रान्तरसाध्यंस्यात् ।

क्षाद्युपकारविशेषोद्देशेन शिक्षादेः प्रवृत्तिः, अतस्तेषां भेदएव । मीमांसाशास्त्रंच वेदार्थविशदीकरणरूपैकोपकारोद्देशेनैव प्रवृत्तमितिभावः । (अदूरेति) नच तत्वनिर्णयप्राधान्यात् । नन्विह वेदार्थविशदीकरणादेकविद्यास्थानत्वे स्मृतेरपीतिहासपुराणाभ्यां सहैकविद्यास्थानत्वप्रसंगः, तत्वाचारविशदीकरणरूपावान्तरभेदविवक्षायां कर्मब्रह्मभेदविवक्षया मीमांसायामपि विद्यास्थानभेदप्रसंगइत्यत्राह (नचेति) तत्तत्प्रवृत्तिप्रयोजकोपकारविशेषमालोच्य विद्यास्थानभेदान् परिगणयद्भिस्तत्तत्प्रबन्धाभिप्रायविद्भिर्महर्षिभिर्मीमांसेत्येकविद्यास्थानत्वेन कीर्तनान्मीमांसायाएकोद्देशेनप्रवृत्तिरवगम्यतइतिभावः । (अन्यथेति) फलकरणेतिकर्तव्यतादिनिरूपणार्थं तत्सत्यत्वतात्पर्याभ्युपगमे वेदान्तभागेपिकरणेतिकर्तव्यतारूपप्रमाणतर्कव्युत्पादनार्थं तत्सत्यत्वतात्पर्याभ्युपगमप्रसङ्गाद्व्याघातइत्यर्थः (सगुणेति) तत्रापिसत्यत्वतात्पर्याभ्युपगमप्रसङ्गे

यदात्वस्मदुक्तन्यायेनसकलकर्म समाराध्यमनन्तगुणविभूतिकंब्रह्मवेदान्तवे द्यं तदातुनविरोधगन्धोऽपि । निरीश्वरत्वसेश्वरत्वाभ्यांविरोधइतिचेन्न ; जैमिनिसूत्रेष्वीश्वरप्रतिक्षेपादर्शनात् ,अर्वाचीनव्याख्यातृजल्पितानांतु अ नादरणीयत्वात् । अतएवसेश्वरमीमांसापक्षोऽपिनातीवविच्छिन्नः; परै रनूद्यतेच । देवताकाण्डश्चकर्मकाण्डशेषतयाभाष्यकारैःपरिगृहीतं । "त दुक्तंसंकर्षे " इति तत्रत्यसूत्राणिचोदाहरन्ति । तस्यच काण्डस्योप संहारे " अन्तेहरौतद्दर्शनात् " इतिदेवताकाष्ठांप्रदर्श्य " सविष्णु राहहि " इतिसर्वदेवताराधनानां तत्पर्यवसानायतस्यसर्वांतरात्मत्वेन व्याप्तिंप्रतिपाद्य "तंब्रह्मेत्याचक्षतेतम्ब्रह्मेत्याचक्षते" इतितस्यैववेदान्तवे द्यपरब्रह्मत्वोपक्षेपेणोपसंहारात् , सामान्यतोपिविशेषतश्चेश्वरःप्रस्तुतइति तत्वविदांसम्प्रदायः । अतएवकर्मकाण्डदेवताधिकरणमपिकर्मप्राशस्त्य मात्रपरम् । किमलौकिकदेवताविग्रहादिसमर्थनप्रयासेन - यथाश्रुतकर्मणए वफलप्रदत्वशक्तिरित्येतावतैवोक्तेन परप्रतिक्षेपात् , अश्रुतवेदान्तानां प्ररोचनासिद्धेश्च, ...

नार्थेविरोधादित्यर्थः । (देवताकाण्डश्चेति) तथाचकर्मकाण्डेदेवतानिरा करणासंभवइतिभावः । (अतएवेति) देवताकाण्डेनैकशास्त्र्यादित्यर्थः । यदि प्राशस्त्यमात्रपरं तर्हि पूर्वपक्षप्रतिक्षेपोनस्यात् , प्राशस्त्यपरत्वंचा संभवि न्यायनिबन्धनत्वाच्छास्त्रस्येत्यत्राह (किमलौकिकेति) अन्वारु ह्यवादेन परप्रतिक्षेपसिद्धिः । न्यायनिबन्धनत्वेपि प्ररोचनालक्षणप्रयो जनसाम्यात् प्राशस्त्यपरत्वोक्तिरिति भावः । (अश्रुतेति) फलप्रदत्वा भिमतानामिन्द्रादिदेवतानां प्रळयेऽनन्तरसर्गे तत्फलावाप्तिर्नस्यात् , अ कृताभ्यागमश्च स्यादितिबुद्ध्या कर्मण्यश्रद्धास्यात् , श्रुतवेदान्तानांतुअ नादिनिधनसर्वज्ञसर्वशक्तिपरमपुरुषाराधनरूपत्वात् सर्वकर्मणां तेनैव तत्फलदाननिश्चयात्राश्रद्धेति भावः । इदंचार्वाचीनोक्तसूत्रार्थमंगीकृत्यो क्तम् । वस्तुतस्तु न सूत्रेषु देवतानिराकरणप्रतीतिः, तानिचैवंव्या- ख्यातानि तत्वटीकायां वेदान्ताचार्यैरेव - " देवतोद्देशेन देयं द्रव्यं दे वतानप्रयोजयेत, कुतः; कृष्यादिवत्फलसाधनभूतक्रियायाएव प्रयोजकत्वो

पपरोस्तत्राह "देवतावाप्रयोजयेदतिथिवत् भोजनस्य तदर्थत्वा" दि ति । वाशब्दश्शंकानिवर्तकः । हविरुद्देश्यादेवताफलार्थिनं स्वाराधने प्र योजयेत्, कुतः? भोजनस्य तदर्थत्वात् –भोजनस्य हविषस्तत्समर्पणस्यच तदर्थत्वात्– तच्छेषत्वात् । संप्रदानभूताहि देवता प्रधानतया स्वार्थे द्रव्य तत्समर्पणे प्रयुङ्क्ते । क्रियाप्रधानवाक्येष्वन्यग्भूतापिहि देवता । तत्तन्मंत्रा दिसामर्थ्यादार्थप्राधान्यशालिनी ॥ अतो यथाविग्रहादिमानतिथिराराध्यः स्वार्थं स्वाभीष्टं उपचरणं प्रयुङ्क्ते तथा देवतापीति । 'आर्थपत्याच्च' अ र्यतेप्राप्यतइत्यर्थोविभूतिः, अर्घ्यतइतिवा, अतस्तदभावादनाराध्या, अनी-प्सितत्वादप्रयोजकेति न शंकनीयं । पराखलु देवतासर्वस्येष्टे तन्नियु क्ताचापरा यथाधिकारंतत्तद्विभूतीनां । तथापि निरपेक्षादेवतानकुतश्चिं-त्प्रीयेत, न कंचित्प्रीणाति, अतः कथं प्रयोजिकेत्यत्राह "ततश्च तेन संबन्धः" अतो नैरपेक्ष्येऽपि नरदेवनीत्या दयौदार्यशालिन्याः परिचर्य माणायाः प्रसेदुष्यादेवतायाएव हेतोः परिचरतां स्वाभीष्टफलेन संबं धः स्मृत्युपचारादिभिरेव सिद्धइति पूर्वः पक्षः । राद्धान्तस्तु, "अ पिवाशब्दपूर्वत्वाद्यज्ञकर्मप्रधानंस्यात्" अत्रापिवेति सार्धाङ्गीकारं पर पक्षव्यावर्तनं । यद्यपि देवताया विग्रहहविरादानयुगपत्कर्मसन्निधिप्री-तिफलप्रदानरूपविग्रहादिपंचकं दुर्निषेधं । द्रव्याद्यपेक्षया संप्रदानस्य-प्राधान्यं; यजेश्च देवताराधनवाचितया यागस्य तादर्थ्यं; सिद्धपरवा-क्येषुच परापरदेवतयोस्स्वरूपादिकमनन्यार्थमाम्नामः, तथापि कर्त व्योपदेशेषु यज्ञादिरूपं कर्मस्वर्गादिफलसाधनतया चोदितत्वात्प्रधानं-सत् साध्यतयाबुद्ध्यारोहेण पुरुषंप्रवर्तयति, कृत्स्नंचदेवतादिक्रियाशे-षभूतं । ननु फलप्रदायादेवताया आराध्यत्वेन प्रधानत्वमनुशोश्रूया महे, अत्राह "गुणत्वेनदेवताश्रुतिः" हविष्प्रदानंप्रतिगुणीभूतांहि-देवतामनुश्शृणुमः, मन्त्रार्थवादोपस्थापितंदेवताप्रीतिरूपमपूर्वं चोदितस्य क्षणिकस्य कालान्तरभाविफलद्वारतयोपादीयेत, अतो वास्तवप्राधान्य-शालिन्यपि देवताफलकामप्रवर्तकशाब्दप्राधान्यक्रियागुणभूता नप्राधा-न्येनप्रयोजिकेति । अतिथेस्तर्हिकथंप्रयोजकत्वं इत्थमित्याह - "आतिथौ तत्प्रधानत्वमभावःकर्मणिस्यात्" आतिथ्यंप्रत्यतिथेःप्रधानत्वं प्राप्तं, अ-न्यथाहि तदर्थकर्मणिप्रयोजकाभावात्तदभावस्स्यात् । तत्सपर्या विधिरे-

सहसा च गुह्यार्थाना मवचनीयत्वात् । एवंसति ब्रह्मकाण्डदेवताधिकरणैकरस्यसिद्धेः । द्रव्यदेवतयोर्द्रव्यबलीयस्त्ववर्णनमपि नदेवताविग्रहाद्यपारमार्थ्यलिंगम् , प्रतीतिसन्निकर्षविप्रकर्षाभ्यामेवप्राबल्यदौर्बल्यसिद्धेः ।

यतत्रप्रयोजकइतिचेत् तत्रप्रत्याह " तस्यप्रतिविधानत्वात् " आतिथ्यकर्मणोहि अतिथ्यागमनप्रतिविधानतयैवचोदना । क्रियाप्रयुक्तपुरुषसमाहूतातुदेवता । सन्निधत्तेतदिष्टार्थंनततस्तत्प्रयुक्तता ॥ अतिथिस्तु स्वयंप्राप्तः स्वाभीष्टंचप्रयोजयेत । तदिष्टानुविधानेन तत्तपर्यार्थचोदना ॥ अतः प्राताप्राप्तविवेकादतिथिप्राधान्योक्तिः " इति । नन्वक्किमर्थमन्वारोहेणचित्तसंक्षोभः क्रियते, यावतापरमात्मसमर्थनादेवप्ररोचनासिद्धिरित्यत्राह (सहसाचेति) निर्धारितकर्मस्वरूपस्यैव ब्रह्मज्ञानाधिकारइतिभावः । अन्वारुह्यवादत्वेहेतुमाह (एवंसतीति) नचैकरस्यासिद्धिःपरस्येष्टैवेतिवाच्यम् , " मध्वादिष्वसंभवादनधिकारंजैमिनिः " इत्यादावैकरस्यप्रतीते स्तत्परित्यागायोगादितिभावः । ननु " विप्रतिपत्तौहविषानियम्येतकर्मणस्तदुपाख्यत्वात " इत्यधिकरणे " ऐंद्रमेकादशकपालंनिर्वपे " दितिविहितविकृतियागे द्रव्यतआग्नेयसाम्याद्देवतास्सान्नाय्ययागसाम्याच्च कस्यधर्माग्राह्याइतिविचारे द्रव्यसाम्यस्यबलीयस्त्वात्तेनप्रकृतिंनियमइतिसमर्थितं । तत्रप्राबल्यदौर्बल्येसत्त्वासत्त्वनिबन्धनेएवेति विरोधइत्यत्राह (द्रव्यदेवतयोरिति) देवतायाःस्वरूपंदेवतात्वञ्चाप्रत्यक्षं, द्रव्यस्यतु हविष्ट्वधर्मएवाप्रत्यक्षइति प्रतीतिशैघ्र्यविलंबाभ्यामेवप्राबल्यदौर्बल्ये इतिभावः । ननु धर्मिणः प्रत्यक्षगम्यत्वंकथंप्राबल्यहेतुः, यत्कर्मसाम्यंशीघ्रंप्रतीयते तद्धर्मातिदेशःकार्यइतिहिवक्तुंयुक्तं, नचद्रव्यसंबन्धोदेवतासंबन्धाच्छीघ्रंप्रतीयते, येनप्राबल्यंस्यादितिचेत्सत्यं; द्रव्यवाचिपदानांलोकेव्युत्पन्नतया द्रव्यविनियोजकवाक्यश्रवणसमनन्तरमेव झटितिद्रव्यसंबन्धःप्रतीयते, देवतावाचिपदानां लोकाव्युत्पन्नतया तद्विनियोजकवाक्यश्रवणसमनन्तरन्ततः प्राग्वा श्रौतव्यवहारदर्शनात् , कोवेन्द्रइतिजिज्ञासायां ' वज्रहस्तःपुरन्दर ' इतिवाक्यश्रवणेनवा पुराणादिश्रवणेनवा अन्यथा वेन्द्रादिपदव्युत्पत्तौसत्यां तत्संबन्धप्रतीतिरित्यस्येव द्रव्यसंबंधप्रतीतौ शीघ्रभावः । किञ्च देवताऽभावोनदौर्बल्येहेतुः

यद्यपि द्रव्यस्यापिधर्मत्वंपरोक्षं अथापिस्वरूपतःप्रत्यक्षतया विशेषोऽस्त्येव । एवं सर्वत्राविरोधस्सेश्वरमीमांसायामनुसन्धातव्यः । तथापि " मध्वादिष्वसंभवादनधिकारं जैमिनिः " " धर्मं जैमिनिरतएव, " " शेषत्वात्पुरुषार्थवादोयथान्येष्वितिजैमिनिः " " परामर्शंजैमिनिरचोदनाच्चापवदतिहि " " परञ्जैमिनिर्मुख्यत्वात् " " ब्राह्मेणजैमिनिरुपन्यासादिभ्यः "

किन्तु तत्साम्यनिबन्धनातिदेशाभावएव हेतुरिति कुतः प्राबल्यदौर्बल्यचिन्ता, कुतश्चदेवतासाम्यात्क्वचिदतिदेशः । यदि शब्दस्यैवदेवतात्वात्तत्संबंधादतिदेशः तर्हि द्रव्यदेवतयोः कोविशेषः, अतस्सम्प्रदानादपिकरणस्यत्यागस्वरूपोत्पादकतया प्रथमाकांक्षितत्वाच्च प्राबल्यंद्रव्यस्यग्राह्यं (धर्मत्वमिति) अलौकिकश्रेयस्साधनत्वमित्यर्थः । (मध्वादिष्विति) मधुविद्यादिषुवस्वादीनामनधिकारंजैमिनिराचार्योमन्यते, कुतः असंभवात्, तत्रहि विद्यायां वस्वादयउपास्याः नचतत्र तएवकर्तारस्संभवन्ति, कर्मकर्तृविरोधादित्यर्थः । अत्रच वस्वादिजीवपर्यवसितमुपासनमित्याशयेन पूर्वपक्षोत्थाना दर्थविरोधः (धर्मेति) धर्ममेव फलप्रदं जैमिनिराचार्यो मन्यते, कुतः; अतएव - श्रुतेरुपपत्तेश्च; अभिलषितस्वर्गस्यतत्साधनतया " स्वर्गकामोयजेत " इतिश्रुत्या यागस्यैव साधनतयाबोधनात् । कृष्यादिवदाराधनरूपत्वाभावेपि कालान्तरभाविफलप्रदत्वोपपत्तेश्चेत्यर्थः । (शेषत्वादिति) " तत्त्वमसि " इत्यादिसामानाधिकरण्येन कर्मसु कर्तुरेव ब्रह्मत्वावगमात् तद्वेदनस्यतत्संस्कारतया कर्मशेषत्वा द्द्रव्यादिष्विव फलश्रुतिरर्थवाद इतिजैमिनिर्मन्यत इत्यर्थः । (परामर्शमिति) " त्रयोधर्मस्कन्धाः " इत्यत्रचोदनाभावात् उपासनस्तुत्यर्थमनुवादमेव जैमिनिर्मेने । " वीरहावाएषदेवानां योग्निमुद्वासयते " इत्यपवदतिचाश्रमान्तरमित्यर्थः । (परमिति) परमेव ब्रह्मोपासीनानर्चिरादिर्नयतीतिजैमिनिः, ब्रह्मगमयतीतितत्रैवमुख्यत्वादित्यर्थः । (ब्राह्मेणेति) अस्यस्वरूपाविर्भावो ब्राह्मेण अपहतपाप्मत्वादिस्वरूपेण, तेहि ब्रह्मगुणाः प्रत्यगात्मनोऽपिस्वाभाविकाइति " यआत्मापहतपाप्मा " इत्यारभ्योपन्यासादिभ्योऽवग-

" भावञ्जैमिनिर्विकल्पामननात् ,, इतिसूत्रेषुजैमिनिमतस्यपूर्वपक्षत्वेनो पपादनाद्विरोधस्सिद्धइतिचेन्न; अत्यल्पतराप्रधानार्थविवादस्यप्रधानभेदकत्वा भावात् । अतएवहि शास्त्रेषुवार्तिकावतारः । किं पूर्वकृतप्रासादखण्ड विषमांशापनयनेन शेषनिर्माणेतदैक्यंनास्ति । अतःप्रतिसंस्कारेणात्रापि सन्धानं । यद्वावैभवोक्तेषुतत्वभ्रमोमंदधियांमाभूदिति तदनुवादप्रतिक्षेपौ। तदुक्तंतदुक्तमितिजैमिनिपरिग्रहएवबहुशोदृश्यते ।

म्यते, नतु ज्ञानस्वरूपेणाविर्भाव इति जैमिनिरित्यर्थः । (भावमि- ति) " सएकधाभवति " इत्यादिना देहेन्द्रियादिभिर्विविधताश्रुते- र्देहादीनां भावमेव जैमिनिर्मेने नकदाचिच्चितोऽशरीरत्वमित्यर्थः । यद्य प्येते सर्वेऽर्था नपूर्वकाण्डेसूत्रिताः अतोनार्थविरोधः, तथाप्युक्तरीत्याभि- न्नमतस्थत्वात्तत्कर्तृकेण सहनैकशास्त्र्यमितिभावः । प्रौढवादेनपरिहर- ति (अत्यल्पतरेति) अत्यल्पतरविवादस्य अप्रधानार्थविवादस्यचे- त्यर्थः । तेन भगवतः फलप्रदत्वरूपप्रधानार्थविरोधेऽपि तस्यालपत्वा- दितरबह्वर्थविरोधेपि तेषामप्रधानत्वान्नदोषइतिभावः । प्रतिसंस्का- रोऽत्रविपरीतांशशिक्षणं । तात्त्विक परिहारमाह (यद्वेति) वैभ वोक्त्यवगमो गुरुशिष्ययोरैककण्ठ्यादित्यभिप्रेत्य तयोरैककण्ठ्य - मुपपादयति (तदुक्तं तदुक्तमित्यारभ्याचख्युरित्यन्तेनग्रन्थेन) छन्दोगानां वाजिनांचोद्गीथविद्याया ऐक्यंपूर्वपक्षीकृत्य निरस्य संज्ञातऐ क्यमाशंक्योक्तं " संज्ञातश्चेत्तदुक्तमस्तितु तदपि " इति संज्ञैक्येपि भेदउक्तः। यथा " प्रकरणान्तरे प्रयोजनान्यत्वं " इत्यत्र नैयमिकम् साग्निहोत्रयोरित्यर्थः । " अक्षरधियान्त्ववरोधस्सामान्यतद्भावाभ्या मौपस दवत्तदुक्तं " " यत्तदद्रेश्यमग्राह्यं " इत्याद्युक्तास्थूलत्वादिविषयाणाम- क्षरधियां सर्वत्रावरोधः, सर्वत्र ब्रह्मणएकत्वात्तैर्विना इतरव्यावृत्तब्रह्मा नुसंन्धानानुपपत्तेश्च, अतः प्रधानब्रह्मानुसन्धाने तद्गुणानामप्यवरोधः - औपसदवत् - जामदग्न्यचतूरात्रे पुरोडाशुपसद्गुणभूतस्य मन्त्रस्योपस दनुवर्तित्वेनोपांशुगुणकत्वमुक्तं " गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोग " इत्यत्रेति । " प्रदानवदेवतदुक्तं " दहरविद्यायामपहतपा

विशेषतश्च " साक्षादप्यविरोधंजैमिनिः „ " संपत्तेरितिजैमिनिस्तथाहिदर्शयति „ "अन्यार्थन्तु जैमिनिःप्रश्नव्याख्यानाभ्यामपिचैवमेके „ "तद्भूतस्यतुनातद्भावोजैमिनेरपिनियमा त्तद्रूपाभावेभ्यः „

प्सत्वादिगुणविशिष्टोपासने तत्तद्गुणविशिष्टस्वरूपभेदात्प्रतिगुणं गुण्यावृत्तिः यथा " इन्द्रायराज्ञे " इत्यादिषु विशिष्टस्वरूपभेदात्प्रदानावृत्तिः। तदुक्तं संकर्षे – " नानावा देवतापृथक्त्वात् " इति । " इन्द्राय राज्ञेपुरोडाशमेकादशकपालंनिर्वपेत् " "इन्द्रायाधिराजाय " " इन्द्रायस्वराज्ञे " इतिविहितायां त्रिपुरोडाशिन्यामिष्टौ हविर्भेदाद्भेदेनावदानप्राप्तौ " वचनात्सर्वेषां सहावदीयेरन् " इति सूत्रेण " सर्वेषामभिगमयन्नवद्यति " इतिवचनात्सहावदानेस्थापिते तत्रावदानसाहित्यात् प्रदानसाहित्यं " तेषां सहप्रदानमवदानैकत्वात् " इति सूत्रेण पूर्वपक्षीकृत्य "नानावादेवतापृथक्त्वात " इति अधिराजत्वादिविशिष्टदेवताभेदात् प्रदानंनानैवेत्युक्तमित्यर्थः। (साक्षादिति) " सएषोऽग्निर्वैश्वानरः " इत्यग्निशब्दसामानाधिकरण्यं परमात्मवाचिनो वैश्वानरशब्दस्य परमात्मनोऽग्निशरीरकतयोपास्यत्वायेत्युक्तं नावश्यमेव, अग्रनयनादियोगेन परमात्मन्येवाग्निशब्दस्य साक्षाद्वृत्तेस्तत्सामानाधिकरण्याविरोधं जैमिनिर्मन्यतइत्यर्थः। (सम्पत्तेरिति) " लोमानिबर्हिर्हृदयंगार्हपत्य " इत्यादिनोपासकहृदयादीनां यद्वैश्वानरविद्यायां वेदित्वादिकल्पनं तद्विद्यांगभूतायाः प्राणाहुतेरग्निहोत्रत्वसंपादनार्थं। दर्शयतिच श्रुतिः– " यएतदेवंविद्वानग्निहोत्रंजुहोति " इति। (अन्यार्थन्त्विति) " तौहसुप्तं पुरुषमाजग्मतुः " इत्यादौ यद्देहातिरिक्तजीवसद्भावप्रतिबोधनं " योवैबालकएतेषां पुरुषाणां कर्ता यस्यवैतत्कर्मसवैवेदितव्यः " इति वेद्यतयोक्तब्रह्मप्रतिबोधनार्थमिति " क्वैषएतद्बालाके पुरुषोऽशयिष्ट " इतिप्रश्नात् " अथास्मिन् प्राणएवैकधाभवति " इति " सतासौम्य " इत्यादिवाक्यसमानार्थात्प्रतिवचनाच्च अवगम्यते। एकेवाजसनेयिनोप्येतत्प्रतिवचनसमानार्थं वाक्यं स्पष्टमधीयते " क्वैषएत " दित्यादि " यएषोन्तर्हृदयआकाशस्तस्मिञ्छेते " इत्यन्तं। (तद्भूतस्यत्विति।) तद्भूतस्य-नैष्ठिकाद्याश्र

इतिसूत्रेषु भगवता बादरायणेन स्वाभिमतार्थस्थापनायजैमिनि-स्वनाम्नैवोपात्तः । सच भगवान्जैमिनिः " औत्पत्तिकस्तु शब्द स्यार्थेनसंबन्धः तस्यज्ञानमुपदेशोऽव्यतिरेकश्चार्थे ऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् " इति स्वोक्तार्थसंप्रतिपत्तये स्वाचार्यं बादरायणमेव पुरस्करोति । जैमिनेर्बादरायणशिष्यत्वञ्च महाभारतादिषु प्रसिद्ध-" सुमन्तुंजैमिनिंपैल्वं वैशंपायनमेवच " इत्यादिना । नत्वत्रव्यासशिष्योजैमिनिरित्युक्तं, सत्यं व्यासएवात्रबादरायणः " द्वीपेबदरिकामिश्रे बादरायणमच्युतम् । पराशरात्सत्यवती पुत्रंलेभेपरन्तपम् ॥ "इतिहिस्मर्यते ।

संप्राप्तस्य, नातद्भावः - अतद्भावः- अनाश्रमित्वेनावस्थानं, न संभवति, कुतः? तद्रूपेत्यादि - तेषां नैष्ठिकवैखानसपरिव्राजकानां, रूपाणि-धर्माः, तन्निवृत्तिभ्योनियमात् , " ब्रह्मचार्याचार्यकुलवासी तृतीयोत्यन्तमात्मानमाचार्यकुलेवसादयन् " इति, " आरण्यमियात्ततो न पुनरेयात् " इति, " सन्न्यस्याग्नीन्नपुनरावर्तयेत् " इतिच शास्त्राणिहि नियच्छन्ति, जैमिनेरप्येवंमतमिति । उत्पत्तिर्जन्मस्वभावः, औत्पत्तिकः - नित्यइतियावत् । नित्यश्शब्दार्थसंबन्धः न सांकेतिकः, येन प्रमाणंनस्यात् । नित्यत्वात्तस्य-धर्मस्य, उपदेशो,ज्ञानं-ज्ञापकः, तच्च ज्ञानं, न व्यतिरेकः- न विपर्ययः, संशयस्याप्युपलक्षणमेतत् , तथानुपलब्धेर्थे प्रवर्तमानत्वान्नानुवादकोपि, तस्मादनपेक्षत्वादनधिगतार्थबोधकत्वाच्चोदना धर्मे प्रमाणं भवत्येव, बादरायणस्याचार्यस्यमते नेति सूत्रार्थः । (स्वाचार्यमिति) तथाच स्वाचार्यभूतब्रह्मसूत्रकृत्पुरस्कारेण प्रवर्तमाने जैमिनीयशास्त्रे न तद्विरुद्धाभिधानमित्यर्थः । नन्वाचार्यत्वान्न ब्रह्मसूत्रकृत्पुरस्कारः तत्र मानाभावात् । किन्तु ऐतिशायनादिवत्तद्ग्रहणं क्वचित्सम्मतिमात्रात् , अतोन्यत्र तद्विरुद्धाभिधाने नानुपपत्तिरित्यत्राह (जैमिनेरिति) (नन्वत्रेति) नच सएवबादरायणः,बादरायणशब्दस्य ऐतिशायनादिवदपत्यप्रत्ययान्तत्वेन बादरिशब्दाद्व्युत्पन्नत्वादिति भावः (द्वीपइति) अनेन बदराणां समूहोबादरं तदयनं यस्य सबादरायणइति व्युत्पत्तिस्सूचिता । संज्ञात्वाच्च " पू,

व्यासव्यातिरिक्तेऽपि वादरायणसंज्ञाप्रयुक्तेतिचेत् तथापि " तपोविशिष्टादपिवै वसिष्ठान्मुनिसत्तमात् । मन्येज्येष्ठतमन्त्वाद्य रहस्यज्ञानवेदन " इति रहस्यतमार्थज्ञापकत्वेन प्रसिद्धिप्रकर्षादेः संप्रदायादत्रव्यासएव स्वीक्रियते। अतएवहि युष्मद्भूमिकामाश्रिताः वाचस्पतिप्रभृतयोपि व्यासमेव ब्रह्मसूत्रकृतमाचख्युः। येषुचसूत्रेषु पूर्वपक्षतया जैमिनिमतमुक्तं शारीरके तेष्वपि देवतासद्भावः परब्रह्मसद्भावोमुक्तस्य परब्रह्मसाम्यापत्तिर्विग्रहादिसद्भावश्च प्रतीयते, तदपिंच तत्प्रणीतकर्मकाण्डदेवताधिकरणादेरन्यपरत्वं स्थिरीकरोति । नह्यर्वाचीनत्र जैमिनिहृदयानभिज्ञस्तदाचार्यो बादरायणः, अतः परस्परसम्मत्या कार्यांतरेष्वित्रात्रापि यथांशकरणमपि युक्तं। तदेतदखिलमभिप्रेत्योक्तं भगवता बोधायनेन - "संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेतिशास्त्रैकत्वसिद्धिः" इति। तदेतदुपादायव्यस्तृणीतचभाष्यकारः । नन्वेतावतापि कर्मब्रह्ममीमांसयोरैकशास्त्रये प्रबन्धैक्येवा किंप्रमाणमुपन्यस्तमितिचेत्, किंवा कर्मकाण्डद्वादशाध्याय्यादौ शारीरकचतुरध्याय्यांच प्रत्येकमेकशास्त्रयेत्वयानिर्णीतं।

वेपदात् " इत्यादिना णत्वमितिभावः (व्यासेति) तथाच कतरोबादरायण स्सूत्रकारइत्यनिर्धारणमिति भावः। (तथापीत्यादि) श्लोके ज्ञानपदस्य कर्मणिव्युत्पत्त्या वेदनशब्दस्यच णिजन्तनिष्पन्नतया व्यासस्य रहस्यतमार्थख्यापकत्वप्रतीतेः रहस्यतमार्थोपदेशरूपब्रह्मसूत्रकर्तृत्वं तस्यैव युक्तमित्यर्थः। " अवतीर्णोमहायोगीसत्यवत्यां पराशरात्। " इत्यारभ्य " चकारब्रह्मसूत्राणि येषांसूत्रत्वमंजसा। " इत्यादिस्कान्दवचनादिकण्ठोक्तिरादिशब्दार्थः। ननु जैमिनीयसूत्राणां देवतानिराकरणपरतया तद्व्याख्यातृभिर्व्याख्यातत्वाद्देवतासद्भावादौ तात्पर्याभावात्तदभिप्रायापरिज्ञानादेव वेदान्ते तथातथा जैमिनिमतोपन्यासइत्यत्राह (नहीति) आचार्यबादरायणशब्दाभ्या मभिप्रायापरिज्ञानायोगे हेतुरुच्यते। (अतइति) व्याख्येयैक्यात्प्रथमतस्सामान्येन वेदार्थनिर्णयोद्देशेनैव[illegible]दयस्य युक्तत्वात् परस्परविरोधाभावाच्चेत्यर्थः। प्रतिबन्दीमुखेन साधयितुंशंकते (नन्विति) (किंवेति) ऐकशास्त्र्यइत्यै

क्रमविशेषनियामकसंगतिविशेषविशिष्टाविरुद्धावान्तरार्थं शास्त्रान्तरव्यावृत्तासाधारणोपकारार्हसप्रकारैकप्रधानार्थत्वमितिचेत् इदन्तु किम्प्रमाणमितिनिपुणोभूत्वात्वमेवनिरूपय, त्यजवासर्वत्रैक्यं । तस्मात् "अथातोधर्मजिज्ञासा" इत्यारभ्य "अनावृत्तिश्शब्दादनावृत्तिश्शब्दात्" इत्येवमन्तंकर्म देवतापरदेवतागोचरतया विभक्तकाण्डत्रयं विंशतिलक्षणमेकं शास्त्रमिति । तदिदं "मीमांसाशास्त्रं" इत्यादिना भाष्येण दर्शितमिति ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य वेदान्ताचार्यस्यकृतिषु शतदूषण्यामैकशास्त्र्यसमर्थनवादस्तृतीयः ॥

क्रमबन्ध्यस्याप्युपलक्षणं । (क्रमेत्यादि) संगतिविशेषविशिष्टत्वमैकप्रबन्ध्येहेतुः । उत्तरांशश्शास्त्रैक्येहेतुः (शास्त्रान्तरेति) न्यायविस्तरादिविद्यास्थानान्तर साध्यविलक्षणकर्मभाग तात्पर्यनिर्णयरूपोपकार जननार्हत्वात्कर्ममीमांसाया इति भावः । इदंच वेदार्थानुबन्ध्यर्थकत्वेन सर्वेषामैकशास्त्र्यं वारयितुमुक्तं । अथान्तरार्थाविरोधस्याप्यैकशास्त्र्यापेक्षितत्वादुक्तमविरुद्धावान्तरार्थेति शास्त्रविशेषणं । किंप्रमाणं - कस्यप्रमाणम् । किं विंशतिलक्षण्यैकशास्त्र्यस्य किंवा द्वादशाध्याय्यादिमात्रैकशास्त्र्यस्य इति निरूपयेत्यर्थः । वेदार्थनिर्णयरूपैकोपकारार्हताया विंशतिलक्षणीसाधारण्यात्तदैक्यमेव तत्प्रमाणं भवेदितिभावः । नच कर्मब्रह्मनिर्णयरूपोपकारयोर्भेदाद्भेदइति वाच्यम्, कृत्स्नवेदाध्यायिनः कृत्स्नापातप्रतीतिमतो वेदार्थमात्रे निर्णिनीषोदयाद्वेदार्थनिर्णयत्वस्यैवेष्टतावच्छेदकत्वात् तदनुग्रहार्थशास्त्रस्यापि तदिष्टतावच्छेदकावच्छिन्नोद्देशेन प्रवृत्तेर्युक्तत्वाद्यावत एकेष्टतावच्छेदकावच्छिन्नोपकार जननार्हता तावत्एकशास्त्रत्वात् । अतएव मीमांसेत्येकतया विद्यास्थानगणने परिगणनं, तस्योक्तप्रयोजकानुरोधित्वदर्शनात् । अन्यथा प्रतिषट्कं प्रत्यध्यायं प्रतिपादं प्रत्यधिकरणंच भेदप्रसंगात । यदाह कश्चित्परिप्लवमतिः - किं कर्मब्रह्ममीमांसयोरेकग्रन्थत्वं पूर्वोत्तरशास्त्रमिति व्यवहारमात्रात्, किं वोपजीव्योपजीवित्वेसति विषयाद्यैक्यात्, यद्वा एकेनैवाध्ययनविधिना तदुत्थरागेणवा कर्मब्रह्मपरकृत्स्नवेदविचारस्यैव प्रयुक्तत्वेनैकदेशविचारे

विधेरागस्यवाऽभावात्, किंवा जयादित्यवामनवृत्त्योरिव कर्तृभेदेऽपि व्याख्येयैक्यात्, यद्वा प्रबन्धान्तरइवैकप्रबन्धत्वव्यवहारात् । नाद्यः – ऐकशास्त्र्यहेतोः पूर्वोत्तरभागव्यवहारस्यात्राभावात्, पूर्वोत्तरशास्त्रव्यवहारस्यच भिन्नयोश्शास्त्रयोः पूर्वापरीभावमात्रेणोपपत्तेः । द्वितीये –ब्रह्ममीमांसायाः कर्ममीमांसोपजीवित्वं किं नित्यफलार्थिनःपुंसोब्रह्मविचारेप्रवृत्त्यर्थस्य तत्प्रामाण्यनिश्चयस्यवा ब्रह्मज्ञानकर्मफले नित्यानित्येइति विवेकस्यवा कर्मफलानित्यत्वनिश्चयविशिष्टस्य ब्रह्मज्ञानफलनित्यत्वापातप्रत्ययस्यवा कर्मविचाराधीनत्वात्, किंवा ब्रह्मभागविचारे प्रवृत्तस्य तदर्थनिश्चयार्थश्रुतिलिंगादिबलाबलादौ कर्मविचारापेक्षणात्, यद्वा ब्रह्मनिश्चित्य तन्निदिध्यासने प्रवृत्तस्य निदिध्यासनांगकर्मानुष्ठाने कर्मविचारापेक्षणात् । नाद्यः – वेदप्रामाण्यस्य ब्रह्मतर्काख्यतर्कशास्त्रसिद्धस्यवा ब्रह्ममीमांसायामेव अस्मन्मते 'नविलक्षणत्वा' दित्यत्र त्वन्मते 'अतएवच नित्यत्व' मित्यत्र वक्ष्यमाणस्यवा पूर्वतन्त्रेवक्ष्यमाणस्य त्रैवर्णिकाधिकारस्यैवोपजीवनात् ? नित्यानित्यविवेकस्यच त्वन्मते ब्रह्मविचारप्रवृत्त्यहेतुत्वात्, कर्मविचारंविनाऽप्यस्मद्रीत्यातत्सिद्धेश्च । विशिष्टापातप्रत्ययस्य च ब्रह्मज्ञानफलनित्यत्वापातप्रतीतिमात्रेण नित्यफलार्थिनस्तत्र प्रवृत्तिवत्कर्मफलानित्यत्वापातप्रतीतिमात्रेण ततो निवृत्तेरुपपत्तौ विशेषणस्य कर्मफलानित्यत्वनिश्चयस्यानपेक्षिततया कर्मत्यागेन ब्रह्मविचारे प्रवृत्त्यहेतुत्वात् । नद्वितीयः – श्रुतिलिंगादिबलाबलादेरुपक्रमोपसंहारबलाबलादेरिव ब्रह्मतर्कसिद्धस्य लोकसिद्धस्यवोपजीवनात् । नतृतीयः - ब्रह्म विचारानन्तरं निदिध्यासनात्प्राक्कर्मविचारोपपत्तेः । नापिमीमांसयोर्विषयाद्यैक्यं, सिद्धसाध्यविषयत्वात् नित्यानित्यमोक्षाभ्युदयफलत्वात् विरागसरागाधिकारिकत्वाच्च । वेदार्थत्वाल्लौकिकपुरुषार्थत्वतदर्थित्वैर्विषयाद्यैक्येच अर्थकामशास्त्रयोरपि शास्त्रार्थत्वपुरुषार्थत्वतदर्थित्वै र्मोक्षशास्त्रादिना विषयाद्यैक्यंस्यात् । न तृतीयः-' षडंगोवेदोऽध्येतव्य' इत्येकेनैव विधिना तदुत्थरागेणवा व्याकरणाद्यंगविचारस्यापि प्रयुक्तत्वेन केवलवेदविचारे विधेरागस्यवा अभावेन व्याकरणादिविचाररूपमहाभाष्यादेर्वेदविचाररूपमीमांसयैकशास्त्र्यापातात् । इहैव कर्मकाण्डस्यापि ब्रह्मपरतया विचारितत्वेन एकदेशविचाराभावाच्च । चतुर्थे-व्याख्येयैक्यं

नतावद्वेदत्वादिनैक्यमात्रं, व्याख्यानेऽपि प्रबन्धभेदेसत्यपि वेदव्याख्यानत्वादिनैक्यसिद्धिप्रसंगात्। नापिपूर्वापरीभूतैकप्रबन्धत्वं, व्याख्यानस्यैकप्रबन्धत्वेहि नतावद्व्याख्येयैक्यमात्रं हेतुः, वैदिकपदार्थनिर्णायकयोर्निरुक्तव्याकरणयोरिव एकप्रबन्धव्याख्यानयोः प्रस्थानयोरिवच प्रबंधभेदेऽपि तदुपपत्तेः। नाप्येकप्रबन्धपूर्वापरभागव्याख्यानत्वं हेतुः, असिद्धेः। तथाहि - तत्तच्छाखासंहितारण्यकभागयोः पूर्वापरतया न पूर्वापरभागव्याख्यानता, एकशाखासंहितारण्यकयोः क्रमेण व्याख्यानानन्तरं शाखान्तरसंहितारण्यकव्याख्यानरूपत्वाभावात्। अतः कर्मब्रह्मपरसमुदायरूपेण पूर्वापरभागता तद्व्याख्यानरूपतया पूर्वापरभागव्याख्यानतावाच्या। समुदाययोश्च पूर्वापरभावो न कल्पनेनापि कल्प्यः, तत्तच्छाखीयसंहितारण्यकयो रध्ययनसिद्धं क्रमं बाधित्वाकल्पनासंभवात्। नापि तत्तच्छाखास्थसंहितारण्यकयोः पूर्वापरीभावमात्रेण तत्समुदाययोस्तत्सिद्धिः, ब्रह्मसूत्रव्याकरणसूत्रादौ प्रथमपादसमुदायस्य द्वितीयपादसमुदायस्यच पौर्वापर्यप्रसंगात्। यदिच विप्रकीर्णकर्मब्रह्मभागौ बुद्ध्या पूर्वापरीभावेन विविच्य मीमांसयोः प्रवृत्तिः, तर्हि वेदार्थविचारत्वोपाधिना अप्रवृत्तेः प्रयोजनभेदमभिसन्धाय कर्मब्रह्मविचारत्वोपाधिनैव प्रवृत्तेर्नैकशास्त्रता, तस्मान्नमीमांसयोः पूर्वापरभागव्याख्यानत्वं। अस्तुवातत्, तथापि कर्मब्रह्मकाण्डार्थनिर्णायकयोः स्मृतिपुराणयोरिव भिन्नप्रबन्धतास्तु। नपंचमः - उत्तरषट्काद्याद्यध्यायेषु पूर्वषट्काद्याध्यायमपेक्ष्य सप्तमादिव्यवहारवत् देवताकाण्डब्रह्मकाण्डाद्याद्यध्यायेषु कर्ममीमांसाद्याध्यायमपेक्ष्य त्रयोदशसप्तदशादिव्यवहारस्य द्वितीयभागतृतीयभागप्रथमादिव्यवहरस्यवा अभावात्। देवताविग्रहादिनिरासतत्समर्थनाभ्यामर्थविरोधाच्च न मीमांसयोरैक्यं। तन्निरासःकर्मण्यश्रद्धावारणार्थइतिचेत्, सत्येव ब्रह्मणि तज्ज्ञानइव सत्यामपि देवतायामाश्वाससंभवात्। पौरुषेयत्वाद्वेदाप्रामाण्यं माशंकीति तन्निरासः इतिचेत् सत्यामपिदेवतायां तदकृतत्वमात्रेणापौरुषेयत्वात्। किंच "मध्वादिष्वसंभवात्" "शेषत्वात्पुरुषार्थवादः" इत्यादिषु जैमिनिमतस्य पूर्वपक्षितत्वात्कथमविरोधः। नचातन्मतंतन्मतमिति वक्तुं युक्तं। किंच यदिशास्त्रैक्यं तदा आदौ वेदार्थजिज्ञासेति साधारणीप्रतिज्ञा-


स्यात् । नच ब्रह्मजिज्ञासेत्येव साधारणीप्रतिज्ञा कर्मविचारस्तु ब्रह्म मीमांसाचतुर्थपादे संगतइतिवाच्यं, तथासति ब्रह्मजिज्ञासायाः कर्मविचारानन्तर्यौक्त्यसंभवात् । कर्मब्रह्ममीमांसाप्रतिज्ञाभ्यामेव साधारणी प्रतिज्ञार्थसिद्धेरत्यपिन, प्रारिप्सितशास्त्रविषयादिसूचनाय साधारणस्यैवादौ साक्षात्प्रतिज्ञेयत्वात् । ननु धर्मजिज्ञासेत्येवसाधारणीप्रतिज्ञा, अलौकिकश्रेयस्साधनं धर्मः सच सिद्धस्साध्यश्च, साध्यो यागादिः, सिद्धो ब्रह्म, "कृष्णंधर्मंसनातनं" इतिभारतोक्तेरितिचेन्न, तथात्वे दैव ब्रह्ममीमांसयोर्धर्ममीमांसेति व्यवहारापातात्, प्रतिज्ञातधर्मसामान्यस्यैवानन्तरं लक्षणीयत्वेन चोदनालक्षणोऽर्थइति विशेषलक्षणायोगाच्च । तत्रचोदनाशब्दस्य वेदमात्रपरत्वे पुनर्ब्रह्ममीमांसायां शास्त्रयोनिसूत्रवैयर्थ्यं । कृष्णंधर्ममितितु धारणाद्धर्मइतिवचनाद्यौगिकः, अन्यथा "पातनात् पापनामासौपुनातिः पुण्यनामवान्, "परमंयोमहत्तपः" इति वचनात् पापत्वाद्यपिस्यात् । देवताकाण्डःर्थदेवतायाश्च नक्वचिद्धर्मशब्दो दृष्टइति ।

तदेतत्सर्वमाचार्यसूक्त्यश्रवणहेतुदौर्भाग्यनिबन्धनं । तथाहि "ऐक शास्त्र्यञ्च भागद्वयात्मकवेदाख्यैकप्रबन्धव्याख्यानरूपत्वात्" इत्यादिना व्याख्येयैक्यमेव शास्त्रैक्ये हेतुतयानुगृहीतमाचार्यैः । "अस्त्वैक शास्त्र्यं कथंपौर्वापर्यनियमइतिशंकांपरिहरन्" इत्यादिना उपजीव्योप जीवकभावादिक्रमनियामकत्वेनैवानुगृहीतम् । एवंसति विकल्पसंभ्रम-आहोपुरुषिकामात्रं । यदुक्तं-'कर्मफलानित्यत्वापातप्रतीतिमात्रेण ततोनिवृत्त्युपपत्तौ कर्मफलानित्यत्वनिश्चयोनापेक्षित' इति तन्न, "सांगाध्ययनेन कर्मब्रह्मज्ञानयोरुभयोरप्यापातप्रतीतौ अधीतक्रमेण कर्म विचार्य कर्मणामनित्यफलत्वनिश्चया यदि नित्यफलं केनचिद्भवति तदा तन्मयानुष्ठेयमितिज्ञानवतो ब्रह्मज्ञानस्य नित्यफलत्वसंभावनया तद्विचारे प्रवृत्तिः" इतिह्याचार्यैरनुगृहीतं, अत्रास्यकुचोद्यस्यावकाशाभावात् । यदिकर्मण्यपि नित्यफलसंभावना तदा यदि नित्यफलंकिञ्चित्स्यात्तदा तन्मयानुष्ठेयमितिबुद्धिमतः कर्मणोनिवृत्त्यसंभवेन अनित्यफलत्वनिश्चयस्यैवकेवलकर्मणोनिवर्तकत्वात् । यच्चोपजीव्यविकल्पेषु तृतीयविकल्पदूषणं त च्चैकशास्त्र्यहेतुतया विकल्प्य तेन क्रमासंभवदूषणोक्तेरुपहास्यम् । अ

स्त्वनेनैकशास्त्रत्वं तथापि क्रमोनसंभवतीत्यभिप्रायेण तथोक्तमितिचेन्न, तै नैक्यंयदिसिद्ध्यति तदा स्वाध्यायाधीतिक्रमाद्व्याख्याननियमसिद्धेः। यच्च विषयाद्यैक्यदूषणं तदपि पूर्वोक्तप्रमाणाभ्यामैकशास्त्र्येसिद्धे ग्रंथोक्तप्रकारेण विषयाद्यैक्यस्यनिष्प्रत्यूहत्वान्निरस्तं। किञ्च पूर्वोत्तरभागात्मिकाया एकैकशाखाया एकैकग्रन्थत्वात्तत्रच विषयाद्यैक्यस्यावश्यकत्वे त द्व्याख्यानस्यापि तदेवविषयादिकमिति कथं नविषयाद्यैक्यं। नचं कर्म ब्रह्मादिरूपविषयादिभेदादेकशाखायामपि कर्मब्रह्मभागयोर्भिन्नग्रन्थता, तथासत्येकस्मिन्नेवानुवाके नानाकर्मणां भिन्नफलानां प्रतिपादनात्तत्रापि तत्तत्कर्मप्रतिपादकानां वाक्यानां नानाग्रन्थत्वप्रसंगात। यदुक्तं-व्याकरणाद्यंगविचारोऽप्येकविध्युत्थरागप्रयुक्तइति, तन्न, स्वाध्यायापातप्रतीतेरेव व्याकरणविचारसाध्यतया स्वाध्यायापातप्रतीतिप्रयुक्तविचार रागस्य व्याकरणविषयत्वासिद्धेः। यदुक्तमेकदेशविचाराभावादिति, तन्न, इहैव कर्मकाण्डस्य ब्रह्मपरतया विचारितत्वेपि सहस्राधिकरण निवर्त्यसंशयनिवर्तकविचारस्य ब्रह्मविचारेणासिद्धेः, किञ्चिद्विचारमात्रेणास्य कर्मविचारत्वे वेदप्रामाण्यविचारएव ब्रह्मविचारस्स्यात्। यदुक्तं- वेदार्थविचारत्वोपाधिना अप्रवृत्तेः प्रयोजनभेदमभिसन्धाय कर्मब्रह्म विचारत्वोपाधिनैव प्रवृत्तेर्नैकशास्त्रतेति तन्न, अवयवप्रयोजनभेदाभिसंधेरवयविप्रयोजनाभिसन्ध्यविरोधित्वात, अन्यथा षट्काध्यायपादपेटिकाधिकरणभेदेशास्त्रभेदप्रसंगात्। यच्च - देवतानिराकरणस्य कर्मण्यश्रद्धावारणार्थत्वे दूषणोद्भावनं तदश्रुतवेदान्तानामित्याचार्यानुगृहीतपदा श्रवणनिबन्धनं, तदनुग्रहस्यायंभावः, देवतानां प्रळये विनाशात् तत्प्राचीनकर्मणां फलाभावप्रसंगात् अनन्तरसर्गेऽकृताभ्यागमप्रसंगात इन्द्रस्येन्द्रयजनश्रवणेन स्वस्यैव स्वस्मै फलप्रदत्वविरोधाच्च कर्मण्यश्रुतवेदान्तानामश्रद्धास्यात्, श्रुतवेदान्तानान्तु तदन्तर्यामिणः परमात्मनएव फलप्रदत्वाध्यवसायात्कर्मणि नाश्रद्धास्यात् इति, तस्मात् अश्रुतवेदान्तानां कर्मण्यश्रद्धावारणार्थमन्वारुह्यवादेन देवतानिराकरणंयुज्यतएवेति। यच्चात्नमतं तन्मतमितिवक्तुमयुक्तमिति तदप्याचार्यैरेव परिहृतं - तन्मतत्वेनोपन्यासनिरासस्तदुक्ततया तत्र तत्त्वबुद्धिर्मन्दमतीनाम्माभूदिति। अतन्मतत्वञ्च भारतादेवज्ञायतइत्याचार्यैरेवोक्तं - सच्छिष्य-

स्य जैमिनेर्भगवद्व्यासाचार्यमतिविरुद्धमतिसंभवः, तस्मादैकशास्त्र्यमनङ्गीकुर्वताप्यन्वारुह्यवादेनैव जैमिनिना देवतानिराकरणमित्यङ्गीकार्यं । ब्रह्मजिज्ञासेत्येव साधारणार्थप्रतिज्ञेत्याचार्यसूक्तितात्पर्यं प्रागेवोपपादितम् - धर्मजिज्ञासासूत्रस्य साधारणप्रतिज्ञात्वंचोपपादितमिति ॥

इति शतदूषणीव्याख्याने चण्डमारुते शास्त्रभेदभङ्गोनाम तृतीयः स्कन्धः ॥



॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीमते निगमान्तमहादेशिकाय नमः ॥

॥ अथ चतुर्थो वादः ॥

विधित्रस्तैर्यत्तत्कथितमविधेयश्रुतिपथै र्विधत्ते दुःखाब्धेर्विलयमविधेया मतिरिति । तदुद्धृत्योपायं भगवदुपसत्तिं प्रथयते नमस्यामस्यामोर्यतिपरिवृढायप्रतिकलम् ॥ * ॥

यदेतद्भ्रांतजनजल्पितं; समूलस्यसंसारस्य संविन्मात्रेपरस्मिन्ब्रह्मण्यारोपितत्वा दळीककलधौतादेरिवा धिष्ठानयाथात्म्याध्यवसायादेव विलयः; नपुनःकर्मणोपासनेनवाविहितेनादृष्टद्वारा । आहुश्च " मणिमन्त्रौषधादिभ्यो दण्डघातादिनापिवा । क्रियतेनैवकेनापि मायाकुण्डलिखण्डनं " इति ।

उद्गृह्णन्निगमान्तसागरतलस्पर्शीनितत्त्वान्यसौ
सासूयप्रतिवादिदर्शनसिरामर्माणिभिन्दन्निव ।
वेदान्तार्यवचःप्रसाधनपटुव्याख्यानमुद्राकरः
चित्तेभातुवधूलसन्ततिपरिष्कारस्य कस्यापि नः ॥ * ॥

(विधित्रस्तैरिति) विधेयत्वे अदृष्टद्वारानिवर्तकत्वप्रसङ्गेन तन्निवर्त्यस्य सत्यत्वप्रसंगो विधित्रासहेतुः । (अविधेयेति) अपरिचितश्रुतिमार्गैरित्यर्थः । तेन यागादिशब्दार्थेऽपि मौढ्यं व्यज्यते । यत्तदित्यत्र तच्छब्दः प्रसिद्धिपरः । (नमस्यामस्यामइति) नमस्यांप्रयुञ्ज्महइत्यर्थः । (प्रतिकलमिति) दुरर्थप्रलापोद्धूननदशासु सम्यगर्थोपदेशदशासुचेत्यर्थः । तेन तत्कृतोपकारस्मृतिर्नमस्याहेतुरित्युक्तंभवति । सविशेषब्रह्मव्यावृत्त्यर्थं (संविन्मात्रइति) " ब्रह्मवेदब्रह्मैवभवति " इत्याद्यभिप्रायेण (परस्मिन्ब्रह्मणीति). केनापि पुरुषेणेत्यर्थः ।

यत्पुनरुन्मत्तान्प्रति भिषज्यते; तदपि तत्रानारोपितत्वाभिमतदोषविशेषमोक्षणायैव, नपुन स्तदधीनधीविशेषमात्रसिद्धमित्थ्यापदार्थ निवर्तनाय । दोषेतु शममुपेयुषि स्वरसवाहितत्त्वज्ञानादेवतन्निवृत्तिः । अत्राप्याहुः “ भ्रांतभेषजनिर्माणं नभ्रांतेरुपशांतये । किन्तुभ्रांतिनिदानस्य दोषस्यैवोपशांतये ॥ ” इति । नचात्रापिदोषनिवारणाय वैधापेक्षानुप्रवेशः; दोषस्याप्यत्र दृङ्मात्राधीनसिद्धितया मित्थ्यात्वाविशेषेण एकहेलयैव तत्त्वज्ञानेनानिवार्यत्वात् । ततश्च — विश्वमित्थ्यात्वविज्ञानकुक्षिनिक्षेपभक्षितः । नापेक्षतेपुनर्दोषः कर्मायत्तात्मबाधकम् ॥*॥ लौकिकस्यतुदोषस्य व्यावहारिकव्यवस्थानतिक्रमाद्भेषजाद्यवकाशः । यद्यप्यविद्यायामपि सा समाना; तथापि तथाविधत्वप्रबोधनायप्रवृत्तत्वाद्वाक्यस्य तावतैवतन्निवृत्त्युपपत्तिः । नचज्ञानंस्वरूपेणविधातुंशक्यं, अतएवद्रष्टव्यइत्यपि फलानुवादइतिनिरणैषुः । तदर्थतयाचनश्रवणादिविधिनैरर्थक्यं । तादर्थ्यंच प्रतिबन्धकभेदवासना

(अनारोपितत्वाभिमतेति)लौकिकानामभिमतिर्विवक्षिता तेन,व्यावहारिकत्वं विवक्षितम् । (भ्रान्तेरिति) भ्रान्तिसिद्धार्थस्याप्युपलक्षणं । (नचेति) दोषः - अविद्या । भक्षितः - जीर्णः । (तथाविधत्वेति) व्यावहारिकत्वबोधनाय ; मिथ्यात्वे तात्पर्यम् । ज्ञानस्यैवतर्हिविधानमस्त्वित्यत्राह (नचज्ञानमिति) आज्यावेक्षणादिविधीनां तत्साधनपरत्वाभिप्रायेणाह (स्वरूपेणेति) कथन्तर्हि द्रष्टव्य इतिविधिरित्यत्राह (अतएवेति) ननुतर्हि श्रोतव्यादिवाक्यानामपि ज्ञानविषयाणां विधिपरत्वासंभवाद्वैयर्थ्यमेवस्यादित्यत्राह (तदर्थतयेति) ज्ञानार्थतयेत्यर्थः । ज्ञानार्थोऽयंचेतोवृत्तिविशेषः; नतु स्वयंज्ञानमितिभावः । यद्वा-यद्यविधेयाज्ज्ञानादेवबन्धनिवृत्तिः ननुविहितात् , तदा श्रवणादिविधानं व्यर्थमित्यत्राह (तदर्थतयेति) दर्शनरूपफलार्थतयेत्यर्थः । वाक्यजन्यज्ञाने वाक्यमेवह्यपेक्ष्यते , नपुनः श्रवणमित्यत्राह (तादर्थ्यंचेति) ननु श्रवणादीनां सर्वेषामपि प्रकरणेन, मोक्षार्थत्ताअविशिष्टा

निरसनद्वारेण । तस्याश्चप्रतिबन्धकत्वं असम्भावनाविपरीतसम्भावना ख्यचित्तविक्षेपहेतुत्वात् । " ब्रह्मवेद " इत्यादौच ज्ञानमात्रस्यैवमोक्षहेतुत्वंश्रूयते । नचास्यवाक्यतस्सिद्धस्यैवज्ञानस्यविधेयत्वसंभवः, "अप्राप्तेशास्त्रमर्थवत्" दितिहि न्यायविदः । यत्तु नायंसर्पइतिबुध्यस्वेत्यादौ भ्रमनिवृत्त्यर्थं ज्ञानविधिवद्दृश्यते; तत्रापि नायंसर्पइत्येतावतैवासिद्धंज्ञानं विस्रम्भमभिसन्धायविधेयवदनूद्यते । यदिचनायंसर्पइत्येतावता भ्रमोननिवर्तेत, तदाजानीहीतिपरश्शतविधानेऽपि कथंतन्निवृत्तिः, अतः " तत्त्वमसि " इत्याद्युपदेशात्सोहमित्यादिरूपेण विवर्तमानयाधियैव विशुद्धाधिष्ठाननिष्ठया समूलभेदभ्रमोन्मूलनमिति ॥

अत्र ब्रूमः । सिद्धे विश्वस्य मिथ्यात्वे धीमात्रात्तन्निवर्तनं । तदेवनघटेतेति यथावदभिधास्यते ॥

यत्तु लौकिकदोषस्याविद्यायाश्च मिथ्यात्वाविशेषेपि व्यावहारिकव्यवस्थया वैषम्यमुक्तं, तदपि न, मिथ्याभूतानामपि काचकामलादि दोषाणां ज्ञानेतरानिवर्त्यत्वे दृष्टेस त्यविद्यायामपि तदविरोधात् । अस्त्वविरोधः, तथापि प्रयोजकोपदेशजन्यज्ञानादेव तन्निवृत्त्युपपत्तेः हेत्वन्तरपरिग्रहे कल्पनागौरवमितिचेन्न, श्रुतेतदभावात् , तत्परिग्रहएव तत्प्रसंगाच्च । नहि श्रुतहानं न्याय्यं । येच ब्रह्मव्यतिरिक्तं सर्वं मिथ्येति प्रयोजकज्ञानवन्तः, तेपि चक्षुरादिगततिमिरादिदोषनाशाय प्रतिभट

वाक्यतस्तुनज्ञानस्यापीत्यत्राह (ब्रह्मवेदेति) एवमपि ज्ञानस्यस्वरूपेण विधातुमशक्यत्वंकुतइत्यत्राह(नचास्येति) प्रमाणपरतंत्रस्यज्ञानस्यनविधेयता, विद्ध्यभावेतदप्राप्तौहि विधिःस्यादित्यर्थः । (विस्रंभमिति) विस्रंभयौग्यतानूद्यत इति भावः । (मित्थ्याभूतानामिति) ततश्च विश्वमिथ्यात्वज्ञानेन निवृत्तिसंभवेपि तन्निवृत्त्यर्थतयाऽन्यस्यापि विधानमविरुद्धमित्यर्थः । (प्रयोजकेति) ब्रह्मव्यतिरिक्तत्वेन मिथ्यात्वोपदेशजन्यज्ञानादेवेत्यर्थः । तदभावात् – आभिप्रायिकोदोष स्तच्छब्देन गृह्यते । (तत्परिग्रहइति) परिग्रहः कल्पना । (येचेति) अनेन व्यभिचारः स्वप्रवृत्ति

भंगाच्च भेषजंशस्त्रादीन् प्रयुञ्जानादृश्यन्ते, नपुनर्मिथ्यात्वाध्यवसाय महाभेषजं प्रमाणयन्तो जोषमासते । आहुश्च " मायावादिमतस्थाश्च-महारोगेण [दूषि] पीडिताः । मन्त्रेशयानादृश्यन्ते किञ्चभेषजकांक्षिणः ॥" इति । तस्मादविद्यायामपि मिथ्यात्वाध्यवसायस्य प्रयोजकोपदेशत्वशास्त्रसिद्धावपि दोषान्तरवदेव ज्ञानेतरहेतुनिवर्त्यत्वाविरोधात् तदर्थकर्मांगकोपासनविधानं नानुपपन्नं । उक्तंचवरदराजाचार्यैः " यथाहरीतकीखादः क्रियतेदोषशांतये । तद्वद्दुरितशांत्यर्थं क्रियतांहरिकीर्तनं " इति । यत्तूक्तं नज्ञानं स्वरूपेणविधातुंशक्यमिति, तत्किंज्ञानस्याभाव्यरूपतया, उताभावार्थतया, यद्वा साक्षात्प्रयत्नविषयत्वाभावात्, अथवा साक्षात्पुरुषव्यापारत्वाभावात् , उतसांशाभावनानुप्रवेशविरहात् , अन्यस्माद्वाकुतश्चिदिति । नप्रथमः, भवत्पक्षेवृत्तिरूपस्य परपक्षेत्वात्मविशेषगुणस्य अस्मत्पक्षेतु तदवस्थाविशेषरूपस्य करणाधीनतयाभाव्यत्वसिद्धेः । आहुश्च " कादाचित्कस्वभावस्य भाव्यत्वं केनवार्यते । तस्याकारणजन्यत्वे चार्वाकमतचर्वणम् ॥ " इति । नद्वितीयः, " ज्ञा अवबोधने " इतिभावार्थतयैव पाणिनीयस्मरणात् , आत्मस्वरूपभूतज्ञानस्य तु विधानप्रसंगाभावात् ।

विरोधश्चोक्तः । बाधितानुवृत्त्यादिभिस्तदुपपादनेऽपि अननुवृत्त्यर्थमपि भेषजपानवदविद्याननुवृत्त्यर्थमेव साधनान्तरविधानं संभवतीत्याशयः । (नप्रथमइति) भाव्यपदेन साध्यत्वं विवक्षितम् । (कादाचित्केति) अत्र पूर्वार्धमिहोपजीव्यं । यद्वा – भाव्यत्वं साक्षात्परंपरौदासीन्येन कृतिसाध्यत्वं भाव्यत्वंच करणाधीनतयेति, केषांचिज्ज्ञानानां पुरुषप्रयत्नाधीनकरणजन्यत्वदर्शनेन भाव्यत्वसिद्धेरित्यर्थः । सिद्धेहि करणाधीनत्वे तत्प्रयोजकप्रयत्नाधीनतास्यात् , तदेव नेत्यत्राह (तस्येति) (भावार्थतयेति) बुद्धेर्ज्ञाधात्वर्थतया पाणिनीयस्मरणादित्यर्थः । वृत्तिरेवभावार्थः । आत्मस्वरूपभूतन्तु ज्ञानमभावार्थत्वादविधेयमेवेत्यत्राह (आत्मेति).

न तृतीयः, प्रयत्नस्याविधेयत्वप्रसंगात्, लोकेहि स्वाभिमतकार्यार्थं प्रयतेतेतिप्रयत्नविषयविधानदर्शनात् । नचतुर्थः, भावार्थान्तराणामप्यविधेयत्वप्रसंगात् । नपञ्चमः, यष्टव्यइत्यादौ यागादेरिव द्रष्टव्यइत्यादौ दर्शनादेरपि तदनुप्रवेशे विरोधाभावात् । नापि षष्ठः, ज्ञानविधिविरोधिनःकस्यचिदन्यस्यापि कुतश्चित्सिद्ध्यभावात् । किञ्च — यदिज्ञानं नविधेयं कथं तर्हि यागादिविधिरपि न भज्येत, यागोपिहि देवतोद्देशेनद्रव्यत्यागात्माबुद्धिविशेषएव । एवञ्चद्वादशाहे अविवाक्ये दशमेहनि बुद्धिविशेषरूपस्य मानसग्रहादेः कथंविधेयतेष्यते, कथंवा मनश्चितादयग्नीनां दृष्टिरूपाणां तत्त्वविषयाणांचोपासनानां विधेयत्वमिष्यते, कथञ्च दर्शनार्थतयापि श्रवणमनननिधिध्यासनानि विधेयानीच्छसि, तान्यपि ज्ञानविशेषरूपाण्येव । ननु नतानिज्ञानरूपाणि, अपितु तदर्थव्यापाररूपाणीतिचेत् तन्न, तदर्थत्वेसत्यपि तेषामपि स्वरूपस्यज्ञानरूपत्वात् ।

अस्माभिरपि स्वरूपभूतज्ञानस्य विधानं नेष्यतइत्यर्थः । (लोक इति) तृप्तयर्थं भोजने प्रयतेतेत्यादा विष्टसाधनत्वबोधनरूपविधानस्य दर्शनादित्यर्थः । (भावार्थान्तराणामिति) पुरुषशब्देनात्मविवक्षायां प्रक्षेपादेर्विधेयतानस्यात्, शरीरपरत्वेतु त्यागादेर्विधेयता नस्यात् । (अनुप्रवेशइति) केनेत्यंशानुप्रवेशइत्यर्थः । (कुतश्चिदिति) प्रमाणादित्यर्थः । ननु श्रवणादीनां न ज्ञानत्वं, परोक्षापरोक्षज्ञाने क्लृप्तकारणाजन्यत्वात्, किन्तु ज्ञानाभासः पदार्थान्तरं, अन्तःकरणसमवेतंज्ञानं सुखाद्यष्टगुणातिरिक्तान्तःकरणविशेषगुणभिन्नं पदार्थत्वात सुखादिवत् । न चाप्रयोजकत्वं प्रत्यक्षसिद्धायावृत्तेः क्लृप्तकारणाजन्यत्वेन ज्ञानत्वायोगात् । नच तस्मिन् मनःकरणमितिवाच्यं, मनसः प्रमाश्रयत्वेन तदकरणत्वात्, अतः इन्द्रियादिवज्ज्ञानार्थत्वा न्न ज्ञानमिति शंकते (ननु नतानीति) (तदर्थत्वइति) अयंभावः, श्रवणादीनां ज्ञानत्वं तावदनुभवसिद्धं – ध्यानेतु विद्युपास्योर्व्यतिरेकेणोपक्रमोपसंहारदर्शनेनापि ज्ञानत्वमवगम्यते । नचान्यत्र क्लृप्तकारणविरहादज्ञानत्वं, ज्ञानत्वे प्रामा

णिके सिद्धेस त्यन्यत्रक्लृप्तकारणाभावेपि सामग्र्यन्तरस्यैव कल्प्यत्वा-त् । अन्यथा प्रत्यक्षे क्लृप्तकारणविरहा दनुमितेरप्यज्ञानत्वप्रसंगात् । स्वभावतस्तु मनसएवकारणत्वा न्नान्यत्र क्लृप्तकारणविरहः । नच-मनसः प्रमाश्रयत्वमेवेतिवाच्यम्, आत्मनएव ज्ञानाश्रयतया मनसःका रणत्वसाधनात् । किंच निदिध्यासनं तावदविच्छिन्नस्मृतिसन्तानः, ध्या नानन्तरं एतावन्तं कालं भगवन्तमस्मार्षमिति प्रयोगानुभवदर्शनात, ध्याने ध्रुवास्मृतिरित्यादिश्रौतप्रयोगाच्च । स्मृतेश्च ज्ञानत्वं तवापीष्टम् । अतस्संस्कारादेस्सत्वान्नान्यत्र क्लृप्तकारणविरहः । अतएवानुभवप्रयोग दर्शनात् द्वप्युपासनस्याप्याहार्यारोपसन्तानात्मकस्य ज्ञानत्वंसिद्धम् । मननमपि युक्तिभि रेवमेवैतदिति व्यवसायः । तच्च ज्ञानमेव, "म-नुअवबोधने" इति धातोर्निष्पन्नत्वात् । श्रवणमपि शाब्दज्ञानविशेषए व – तत्रैव स्वारस्यात । श्रवणमननयोर्निरुक्तहेतुभूतव्यापारत्वेपि व्या प्तिसहचारलाघवोपक्रमादिप्रतिसन्धानातिरिक्तस्य मनोव्यापारस्यादर्श ना त्तेषांचज्ञानरूपत्वात् ज्ञानविधिस्तवाप्यवर्जनीयः । यदप्युच्यते, ज्ञा नस्य बहुशः कृतिव्यभिचारात्कृतिसाध्यत्वाभावान्न विधेयत्वमिति । त-न्न । वाय्वादिनोदनाधीनक्रियायाः कृतिव्यभिचारेण योगादेरपि कृत्य साध्यत्वप्रसंगात् । किंच प्रत्यक्षादिमनोवृत्तौ कृतिसाध्यत्वादर्शनाच्छ्र-वणाद्यात्मकमनोवृत्तेरपि कृतिसाध्यत्वाभावप्रसंगः । यदुक्तं जीवकर्तृ कक्रियायां कृत्यव्यभिचारइति । तन्न । नतावज्जीवकृतिसाध्यत्वं कृतिमा त्रसाध्यतावच्छेदकं - ईश्वरकृतिसाध्ये अव्याप्तेः, नापि जीवकृतिसाध्यता वच्छेदकं आत्माश्रयात् । नच - जीवकर्तृकक्रियात्वं नात्रावच्छेदकतया अभिमतं, किन्तु, यागादिक्रियाविशेषउपलक्ष्यते, तत्रचास्त्येवाव्यभिचारः, ज्ञानन्तु जीवकर्तृकं कुत्राप्यप्रसिद्धमेवेति वाच्यम् । तवमते अवधार-णात्मकब्रह्मसाक्षात्कारस्यापि निदिध्यासनादिद्वारककृतिमन्तरेणासिद्धेः । नच - कृत्यव्यवधानाभावा न्न कृतिसाध्यत्वमिति वाच्यम् । घटादेः कृ-तिसाध्यत्वाभावप्रसंगात् । नच - निदिध्यासितव्यइति निदिध्यासनस्य विहितत्वात् तत्कृत्यतिरिक्तदर्शनहेतुकृत्यभावाच्च दर्शनविधिर्व्यर्थइति-वाच्यम् । तर्हि ततएवाविधानमिति स्यात नतु कृत्यसाध्यत्वात् । व स्तुतस्तु दर्शनसमानाकारध्यानस्य विधेयत्वा त्तस्यचकृत्यव्यभिचारात

श्रवणंहि नाम तत्त्वदर्शिन आचार्या न्नयाययुक्तार्थग्रहणं, मननमपि तथा एवमेवैतादिति युक्तितः प्रतिष्ठापनरूपो व्यवसायः, निदिध्यासनमपि अनवरतभावनात्मकस्मृतिसन्तानः । तदेवमेषां ज्ञानभूतानामेव यदि विधेयत्वमिष्येत, कथं द्रष्टव्यइत्यत्र दर्शनस्य विधेयत्वं नेष्यते । तथाच, विष्णुर्यष्टव्य इत्यादौ विधिबाधनदर्शनात् । सर्वत्रस्याच्च तद्बाधोऽदर्शनेवा नबाधनम् ॥ अथच ध्यानफलतयादर्शनमनूद्यतइतिमन्यसे, तदा मननध्यानयोरपि पूर्वपूर्वफलतयाऽनुवादइतिकिं न कल्पयसि । अस्त्वेवमितिचेन्न; " फलोपकार्यंगतया श्रवणादित्रयविधि " रितियुष्माभिःप्रतिपादनात् । तथाचैकत्रैवविधेयत्वमनुवाद्यत्वंचेति विरोधः, नहि विरुद्धत्रिकद्वयापत्तिरनुमन्यते तान्त्रिकैः । उक्तंहि " उद्देशेनानुवादेन प्राधान्येन समन्वितं । उपादानं विधानंवा गुणत्वंनैवदृश्यते " इति । " उपस्थितेऽतस्तद्वचनात् " इतिसूत्रोक्तन्यायेनो पासनस्य सांसारिकफलोत्तीर्णे प्राकरणिकस्वरूपाविर्भावपूर्वकनिरतिशयानन्दब्रह्मानुभवाख्यफलेसति द्रष्टव्यइत्यत्र निष्कारण

ज्ञानं नविधेयमित्यनुपपन्नं, ज्ञानार्थस्य ज्ञानत्वमविरुद्धं पदज्ञानादिवदिति । दर्शनान्तरस्य विध्यदर्शनान्न ब्रह्मदर्शनस्य विधेयतेत्यत्राह (तथाचेति) यदि क्वचिद्दर्शनेविध्यभानाद्दर्शनान्तरेऽपि नविधिः, तर्हि - " विष्णुरुपांशुयष्टव्यः प्रजापतिरुपांशुयष्टव्यः अग्नीषोमावुपांशुयष्टव्यौ " इत्यादावनुवादरूपत्वस्य स्थापनाज्ज्योतिष्टोमादावपि विधिर्नस्यात् । यदि तत्र प्राप्तितदभावाभ्यां विशेषः तदा प्रकृतेऽपि सएव विशेषोंऽगीकार्यइत्यर्थः (दर्शनइति) ब्रह्मदर्शने विधिबाधनं न स्यादित्यर्थः । (तदेति) श्रवणमात्राद्यन्नान्तरव्यतिरेकेण मननाद्यसिद्धेर्यदिविधेयता तदा दर्शनेऽपि तुल्यमितिभावः (फलेति) फलोपकारितया अंगतयाचेत्यर्थः । फलोपकारित्वंच फलकरणत्वं, करणत्वं श्रवणस्य, अंगत्वमितरयोः । (विरोधइति) अयंच मनननिदिध्यासनयोरनुसन्धेयः । एवं सम्प्रतिपन्नपापध्वंसदृष्टान्तेन दुःखध्वंसस्य साध्यत्वेपिनित्यत्वमुपपादितम् । वस्तुतस्तु पापध्वंसएव मोक्षः, तत्रच साध्यत्वे

विधिभंगप्रयासेन दर्शनस्यफलत्वं किमर्थं कल्प्यते । नियोगसाध्यत्वे मोक्षस्यानित्यत्वप्रसंगादितिचेन्न, मोक्षशब्देन दुःखध्वंसविवक्षायां साध्यत्वेऽपि नित्यत्वोपपत्तेः, प्रायश्चित्तधर्मसाध्यपापध्वंसवच्च । नच दुःखप्रध्वंसोमोक्षः, किन्तु दुःखहेतुसर्वकर्मध्वंसः, दुःखस्यक्षणिकत्वेन स्वयमेव विनाशात् । पुनर्दुःखानुत्पत्तिविवक्षायां तस्यास्साध्यत्वाभावेन प्रसंजकाभावः । ब्रह्मस्वरूपविवक्षायामपि तेनैव दत्तोत्तरत्वं । नह्यनादिसिद्धं ब्रह्म उपायसाध्यमित्यनुन्मत्तोब्रवीति । स्वरूपाविर्भावविवक्षायामपि नियोगविशेषा दत्यन्तवृत्ते प्रतिबन्धे स्वरूपमात्राधीनस्य स्वरूपाविर्भावस्य स्वरूपवन्नित्यत्वा त्पुनःप्रतिबन्धाभावाच्चा निवर्त्यत्वमुपपद्यते । ननु यद्युपासनविधेः फलतया मोक्षः स्वीक्रियते, तर्हि श्रवणमनन-दर्शनविधीनां किंफलमितिचेन्न, श्रोतव्योमन्तव्यइत्यनयो र्विधित्वाभावात् ; द्रष्टव्यइत्यस्यतु पृथग्विधित्वाभावात्, निदिध्यासनापरपर्याय मुपासनमेव दर्शनरूपं तस्मि न्विधेयं । तथाहि श्रवणंतावत् सांगसशिरस्कस्वाध्यायाध्ययनजनितापात प्रतीतिविदितपुरुषार्थतत्साधननिर्णयार्थिनः पुरुषस्य रागतएव सिद्धमिति नतत्रविध्यपेक्षा । श्रवणप्रतिष्ठार्थत्वान्मननस्य तदपि ततएवसिद्धमिति नतत्रापि । अतोयथावस्थितवाक्यार्थाध्यवसायस्य ध्यानोपकारकत्वात् तज्जनकयो श्श्रवणमननयोरिहानुवादएव । ध्यानन्त्वप्राप्तत्वा द्विधेयमेव ।

पि नित्यत्वं संम्प्रतिपन्नमेवेत्याह (नचेति) (पुनः प्रतिबन्धेति) यद्यपि प्रतिबन्धकं नकार्यविनाशकं किन्तु तदुत्पत्तिविरोधि, तथाप्यत्र चक्षुरादिजनितज्ञानावस्थायाः प्रतिबन्धकीभूतकर्मणानिवृत्तिदर्शनादिहापि पुनः प्रतिबन्धसत्त्वे तच्छंकास्यात्, तन्निराकरणार्थमिदमुक्तं । न-चैवं चक्षुरादिजन्यज्ञानस्य द्वितीयक्षणएव निवृत्तिः स्यादितिवाच्यम् । यादृशं प्रतिबन्धकं तादृशस्यैव निवर्तकत्वात्, चक्षुरादिसंप्रयोगाद्यभावविशिष्टंच कर्मप्रतिबन्धकं, चक्षुस्संप्रयोगादिच तत्रोत्तेजकं, नचैतद्द्वितीयक्षणेऽस्ति, नच चक्षुरादेरुत्तेजकत्वे ज्ञानकरणत्वानुपपत्तिः, साक्षात्कारत्वानुमितित्वादिवैजात्यप्रयोजकतया करणत्वस्याप्यावश्यकत्वा-दितिभावः । (नतत्रापीति) विध्यपेक्षेतिशेषः । ननु ध्यातव्यगोचरं

यद्यपिचात्र विषयस्यानुकूलत्वा त्चिन्तनेऽपिरागस्संभवति, तथापि तत्तद्रूपविशेषविशिष्टस्याहरहरनुवर्तनीयस्य सांगस्यतस्य फलसाधनत्व- धियमन्तरेण तथाविधविशिष्टानुष्ठानस्यरागप्राप्तत्वं नसंभवति, साचधीश्चोदनयैव, तन्मूलश्च रागोयागादिष्वपि समानो विधे- रपेक्षितश्चेति नदोषः। ननु यदिध्यानोपकारकतया श्रवणमननयोरनुवा- द स्तर्हि द्रष्टव्यइत्येवविधि रस्तु ध्यानन्तु तदुपकारकत्वेन सिद्धत्वाच्छ्रव- णादिवदनूद्यतइतिकल्प्यमितिचेन्न। ध्यानस्य दर्शनोपकारकत्वं किं मद ष्टद्वारा, उतदृष्टद्वारा। नपूर्वः-तस्य चोदनामन्तरेणासिद्धेः। उत्तरत्रापि दर्शनशब्देन किं चाक्षुषं ज्ञानं विवक्षितं, उतप्रत्यक्षमात्रं, यद्वाप्रत्यक्षसमा नाकारमिति; आद्ये "नचक्षुषागृह्यतेनापिवाचा मनसातुविशुद्धेन" इत्या दिश्रुतिविरोधः। द्वितीयेऽपि-किंलौकिकंप्रत्यक्षं उतयोगिप्रत्यक्षं, पूर्वत्रध्यान स्य लौकिकप्रत्यक्षजनकता यामन्वयव्यतिरेकाद्यभावेन अदृष्टद्वारा तत्सिद्धौ तत्रापि चित्रपशुफलत्वादाविव विध्यपेक्षैव। भावनाबलजन्तुप्रत्यक्षं नाभ्युपगच्छामः। तस्यच 'वृक्षेवृक्षेचपश्यामी' तिवद् भ्रान्तौ स्मृतिवैशद्य मात्रेवा पर्यवसानात्। नभ्रान्तिः अनंकीसत्। नापिस्मृतिवैशद्यं, अ स्वत्पक्षांगीकारप्रसंगात्। इतरत्रतु योगिप्रत्यक्षस्य प्रकृष्टादृष्टजन्यत्वा त्तन्मूलविध्यपेक्षायां निदिध्यासितव्यइत्ययमेवात्रविधिरंगीकार्यः। तृतीयेतु

श्रवणमननयोर्मोक्षार्थतया विधानंस्यात्, रागप्राप्तस्यापि राजसूयांगतया- विदेवनादेर्विधानवदिति शंकां परिहरन्नुपसंहरति (अतइति) मोक्ष साधनत्वेन ध्याने विदिते लोकतएव ध्यानोपकारत्वेन सिद्धयोः श्रवण मननयोर्ध्यानार्थतयैव प्रवृत्ते स्ततएव ध्यानसिद्ध्या मोक्षसिद्धेर्न तत्रमो- क्षार्थमपिविध्यपेक्षा, राजसूयप्रकृतितु विदेवनादीनां लोकतोऽगत्वेनाप्रसक्ते र्नियतानुष्ठानसिद्धये तदंगतया विधानं युक्तमेव, अतश्श्रोतव्योमन्तव्य इत्यनुवादएवेति। (तत्तदिति) अविच्छिन्नत्ववदर्शनरूपत्वप्रीतिरूपत्वाद योगुणाः। नन्वेवं गुणानामप्राप्तत्वयाविधानेऽपि स्वरूपस्य विधानं न स्यादित्यत्राह (फलेति) फलसाधनतया प्राप्तयभावात् स्वरूपस्यैव

विदेवनवद्विधेयतेत्यर्थः । एतेन - यदुक्तं कैश्चित् " उपायत्वदशाप्रभृति भगवज्ज्ञानं प्रीतिरूपमिति वदतां भवतां मते कृतश्रवणमननंप्रति भग वतोऽत्यन्तानुकूलत्वा दनुकूलविषयचिन्तनेच रागतएव प्रवृत्ते स्तच्चिन्त नरूपनिदिध्यासनस्यैव विधिर्नस्यात् , तत्र रागप्राप्ते चिन्तने अविच्छि न्नत्वादिगुणविधानंचे द्रागप्राप्ते श्रवणे गुरुमुखपूर्वक.वादिं विधानं श्रव णादिवाक्येष्वस्त्वि" ति, तन्निरस्तं । तथाहि । किमत्राज्ञातज्ञापकत्वन्नसंभ- वति उताप्रवृत्तप्रवर्तकत्वं, नाद्यः, निदिध्यासनस्य मानान्तरेण मोक्ष साधनत्वेनाप्राप्तेः तदुद्देशेन विधानसंभवात् । न द्वितीयः, मोक्षार्थिनो विधिं विना तत्र प्रवृत्त्यसंभवात् । ननु मोक्षार्थिन स्तत्र प्रवृत्त्यभावेपि सुखरूपे तस्मिन् भगवद्ध्याने तदुद्देशेन प्रवृत्तौ तत्स्वाभाव्यान्मोक्षोऽपि सेत्स्यतीतिचेन्न, नहि भगवद्ध्यानमात्रं प्रीतिरूपं – इदानीं तददर्शनात्, किन्तु – अहरहरनुष्ठीयमानानभिसंहितफलभगवत्समाराधनात्मकनित्यनै- मित्तिकादिभिः परिशुद्धे मनसि शान्त्यादिपरिष्कृते अहरहरभ्यासाधे यातिशयस्य ध्यानस्य बहुकालसाध्यस्य प्रीतिरूपत्वमिष्यते । नच नि रतिशयनित्यपुरुषार्थेच्छां विना शमदमादि संभवति । नापि ध्यानरू पसुखस्यावगमेऽपि तस्य वैषयिकसुखवदेवाल्पास्थिरतया त्रिवर्गप्राव- ण्येन प्रतिबन्धाच्च बह्वायाससाध्या योगकर्मादिप्रवृत्ति विषयनिवृत्तिश्च संभवति । यच्चोक्तं तैरेव, " भवद्भिरपि ' सहकार्यन्तरविधिः ' इतिसू त्रे ' तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य ' इत्यादिवाक्यै रौपदेशिकार्था- धिगमस्य पुनः पुनर्ब्रह्मसंशीलनस्यच विधेरङ्गीकृतत्वेन तयोरेव श्रो तव्योमन्तव्यइत्याभ्यां विधिरस्तु, औपदेशिकार्थाधिगमादौ श्रवणादि- पदप्रयोगा" दिति ॥

तदिदमाचार्यैरेवाशंक्य निरस्तं, ननु न्यायोपेतवाक्यमात्रानवग- म्य केवलोपदेशगम्यार्थविशेषश्रवणं श्रोतव्यइत्यत्र विधेयमितिचेन्न, म ननपूर्वभावितया श्रवणस्य न्यायानुगृहीतवाक्यजन्यरूपत.वगमा च्छ- ब्दस्वारस्याच्च । नच मन्तव्यइत्यालंबनसंशीलनरूपमननविधिरिति वा च्यम्, श्रवणशब्दस्य न्यायोपेतवाक्यजन्यज्ञानइव मन्तव्यशब्दस्य त त्प्रतिष्ठापने प्रसिद्धिप्राचुर्यात, तस्यचापवादाभावात्, उभयोरप्राप्तार्थ-

द्रष्टव्यइत्यनेन ध्यानस्यैववैशद्यलक्षणविशेषविधानमिति तदेव सामान्यतो निदिध्यासितव्यइत्युच्यतइतिवैशद्यविशिष्टध्यानासिद्धौ ध्यानदर्शनयोस्साध्य साधनभावाभावात् कथं दर्शनार्थतया ध्यानानुवादः । नन्वेवमस्तु ध्या नस्यविधेयता, दर्शनन्तु योगिप्रत्यक्षात्मकं पृथ ग्विधेयमिति किं नांगीक्रि यते,पृथक्फलनिर्देशाभावादिति नवक्तव्यं-मोक्षार्थतया विधेयस्य दर्शनस्य प्रधानत्वे तन्निर्वर्तकतया ध्यानस्यापिविधाने पृथक्फलनैरपेक्ष्या त्प्रधानवा क्यार्थैक्योपपत्तेश्च, अन्यथा दर्शनशब्दस्य मुख्यार्थभंगश्चेतिचेन्मैवम्, "ध्रु वास्मृतिः, स्मृतिलम्भेसर्वग्रन्थीनांविप्रमोक्षः " इतिक्वचिद्ध्रुवानुस्मृतेः साक्षात्सर्वग्रन्थिविप्रमोक्षहेतुत्वं श्रूयते स्मृतिलम्भइति सप्तम्या । क्वचित्तु "भिद्यतेहृदयग्रन्थिश्छिद्यंतेसर्वसंशयाः । क्षीयंतेचास्यकर्माणितस्मिन्दृष्टे परावरे " इतिदर्शनस्य तथैव फलसाधनत्वं श्रूयते । अनयोर्न तावदेक फलसाधनयोर्विकल्पः, गुरुलघुविकल्पायोगात् । अधिकारिभेदेनव्यव स्थितविकल्पकल्पनायामतिगौरवं, विकल्पकल्पनतद्व्यवस्थाकल्पनाचेति ।

विधायित्वे वाक्यभेदप्रसङ्गात् । ननु दर्शनरूपताविशिष्टध्यानविधिव दु पदेशगम्यार्थश्रवणशुभाश्रयमननविशिष्टनिदिध्यासनविधिः किं नस्या त्, मैवं, चतुर्ष्वंशेषु विधेस्तात्पर्यकल्पनादपि द्वयोस्तत्कल्पनस्य ल- घुत्वात् । नचास्मिन् वाक्ये विधानाभावा दौपदेशिकार्थाधिगमालम्बन संशीलनयो रसिद्धिश्शंकनीया, "तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बा ल्येन तिष्ठासेत् बाल्यंच पाण्डित्यंच निर्विद्याथमुनिः " इत्यनन्यथा सि द्धवाक्यान्तरसिद्धत्वात् । किंच सर्वत्र निगमाधीनार्थावधारणस्य न्या यानुसन्धानात्मकमननस्य च निदिध्यासनसहपाठा दिहापि तत्सहच रितयो स्तथात्वमेवयुक्तं, "आगमेनानुमानेन ध्यानाभ्यासवशेनच । त्रि धाप्रकल्पयन्प्रज्ञां लभते योगमुत्तमम् ॥ " इति स्मृतौ "श्रुत्वामत्वातथा ध्यात्वा तदज्ञानविपर्ययौ । संशयंचपराणुद्य लभते ब्रह्मदर्शनम् ॥ " इ ति त्वदुदाहृतश्रुतावन्यत्रापि तथा दर्शनात् । (साध्यसाधनभावाभावा- दिति) निदिध्यासितव्यो द्रष्टव्यइति पदयोरेकविषयत्वेन तदर्थयोःसा ध्यसाधनभावाभावादित्यर्थः । निदिध्यासितव्यो द्रष्टव्यइत्यनयो रैका

किञ्च-विकल्पस्य प्रयोगत्रयेण प्रामाण्यत्यागा प्रामाण्यस्वीकार त्यक्तप्रामाण्य स्वीकार स्वीकृताप्रमाण्यपरित्यागावृत्तिरूपाष्टदोषदुष्टत्वादन्याय्यत्वमेव । नापिसमुच्चयः, यौगपद्यस्याशक्यत्वात् । क्रमेप्युपकार्योपकारकयोरुपकार्यस्य फलहेतोरंगिनः स्वांगेनसह समुच्चयायोगात् । नच क्रमिकयोरपि दर्शपूर्णमासयोरिव ध्रुवानुस्मृतिदर्शनयो रेकं कारणत्वं, तदुपस्थापकश्रुत्याद्यभावात् । नच अङ्गभूतायां ध्रुवानुस्मृता वंगिनोदर्शनस्यैव फलं कीर्त्यतइति न विरोधइति वाच्यं, अंगांगिभावस्याद्याप्यनिश्चितत्वात्, दृष्टद्वारस्यासिद्धेः, अदृष्टद्वारकल्पनेगौरवात् । स्वतः प्रतीयमानार्थभंगेच श्रुतहानिदोषात् । नचात्रप्रजापतिवाक्यनयः, भूयसांन्यायविरोधात्, "द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनं" इतितान्त्रिकाः । भूयांसिहिवाक्यानि ध्यानोपासनादिशब्दैर्ध्रुवानुस्मृतिमेव मोक्षसाधनमभिदधति । नकेवलं श्रुतिरेव, स्मृतीतिहासपुराणसर्वोत्तरतन्त्रयोगसांख्यशास्त्राण्यपि । दर्शनं न्त्वल्पवाक्यावसितम् । एव मीश्वरोपासनस्यैव भूयोभिर्वाक्यै र्मोक्षसाधनत्वावसायात् तदन्यनिषेधश्रुतिसामर्थ्यात् क्वाचित्कजीवोपासनानां मोक्षसाधनतया श्रुतानां यथालिंगं जीवविशिष्टपरमात्मविषयतया अंगत

र्थ्याभावे द्रष्टव्यइत्यस्य दर्शनसमानाकारत्वोपचारहेत्वभावेन नतादर्थ्येन लोकसिद्धसाधने ध्याने प्रवृत्तिसंभव इति भावः । किं युगपदनुष्ठितयोस्समुच्चयः उतक्रमेणेत्यभिप्रेत्याद्यं दूषयति (यौगपद्यस्येति) क्रमेपि किमङ्गाङ्गिनोस्समुच्चयः उतप्रधानयोः, आद्यमाह (क्रमेऽपीति) (उपकार्योपकारकयोरिति) सतोऽतिशेषः । द्वितीयमाह (नचक्रमिकयोरिति) यथा दर्शपूर्णमासाभ्यामितिद्विवचना त्ससमुच्चयः तथेहनास्तीत्यर्थः । ननु एकफलोद्देशेनमास्तूभयोस्समुच्चयेनविधिः; किन्तुदर्शनमेवफलार्थंविधीयते, तदङ्गभूतस्मृतौतु तत्फलस्यानुवादमात्रमित्याशङ्क्याह (नचाङ्गेति) स्वतःस्वरसतः, सचार्थःसाक्षात्साधनत्वम् । (नचात्रेति) तत्रहिजीवोपासनस्य मोक्षसाधनताप्रतीतावपि तस्ययथाऽङ्गत्वमेव, एवं ब्रह्मोपासनस्यापि

यावा निर्वाहः, अत्रतु नतथेति विशेषः । अतः परिशेषाद्ध्रुवानुस्मृति दर्शनयो रैक्यएव पर्यवसानं । विस्तृतञ्चैतद्भाष्यएव - छागपशुन्यायेन वेदनध्यानादिशब्दानामुत्तरोत्तरं विश्रान्तिप्रतिपादनात् । एवंस्थिते स्मृतिदर्शनशब्दयोर्मुख्यैकार्थासंभवे कस्यचिदौपचारिकत्वमवश्याश्रयणीयमितिचावधारिते स्मृतिशब्देन प्रत्यक्षज्ञानोपचारेऽतिशयासिद्धेः दर्शनशब्देनतु स्मृतेरुपचारे प्रत्यक्षसमानाकारतारूपवैशद्यातिशयलक्षणविशेषसिद्धेश्च दर्शनशब्देन विशदतमाध्रुवानुस्मृतिरेव विवक्षितेत्यंगीक्रियते । अतोऽत्रापि निदिध्यासितव्यइति ध्रुवानुस्मृतिविधानात् द्रष्टव्यइत्येतदपि तद्विशेषसमर्पकमिति । तेन " स्मृतिलंभेसर्वग्रन्थीनांविप्रमोक्षः " " तस्मिन्दृष्टेपरावरे " इत्यत्रच्छागपशुन्यायनिर्णीतोऽर्थः एकस्मिन्नपिवाक्ये निदिध्यासितव्यो द्रष्टव्यइत्यनयो रप्याश्रीयतइति नविरोधः । नच तव्यप्रत्ययद्वयविरोधः, "अग्नयेपथिकृत"इत्यादिषु एकविधेयत्वेपि चतुर्थीद्व

स्यर्थः । (नतथेति) नभूयश्श्रवणाभावोनापिनिषेधइत्यर्थः । (एवंस्थितइति) ननुदर्शनशब्दलक्षणभयाद्भिन्नार्थत्वमेववाच्यमितिचेन्न, वाक्यस्वारस्यानुसारेणपदलक्षणायान्याय्यत्वात्, अतएवगङ्गायांघोषइत्यत्रलक्षणा । (स्मृतिशब्देनेति) स्मृतिसमानाकारत्वंहि ज्ञानत्वादि, तच्च दर्शनविधानादेवासिद्धम्, तथाच दर्शनविध्यसिद्धस्य विधेयस्यासिद्धेर्ध्यानविध्यानर्थक्यं । दर्शनसमानाकारोपचारेतु वैशद्यस्य ध्यानविधिमात्रेणं तदलभाद् द्रष्टव्यइत्यस्यापि सार्थकत्वमित्यर्थः । दर्शनशब्दस्य चाक्षुषज्ञाने मुख्यस्य प्रत्यक्षपरत्वेऽपि लक्षणैव, अतउभयोर्लक्षणापेक्षया एकस्यापिमुख्यार्थापरित्यागोन्याय्यइत्यपिद्रष्टव्यम् । एवं "स्मृतिलम्भेसर्वग्रन्थीनांविप्रमोक्षः" "तस्मिन्दृष्टेपरावरे" इत्यत्रनिर्णीतमर्थं निदिध्यासितव्योद्रष्टव्यइत्यत्रातिदिशति (अतइति)भिन्नवाक्यएवैतन्न्यायदर्शनात् कथमेकवाक्येप्रवृत्तिरित्यत्राह (तेनेति) विशेषसमर्पकत्वेनेत्यर्थः । नहि न्यायप्रवृत्तौ भिन्नवाक्यत्व मेकवाक्यत्वंवा प्रयोजकं, किन्तु सामान्यविशेषभावः, सचेहाप्यस्तीतिभावः । (नचेति) विशिष्टविधेरेकेनलाभादितिभावः । (अग्नयइति) तत्रापि विशिष्टस्यदेवतात्व मेकेनैवप्रत्ययेनलभ्यते, अत उभयत्रा

यवदविरोधात् । एवंस्थिते यदिवाक्यार्थज्ञानस्यमोक्षोपायता तदोपासना दिविधिनैरर्थक्यं दुष्परिहरं, शब्दजन्यप्रत्यक्षवादस्तुपरिहरिष्यते । यत्तु वाक्यार्थज्ञानोत्पत्तौ प्रतिबन्धकभेदवासनानिरासद्वारेण श्रवणमननानिदिध्यासनाना मुपकारकत्वमुक्तम्, तदपि हास्यं, वाक्यस्याकाङ्क्षायोग्यतासन्निधिपरामर्शमन्तरेणापेक्षणीयान्तराभावात् । सत्यांतुसामग्र्यांवाक्यार्थज्ञानानुत्पत्त्यनुपपत्तेः । नचप्रतिबन्धकमपि सामग्री वैकल्यपर्यवसितम्, यथाहुः; " प्रतिबन्धोऽपि सामग्रीतद्धेतुप्रतिबन्धकः " इति, विपरीतवासनायाः प्रतिबन्धकत्वस्यैवासिद्धेः, सत्यामपि विपरीतसर्पादिवासनाया माप्तोपदेशलिंगादिभिः सर्पादिबाधकं तत्त्वज्ञान मुत्पद्यते । अतएवासम्भावनाविपरीतसम्भावनाख्यचित्तविक्षेपद्वारा भेदवासनायाः प्रतिबन्धकत्वमित्येतदपिनिरस्तम् । यदिच भेदवासनानिरसनद्वारेणाद्वैतवाक्यार्थज्ञानोत्पत्तिरिष्यते, तदानकदाचिदपितदुत्पत्तिस्सेत्स्यति, उक्तंहि—" यावच्छरीरपातंहिकिन्नवर्तेतवासना । तन्निवृत्तौकथं पुंसा मुन्मीलननिमीलने ॥ " इति । किञ्च अनादिकालोपचितानां पटुतरप्रत्ययाभ्यासादरै र्दृढतरानिरूढाना मपरिमितानां भेदवासनानां कतिपयकालसाध्याविशदप्रत्ययादिमूलाल्पीयस्तमाद्वैतवासनया निरसितुमशक्यत्वात् । किञ्च तत्त्वज्ञानेसति तद्विषयभावनया तद्विपरीतवासनानिरासः तन्निरासेच तत्वज्ञानमिति मिथस्संश्रयस्स्यात्

पिप्रत्ययान्तरमनुवादस्साधुत्वार्थवेतिभावः । (एवमिति) एवंस्वपक्षेस्थिते परपक्षेदोषउच्यतइत्यर्थः । (नैरर्थक्यमिति) वाक्यश्रवणादेववाक्यार्थज्ञानसिद्धिरितिभावः । प्रत्यक्षार्थतयासार्थक मित्याशङ्क्याह (शब्देति) (नचेति) प्रतिबन्धकंइतीत्यनन्तर मितीतिशेषः, नचेत्येत दनेन संम्बध्यते। विपरीतवासना भेदभ्रमजन्यसंस्कारः । असंभावना अद्वैतंनोपपद्यत इतिबुद्धिः । विपरीतसंभावना- भेदउपपन्नइतिबुद्धिः । (कथमिति) उन्मीलनादीनामप्यध्यस्तत्वेन संस्कारजन्यत्वादित्यर्थः । (अनादीति) यदिविरोधिगोचरत्वादद्वैतज्ञानस्य भेदवासनानिवर्तकत्वं तदाएकेनापि

तदप्याहुः " उत्पन्नेसातिविज्ञाने वासनातुनिरस्यते । निरस्त वासनस्यैव विज्ञानमितिदुर्भणं ॥ " इति । अनुत्पन्नएव तत्वज्ञाने श्रवणमनननिदिध्यासनैः क्रमात्तन्निरासइतिचेत्, किन्तानितत्त्वगोचराणि उतातत्त्वगोचराणि, पूर्वत्र विपरीतवासनायां सत्यां तेषामप्यनुत्पत्तिरेव । उत्तरत्रातत्त्ववासनया कथं तत्त्वज्ञानोत्पत्तिप्रतिबन्धकवासनानिरासः । तथाच " सागरंगन्तुकामस्य हिमवद्गमनोपमं । " इतिन्यायः । किञ्च अभेदज्ञाने सिद्धे भेदवासनानिरासस्य किमर्थमपेक्षा । तदसिद्धौतु तत्प्रतिपक्षवासनानिरासाभिलाषानुत्थानं । नह्यभेदज्ञानप्रतीतिरभेदप्रतीतिमन्तरेणस्यात् । नच प्रतीतौतुवैशद्यावैशद्यादिवैषम्यं त्वया वक्तुंशक्यं, अभेदस्य ब्रह्मस्वरूपायमाणस्य सर्वदैकरूपत्वात्, विशेषग्रहेच भेदप्रतीतित्वप्रसंगात् । नच व्यावहारिकभेदोऽत्रास्तीति वाच्यम्, भेदवासनानिरासद्वारेणाभेदग्रहस्य परमार्थविषयत्वात् । अतो नभेदवासनानिरासद्वारेण श्रवणादित्रयस्य दर्शनोपकारकत्वमिति । यत्पुनरुक्तं " ब्रह्मवेदब्रह्मैवभवति " इत्यादौ ज्ञानमात्रस्यैव मोक्षहेतुत्वं श्रूयते नहि प्रतिपन्नेर्थे नास्तिकत्वं न्याय्यं । अतएवोच्यते " नैषाकरणमितिस्तर्केणापनेया " इतीति, तदप्यसत्, सामान्यशब्दानां विशेषे-

---

निवृत्तिःस्यात, यदि तावतामेकेनानिवृत्तिर्नसंभवति तदातावत्कालध्यानेनैव तन्निवृत्तिस्स्यादितिभावः । (अनुत्पन्नइति) ध्यातव्यादिज्ञानंध्यानाद्यहेतुरितिभावः । (कथमिति) प्रत्युत विपरीतवासनावर्धकत्वमितिभावः । (तदसिद्धाविति) अभेदएवतात्विकइति ज्ञानेसत्येव तद्विपरीतभेदभ्रमनिरासभिलाषोभवेत् नान्यथेति भावः (अभेदस्येति) अभेदस्य ब्रह्मस्वरूपतया तस्यच निर्विशेषत्वात् स्वरूपेणैव तत्सदा विषयीक्रियते नतु कदाचित्किंचिद्धर्मविशिष्टतया, अतोतिरिक्ताकारप्रकाशरूपवैशद्यं न संभवतीत्यर्थः । (विशेषेति) तथाच ब्रह्मणस्सविशेषत्वं स्यादित्यर्थः । (भेदेति) भेदवासनानिरासंसाध्यस्येत्यर्थः । (ज्ञानमात्रस्येति)मात्रशब्देन अज्ञानस्य ज्ञानविशेषस्यच निरासात् क्वचिन्मतेऽज्ञानत्वात्

पर्यवसानस्य पश्वधिकरणादिन्यायसिद्धत्वात् । न्यायानपेक्षत्वे किं शारीरकशास्त्रेणापि । ध्यानोपासनशब्दयोश्च ज्ञानविशेषविषयतया ज्ञानसामान्यविषयवेदनादिशब्दानां तस्मिन् विशेषशब्दार्थे एव पर्यवसानं युक्तं, विकल्पसमुच्चयफलान्तरार्थाद्यसंभवस्योक्तत्वात् ,तदुक्तम्— " अष्टदोषाविकल्पेस्यु गौरवंचव्यवस्थितौ । समुच्चयेऽनपेक्षास्या दंगांगित्वं नमीयते ॥ " इति । तथा विद्युपास्योर्व्यतिकरेणोपक्रमोपसंहार दर्शनाच्च तयोरैकार्थ्यं सिद्धम । " मनोब्रह्मेत्युपासीत " इति विहितमेवब्रह्मोपासनं " भातिचतपतिचकीर्त्या यशसाब्रह्मवर्चसेन यएवंवेद" इतिफलविधानार्थमनूद्यते । नह्यफलंविधायान्यत्सफलमनुवदितुं युक्तम्, एवं " यस्तद्वेदयत्सवेद " इति वेदनशब्दमात्रश्रावीजानश्रुतिः तदर्थं " यांदेवतामुपास्से " इत्युपासिनानुवदति । एवमन्यत्रापि । तथा "तमेवंविद्वानमृतइहभवति । नान्यःपन्थाअयनायविद्यते " " नाहंवेदैर्नतपसा " इत्यादिश्रुतिस्मृत्योर्वेदनभक्तिशब्दाभ्यां मोक्षोपायमभिधाय तदपरोपायनिषेधपरयोः परस्परार्थप्रतिक्षेपानुपपत्तेः वेदनशब्देनापि तैलधारावदविच्छिन्नभक्तिरूपज्ञानविशेषएव विवक्षितइति स्वीकर्तव्यम् । एवं ध्यानोपासनभक्तिशब्दसमानार्थतया वेदनादिशब्दानां विशेषविषयत्वे निश्चितेसति सामान्यमात्राश्रयणं न्यायानभिज्ञतानिबन्धनम् । तदुक्तं " पशोश्छागत्वनिर्णीतौ निपुणन्यायपूर्वकं । गर्दभादिपुतुल्यत्वं गर्दभप्रायकल्पितम् ॥ " इति । यत्पुनर्वाक्यतस्सिद्धस्यैवज्ञानस्य विधेयत्वं न संभवतीति तदस्माकमिष्टमेव, ततोन्यस्यैव विधानोपपादनात् । प्रत्यक्षविरुद्धश्चायमविधेयज्ञानाधीनमोक्षवादः, वाक्यार्थज्ञानमात्रेणाविद्यानिवृत्त्यदर्शनात्, आहुश्च " तत्वमस्यादिवाक्यस्य शतशश्श्रवणेपिहि । दृश्यतेत्वमहं पूर्वो विवादोब्रह्मवादिनां ॥ " इति । ननु येषां वाक्यार्थज्ञानं जातं तेषां तन्निवृत्तिरस्त्येव, येषान्तु-सानास्ति तेषां तदपि नजातमित्यविरोधइतिचेत् तन्न, तज्ज्ञानाभावे तत्प्रवचनाद्यसंभवात्, तदसंभवेच शिष्याणां श्रवणादेरप्यसिद्धिप्रसंगात् ।

एवमाचार्यस्यापि । अथवान्यार्थज्ञनेन निवृत्ताविद्याएवाविद्यावतां श्रावकाइतिचेन्न; तेषां श्रावकत्वादिव्यापारस्य तत्करणशरीरेन्द्रियादेस्तत्प्रयोजनस्यच ख्यातिलाभपूजापरानुग्रहादेस्तत्तत्प्रतिभासस्यचाविद्यामन्तरेणासंभवात् । अविद्यानिवृत्तावपि बाधितानुवृत्त्या भेदप्रतिभासात् प्रत्यक्षाद्यविरोधः प्रवचनाद्युपपत्तिश्चेतिचेत् तन्न; भवत्पक्षे बाधितानुवृत्त्यसंभवस्य वक्ष्यमाणत्वात् । तथाप्यविशदप्रतिपत्तिमात्रादविद्याविशेषवशादेव वा प्रवचनाद्युपपत्तिरितिचेन्न; विशदप्रतीतिपरामर्शरूपप्रत्यक्षसिद्धान्तयोर्विरोधात् । विशदाध्यक्षितसमस्ततत्वार्थाश्च वासुदेवादयोऽर्जुनादिभ्य उपदिशन्तीतिहि स्वीकृतंयुष्माभिः । नचाद्वैतसिद्धान्तश्रावका स्वात्मनां तदनभिज्ञतामनुमन्यन्ते । तथासत्यविवादश्च । किंच प्रतिवादिनः प्रबलाविद्याः कथं भवत्पक्षं प्रतिक्षिपंति । नतावदविदित्वैव, निराश्रयवादायोगात् । विदित्वाचेत् कथं तर्हि प्रतिवादिनाविदिते भवत्पक्षे भवतां ज्ञानानुत्पत्तिः । नहि स्वोक्तं परे जा

काचित् ज्ञानविशेषत्वात न निदिध्यासनसाध्यतेत्यर्थः । (एवमाचार्यस्येति) श्रवणासिद्धिप्रसंगइत्यर्थः । (भवत्पक्षइति) दोषस्यापिवया बाध्यतुल्यमिथ्यात्वांगीकारादित्यर्थः । (अविद्याविशेषेति) विशदज्ञानात्काचिदविद्यानिवृत्ता काचिन्नेति भावः । (विशदेति) गुरुमुखश्रवणेनार्थो मेविशदइति प्रत्यक्षविरोधइत्यर्थः । सिद्धान्तविरोधं विवृणोति (विशदाध्यक्षितेति) अविद्याविशेषाप्रवचनादिपक्षे दूषणमाह - (नचेति) त्वमेवाज्ञानापादनेन गुरुभ्यो द्रुह्यसि, तेतु स्वाज्ञानं नानुमन्यन्तइत्युपालंभः । अज्ञानानुमतौ दोषमाह (तथासतीति) अद्वैतस्याज्ञाने त्वया तदसाधवान्नावयोर्विवादस्स्यात् । नहि किंचिदज्ञानेपि कस्यचिदज्ञानस्य निवृत्त्याव्यवहारसंभवः - पूर्वदिनेऽज्ञाननिवृत्तौ उत्तरदिनेऽज्ञानान्तरसत्त्वेपि व्यवहारप्रसंगात्, एकतमोनिवृत्तौ तमोऽन्तरसत्त्वेऽपि व्यवहारप्रसंगाच्चेतिभावः । येषामविद्यानिवृत्तिर्नास्ति तेषांश्रवमपि नजातमित्यत्र परेषां प्रवचनाद्यसंभवउक्तः, इदानीं दोषान्तरमाह (किंचेति) (निराश्रयेति) निर्विषयविवादायोगादित्यर्थः ।

नन्ति वयन्तु नविद्मइति स्वस्थैरभिधेयं । यत्तदविद्यानिवर्तकं विशदमद्वैतज्ञानमुदेष्यति, यच्चेदानीं श्रवणादविशदमुत्पन्नं - तदुभयं भिन्नविषयमेकविषयंवा; भिन्नविषयत्वे तस्यान्यसिद्धान्तज्ञानवत्तदनुपकारकत्वम् । एकविषयत्वेप्यन्यूनानतिरिक्तविषयंवा प्रकारविशेषविशेषितविषयंवा; आद्ये पश्चात्तनस्याप्यनिवर्तकत्वं, इदानीन्तनस्यैववा निवर्तकत्वं स्यात्; अविशेषात् । द्वितीये ब्रह्मणस्सविशेषत्वंस्यात् । सविशेषमिदानीं गृहीतं पश्चात्तु निर्विशेषं प्रकाशिष्यतइति वैषम्यमितिचेत्; कथमिदं त्वयावगतम् । श्रुतेरितिचेत्; तर्हि श्रुतेरेव निर्विशेषज्ञानमिदानीमेव जातमिति कः पश्चात्तनस्य - विशेषः । ज्ञानमिदानीं जातं व्यवसायस्तु पश्चाद्भविष्यतीति विशेषइतिचेन्न; वेदप्रामाण्यनिश्चये तदानीमेव व्यवसायोदयात्, तदनिश्चयेतु पश्चादपि तदसिद्धेः । प्रमाणत्वाभ्युपगमेवा तदर्थविशेषेसन्देहइतिचेत्; तर्हि विशदप्रवचनप्रवीणेभ्य आचार्येभ्यो न्यायपूर्वं द्वित्रिश्शतशोवा श्रोतव्यं, नपुनश्श्रवणदशायामेव सन्दिहानेन भवता

(तस्येति) ध्यानादिद्वारा भाविविशदज्ञानानुपकारकत्वमित्यर्थः । (इदानीन्तनस्येति) निवृत्तस्य पुनर्निवृत्त्ययोगादित्येवकाराभिप्रायः । अविशेषात् - स्वरूपविषयत्वाविशेषादित्यर्थः । अविशदमपि स्वरूपाज्ञाननिवर्तकं दृष्टमिति भावः । (सविशेषत्वमिति) विशदज्ञानस्य तत्त्वज्ञानत्वादितिभावः । (कथमिति) निर्विशेषज्ञानंभविष्यतीति कथमवगतमित्यर्थः । (श्रुतेरिति) अद्वैतश्रुतेर्निर्विशेषबोधनसामर्थ्यपर्यालोचनेनेत्यर्थः । इदानीन्तनस्यापि तादृशश्रुतिजन्यज्ञानत्वादिति भावः । व्यवसायः - अप्रामाण्यशंकाशून्यं ज्ञानं । वेदप्रामण्यनिश्चयेपि तत्तात्पर्यसन्देहाद्व्यवसायाभावइत्याशंक्य तथापि श्रवणवेळायामेव शक्तितात्पर्यावधारणेन मननादिवैयर्थ्यमित्याह (प्रमाणत्वेति) न्यायत स्तात्पर्यनिर्णयेऽपि बाधकतर्काभासोत्थापित सन्देहनिराकरणाय ज्ञानान्तरं मननवदिति शंकते -

पश्चादनवरतध्यानेनापि ज्ञातुं शक्यं। मननवदाहार्यसन्देहनिराकरणाय पश्चात्तनंज्ञानमितिचेन्न; मननेनैव संभावितनिष्कंपत्वे पुनरन्यावकाशाभावात् ; अन्यथातिप्रसंगात् । अस्तुतर्हि पारोक्ष्यापारोक्ष्यलक्षणं वैषम्य मितिचेत् ; विषयातिरेकाभावेनैव प्रागुक्तेन तदसिद्धेः, सिद्धावपि बाध कत्वमबाधकत्वंच प्रत्यकिंचित्करत्वात । परोक्षेणापि शास्त्रानुमानजन्यज्ञानेनापरोक्षभ्रमबाधस्याभ्युपगमात्, प्रत्यक्षेणापि देहात्मभ्रमादिनाशास्त्रबाधानभ्युपगमाच्च । उत्पन्ना भ्रान्तिरनित्यत्वात्स्वयमेव निवर्तते, भ्रान्त्यनुवृत्तिनिवृत्तिस्तु कारणानुवृत्तिनिवृत्त्याभवति - तदनुवृत्तौतु बाध कस्य प्रत्यक्षत्वेपि भ्रान्त्यनुवृत्तिर्भवत्येव, चन्द्रैकत्वे प्रत्यक्षेपि अंगुल्य वष्टंभादिना भ्रान्त्यनुवृत्तिवत् । वाक्यजन्यज्ञानमपरोक्षमितिच सर्वलोकविरुद्धं, पृथक्चैतत्प्रपंचयिष्यामः । तदेतदखिलं मुखान्तरेण प्रपंचितं भाष्ये "नतावद्वाक्यार्थज्ञानं" इत्यादिनाविस्तरेण ।

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यामविधेयज्ञानवादभंगश्चतुर्थः ॥

(मननवदिति) (विषयेति) प्रमाणैक्येचेतिशेषः । एकस्यापि प्रमाणस्य विषयभेदेपरोक्षापरोक्षजनकत्वं दृष्टं, मनस आत्मप्रत्यक्ष वह्न्यादिस्मृतिजनकत्वदर्शनात्, विषयैक्येपि प्रमाणभेदात्तद्दृष्टं, यथैकत्रैव वह्नौ प्रत्यक्षानुमाना भ्यां, विषयप्रमाणैक्येतु नदृष्टमित्यर्थः । ननु सहकारिवैचित्र्या दात्मस्मृतिजनकत्वंदृष्टं, अतइहापि मननादिसहकारि वैचित्र्या दपरोक्षं संभवती त्यत्राह (सिद्धावपीति) किंच किंभ्रान्तिनिवृत्त्यर्थ मपरोक्षज्ञानं उततदनुवृत्तिनिवृत्त्यर्थं, आद्यआह (उत्पन्नेति) द्वितीयआह (भ्रान्तीति) ननु भ्रान्तिकारणभूताज्ञाननिवृत्त्यर्थ मितिचेन्न, परोक्षज्ञानादपि तत्संभवस्योपपादयिष्यमाणत्वात् ॥

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावर तत्त्वयाथात्म्येन तदेकदेवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध महाचार्यापरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्यायां चण्डमारुताख्यायामविधेयज्ञानवादभंगश्चतुर्थःस्कन्धः ॥

श्रीमते रामानुजाय नमः ॥

श्रीमते निगमान्तमहादेशिकाय नमः ।

अथ पञ्चमस्कन्धः ॥

नानुवर्तेत संसारो यत्प्रसादैकबाधितः ।
प्रसीदतु स मे देवः प्रथमाञ्जलिकिङ्करः ॥

यदुच्यते, तत्त्वमस्यादिवाक्यात् तत्त्वज्ञाने जातेऽपि ब्रह्मविदां बाधितानुवृत्त्या भेदप्रतिभासादेराशरीर मनुवृत्तिः, तदनुवृत्तावपि छिन्नमूलतया दग्धपटादिवदबन्धकत्वञ्चेति । तत्र पृच्छामः, बाधितत्वे कथ मनुवृत्तिर्भवतावक्तव्या, तस्यां च तत्कथम् ।

हृदि विनिहिते दैवाद्यत्पादपङ्कजयोर्युगे
भवति विविधश्रेयः पारम्परी निरवग्रहा ।
दुरितनिवहैर्दुर्निर्दिष्टं भवश्वसत्साध्वसैः
मनसि करवै वेदान्तार्यं तमन्यकथोज्झितः ॥

नैवक्षमाणि दुरितानि सकृद्यदीक्षाक्रोडीकृतं कमपि तत्क्षणविंद्रुतानि । भूयस्समीक्षितुमशेषविधःपुमर्थं स्वश्रीनिवासगुरुरस्तिकृतं-परैर्नः ॥

(बाधितानुवृत्त्येति) इत्थंभावे तृतीया । तत्त्वज्ञानेन बाधितस्यापि भेदप्रतिभासस्य बाधितानुवृत्तिरूपैवानुवृत्तिः, नतु प्राग्वदनुवृत्तिरित्यर्थः । भेदप्रतिभासानुवृत्तौ तत्कार्यबन्धोऽपि स्यादित्यत्राह (तदनुवृत्तावपीति) भेदप्रतिभासानुवृत्तावपि अविद्याया निवृत्तत्वात् तस्यादग्धपटवन्न कार्यकरत्वमित्यर्थः । ननु – कथं बाधानुवृत्त्योर्विरोधः, भेदमिथ्यात्वबुद्धिरूपबाधस्य भेदप्रतिभासानुवृत्तेश्चाविरोधात्, दृश्यते हि एक एव चन्द्रः नद्वाविति चन्द्रभेदमिथ्यात्वज्ञाने सत्यपि तिमिरादिवशात्तत्प्रतिभासानुवृत्तिरिति छिन्नमूलत्वोक्तिविरोधमप्यजानानस्य शंकामनुवदति

प्रमाणबलान्मिथ्यात्वाध्यवसायेऽपि द्विचन्द्रादिष्विव दोषमहिम्ना प्रतिभासानुवृत्तिरिति नविरोधइतिचेत्, समस्तद्वैतकुक्षिम्भरिणाप्यद्वैतज्ञानेनाबाधितः कोऽसौदोषः । अविद्यैवेतिचेत्, कथं तर्ह्यविद्यानिवृत्तिः, नहि तन्निवृत्तावपर्यवसितः कश्चिद्बाधोनाम । तन्निवृत्तावपि तन्मूलवासनास्तीतिचेत्; साकिंब्रह्मवत्सत्यत्वात्तत्त्वज्ञानेनाबाधिता, उत मिथ्यात्वेपितदविषयत्वात् । नप्रथमः— द्वैतापसिद्धान्तादिदोषप्रसंगात् । नच साब्रह्मस्वरूपानुप्रवेशिनी, भेदप्रतिभासानुवृत्तेरनिर्मोक्षप्रसंगात्, ब्रह्मणस्सावयवत्वादिदोषप्रसंगाच्च । नचासत्याविद्योपात्तावासना सत्येति सम्पद्यते । नचोपादानध्वंसे कार्यानुवृत्तिमुन्मत्तो ध्यनुसन्धत्ते । नापिद्वितीयः, वासनाया अपि श्रवणसमयसमधिगतब्रह्मव्यतिरेकलक्षणैकोपाधिक्रोडीकारात, अन्यथात्वविद्याया अपि बाधकज्ञानाविषयत्वप्रसंगात् । "नेह नानास्ति" इत्यादेरविशेषात्तद्विषयत्वमितिचेत्; तुल्यम् । यदिचवाक्यार्थज्ञानाद्वासनाननिवर्तते, कुतस्तर्हितन्निवृत्तिः । नतावददृष्टादेः, तथासति ज्ञानबाध्यत्वाभावेन सत्यत्वप्रसंगात् । अत

(प्रमाणबलादिति) अबाधितः - अनिवृत्तः । माभूदविद्यानिवृत्तिः, नचतथासति बाधितानुवृत्त्यसिद्धिः, मिथ्यात्वबुद्धिरेव बाधइत्यभिधानादित्यत्राह (नहीति) मिथ्यात्वबुद्धे र्बाधरूपता ह्यविद्यानिवर्तकत्वादेवेति वाच्यं, अन्यथा छिन्नमूलत्वोक्तिविरोधात् । त्वत्प्रकरणपाठकानां डिंभानामपि बाधितानुवृत्तिप्रसंगात्, जीवन्मुक्तानामेवहि सेष्यते, अतोऽविद्या, निवृत्तिपर्यवसितएव बाधइत्यर्थः । (सेति) तत्त्वज्ञानं - ब्रह्मव्यतिरिक्तकृत्स्नमिथ्यात्वज्ञानम् । (द्वैतेति) आदिपदेन तन्मूलभेदप्रतिभासस्य सत्यत्वं गृह्यते । ब्रह्मस्वरूपानुप्रवेशा न्नोक्तदोष इत्यत्राह (नचेति) (ब्रह्मण इति) आदिपदेन विनाशित्वं गृह्यते । (नचोपादानेति) वासनापि भाव कार्यतया अविद्योपादानेतिभावः । एतेन 'संस्कारः कार्योपि ध्वंसइवनिरुपादानः' इति निरस्तं । किंच - परमते ध्वंसोपि भावरूपाज्ञानोपादानक एव । यद्वा - अत्र कार्यपदेनानुवर्तमानशरीरादिकं विवक्षितम् । ननु ध्वं

एवनस्वत:, व्याघाताच्च । नहि वध्यघातकयोस्तादात्म्यन्दृष्टम् । नच सहकार्यन्तरमन्तरेण घटादिष्वपि स्वप्रध्वंसहेतुता । अहेतुकविनाशवादेतुसौगतचार्वाकादिसौहार्दोद्गारप्रसंग: । अविद्यायाश्चतद्वदेवाहेतुकनिवृत्त्यविरोधस्स्यात् । नचदहनान्त्यशब्दचरमसंस्कारादिवदिति वाच्यम्, तत्रापि तत्तदवस्थान्तरकालविशेषादिसामग्रीसाहितपरमेश्वरसंकल्परूपस्य कारणस्यास्माभिरभ्युपगमात् । द्विचन्द्रादौतु अंगुल्यवष्टंभतिमिरादिदोषस्य चन्द्रैकत्वज्ञानाविषयत्वात् तदुभयविषयैकज्ञा

समावस्य प्रतियोगिजन्यत्वा न्नव्याघातइत्यत्राह (नच सहकार्यन्तरमिति) आगन्तुकहेत्वन्तरमनपेक्ष्य स्वप्रध्वंसहेतुत्वस्य एकक्षणाधिककालवृत्तित्वस्यच व्याघात:। (अहेतुकेति) कार्यस्याहेतुकत्वांगीकारेचार्वाकमतप्रवेश:, विनाशस्याहेतुकत्वांगीकारे क्षणिकत्वप्रसंगेन सौगतमतप्रवेशइत्यर्थ: । (अविद्यायाश्चेति) ततश्च श्रवणाद्यायासवैयर्थ्यमिति भाव: । ननु क्वचि दहेतुकनिवृत्तिमात्रा न्न सर्वत्र तथाप्रसंग:, त्वयापि क्वचि दहेतुकनिवृत्तेरंगीकार्यत्वात. यथा दहनेन दाह्यनाशेसति दहननाश: स्वतएव दृश्यते, तथैव अन्त्यशब्दस्य मरणसमयानुभवजन्यसंस्कारस्यच स्वतएव नाशइत्यत्राह (नचेति) संस्कारादिवदित्यनन्तरं अहेतुकनिवृत्तिरिति शेष: । (तत्रापीति) दहननाशो दहनस्य सूक्ष्मावस्थान्तरापत्ति:, तद्धेतुश्च दाह्यभस्मीभावावस्था, अन्त्यशब्दनाशश्च तदातनो गगने यत्किञ्चिद्द्रव्यसंयोगादि:, तद्धेतुश्च प्रसिद्धएव-संस्कारनाशावस्था नरकानुभवादि:, अतिरिक्ताभावपक्षे प्येतएवागन्तुकहेतव:, उपान्त्यशब्दस्तन्नाशोवाऽन्त्यशब्दनाशक: । ईश्वरसंकल्पोप्यागन्तुककारणमित्याह (ईश्वरेति) अतस्स्वतोनिवृत्तेरसंभवा द्वाक्यजन्यमिथ्यात्वज्ञानादेवाविद्यावासनानिवृत्ति:, ततश्च नभेदप्रतिभासानुवृत्तिसंभव इतिस्थितम् । यद्येवं मिथ्यात्वज्ञानेसति भेदप्रतिभासासंभव:, कथंतर्हि तस्मिन्सत्यपि चन्द्रभेदप्रतिभासइत्याशंक्य वैषम्यमाह (द्विचन्द्रादाविति) द्विचन्द्रादौतु दोषस्याबाधइति तन्मूलभ्रमपरम्परानुवृत्तिर्घटतइत्यन्वय: । चन्द्रैकत्वं-चन्द्राभेद: । (तदुभयेति) यथा ताराप्रकाशांशस्य

नोदयेपि प्रार्श्वस्थतारकाप्रकाशस्येव दोषप्रकाशांशस्य चन्द्रैकत्वप्रकाशेनविरोधाभावात् , दोषोमिथ्येतितुज्ञानस्य लौकिकाना मनुदयात् , यौक्तिकमिथ्यात्वज्ञानस्यैव भ्रान्तित्वेन तत्सत्यत्वाच्चाबाधइति तन्मूलभ्रम परम्परानुवृत्तिर्घटते, तद्विषयान्यथात्वाध्यवसायेन भयविस्मयादिकार्यनिवृत्तिश्च । तवतु नतथा, कारणभूताविद्यावत्कार्यभूतशोकादिवच्च, मध्यगतभेदवासनाभेदज्ञानयोरप्येकहेलयैवनिवार्यत्वात् , अनुवृत्तावपि बाध्यबाधकयोराविद्यत्वेन वास्तवप्रामाण्याभावात् विशेषेणबाधकबलासंभवाच्चेति । तदेतत्सर्वमभिप्रेत्य " सत्यपिवाक्यार्थज्ञाने " इत्यादि " भयादिकार्यंतुनिवर्तते " इत्यन्तंभाषितम् ॥

इति श्री कवितार्किकसिंहस्य सर्वतंत्रस्वतंत्रस्य श्रीमद्वेंकटनाथस्य वेदांताचार्यस्यकृतिषु शतदूषण्यांबाधितानुवृत्तिभङ्गवादः पञ्चमः ॥

चन्द्रैकत्वप्रकाशविरोधिविषयत्वाभावः, तथा दोषप्रकाशांशस्यापि चन्द्रैकत्वप्रकाशविरोधिविषयत्वाभावादित्यर्थः । बाधकज्ञानेनिषेध्यत्वेन-विषयस्यैव बाध्यत्वादिति भावः । कस्यचिद्दोषमिथ्यात्वज्ञानेऽपि चन्द्रभेदप्रतिभासोदृश्यतइत्यत्राह (दोषोमिथ्येति) (यौक्तिकेति) स्वकुमतिकल्पित दुर्न्यायमूल दोषमिथ्यात्वज्ञानस्य मिथ्यात्वसाधकाभासादेव भ्रान्तितया दोषाणां सत्यतया न बाधइत्यर्थः । वस्तुतस्तत्पक्षेपि दोषस्य यौक्तिकज्ञाना दनपायएवेति तन्मूलभ्रमोघटतएव, विरोधितत्वविषयत्वेन निवर्तकत्वे अविद्यावदिदानीमेव वासनायाअपि निवृत्तिप्रसंगात् , बाध्यबाधकज्ञानयोर्मिथ्यात्वाविशेषेण वास्तवप्रामाण्यतदभावाभ्यामपि विशेषाभावात् , बाधकज्ञानस्य बाध्यप्रतिभासापेक्षया विशेषेणबलाभावाच्च पश्चादप्यनिवृत्तिप्रसंगात् एकहेलयैवनिवार्यत्वं वाच्यमित्याह(कारणभूतेति)

इति श्रीवाधूलकुलतिलक श्रीनिवासाचार्य पादसेवासमधिगत परावरतत्त्वयाथात्म्येन तदेकदेवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध महाचार्यापरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्यायां चण्डमारुताख्यायां बाधितानुवृत्तिभङ्गः पञ्चमस्कन्धः ॥

श्रीमतेरामानुजायनमः ।

श्रीमतेनिगमान्त महादेशिकायनमः ।

अथ षष्ठस्कन्धः ।

दृष्टानुश्रविकार्थजातविमुखान् पुंसोऽधिकृत्यश्रुतौ-
यज्ञादिर्यदुपास्तिसाधनतया साक्षाद्विधिंप्राप्नुते ।
लीलाभोगविभूतियुग्म भरितस्वात्मप्रदानोन्मुखः-
श्रीमानस्तुसमे समस्तदुरितोत्ताराय नारायणः ॥

यदुच्यते, " तमेतंवेदानुवचनेन ब्राह्मणाविविदिषन्ति यज्ञेन दानेनतपसानाशकेन" इत्यत्रयज्ञादिकंविविदिषासाधनत्वेन विधीयते, नतु वेदनसाधनत्वेन, वस्तुविरोधात् श्रुत्यक्षरपर्यालोचनाच, विविदिषन्तीति हिश्रूयते नपुनर्विदन्तीति । तत्रब्रूमः; कोऽसौवस्तुविरोधस्तावत् ; किं ज्ञानस्य यज्ञादिभिस्साधयितुमशक्यत्वं, उततेषांज्ञानांगभूतशमादिप्रत्यनीकात्मत्वं । यद्वा तत्वज्ञानफलापवर्गप्रत्यनीक त्रिवर्गसाधकत्वं, यद्वा आश्रमांगतयाविहितानां विद्यांगत्वे नित्यानित्यसंयोगविरोधः, अन्योवा कश्चिदिति । नप्रथमः, सहियज्ञादिकमन्तरेणउत्पत्तिदर्शनाद्वा यज्ञादिसन्निधावव्यनुत्पत्तिदर्शनाद्वा, आद्येत्वसिद्धिः प्राचीनेष्वर्वाचीनेषुवा धिकारिष्वननुष्ठितशुद्धधर्मेषुविद्योत्पत्तेरसिद्धत्वात् ।

अद्वैतिजालकलिलेन मुदीर्णदर्पमीषज्जलंकरमनाहतमर्मगाथैः।
संवर्मितेन निगमांतगुरोः प्रबन्धैः तेब्रह्मतत्त्वमिहनः प्रतिबोधयन्तु ॥
सकलजनहितेच्छु श्रीनिवासार्यवर्यो-
हृदि निहितहितार्थं श्चेत्नयीमातुरेषः ।
कुमतिविहतवाचो नह्युपादेक्ष्यदस्या-
श्चिरतरमतिकष्टा तह्यवस्थान्ववरूयत ॥

(दृष्टेति) इहामुत्रार्थफलभोगविरक्तान् । साक्षाद्यदुपास्तिसाधनतयेत्यन्वयः । (विविदिषन्तीतिहीति) सन्नन्तप्रकृतिधात्वर्थेन नान्वयः उपसर्जनत्वात् । (आश्रमांगतयेति) आश्रमप्रयोज्यतयेत्यर्थः । अनेन नित्यत्वंविवक्षितं । शुद्धधर्मकारणान्तराभावाद्विवक्षचित्स्वस्यैवानिवृत्तेः

द्वितीयेत्वप्रयोजकता, सामग्र्यैवाहिकार्योत्पत्तिः नपुनर्हेतुमात्रात् ; संभवतिच प्रायशः कर्मकर्तृसाधनवैगुण्यं, अन्यथा चित्रापशुफलत्वादावपिकस्तेसमाश्वासः । तस्यास्तत्साधनत्वं विदधातिश्रुतिरितिचेत् , अत्रापियदिश्रुतिर्विदधाति तदा तद्वदेव समाश्वसिहि । अन्यथाविविदिषासाधनत्वेपि त्वयानसमाश्वासितव्यं; तत्रापि साध्यसाधनभावस्य श्रुत्यैकावसेयत्वात् । " कुर्वद्वायमकुर्वद्वे " त्यादिचार्वाकदुर्वादस्य त्वयाप्यस्मर्तव्यत्वात् , व्यभिचारस्यचसमत्वात् । एतेन - वाक्यजन्यप्रमितिरूपस्य संस्कारजन्यस्मृतिसन्ततिरूपस्यवा वेदनस्य किंकर्मापेक्षयेतिनिरस्तं; इच्छाया अप्यनुकूलता बोधाधीनोत्पत्तेः किंकर्मापेक्षयेति समत्वात् । अन्तःकरणनैर्मल्यद्वारेणेतिचेत् तुल्यं; " यत्रोभयोस्समोदोष " इत्यभियुक्तवचनं किमर्थमित्थं विस्मरसि । " कषाये कर्मभिःपक्वे ततोज्ञानं प्रवर्तते " इत्यादिवाचनिकार्थातिलंघनं तत्राधिकम् । नापि द्वितीयः; शमादेरविहिताप्रतिषिद्धनिषिद्ध विषयत्वेन विद्यांगतया

कार्याभाव इत्याह (संभवतीति) (चित्रापशुफलत्वादाविति) चित्रायाः पशुफलत्वादौ । (तस्याइति) तथाच श्रुतिबलात्साधनत्वे सिद्धे कारणान्तराभावात्कर्मादिवैगुण्याद्वा कार्याभावइत्युन्नीयत इति भावः । (अत्रापीति) तथाच श्रुत्यक्षरपर्यालोचनैव कार्या नोक्तार्थ-विरोधइत्यर्थः । अन्यथा - श्रुत्यासमाश्वासाभावे । चार्वाकमतप्रवेशेन यत्रकुत्रचिद्यस्य कस्यापि कारणत्वमंगीकुर्वता कर्मणां वेदनसाधनत्वं न निराकर्तुं शक्यमित्यभिप्रायेणाह (कुर्वद्वेति) विस्मरणशीलस्य व्य-भिचारनिमित्ताशंका मुक्तार्थस्मारणेन परिहरति (व्यभिचारस्येति) एतेन - वक्ष्यमाणेन (किं कर्मापेक्षयेति) अन्यथा घटमानयेति वाक्यार्थज्ञानाय घटादिस्मरणायच यागाद्यनुष्ठानप्रसंगादितिभावः । (इच्छायाइति) यदीच्छामात्रे तदपेक्षाभावेपि प्रमाणबलादिह तदपेक्षा तदा प्रकृतेपि तुल्यमिति भावः । अविशेषे कथं विविदिषासाधनत्वप्रति-क्षेपइत्यत्राह (कषायइति) (अविहितेति) अविहितश्च तदप्रतिषिद्ध

विहितेभ्यः कर्मभ्यो व्यतिरिक्तविषयत्वात् । विहितस्यच " धर्मेणपापमपनुदति ", " कषायःक्तिः कर्माणि ज्ञानंतुपरमागतिः " इत्यादिभिर्विद्योपकारकत्वस्यैव श्रुतत्वात् । नचतृतीयः, फलाभिसंधिविरहादेवत्रिवर्गानारंभात्, अनेकफलसाधनस्यापि ज्योतिष्टोमादे रभिसंधिविशेषेण फलंप्रतिनियमस्य सर्वैरभ्युपगन्तव्यत्वात् । अतएवनचतुर्थः, तत्रापि विनियोगपृथक्त्वेन नित्यानित्यसंयोग विरोधाभावात् । तदेतत्सर्वं सूत्रकारै रेव विस्पष्टमुक्तम् - " सर्वापेक्षाचयज्ञादिश्रुतेरश्ववत् " " शमदमाद्युपेतस्स्यात्तथापितुतद्विधे स्तदंगतया तेषामप्यवश्यानुष्टेयत्वात् " " विहितत्वाच्चाश्रमकर्मापि " " सहकारित्वेनच " " अग्निहोत्रादितुतत्कार्यायैवतद्दर्शनात् " इत्यादिभिः । याचते श्रुत्यक्षरपर्यालोचना सोऽपिहस्तसमालोचः; " सोऽन्वेष्टव्यः, सविजिज्ञासितव्यः " " तद्विजिज्ञासितव्यम् " " श्रोतव्योमन्तव्यो निदिध्यासितव्यः " इत्यादिश्रुतिशीलापरामर्शात् , नहि तेष्नुसन्प्रत्यार्थविधिपरत्वं भवतीपि स्वीकृतम् ।

श्वेत्यर्थः । शमादेस्तावन्मात्रविषयत्वे नियामकमाह (विहितस्यचेति) ननु फलाभिसन्धिविरहेपि तद्योग्यस्य कथं तदनारंभकत्वं, नहि दाहार्थं स्पृष्टएव वह्निर्दहतीतिनियमोस्तीत्याह (अनेकेति) श्रुत्येकसमधिगम्येऽर्थे तत्तत्कामाधिकारबलाद्यथाश्रुतिः तथांगीकारइतिभावः । (अतएवेति) फलाभिसन्धितदभावाभ्यामेवेत्यर्थः । तदेव विवृणोति (तत्रापीति) (हस्तसमालोचइति) हस्तस्येव समालोचनमित्यर्थः । एकहस्तावदेवहीतरहस्तोऽपि । अयश्च घञन्तत्वान्नियतपुंल्लिगः (सोऽन्वेष्टव्यइति) आदिशब्देन " तद्विजिज्ञासस्व " इत्यादेस्संग्रहः । प्रकृत्यर्थस्यैव वाक्यार्थान्वयेपीच्छानुवादः श्रुतेश्शीलं, तथाचोपसर्जनेनापिप्रकृत्यर्थेन विध्यन्वयवत्कारणान्वयो युज्यतेहीतिभावः । (तेष्विति) " विजिज्ञासितव्यः " " विजिज्ञासितव्यं " " निदिध्यासितव्यः " इत्या

विधिबलाववसितपुरुषार्थसाधनत्वार्थसिद्धेच्छानुवाद रूपत्वात्प्रत्ययस्य , ध्यायीतेत्यादिविध्यन्तरैकार्थ्यात् । तत्र शाब्दं प्रत्ययार्थप्राधान्य मनादृत्येच्छाया इष्यमाणप्रधानत्वादार्थं प्रकृत्यर्थप्राधान्यं स्वीक्रियतइति चेत्; तर्हि " क्रियावानेषब्रह्मविदां वरिष्ठः, "कर्मणैवहि संसिद्धि" कषायेकर्मभिः पक्वे ततो ज्ञानं प्रवर्तते " इत्यादिप्रमाणसहस्रैकार्थ्या दत्रापि वेदनपरत्वमंगीकुरुष्व । लोकेत्र असिना जिघांसति अश्वेन जिगमिषति इत्यादिषु प्रकृत्यर्थे करणान्वयो बहुलमुपलभ्यते । अत्रासेरश्वस्यवा हननगमनेच्छासाधनत्वायोगात् हननादिसाधनत्वस्यान्वयव्यतिरेकसिद्धत्वाच्च अगत्याप्रकृत्यर्थसाधनत्वाश्रयणं , इहतु नतथा, अन्तःकरणनैर्मल्यद्वारेण सत्वविवृद्ध्योपकारकत्वस्य ज्ञानतदिच्छयोरविशेषादिति चेन्न; अनन्यपरत्वस्योपपादितत्वात , अयोगस्यचात्राप्यविशेषात् । तथाहि - योयं विविदिषाकामो यज्ञादिष्वधिकरोति सकिं तदानीं वेदनमिच्छति उतन; आद्ये विविदिषासिद्धैवेति न तस्या यज्ञादिसाध्यत्वं, तथाच चक्रकम् ;वेदनेच्छायां जातायामेव विविदिषेच्छा जायते , तस्यां जातायां कर्मानुष्ठानम्, ततो विविदिषेति । अत्रैकैकोभयपर्वसंको चेनात्माश्रयान्योन्याश्रयावप्यन्तर्भा

दिष्वित्यर्थः। अत्र वाक्येष्विति विशेष्यमध्याहार्यम्। शंकते (विधिबलेति) अनुवादरूपत्वे हेतुः (ध्यायीतेत्यादीति) (शाब्दं प्रत्ययार्थ प्राधान्यमनादृत्येति) अत्र हेतुरनुवादरूपत्वम् । (स्वीक्रियतइति) प्रकृत्यर्थे नैव विध्यन्वयहेतुतयाद्रियतइत्यर्थः । उपसर्जनेन प्रकृत्यर्थेन करणान्वयोपि लोके दृष्टइत्याह (लोकेत्रेति) शंकते (अत्रासेरिति) (अनन्यपरत्वस्येति) " क्रियावानेषब्रह्मविदां वरिष्ठः " इत्यादिवेदनसाधनत्वप्रतिपादक श्रुतिबलादिति भावः । (अयोगस्येति) इच्छान्वयायोगस्येत्यर्थः । (तथेति) तथात्वे - यज्ञादिसाध्यत्वइत्यर्थः । (वेदनेच्छायामिति) विविदिषायाः स्वतः प्रयोजनत्वाभावेन

व्यौ । द्वितीयेपि वेदनस्यानिष्टत्वे विविदिषाप्यनिष्टैव स्यात्, तद्वि षयत्वात्तस्याः; विविदिषाहि वेदनं साधयेत्; तच्चापवर्गादिकमिति म त्वैवहि तस्यामभिलाषसंभवः । ननु वेदनौन्मुख्यलक्षणविविदिषा पूर्वं संवृत्ता । तदर्थप्रवृत्तिपर्यन्तातु साध्यतयाभिमतेतिचेन्न; तादृशतीव्रे-च्छायाएव उत्पत्त्यनुत्पत्तिविकल्पे प्रागुक्तदोषानतिलंघनात् । नहि वेद ने तीव्रेच्छायामसंभवन्त्यां तादृशीमपितामिच्छेत्, तदुपायवर्गानुष्ठान क्लेशं वा सहेत । ननु दृष्टमेतत् यद्बुभुक्षापिपासादिकामनया-भेषजमुपदिश्यते; तत्रापि भोजनादेरिष्टत्वानिष्टत्वविकल्पेन प्रागुक्तप्र सङ्गोदुर्वारः । तत्र यः परिहारस्ते सनोऽपि भविष्यतीतिचेत् तन्न; भोजनादेस्सामान्यतोऽनुकूलत्वज्ञानादेवेष्टत्वसिद्धेः । तथापि दोषवशात्तदा तनमनारोग्यात्मकं प्रातिकूल्यमपनेतव्यमिति तावन्मात्रार्थं भेषजोप देशः, न पुनरिच्छास्वरूपनिष्पत्तये । अत्रापि तर्हि तथास्तु; सामा न्यतो वेदनस्येष्टत्वेऽपि तादात्विकतत्प्रातिकूल्यापादकरजस्तमोनिबर्ह-णेन अन्तःकरणशुद्ध्यर्थं कर्मणां विनियोगइतिचेत्;

वेदनार्थमेवोद्देश्यत्वादिति भावः । (तद्विषयत्वादिति) तस्याः- वि विदिषायाः । ननु वेदनेच्छाभावे कथं विविदिषेच्छाया असंभवइत्या कांक्षायां तद्विषयेच्छायास्स्वयं प्रयोजनत्वाभावेन तत्साधनत्वेनैवोद्दे-श्यत्वादित्याह (विविदिषाहीति) अपवर्गः - अविद्यानिवृत्तिः । आ-दिशब्देनानवच्छिन्न ब्रह्मानन्दानुभव उच्यते । (तदर्थेति) वेदनार्थश्र वणाद्यनुष्ठानपर्यन्तेत्यर्थः । (प्रागुक्तेति) तीव्रविविदिषाहेतुभूत यज्ञां द्यधिकारिणः तीव्रवेदनेच्छाभावे वेदनौन्मुख्यमात्राद्वेदनसाधनश्रवणादा विव ततोपि व्यवहितायां श्रवणादिहेतुतीव्रविविदिषायामिच्छानस्या त्, तीव्रविविदिषांगीकारेतु यज्ञाद्यसाध्यत्वचक्रकयोः प्रसंगइत्यर्थः । (तथापीति) प्रातिकूल्यशब्दः प्रतिकूलपरः भोजनप्रतिकूलमित्यर्थः । प्रा तिकूल्यहेतुपरोवा भोजनस्य प्रातिकूल्यहेतुरित्यर्थः । (तत्प्रातिकूल्येति) वे दनेच्छायांसत्यामपि रजस्तमोभिभूतत्वात्तत्साधनश्रवणादौ दुःखसाध्यगुरु शुश्रूषादिसाध्ये प्रातिकूल्यबुद्धिर्भवतीति रजस्तमोनिबर्हणार्थकर्मेत्यर्थः ।

तर्हि विविदिषासाधनत्वश्रुतिः परित्यक्तैव । अवान्तरव्यापारत्वा दविरोध इतिचेत्; तर्हि वेदनसाधनत्व मप्यनुमन्यतां, तत्पूर्वभाविन स्सर्वस्यापि यज्ञादिकर्मावान्तरव्यापारत्वोपपत्तेः । एवञ्चसति " क्रियावानेषब्रह्मविदांवरिष्ठः " " कषायेकर्मभिः पक्वे ततोज्ञानं प्रवर्तते " पुण्यंप्रज्ञांवर्धयति क्रियमाणं पुनः पुनः " इत्यादिभिरैकार्थ्यंच । अतो यज्ञादिकर्म वेदनसाधनमेव । ननु विविदिषासाधनत्वेयच्चोद्यं यज्ञादेः तद्भक्तिसाधनत्वेऽपि समानं । तथाहि; किंभगवतिभक्तिमान्भक्तिंकामयते उत तद्विधुरः ? नप्रथमः; भक्तेर्निष्पन्नत्वेन साध्यत्वायोगात् । नद्वितीयः; भगवद्भक्तिविधुरस्य तद्भक्तावपि नैरपेक्ष्यात , भक्त्यवस्थाभेदान्निर्वाहेऽपि प्राग्वदेवदोषइति तन्न; प्रीतिरूपज्ञानविशेषोऽहि भक्तिः, प्रीतिश्च तारतम्यवती विषयस्वभाव विशेषाभिमानाभ्यासभेषजादिभिः प्रेमवृद्धिः कामशास्त्रादिष्वपिसम्मता, पुरुषस्यतत्कामना संभवति नवेत्येतावदेव चिन्तनीयं ।

(तर्हीति) विविदिषायाः पूर्वसिद्धत्वा द्रजस्तमोनिबर्हणार्थमेव कर्मानुष्ठानमिति विविदिषार्थतया यागादिकं श्रुतिप्रतिपाद्यं नस्यादित्यर्थः । गुरुशुश्रूषादिदुःखसाध्येऽपिश्रवणादौ प्रातिकूल्यबुद्धिविरोधिनीच्छा रजस्तमो निबर्हणमन्तरेणनभवतीति यज्ञादिभिस्तादृशेच्छायांजननीयायां रजस्तमोनिबर्हणस्यावान्तरव्यापारात् यज्ञादेर्विविदिषार्थतया श्रुतिप्रतिपाद्यत्वमविरुद्धमितिशङ्कते । (अवान्तरेति) यद्यप्येवं सतिपूर्वोक्तान्योन्याश्रयःस्थिरएव। तथापि दूषणान्तरमाह (तर्हिवेदनेति) एवं व्यापारस्याव्यवधायकत्वेन विविदिषाकारणत्वाङ्गीकारे रजस्तमोनिबर्हणं प्रातिकूल्यनिवृत्तिंविविदिषां श्रवणादिकंचद्वारमङ्गीकृत्य वेदनसाधनत्वमङ्गीकर्तुं शक्यमेव, बाधकाभावात् , एवञ्च श्रुत्यन्तरानुसाराद्वेदनसाधनपरत्वमेवास्यवाक्यस्याङ्गीक्रियतामितिभावः । (तद्भक्तावपीति) तस्मिन्निवेतिभावः । भक्तिविधुरस्यापि भक्तेर्मोक्षसाधनत्वंज्ञातवतोभक्तीच्छा सम्भवत्येव - तथापि प्रथमकोटिमभ्युपेत्याह (तन्नप्रीतिरूपेति) (भेषजादिभिरिति) आदिशब्देनमणिमन्त्रादिग्रहः । (कामशास्त्रादिष्विति)

तत्र यदिसंजातमात्रादतिशयितस्य प्रेम्णः फलान्तरं प्रमाणतस्सिद्ध्येत् तदा तथाविधं तस्यातिशयमभिवाञ्छेदेव। नच तावता तथाविधस्यातिशयस्यापि निष्पन्नत्वप्रसंगः; ज्ञानवदुपपत्तेः, सामान्यतोऽवगतेहि विशेषतो ज्ञानायव्याप्रियते, अन्यथा जिज्ञासैव सर्वत्रनस्यात। नन्वेवं विविदिषायामप्येवमस्त्वितिचेन्न; विशेषेच्छायाएव प्रागेवोदयात्, नहिपूर्वं सामान्यतो ज्ञानमिच्छति पश्चाद्विशेषतइति संभवति। नच विषयविशेषावच्छेदमन्तरेण इच्छाजाति

आदिशब्देन "रोचनालक्ष्मणामूल कल्कलिप्ततनूर्वधूः। ऋतौप्राप्नोतिसौभाग्यं दयितप्रियतामपि" ॥ इत्याद्युक्तायुर्वेदसंग्रहः। (सञ्जातमात्रादिति) प्रेम्णइतिविशेष्याध्याहारः। (ज्ञानवदिति) विशेषतोज्ञानेच्छायांसत्यामपि विशेषतोज्ञानाभावादित्यर्थः। व्याप्रियत इत्यनन्तरं ननुविशेषतोज्ञातइत्याध्यहारः। (अन्यथेति) विशेषतोज्ञातेचेदित्यर्थः। सिद्धइच्छाविरहादितिभावः। (विविदिषायामप्येवमिति) यथाजिज्ञासाकारणतयापूर्वज्ञानसत्त्वेपि ज्ञानान्तरविषयिणीजिज्ञासा तथावेदनेच्छायाविविदिषेच्छाकारणतयापूर्वसत्त्वेपि विविदिषान्तरविषयिणीच्छास्त्वित्यर्थः। कारणीभूताया अपिवेदनेच्छाया इष्यमाणतयाभिमतेच्छासजातीयत्वा द्विषमोदृष्टान्तइत्याह (न विशेषेच्छायाइति) विशेषविषयाया इच्छायाइत्यर्थः। ननु विशेषविषयेच्छासिद्धावपि स्वरूपतएव तद्विजातीया तद्विषयेच्छैवेष्यतामित्यत्राह (नच विषयेति) यद्यप्येकस्मिन्नेवविषये इच्छायामुत्कटत्वानुत्कटत्वरूप जातिविशेषो लोकसिद्धः, तथापि पूर्वोक्तरीत्या उत्कटेच्छाप्यत्रास्तीति तात्पर्यम्। यद्वा — जिज्ञासाविषयीभूतविशेषज्ञानस्य कारणीभूतसामान्यज्ञानादिवात्र इष्यमाणविविदिषाया विद्यमानविविदिषापेक्षया विषयविशेषावच्छेदान्न वैलक्षण्यं ब्रूमः, किन्तु लोकसिद्धोत्कटत्वादिनैवेत्याशंक्य तदपि प्रकृते नसंभवतीत्याह (नच विषयेति) विषयविशेषावच्छेदातिरिक्तो यो जातिविशेषः औत्कट्यादिरूपस्सप्रकृते न संभवतीत्यर्थः। तादृशोत्कटवेदनेच्छाया असिद्धौ उत्कटविविदिषाविषयकेच्छाया

विशेषः कश्चित्संभवति । भक्तौतु भोग्याकाराविर्भाव तारतम्यवशा त्तारतम्यमुक्तमिति । इहापि ततएव तारतम्यमितिचेत् ; अस्तुत त्तथापि काम्यत्वंदुर्वचं - तथाविध विषयविशेषितस्य वेदनस्य काम्य त्वमन्तरेण तदसिद्धेः, तत्काम्यतायाश्चसिद्धौसिद्धा तथाविधवेदनेच्छेति कथंसाकाम्या, अतस्सिद्धं

असंभवादित्यर्थः ननु इष्यमाणभक्तावपि कथं प्रकृते जातिविशेषसंभ व इत्याकांक्षायां प्रीतिश्च तारतम्यवतीत्यादिना पूर्वमुक्तं स्मारयति· (भक्तौत्विति) भोग्यस्याकारः भोग्याकारः प्रियत्वमितियावत् । आ विर्भावोनिष्पत्तिः । प्रियत्वतारतम्यस्य प्रीतितारतम्याधीनत्वात प्रीतिता रतम्येतात्पर्यम् । तथाच प्रीतिरूपभक्तितारतम्यमेव भक्तिविषये का मनायां हेतुरित्यर्थः । ननु यादृशीभक्तिस्त्वयेष्यमाणत्वेनाभिमता त- द्रूपवेदनवि षयत्वमेवेष्यमाणायां विविदिषायां विशेषोस्त्वित्याशंकते (इ- हापीति) विविदिषायामित्यर्थः (काम्यत्वमिति) विविदिषायाइति शेषः । (तथाविधेति) अतिशयितप्रीतिरूपत्वात्मको य इष्यमाणविविदिषा- याः प्रकारतया विषयः तद्विशेषितं यद्वेदनं तत्कामनामन्तरेण त- द्विषयविविदिषाकामनापि न संभवतीत्यर्थः । नन्विच्छार्थं कर्मानुष्ठा नस्यात्माश्रयग्रस्तत्वे क्वचिदपीच्छानसंभवेत् इच्छाहेतुभूतकर्मानुष्ठाना योगात, नचेच्छायाविषयवैलक्षण्यज्ञानमात्राधीनत्वं ; वैलक्षण्ये ज्ञाते पि कस्यचिदिच्छानुत्पत्तिदर्शनात । अतः कस्यचिदिच्छोत्पत्तेः कर्म हेतुकत्वमाश्रयणीयम् – तच्चैवं सत्यनुपपन्नमित्यतआह (अतस्सिद्ध- मिति) अस्माकम्मते इच्छार्थं कर्मानुष्ठानं नास्त्येव, भोगादृष्टोद्बोधि तपूर्ववासनासाचिवाद्विषयवैलक्षण्यज्ञानादिच्छोत्पत्त्युपपत्तेः । नचाज्ञात सुकृतवशाद्धर्मरुचिवद्यज्ञादिना वेदनेच्छासिद्धिरिति वाच्यम् ; बह्व र्थव्ययायाससाध्यानां यज्ञादीनामज्ञातसुकृतहेतुरूपत्वासंभवात, " यज्ञेन विविदिषन्ती" तिवाक्यस्य ह्यर्थश्चिन्त्यते; अतो बुद्धिपूर्वकमेव एतद्वा

यज्ञादिकर्मविविदिषासाधनत्वेन न विहितमिति । तदेतत्सर्व मभिसन्धायाह-- " एवं रूपायाध्रुवानुस्मृते स्साधनानि यज्ञादीनि कर्माणीति " यज्ञादिश्रुतेरश्ववदि " " त्यभिधास्यते " इति ॥

इतिश्री कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य

श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु

शतदूषण्यां विविदिषासाधनत्व भङ्गवादः षष्ठः ।

क्यविहितयज्ञाद्यनुष्ठानम् । तदिदमुक्तं (यज्ञादिकर्मेति) (विविदिषासाधनत्वेन नविहितमितिच) अत्र विविदिषन्तीत्यस्य सन्निधौ " मनसैवानुद्रष्टव्य " मिति विशदवेदनं विहितम्, " एतमेव विदित्वामुनिर्भवति " इतिस्तुतम् । अतो विधिस्तुतिविषयस्यैव वेदनस्यात्रविध्यन्तराकांक्षा – नतु तदुभयरहिताया विविदिषायाः " इति तत्वटीकोक्तमप्यनुसन्धेयम् ।

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगत

परावरतत्वयाथात्म्येन तदेकदेवतेन तच्चरणपरिचरण

परायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन

रामानुजदासेनविरचितायां शतदूषणी

व्याख्यायां चण्डमारुताख्यायां –

विविदिषासाधनत्वभंगष्षष्ठः

॥ स्कन्धः ॥

श्रीमते रामानुजायनमः ।

श्रीमतेनिगमान्तमहादेशिकायनमः ।

॥ अथ सप्तमोवादः ॥

विभूत्यंशेयस्यस्फुरतिजगतामक्षमखिलं
श्रुतिर्जात्यंधानामुपदिशतियंरूपमिवनः ।
निजाध्यक्षप्रेक्षाचुळकितसमस्तस्स्वयमसौ
हृषीकेशोदिव्यांदिशतुममचक्षुस्स्वविषयम् ॥

यदूचिरे-यद्यपि तत्वमस्यादिवाक्यश्रवणसमयसम्भवं परोक्षं ज्ञानं अवि-द्यां ननिवर्त्तयति, तथापि श्रवणादिभि र्निरस्तसमस्तभेदवासनामूलासंभा-

---

सर्वाध्यक्षोप्यनध्यक्षो देहिनां यस्य सूक्तिभिः ।
अध्यक्षाति हरिस्तस्मै नमो वेदान्तसूरये ॥

अतिदृशमखिलस्य तं पुराणं निगमगुहाहितमग्र्ययोगगम्यं ।
ममहृदिभवहर्षशोकमुक्त्यै दधतुरमानिधिदेशिकेन्द्रवाचः ॥

परेषां शब्दजन्यत्वेनाभिमते ब्रह्मापरोक्षे किं मक्षाणामेव कारणता, उतशब्दस्य, आद्ये दोषमाह (विभूत्यंशइति) अक्षयोग्यविभूत्येकदेशेपि मनःप्रभृती न्यक्षाणि प्रतिहन्यन्ते, किमुतायोग्ये ब्रह्मणीति भावः । द्वितीये दोषमाह (श्रुतिरिति) जात्यन्धानां- कृतइति शेषः । लोके उपदेष्टारो जात्यन्धानां कृते यथा रूपमुपदिशन्ति, तथा श्रुतिरपि नःकृते यमुपदिशतीत्यर्थः । इवेत्यनेन उपदेशद्वयस्यापि-परोक्षत्वेन सादृश्यं विवक्षितम् । अनेन वादार्थसंग्रहः । (निजाध्यक्षेत्यादि) स्वतस्सिद्धसर्वसाक्षात्कारो भगवान् परोक्तदुरर्थम्, अस्मदुक्तसदर्थंच, जानन्, पारितोषिकतया स्वस्य हृषीकेशतया स्ववि-

वनाविपरीतसंभावनाख्यचित्तविक्षेपलक्षणप्रतिबन्धस्य तदेववाक्यं अभि यानिवर्त्तक मपरोक्षं ज्ञानञ्जनयति। नच–शब्दस्य कथ मपरोक्षधीहेतुत्व मितिवाच्यम्, इन्द्रियस्यापि कथमितिप्रसंगात्। दर्शनादितिचेत्, तुल्यं। कतद्दर्शनमितिचेत्, संवित्स्वप्रकाशा दशमस्त्वमसीत्यादिषु। नह्यत्रसंविद्विषयः स्वविषयोवा प्रकाशोनास्ति, सन्नपिवापरोक्षः, स्वधीविरोधात्, प्रत्यक्षेच विषये परोक्षप्रकाशव्याघातात्, अन्यथा शुक्तितत्वप्रकाशेपि रजतावभासविरोधप्रसंगात्। नचायंप्रकाशइन्द्रियजन्यः, वाक्यस्य तदानीमबोधकत्वप्रसंगात्, वाक्यमन्तरेणापि तत्प्रसंगाच्च। नच-रत्नतत्वाधिगमवत् शब्दसंभिन्नेन्द्रियजन्यः, अन्यतरेणतदुत्पत्त्युपपत्तौ कल्पना गौरवात्, अन्वयव्यतिरेकाविशेषेस तीन्द्रियसहकृतशब्दजन्यइति विपरिवर्त प्रसंगाच्च। किन्नामेन्द्रियं तत्सहकारिस्यादितिचेत्?

षयमानस्वप्रकाशं ददात्वित्यर्थः। अस्त्वपरोक्षप्रकाशः, सइन्द्रियकरणकएवस्यात्, नवाक्यकरणकइत्यत्राह (नचेति) इन्द्रियजन्यः – इन्द्रियकरणकइत्यर्थः। (वाक्यस्येति) इन्द्रियस्य वाक्यनिरपेक्षत्वादितिभावः। (अन्यतरेणेति) इन्द्रियवाक्ययोः पृथक्करणत्वेन क्लृप्तयोरन्यतरेण कार्योपपत्ता वन्यतरस्मिन्नन्यतरसहकारित्वकल्पनायां माना भावादित्यर्थः। रत्नतत्वाधिगमेपि शाब्दज्ञानसंस्कारसचिवेन्द्रियस्यैव हेतुत्वमिति भावः। (किन्नामेति) यद्यपि पूर्ववादिना शब्दस्य इंद्रियंप्रति सहकारित्वमुच्यते, तस्यैवेन्द्रियस्य शब्दं प्रति सहकारित्व स्यानेनाभिधाने नैतच्छंकावकाशः, अथापि तटस्थस्यैयमाशंकेति नदोषः। यद्वा - चक्षुरादीनां प्रत्येकं व्यभिचारा च्छाब्दज्ञानेच वैजात्यस्याक्लृप्तत्वात् नेन्द्रियस्य वाक्यसहकारित्वं संभवति, प्रत्यक्षे चाक्षुषस्पार्शनादिवैजात्यस्य क्लृप्तत्वात्; ननु शब्दस्य सहकारित्वेन शब्दजन्यतावच्छेदक मिन्द्रियजन्यज्ञानविशेषे कल्पनीयमिति चेत्, न, तथापि शब्दजन्यतावच्छेदकस्यैकस्यैवकल्पनात्, चक्षुरादीनांत्वननुगमाज्जन्यतावच्छेदकमनेकं कल्पनीय-

मनसःसर्वज्ञानकरणसाधारणसहकारित्वं किं नजानासि। तथापि विनिगमनायां को हेतुरिति चेत्, न, अन्धस्यांधतमसिस्थितस्यवा वाक्यश्रवणा द्दश मोस्मीति प्रत्यक्षप्रत्ययात्। नचात्रापरोक्षत्वमारोपितं, बाधकाभावात्। नच सम्प्लवे भेदाग्रहा त्तद्व्यवहारः, कदाचिदपि तत्र धीभेदानुपलंभात्। अतो वाक्यजातीयस्य क्वचित्प्रत्यक्षज्ञानजनकत्वसिद्धौ क्व विरोधाव काशः। अन्यदपि वाक्यं किं नजनयतीतिचेत्, न, गोजातीयत्वे शाकरः किं न दुग्धे दुग्धमितिवदुपहास्यत्वात्। अस्ति तत्रावान्तरोपाधिरिति चेत्, अस्त्वत्रापिकश्चित्। नच-तदज्ञानं तत्कार्योत्पत्तिप्रतिबन्धि, तज्ज्ञान स्य तत्कारणत्वानभ्युपगमात्। अन्यथा अतिप्रसंगात्। यथाहुः-"नकारण परिज्ञानं तत्कार्योत्पत्तिकारणं। नहि बीजाद्यविज्ञान मंकुरोत्पत्तिवार

मिति वादिन एवाशंकेति। (मनसइति) तथाच तस्यां न पूर्वोक्तगौरवमितिभावः। विपरिवर्तापादनेपि शब्दकरणकत्वनिर्द्धारणं कथमिति प्रच्छति (तथापीति) (अन्धस्येति) तत्र चक्षुरादेरव्यापारात, मनसश्चापि करणत्वानङ्गीकारात् शब्दस्यैव तत्र करणत्वं वाच्यमिति भावः। (प्रत्यक्षप्रत्ययादिति) प्रत्यक्षत्वमानुभाविकमितिभावः। यद्यपि नेदं रजतमितिवन्नप्रत्यक्षबाधः, तथापि यौक्तिकबाधोस्त्येव, मनस्संवलितसामग्र्या शब्दसंवलितसामग्र्याश्च विद्यमानतया परोक्षापरोक्षरूपकार्यद्वयस्यावश्यकत्वात, अतोदशमोस्मीत्येकैवापरोक्षप्रतीतिरितिबुद्धे र्भ्रमत्वमवर्जनीयमेवेतिशङ्कां परिहरति (नचसंप्लवइति) (भेदाग्रहादिति) भ्रमस्याप्युपलक्षणं। (कदाचिदिति) तत्र-तादृशस्थले। करणान्तरसन्निधानस्थले धीभेदानुपलम्भेन मनसःकरणान्तरसहकारित्वमेव, न पृथ क्करणत्वमित्यर्थः। यद्यपि मनसः करणत्वं स्वमते कुत्रापि नास्त्येव, तथापि परेण स्वमतेन शंकिते तदभ्युपगमेन परिहृतमिति ध्येयं। (क्वेति) शब्दस्य प्रत्यक्षजनकत्वं नविरुद्धमित्यर्थः। (अस्तीति) स्त्रीत्वविशेषितं गोत्वमित्यर्थः। नन्वस्माभिरज्ञातत्वं यद्यपि न दोषः, तथा प्यत्यंताज्ञातत्वे वस्तुसत्तैव नस्यादित्यत आह

णम्''इति । नचास्यात्यन्ताज्ञातता, स्वतोऽपरोक्षार्थगोचरत्वस्योपाधेरव धारणात् । नच– तत्वमस्यादिवाक्यस्य प्रत्यक्षज्ञानजनकत्वे किं प्रमाण मितिवाच्यम् , निवर्त्यमिथ्यात्वान्यथानुपपत्त्यैव तात्सिद्धेः। स्वतःशुद्धेपि हि विश्वसाक्षिणिब्रह्मणि स्फटिकमणिघटितदाडिमीकुसुमरागोपरागवत् अवभासमात्रसिद्धि रियमशुद्धिः, साच ज्ञानमात्रनिवर्त्येति "तरतिशोकमा त्मवि''दित्यादिश्रुतिशतसिद्धं, मिथ्याभूतस्य च धीमात्रनिवर्त्यत्वं,युक्तं, नच परोक्षंज्ञानंनिवर्तकंदृश्यते । अतः परिशेषादपरोक्षमेव ज्ञानं निवर्तक मितिस्थिते, नतावत्करणमिन्द्रियं, बाह्येन्द्रियाणां प्रत्यक्पराङ्मुखत्वात् , मनसोपि सोहमस्मीत्यस्मिन्नर्थे स्वातन्त्र्येणाप्रवृत्तेः, शब्दसंस्का रादिपुरस्कारेतु तस्यैव करणत्वोपपत्तेः, मनसश्च नित्यशुद्धबुद्धमुक्तस्वभाव ब्रह्मगोचर साक्षात्कारकरणत्वस्या दृष्टचरत्वेन शब्दस्य तत्स- हकारित्वकल्पनायोगात् , तथात्वेच श्रवणादिनैष्फल्यात् । "न चक्षुषागृ ह्यते नापि वाचा'' "मनसातुविशुद्धेन'' "मनसैवेदमाप्तव्य'' मित्यादिश्रुतीनां

(नचास्येति) (निवर्त्येति)तज्ज्ञाननिवर्त्यस्य मिथ्यात्वं तज्ज्ञानस्य साक्षा त्वमन्तरेणानुपपन्नमिति प्रदर्शनार्थं निवर्त्यपदम्, प्रपञ्चरूपस्य निव र्त्यस्य मिथ्यात्वं तत्वमस्यादिवाक्य स्यापरोक्षजनकत्वमन्तरेणानुपपन्न मित्यर्थः । मिथ्यात्वं ज्ञाननिवर्त्यत्वञ्च प्रपञ्चस्योपपादयति (स्वतइत्यादि- ना) ज्ञानमात्रनिवर्त्यत्वे युक्तिमप्याह (मिथ्याभूतस्येति) मिथ्याभूत स्य ज्ञानमात्रनिवर्त्यत्वं युक्तञ्चेत्यन्वयः । (मनसोपीति) सहकारिविशेष मनासाद्य सोहमितिज्ञानस्य मनसाऽसंभवादित्यर्थः । तत्सहकृतमनस एव करणत्वं कुतो नस्यादित्यत्राह (मनसश्चेति) यद्यपि शब्दस्यापि तादृ शसाक्षात्कारकरणत्वमसिद्धं, तथापि तादृशज्ञानकरणत्वे नविवादः, अतस्तज्जन्यज्ञानस्यसाक्षत्त्वमात्रंकल्पनीयं , मनसस्तु तादृशज्ञानकरण त्वं तज्जन्यज्ञानस्यसाक्षात्त्वंच कल्प्यम् , अतोलाघवाच्छब्दस्यैव साक्षा- त्कारकरणत्वकल्पनं युक्तमितिभावः । (तथात्वइति) मनसस्तादृ- शसाक्षात्कारकरणत्वस्य दृष्टचरत्वे श्रवणादिसापेक्षापरोक्षज्ञाने प्यन्यत्र

चित्तैकाग्र्यस्यांतरंगत्वबोधनेतात्पर्यात् । अतएव " अप्राप्यमनसासहे " त्यादेरनधिकृत मनोविषयत्वव्यवस्थापनानुपपत्तिः । नच-मानसंप्रत्यक्षमस्ति, आत्मनः स्वप्रकाशत्वात् , सुखादेस्तु साक्षिवेद्यत्वात् , भावनासहकृतमनोजन्यसाक्षात्कारस्यापि पथिकपरिभावितप्रियतमासाक्षात्कारवत् भ्रान्तित्वात् , भ्रान्तिरूपसाक्षात्कारस्यापि साक्षिरूपत्वेनैव मानसत्वाभावात् , अनुमानादेस्त्वापरोक्ष्यविद्वेषशीलत्वात् । अतो वाक्यपरिशेषे तत्रापि भेदगर्भाणां वाक्यानां भेदभ्रमनिवर्तकत्वायोगात् अद्वैतवाक्यान्येवा विद्यानिवर्तकापरोक्षज्ञानंजनयन्तीति । किंच—प्रत्यक्षस्य भेदभ्रमस्य परोक्षा दैन्द्रियिकप्रत्यक्षाद्वा न परिभवोयुक्तः, न्यूनत्वात् समत्वाच्च । शास्त्रमूलंतु प्रत्यक्षं साक्षात्कारत्वाविशेषेपि निर्दोषहेतुकत्वाद्बाधक्षमं । तदुक्तं "न्यूनत्वाच्च समत्वाच्च परोक्षं नाक्षजंक्षमं । निर्दोषहेतुजन्यत्वात् प्रत्यक्षं शास्त्रजं क्षम " मिति । प्रत्यक्षभेदभ्रमनिवर्तनइतिशेषः । साक्षात्कारस्यचा विद्यानिवर्तकत्वं तस्यच शब्दकरणत्वं शब्दादेवसिध्यति, " निचाय्यतं मृत्यु मुखात् प्रमुच्यते " " क्षीयन्तेचास्य कर्माणि तस्मिन्दृष्टेपरावरे" इत्या-

---

क्लृप्तस्य मनसएव करणत्वेन शब्दस्य करणत्वाभावाच्छ्रवणादिनिरपेक्षपरोक्षज्ञाने शब्दस्य करणत्वं ग्राह्यं, तथाच श्रवणादिवैय्यर्थ्यमितिभावः । (अतएवेति) मनोग्राह्यत्वाभावे श्रुतिः प्रमाणमित्यर्थादुक्तं भवति । (भावनेति) भावनासहकृतमनोजन्यत्वेन पराभिमतस्येत्यर्थः (पथिकेति) प्रोषितचिंतितायाः प्रियतमायाः साक्षात्कारवदित्यर्थः । पूर्वं परोक्षज्ञानस्य निवर्तकत्वा दर्शना दपरोक्षपरिशेषः प्रमाणान्तराणामप्रवृत्तेर्वाक्यपरिशेषश्चोक्तः, इदानीं परोक्षस्यापरोक्षस्य च निवर्तकत्वासंभवा दपरोक्षत्वं शब्दजन्यत्वंच परिशेषयति (किंचेति) (न्यूनत्वाच्चेति) परोक्षभ्रमस्यापरोक्षज्ञाननिवर्त्यत्वदर्शनात्ततोन्यूनबलत्वादित्यर्थः । न्यूनत्वात्परोक्षन्नक्षमम् , समत्वादक्षजंच नक्षममित्यर्थः । नकेवलं परिशेषात् साक्षात्त्वशब्दकरणत्वयो स्सिद्धिः, किंतु श्रुत्यापीत्याह (साक्षात्कारस्यचेति) (निचाय्येति) चायृधातुर्दर्श

दिभि रपरोक्षज्ञानस्य अविद्यानिवर्तकत्वसिद्धेः । " तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः"''वेदांतविज्ञानसुनिश्चितार्थाः" "स्वाध्यायश्चक्षुरुतएकमस्य योगोद्वितीय मभिवीक्षणाय । अध्ययनमननन यनोस्यद्रष्टा नमांसचक्षुरभिवीक्षनेतं" "पितृदेवमनुष्याणां वेदश्चक्षुस्सनातन"मित्यादे स्तस्य शब्दकारणकत्वसिद्धिः । प्रयोगश्च—विगीतंज्ञानं साक्षात्कारि - तत्वमस्यादिवाक्यजन्यज्ञानत्वात्, तत्स्वरूपगोचरश्रावणज्ञानवत् । नच तत् तदजन्यं - प्रत्यक्षेविषयस्य कारणत्वस्वीकारात् । तत्रैवप्रतिज्ञाया मपरोक्षज्ञानविषयत्वात्सुखादिज्ञानवादितिवाप्रयोगः । तत्वमस्यादिवाक्यंवा स्वप्रतिपाद्यगोचरसाक्षात्कारजनकम् — स्वप्रकाशार्थोपदेशरूपत्वात्, स्वतोपरोक्षार्थविषयत्वाद्वा, संवित्स्वप्रकाशा दशमस्त्वमसीत्यादिवाक्यवत् । अपरोक्षत्वं तत्वमस्यादिवाक्यजन्यज्ञानवृत्ति - अपरोक्षज्ञाननिष्ठात्यन्ताभावा प्रतियोगित्वात्, ज्ञानत्ववदिति । नच - अत्र परोक्षत्वं तत्वमस्यादिवाक्यजन्यज्ञानवृत्ति - परोक्षनिष्ठात्यन्ताभावाप्रतियोगित्वात्, ज्ञानत्ववदिति सत्प्रतिपक्षसाधनता, सिद्धसाधनात । तेषा मेवहि वाक्याना मसंभावनाविपरीतसंभावनाप्रतिबद्धचेतसिपुरुषे परोक्षज्ञान

नार्थः । (तस्माइति) करिष्यमाणोपदेशएव तत्र दर्शयतिना उक्तइति भावः । (वेदान्तेति) सूपसर्गः प्रत्यक्षरूपइति भावः । (नमांसेति) मांसचक्षुर्निषेधाच्छ्रुतिचक्षुरनुमितमिति भावः । (विगीतमिति) नन्वयमसिद्धोहेतुः, वाक्यार्थज्ञाने वाक्यस्यातीतादिरूपत्वेनाजनकत्वात, तज्ज्ञानस्यैव जनकत्वात, प्रयोज्यत्वमात्रविवक्षायां तल्लिङ्गिकायां तत्पक्षिकायांच व्यभिचार इतिचेन्न, अनुमित्याद्यन्यत्वेन विशेषणात । यद्वा - तत्वमसिवाक्यंप्रत्युच्चारणंभिन्नमेव, तथाच - यस्य तत्वमसिवाक्यस्य नलिङ्गत्वं नापि पक्षत्वं नापिस्मृतिः, तच्छ्रवणजन्यं वाक्यार्थज्ञानं पक्षः, तद्वाक्यप्रयोज्यज्ञानत्वं हेतुरिति । तत्वमस्यादिवाक्यजन्य-किञ्चिज्ज्ञानवृत्तित्वसाधनेदोषमाह (सिद्धसाधनादिति) तत्वमस्या-

जनकत्वमिष्यते । पूर्वोक्तश्रुतिविरुद्धतया कालात्ययापदेशाच्च। नचवाच्यं-अग्निहोत्रादि वाक्यजन्य ज्ञानेष्वप्येवं प्रयोक्तुं शक्य मित्याभाससमान योगक्षेमतेति, तत्र विपक्षेबाधविरहात् । नहि तत्र प्रामाण्यस्यानुपपत्तिः, अनुमानादिवदुपपत्तेः । नाप्यनुष्ठानस्य, परोक्षनिश्चयादपितदुपपत्तेः । नापि फलस्य । ततएव तत्सिद्धेः । नापिच फलकामनायाः, फलसंबन्धनिश्चयादेव तस्याअप्युपपत्तेः । अतएव पुरुषप्रवृत्तिरपि संगच्छते । इहतु प्रागुक्तार्थानुपपत्तिरेव विपक्षेबाधिकास्यात् । अतोनाभासतुल्यतेति ॥ एवं पूर्वेष्वपि प्रयोगे ष्वाभासतुल्यतोद्धारो द्रष्टव्यः । अतोविपक्षेबाधकस्यैव प्रतिबन्धरहस्यत्वात् उक्तार्थे महाविद्याजातयश्च यथावगाहं प्रयोक्तव्याः । स्वपरपक्षसाधारण्यंहि महाविद्यानां स्वभावः, तत्रानुकूलतर्कसदसद्भावाभ्यां एकत्रार्थसिद्धि रितरत्रार्थासिद्धिरितिनिर्णयः । ननु-तर्कपराहताइमेहेतवः, शब्दस्यप्रत्याक्षांतर्भावप्रसंगादितिचेत् ; न,अप्रसंगात्। योगिमनसोबाह्यविषयप्रत्यक्षज्ञानजनकत्वेपि बाह्यप्रत्यक्षबहिर्भाववदुपपत्तेः । अथ-चक्षुरादिपंचकान्यतमत्वं , योगिमनोन्यत्वेसति बाह्य

दिवाक्यजन्ययावज्ज्ञानवृत्तित्वसाधने दोषमाह (पूर्वोक्तेति) (नचेति) अपरोक्षत्वमग्निहोत्रादिवाक्यजन्यज्ञानवृत्त्यपिप्रयोक्तुंशक्यमित्यर्थः । (फलकामनायाइति) अनेनेदंफलम्भेभूयादितिकामनायाइत्यर्थः । (फलेति) फलसंबंधः - फलजननयोग्यता । (अतएवेति) पूर्वमनुष्ठानमित्यग्निहोत्रादिक्रियाविवक्षिता, प्रवृत्तिस्तु तज्जनककृतिरितिभेदः । (इहत्विति) निवर्त्यमिथ्यात्वान्यथानुपपत्तिरित्यर्थः । प्रतिबन्धोव्याप्तिः । ननु महाविद्यानां स्वपरपक्षसाधारण्यात् स्वेनैव सत्प्रतिपक्षितत्वात् कथं ततस्साध्यसिद्धिरित्यत्राह (स्वपरेति) यद्यपि स्वपरपक्षसाधारण्यं महाविद्यानां स्वभावः, तथाप्यनुकूलतर्कतदभावाभ्यां साध्यसिद्धितदभावावित्यर्थः । (योगीति) बाह्यविषयत्वं - बाह्यविशेष्यक

विषया परोक्ष प्रमितिकारणत्वं वा बाह्य प्रत्यक्षांतर्भावे प्रयोजकमिष्येत, इहापितर्हि स्वतोपरोक्षार्थब्रह्मात्मविषयशब्दान्यत्वेस त्यपरोक्षप्रमितिकारणत्वं प्रत्यक्षांतर्भावप्रयोजकमितिसम स्समाधिः । किञ्च-प्रत्यक्षांतर्भावइति इन्द्रियांतर्भावोवा, साक्षात्कारजनकवाक्यांतर्भावोवा विवक्षितःस्यात् । पूर्वत्र मनसोपि बाह्यानंतर्भावइतिवदुपलंभविरोधात् अशक्यः । उत्तरत्रानिष्टप्रसंगता, ऐकराश्येसिद्धेस त्यवांतरभेदाश्रयणाविरोधात् । तदेवतु कथमितिचेत् ,न,दशमस्त्वमसीत्यादौ तद्दर्शनस्यसमर्थितत्वात् । वाक्यस्यैवापरोक्षधीजनकत्वे मनननिदिध्यासनविध्यानर्थक्यं, श्रुतवेदांतानां संसारानुवृत्तिदर्शनविरोधश्चेति चेत्,न,प्रागुक्तप्रतिबन्धनिरसनद्वारेण तयोःश्रवणं प्रतिफलोदयकार्यंगतयाविधानोपपत्तेः, संसारित्वोपलब्धेश्च प्रतिबन्धकवत्पुरुषविषयत्वात् । अतो बाधकापेत सानुग्राहक श्रुत्यादिसिद्धं तत्वमस्यादेः साक्षात्कारजनकत्वमिति ॥

अत्रब्रूमः — यत्तावदुक्तं केषुचिद्वाक्ये ष्वपरोक्षधीहेतुत्वं दृश्यतइति, तन्नरविषाणांकुरप्रसाधने खरविषाणांकुरनिदर्शन मिति मन्यामहे । तथाहि - संवित्स्वप्रकाशेत्यत्रताव त्सामान्यतः स्वपरसमवेत त्रैकालिकसर्वसंवित्स्वप्रकाशत्वंवाक्यार्थः । तादात्विकीतु तज्जन्या संवि देका तदानीं स्वप्रकाशा, तत्र न सर्वसंविदां स्वप्रकाशत्वमिदानीमपरोक्षं, यतो

त्वं, ज्ञानाप्रत्यासत्तिकत्वेसतीतिवा विशेषणीयम् । ननु कथमिष्टत्वं, ' निर्विशेषं न सामान्य ' मिति न्यायेन चक्षुरादिविशेषानन्तर्भावे प्रत्यक्षजनकसामान्यान्तर्भावस्यापिबाधा दित्याशंक्य सामान्यतः प्रत्यक्षान्तर्भावेसति चक्षुराद्यवान्तरभेदाश्रयणव च्छब्दरूपावान्तरभेदाश्रयणमपि संभवतीत्याशयेनाह (ऐकराश्यइति) (तदेवत्विति) ऐकराश्यमित्यर्थः । तद्दर्शनस्य – साक्षात्कारजनकत्व दर्शनस्येत्यर्थः । (यत्तावदिति) नवप्ररूढत्व लाभार्थं मंकुरशब्दप्रयोगः । (यतइति) अपरोक्षार्थविषयत्वप्रयुक्तत्वाभ्युपगमात् ज्ञानापरोक्ष्यस्येतिभावः । नच-सर्वं संविदां कदाचि दापरोक्ष्या त्तद्विषयापरोक्ष्यंस्यादितिवाच्यं,

वाक्यस्य तदापरोक्ष्यहेतुता स्यात् । नच सर्वसंविदैक्यं, तस्यदूषयिष्यमाणत्वात् । तदैक्येपि तत्तदुपाहिताकारेण परोक्षापरोक्षविभागस्य दुरपह्नवत्वात् । वाक्यजन्यसंवित्स्वरूपापरोक्ष्येतावद्वाक्यमेव कारणं - विषयप्रकाशांशकारणव्यतिरेकेण स्वप्रकाशांशे कारणान्तरानुपलम्भादिति चेत ; तर्हि सिद्ध मनुमानादेर्वाक्यान्तराणामप्यपरोक्षधीजनकत्वं, तत्तज्जन्यधियामपि स्वप्रकाशांशेपि तत्तत्कारणकत्वात् । सत्यं, तथापि— संवित्स्वप्रकाशेत्यादिवाक्येषु विषयप्रकाशांश स्वप्रकाशांश श्चैकएवेति विशेषइतिचेन्न, सामान्यविशेषविषयतया तद्भेदस्यदर्शितत्वात् ।

च्यम् । वह्न्यनुमितेरप्यापरोक्ष्यापातात । (नचेति) वस्तुतो ज्ञानस्य स्वप्रकाशत्वेपि तत्स्वप्रकाशत्वस्य तेन ज्ञानेनाग्राह्यत्वा न्न तदापरोक्ष्यमितिभावः । (तदैक्येपीति) उपहितसंविदां कासांचि दन्यकालीनत्वात् कासांचिद्व्यधिकरणत्वाच्च पारोक्ष्यमितिभावः । ननु - संवित्स्वप्रकाशेतिवाक्यजन्यज्ञानस्य स्वप्रकाशत्वेनापरोक्षत्वा त्तज्जनकत्वेनापरोक्षहेतुत्वं सिद्धमेव, नच - प्रत्यक्षांशे जनकत्वमेव साध्यम् ; अन्यथा सिद्धसाधनात् , वाक्यंच विषयांशएव हेतुः-नस्वजन्यज्ञानांशेपि,अतः प्रत्यक्षजनकत्वं नास्त्येवेतिवाच्यं; तदंशेपि वाक्यातिरिक्तकारणादर्शनेन तस्यैव कारणत्वा दिति शंकते (वाक्येति) (तर्हीति) तथाच सिद्धसाधनं हेतुविशेषण वैयर्थ्यं चेति भावः । ननु विषयप्रकाशांशाभिन्नप्रत्यक्षांशजनकत्वं साध्यं, अनुमानादिषु 'वह्निमानितिजानामी' त्यत्र वह्निमानित्यंशोविषयांशः, जानामीत्यंशः स्वप्रकाशांशः, संवित्स्वप्रकाशेत्यत्रतु तज्जन्यज्ञानस्यापि संवित्त्वेन विषयान्तर्भावात् तत्प्रकाशेनैव स्वव्यवहारोपपत्तौ जनामीत्यंशांतरकल्पकाभावात् स्वप्रत्यक्षरूपस्वात्मप्रकाशांशो विषयप्रकाशांश श्चाभिन्नएवेत्यदोष इति शंकते (सत्यमिति) (नेति) संविदि त्यतीतानागतस्वपरसाधारण संविन्मात्रगोचरविषयप्रकाशांशमात्रेण जानामीति तदातनव्यक्तिमात्रगोचर त-

एवं दशमस्त्वमसीत्यादावपि यदि दशमत्वंस्वात्मनः पश्यतएवेदंवाक्यमुक्तं; तदा घटंपश्यतो ऽयंघटइतिव त्सिद्धानुवादपरमिदं वाक्यं स्यात् । तथाच प्रत्यक्षानुवादितामात्रेण प्रत्यक्षताभ्रमः, परोक्षविषयप्रयोग इवा परोक्षविषय प्रयोगेपि शब्दशक्ते स्तदवस्थत्वात् , यदापुनरविदित स्वात्मदशमत्वं प्रत्युच्येत तदातु दशमत्वांशे परोक्षत्वंस्पष्टं, उद्देश्यांशस्यतु प्रागेवदृष्टत्वात् विशिष्टेपि प्रत्यक्षताभ्रमः, प्रतिपत्तिझाटित्यात् ।

दाश्रय पुरुषविशेषसंबंधित्वादिविशिष्ट व्यवहारस्य जानामीत्यंशांतर मन्तरेणासंभवात् , ततश्च दृष्टांतासिद्धिरितिभावः । यद्यपि-- विषयांशेपि स्वस्यान्तर्भावोस्त्येव, तथापि विषयप्रकाशांश स्संविदन्तरवत् एतत्संविदंशेपि परोक्ष एवेति भावः । स्वप्रकाशतया प्रत्यक्षत्वावश्यंभावेन विषयप्रकाशांशस्यैव तत्संवि दंशे प्रत्यक्षत्वमित्याशंकितुर्भावः ।

यद्वा--ननु विषयप्रकाशांशे यत्प्रत्यक्षं तज्जनकत्वं साद्ध्यं, विषयप्रकाशांशश्च नपूर्ववद्वेद्यांशोविवक्षितः, किंन्तु विषयावगाह्यंशः, इदंच साद्ध्यं नानुमानादिष्वस्ति, इहत्वस्ति स्वस्यापिविषयतया स्वप्रकाशांशस्यैव विषयावगाहितया विषयप्रकाशांशत्वादिति शंकते (सत्यमिति) (नेति) किं सर्वविषयावगाह्यंशे यत्प्रत्यक्षं तज्जनकत्वं साद्ध्यं, यत्किञ्चिद्विषयावगाह्यंशे प्रत्यक्षजनकत्वं वा ? नाद्यः, वाक्यस्य स्वप्रकाशांशस्यच सामान्यविशेषविषयतया भेदस्य दर्शितत्वेन सर्वविषयावगाह्यंशे प्रत्यक्षत्वाभावात् साद्ध्यवैकल्यमित्यर्थः । न-द्वितीयः, अनिन्द्रियत्वावच्छिन्न यत्किंचिद्विषयावगाह्यंशप्रत्यक्षजनकत्व व्यापकस्य वेद्यांशान्तर्भूतज्ञानजनकत्वस्योपाधित्वादितिभावः । (दर्शितत्वादिति) दर्शितप्रायत्वादित्यर्थः । प्रमैवकुतोनस्यादित्यत्राह (परोक्षेति) प्रागविदितस्वात्मदशमत्वस्य यदिकस्यचिद्विशिष्टेपि प्रत्यक्षताधीस्तदाभ्रांतिरेवसेत्याह । (उद्देश्येति) अतः प्राचीनप्रत्यक्षाभेदभ्रमस्तत्रेतिभावः ।

एतेन- कदाचिदपि तत्र धीभेदानुपलम्भादिति पूर्ववाद्युक्तं निरस्तम्, करणान्तरसन्निधानात्प्राक् मनसाप्रत्यक्षोत्पादेन तदभेदभ्रम·

नच -- तत्प्रत्यक्षत्वेनैव विशिष्टस्यप्रत्यक्षता, अयं पर्वतोवह्निमा नित्यनुमानेपि तत्प्रसंगात्, गुरुत्वादे रतींद्रियत्वभंगप्रसंगाच्च । एवं क्षत्रियस्त्वमसीत्यादिष्वपि विकल्पो नुसंधेयः ।

यत्तु -- प्रत्यक्षेविषये परोक्षप्रकाश व्याघात इति, तदप्यसत् । आपरोक्ष्यादेः ज्ञानधर्मत्वे ज्ञानव्यक्ति भेदेन विषयैक्येपि परोक्षत्वापरोक्षत्वयोर्विरोधाभावात् । विषयधर्मत्वे पीन्द्रियेण तथाविधं ज्ञानं जायतां, लिंगशब्दादिना त्वन्यथा भूतमिति पुरुष-भेद इवैकस्मिन् पुरुषेपि करणभेदेन कालभेदेनच एकस्यैव वस्तुनः प्रत्यक्षता परोक्षताच प्रागेवदर्शिता । विपरीतवासनाभूयस्त्वेपि करण-शक्त्या तत्वज्ञानोदयस्योपपादनात् । यदि - प्रत्यक्षे विषये परोक्षप्र-काश स्स्यात् - तदा शुक्तित्वप्रकाशेपि रजतावसायाविरोधप्रसंगइति चेत्; किं शुक्तौचक्षुर्व्यापारान्वयव्यतिरेकानुविधायी रजतभ्रमः परोक्षः, येनैवं ब्रवीषि । अथ पुन र्भ्रान्तिरेव प्रसञ्जनीया । तदा शु-क्तित्वादिलक्षणविशेषग्रहस्य भ्रमोत्पत्तिप्रतिपक्षतया विशेषाग्रहस्य सहकारिविरहेण सामग्रीवैकल्याद्वा शुक्तौ रजतभ्रमानुदयः । इहतु

सम्भवात् । (आपरोक्ष्यादेरिति) परोक्षत्वापरोक्षत्वयोर्ज्ञानभेदेनाविरो-धात् तन्निबन्धनः प्रत्यक्षेविषये परोक्षप्रकाशव्याघातविरहइतिभावः । (विषयधर्मत्वेपीति) विषयधर्मत्वेपि तदनिबन्धनएव पारोक्ष्यापारोक्ष्येज्ञा-नेपि वाच्ये, इन्द्रियलिंगादिजन्यज्ञानेषु वैलक्षण्यानुभवात्. तथाच-एकस्मिन्नेव करणद्वयप्रवृत्तौ परोक्षापरोक्षरूपज्ञानद्वय माविरुद्धमिति भावः । (विपरीतेति) मननादिभिर्विपरीतवासनायामनिवृत्तायामपि वा-क्या त्प्रथमतः परोक्षज्ञानस्य त्वयोक्तत्वादित्यर्थः । ननु - नवय मपरोक्षे परोक्षप्रकाशे शुक्तित्वेना परोक्षे परोक्षरजतप्रकाशमापादयामः, किन्तु विरुद्धयोरविरोधांगीकारे शुक्तित्वे भासमानेपि रजतभ्रमस्स्यादिति ब्रूम इति शंका मनूद्यपरिहरति (अथपुनरिति) (शुक्तित्वादीति) प्रतिबं धकाभावस्य अकारणत्वमतेनाह (विशेषेति) (इहत्विति) अपरोक्षत्वं

अप्रतिबद्धपरोक्षज्ञानसामग्रीसिद्धौ कथं तदनुत्पत्तिः । तथाविधाच तत्सामग्री प्रागेव दर्शिता । अंगीक्रियतेच भवतापि श्रवणदशायां। अतएवैवंविधप्रसंगस्य निर्मूलता ।

किञ्च स्वानिष्टं प्रसञ्जकं परानिष्टं प्रसञ्जनीयमितितु तर्कतत्व व्यवस्था । उक्तञ्च श्रीपुण्डरीकाक्षाचार्यैः । * " प्रसञ्जकन्तु स्वानिष्टं परानिष्टं प्रसज्यते । विपर्यये पराभीष्टं स्वाभीष्टे पर्यवस्यति ।। प्रसञ्जकेतु स्वाभीष्टे स्वानिष्टेपर्यवस्यति । स्वाभीष्टस्यत्वसिद्धि स्स्यात् परेष्टस्यप्रसंजन"* इति । उभयमप्यत्र विपरीतं, स्वतः प्रत्यक्षेपि ब्रह्मणि श्रवणदशायां वाक्यतः परोक्षज्ञानजननस्य भवदभिमतत्वात् । मिथ्यैतदितिचेत् , पश्चात्तनप्रत्यक्षज्ञानजननमपि तथैवेति कोविशेषः ।

परोक्षज्ञाने नप्रतिबन्धकम् , नापि तदभावःपरोक्षज्ञानहेतुः, मानाभावादितिभावः । (तथाविधेति) परोक्षविषयप्रयोगइवापरोक्षविषय प्रयोगेपि तच्छक्तेस्तदवस्थत्वादिति शब्दरूपसामग्रीदर्शितेत्यर्थः । (अतएवेति) अपरोक्षे विषयेपि परोक्षप्रत्ययस्यांगीकारात् व्याप्त्यभावात् प्रशिथिलमूलस्तर्कइत्यर्थः । (विपर्ययइति) विपर्यये पर्य्यवसानेतु पराभीष्टं स्वाभीष्टम् साधयति, यथा-दृश्यतेच धूमस्तस्मात् वह्निमानिति । स्वानिष्टं प्रसञ्जकमित्यत्र हेतुमाह (प्रसंजकंत्विति) प्रसंजक वि र्ययेपर्यवसानात् प्रसंजकस्य इष्टत्वे तदभावस्यानिष्टत्वादनिष्टपर्य्यवसानमित्यर्थः । परानिष्टमेवप्रसञ्जनीयमित्यत्रहेतुमाह(स्वाभीष्टस्येति)आपाद्यविपर्य्ययस्य स्वेष्टसाधनत्वादापाद्यस्य चेष्टत्वे तदभावासिद्धे र्नस्वेष्टसिद्धिरित्यर्थः। (उभयमिति) प्रसञ्जकं स्वेष्टम् , प्रसज्यश्चपरेष्टमित्यर्थः । प्रसंजकस्य स्वेष्टत्वमुपपादयति (स्वतइति) (मिथ्यैतदिति) परोक्षज्ञानस्य मिथ्यात्वेन तदभावस्य परमार्थत्वेनेष्टत्वात् परमार्थत्वेनेष्यमाणाभावप्रतियोगित्वेना निष्टत्वमुपपद्यत इतिभावः । (पश्चात्तनेति) श्रवणाद्यनन्तरभाविप्रत्यक्षस्यापि मिथ्यात्वात् तदप्यनिष्टमिति अनेन तर्केणा निष्टमेव सिध्यतीत्यर्थः । किञ्च-अभावस्य सत्यत्वादेवहि प्रतियोगिनः परोक्षज्ञानस्यानिष्टत्वं, अभावस्य

शुक्तौ रजतत्वस्येवा विरोधापादकञ्च मिथ्यात्व मिह स्मर्त्तुमर्हसि ॥*॥ सत्यं विरोधाच्छुक्तित्वं बाधकत्वेनकथ्यते । मिथ्याभूतंचरजतं बाध्यत्वेनाभिधीयते॥*॥तेन मिथ्यैतदितिवचनं तवाविरोधापादकं न भवति, प्रसञ्जनीयंच क्वचिदस्मदिष्टं, आप्तोपदेशादिभिः शुक्तित्वप्रकाशेपि दुष्टेन्द्रियादिना कस्यचित् क्वचिद्रजतावभासानुवृत्तेः, अन्यथा भवतां बाधितानुवृत्तेर्दृष्टान्तस्याप्यभावप्रसंगात् । तथा प्रत्यक्षसिद्धेपि शुक्तेस्तत्वे भ्रान्तविप्रलंभकवाक्यादिभिरपि रजतधीरुदेत्येव, साच परोक्षैव, शीघ्रन्तु बाध्यमानतया केषांचि त्तत्र तदनु त्पत्तिभ्रमः । किंच - यदिप्रत्यक्षविषये परोक्षप्रकाशो व्याहतः । तदा पर्वतोवह्निमानित्यादिपुविशे-

---

सत्यत्वंच मिथ्यात्वस्य शुक्तिरजतयो रिवाविरोधापादकत्वाद्वाच्यम् , तच्च न संभवति, सत्यमिथ्यार्थयोर्विरुद्धत्वात् , अन्यथा बाध्यबाधकभावानुपपत्तेः, तस्मात् परोक्षतदभावयोरविरोधासिद्धेः परोक्षा भावासंभवा न्न प्रसञ्जकस्यानिष्टत्वमित्याह (शुक्तावित्यादिना तवाविरोधापादकन्नभवतीत्यन्तेन) स्मर्तुमर्हसी त्यनन्तरन्त न्नसंभवतीतिशेषः । (सत्यमिति) सत्यं शुक्तित्वमित्यन्वयः । बाध्यत्वेनाभिधीयत इत्यत्र विरोधादित्यनुषञ्जनीयम् । (अविरोधापादकं नसंभवतीति) परोक्षतदभावयोरिति शेषः । परोक्षज्ञानस्यापरोक्षभ्रमानिवर्तकत्वेपि शाब्दज्ञानसचिवेन्द्रियेणापरोक्षज्ञानादेव भ्रमनिवृत्तिस्स्यादित्यत्राह (दुष्टेन्द्रियेति) दोषमाहात्म्या दाप्तोपदेशे सत्यपि क्वचि न्न तत्वापरोक्ष्यमुत्पद्यते, किंतु भ्रमएवेत्यर्थः । एवं विरुद्धयोस्सन्निपाते शुक्तित्वज्ञाने सत्यपि रजतभ्रमस्स्यादि त्यापादनार्थमभिप्रेत्य तत्र दोष उक्तः, इदानीन्तु अपरोक्षेपि परोक्षप्रकाशोस्तिचेत् शुक्तित्वेनापरोक्षेपि रजतत्वेन परोक्षंस्यादित्यापादनार्थमभिप्रेत्य तत्र दोषमाह (तथेति) अयोग्यताज्ञानं प्रतिबन्धकन्नेतिभावः । यद्वा – अप्रामाण्यशंकादशाविवक्षिता । (उदेत्येवेति) तत्रानुभवएव मानमिति भावः । (विशेषतइति) प्रत्यक्षयोग्यार्थं विशेषतोदृष्टं, तदयोग्यार्थं सामान्यतोदृष्टमिति विभागा-

षतोदृष्टानुमानेषु तथाविधार्थगोचरवाक्येषुच परोक्षप्रकाशो न स्यात् । योग्यतामात्रंतु तत्र, नतु तदानीं प्रत्यक्षतेतिचेन्न । यस्य कस्यचित् आरण्यकयोगीश्वरादे स्तद्दर्शनात् । तथापिनानुमातुस्तथेतिचेत्; तर्ह्यत्रापिदशमत्वादे र्वाक्यश्रवणात्पूर्वं मदर्शना न्नवाक्यत स्साक्षात्कारसंभवः । यत्पुनः स्वस्यैव द्रष्टुंयोग्यतयाऽनंतरंदर्शनाद्वा तत्र तत्संभव इष्येत, तर्हि सिद्ध मनुमानादावपि तदुभयसंभवा त्तथात्वं । यदाच अयंघटइति मन्यमानंप्रत्येव कश्चि दयंघटइति ब्रूयात् , तदा तस्यापि प्रत्यक्षार्थविषयत्वाविशेषात् साक्षात्कारजनकत्वप्रसंगः । इष्यतएवेदमपीति चेन्न, स्वतोपरोक्षार्थविषयत्वादिति हेतुविशेषणं प्रयुंजानस्य तदनिष्टं, इष्यतांवा, तथापि ज्योतिष्टोमादिवाक्यार्थस्यापि योगिप्रभृतीनां प्रत्यक्षत्वस्यावयोरविगीतत्वात् तान्प्रति केनचि दविदितमाहात्म्येन तत्प्रयोगे ततः साक्षात्कारसंभवस्स्यात् । तथाच सर्वमपि वाक्यं कस्यचित्साक्षात्कारकारणमिति स्थितौ केषांचिदेवेति व्यवस्थाभंगः । अस्त्वेवमपि

भिप्रायेणोक्तम् । (तथाविधेति) अग्न्यादिवत्प्रत्यक्षार्थगोचरेष्वित्यर्थः । तदानीं प्रत्यक्षे परोक्ष प्रकाशोव्याहतः, अग्न्यादिर्नतथा, ब्रह्मतु तथैव, नित्यापरोक्षत्वादिति शंकते (योग्यतेति) अग्निरपि तदानीमारण्यकानां योगिना मीश्वरस्य हिरण्यगर्भादेश्च प्रत्यक्षइत्याह (यस्यकस्यचिदिति) तंप्रत्यपरोक्षे तस्य परोक्षं व्याहतमिति शंकते (तथापीति) (तर्हीति) तत्र परोक्षज्ञानस्य व्याघाताभावान्न साक्षात्कारसमर्थनमित्यर्थः (यत्पुनरिति) यदि- प्रत्यक्षे परोक्षव्याघात इत्येवोच्यते, प्रत्यक्षइतिच प्रत्यक्षयोग्यत्वं, व्याहतत्वेनाभिमत परोक्षज्ञानानन्तरमपरोक्ष इतिवा विवक्षितं, तथाच दशमत्वस्य प्रत्यक्षयोग्यत्वा दनन्तरं प्रत्यक्षदर्शनाद्वा परोक्षव्याघातात् अपरोक्षसंभव इष्यतइत्यर्थः ।

ननु – तदा प्रत्यक्षे परोक्षप्रकाशस्यैव व्याघातः, यदाच दशमत्वं प्रत्यक्षं तदा तत्रापरोक्षज्ञानसमर्थन मिति सएव दृष्टान्त इत्यत्राह (यदाचेति)

किंन श्छिन्नमिति चे त् , न, अनुमानादिष्वपि तत्प्रसंगस्योक्तत्वात् । तथाच तत्वमस्यादिवाक्य परिशेषासिद्धिः । ततश्चापशूद्रनयविरोधादि-प्रसंगः । किंच - विश्वस्यापि ज्ञाततयाऽज्ञाततयावा साक्षिवेद्यत्वस्य भवदभिमतत्वा त्सर्वैः प्रमाणैः साक्षात्कारसंभवः सुलभएव। यदिच स्वतो परोक्षार्थ विषयमेव वाक्यं तज्जनकमितिव्यवस्थाप्येत । तदा दशमस्त्व मसीत्यादिदृष्टांतासिद्धिः । यद्यपि त्वमंशस्यस्वतोपरोक्षता, तथापि सं-ख्यादिविशिष्टाकारेण स्वतोपरोक्षत्वाभावात् , अन्यथा वाक्यश्रव णात्पूर्वमेव तद्वैशिष्ट्यप्रकाशप्रसंगात् । अतोनुमानस्येव वाक्यजाती यस्य क्वचिदपि साक्षात्कारहेतुत्व दर्शनस्या सिद्धे रनुग्राहकतर्काभा वाच्च स्वाभिमतस्य कस्यचिद्वाक्यस्य तद्धेतुत्वकल्पनं विरुद्धमेव । अतएव स्वतोपरोक्षार्थगोचरत्वलक्षणोपाधिरपिनिरस्तः ।

यत्तु - निवर्त्यमिथ्यात्वानुपपत्त्या पारम्पर्येणा परोक्ष्य तज्जनक विशेषयोः परिशेषइति । तदप्यसिद्ध्यन्यथासिद्धिभ्यामाक्रम्यते । सत्यमेवहि संसार मुपासन प्रीणितेश्वरसंकल्पविशेष निवर्त्य

(ततश्चेति) अत्रैवर्णिकत्वेपि अनुमानाधिकार स्यानपायात , आनुमा निकापरोक्षज्ञानवत्त्वा त्तेषामपि ब्रह्मविद्याधिकारस्स्यादिति भावः। आदिशब्देन श्रवणादिवैयर्थ्यम् विवक्षितं । (किंचेति) नच - साक्षि णस्तदीयत्वाभावा त्तम्प्रत्यपरोक्षत्वं नेतिवाच्यम्, शास्त्रार्थं न जानामीत्या-दिरूपेणाज्ञानावच्छेदकार्थं व्यवहारजनकस्य साक्षिणोपि तदीयत्वादिति भावः। नच -- वृत्त्याऽपरोक्षत्वं विवक्षितम् ।ब्रह्मण स्स्वतोपरोक्षत्वेनऽ तथा त्वादिति भावः। (दृष्टान्तासिद्धिरिति) ननु - स्वतोपरोक्षार्थमात्रविषयत्वं न हेतुः,तादृशार्थविषयत्वमात्रं त्वात्मस्वरूपमादायास्त्येवेतिचेत्, किमयं हेतु स्स्वतोपरोक्षार्थांशे परोक्षजनकत्वसाधकः, उततदर्थमात्रे, न द्वि-तीयः त्वं घटश्चतिष्ठथ इत्यत्र घटांशे ऽप्यपरोक्षतापत्तेः, नाद्यः, दशमस्त्वमसी-त्यादि वाक्योदाहरणायोगात् । (अतएवेति) वाक्यस्यापरोक्षज्ञानजनकत्वा सिद्धे रपरोक्षार्थगोचरत्वं कारणतावच्छेदक मित्यपि निरस्तमित्यर्थः । (सत्यमेवहीति) संसारस्य सत्यत्वं भगवत्संकल्पनिवर्त्यत्वञ्च सा.

साधयिष्यामः । यत्तु - "तरतिशोक मात्मवि"दित्यादिभि र्ज्ञानमात्रनिवर्त्यत्वं सिद्धमिति, एतदपि वेदनज्ञानादिशब्दानां उपासनाख्यविशेषपर्यवसानस्य प्रागेवदर्शितत्वान्निरस्तं । यदाहुः ॥*॥ वेदनं ध्यानविश्रांतंध्यानं श्रान्तं ध्रुवस्मृतौ। साचदृष्टित्वमभ्येतिदृष्टिर्भक्तित्व मृच्छतीति ॥ मिथ्याभूतस्य ज्ञानमात्रनिवर्त्यत्वं युक्तमित्येतच्च मिथ्याभूततया भवदभिमतस्य तिमिरादिदोषस्य प्रतिभटादेश्च भेषजशस्त्रादिनिवर्त्यत्वोदाहरणेन प्रागेव दत्तोत्तरं । अस्तुच मिथ्यात्वे धीबाध्यत्वे युक्तिः, नचात्रमिथ्यात्वं ॥ * ॥ दृश्यत्वाचादि मिथ्यात्वं प्रपंचस्याभिधीयते । ब्रह्मणोपि चमिथ्यात्वं ततएवाभिधास्यते ॥ ब्रह्मणोयदि दृश्यत्वं व्यावहारिकमुच्यते । प्रपंचस्यापि दृश्यत्वं तात्त्विकं किं त्वयेष्यते ॥ * ॥ अपिच संसारमिथ्यात्वेपि किंनिवृत्तिशब्देन प्रतिभासमानामिथ्यार्थ प्रध्वंसनमभिप्रेत्य तदर्थमपरोक्षर्थागवेषणं, उततद्विषयज्ञानप्रध्वंसनं, आहोस्वित्कारणोच्छेदं, अथवा तथाविधज्ञानान्तरानुत्पादं, उततद्विपरीतविषयावगाहरूपविषयापहारं, यद्वा तद्विषयसत्यताध्यवसायशैथिल्यं, अथान्यदेव किंचिदसांव्यवहारिकमिति ॥ नाद्यः क्वचिदपि मिथ्यार्थस्य प्रध्वंसाभावात, " प्रध्वंसोहि स्वरूपस्य प्रच्युतिःप्रतिपाद्यते,

---

धयिष्याम इत्यर्थः । सत्यत्वसाधना न्मिथ्यात्वस्यासिद्धिः सिद्धा , सत्यत्वेवा मिथ्यात्वेवा प्रमाणवला दीश्वरसंकल्पनिवर्त्यत्वस्यावश्यकत्वा दन्यथा सिद्धिस्सिद्धा । (तरतिशोकमित्यादि) ननु - उपासनस्यापि ज्ञानत्वात् कथं ज्ञानमात्रनिवर्त्यत्वस्य निरासइतिचेत् ; न, ध्यानादिभिन्नस्यैव परेण ज्ञानत्वांगीकारात् तन्निवर्त्यत्वस्यैव तदिष्टत्वा त्तस्यैवेह निरस्तताभिधानेन दोषाभावात् । किंच, उपासनादिनानिवृत्तौ मुमुक्षादिसहकारिणोपेक्षितत्वात् न ज्ञानमात्रनिवर्त्यत्वम् , तन्मतेतु उपासनादि सर्वं ज्ञानार्थ मपेक्ष्यते, ज्ञानेनतु बन्धनिवृत्तौ न किंचि दपेक्ष्यतइति । युक्तिः- युक्तता । (व्यावहारिकमिति) तथाच हेत्वसिद्धे र्नमिथ्यात्वसाधनमितिभावः । किं - मिथ्यार्थोस्ति, उत न, द्वितीय आह, (प्रध्वंसोहीति) विद्यमानतामात्रं सत्यत्वं, नातिरिक्तं अनिरूपणादितिभावः ।

स्वरूपसत्यताभावे कस्य प्रच्युतिरुच्यते ॥ सत्यपि तस्मिंस्तेन तदुच्छे दायोगात् । अन्यथा बाधकज्ञानात्पूर्वं सुषुप्ते द्रष्टरिपुरुषे शुक्तिरजता द्यवस्थितिप्रसंगात् । संविदधीनसत्ताकस्यतस्यतन्निवृत्तिरेवहिनिवृत्तिः । आहुश्च - अरोपस्यनिवृत्तिस्स्या दारोपस्यापिसंक्षयः । तस्य स्वरूप शून्यस्यकानिवृत्तिर्हिकथ्यते ॥ नद्वितीयः - तस्य बाधकज्ञानाभावेपि बाधकज्ञानवदेव स्वरसवाहिविनाशहेतुबला देवाशुतरविनाशित्वात् । अन्यथा नुदितबाधकज्ञानस्य भ्रांतस्य सुषुप्त्याद्यभावप्रसंगात् । तथाहुः न भ्रांतिर्बाधकज्ञानात् नियमेनविनश्यति । नस्याद्धि भ्रांतचित्तस्य सुषुप्तौ भ्रांतिसंक्षयइति ॥ यद्यपि — उत्तरज्ञानमात्रमपि संस्का रादिवत्पूर्वज्ञाननिवर्त्तकमिष्यते — तथापि, यत्किञ्चिदविरुविरुद्ध विषयात् परोक्षज्ञानादपि पूर्वज्ञाननिवृत्त्युपपत्तौ विरुद्धविषयप्रत्यक्ष ज्ञानान्वेषणंनिष्फलं । नच तृतीयः - भ्रांतिज्ञानकारणानुच्छेदे यथाव- स्थितप्रत्यक्षज्ञानानुदयात । नह्यगुंल्यवष्टंभतिमिरादिदोषेष्वनुवर्तमानेषु चन्द्रैकत्वसाक्षात्कारसंभवः । संभवेवाऽकिंतदुच्छेदेन । प्रत्यक्षानुवृत्त्यर्थंत दुच्छेदइतिचेत् , न, तत्सामग्र्यनुवृत्तिमन्तरेणतदुच्छेदेपितदासिद्धेः , तस्यांचानुवर्त्तमानायां तदवस्थानेपि विरोधाभावात् । स्वाभाविकप्र

आह । (सत्यपीति) तेन – ज्ञानेनेत्यर्थः । (अन्यथेति) नचेष्टापत्तिः । सुषुप्तिकाले मुद्गरादिनाशुक्तिनिवृत्तौ यदिरजतस्यापिनिवृत्तिः, तदा ज्ञानानिवर्त्यत्वप्रसङ्गात्, अनिवृत्तौ निरधिष्ठानाध्यासप्रसंगा त् । दूषणान्तरमाह (संविदिति) भ्रान्तिज्ञानेत्यादिदोषस्य तत्वज्ञान प्रतिबन्धकत्वादितिभावः । (संभवेवेति) तत्वज्ञानोत्पत्त्यर्थंहि भ्रान्ति- सामग्र्युच्छेदकल्पनं; तस्यांसत्यामपि तत्वज्ञानोत्पत्तौ किन्तदुच्छेदकल्प- नेनेत्यर्थः । द्वितीय प्रत्यक्षज्ञानोत्पत्तेः प्राक्, तत्सामग्र्यनुवर्ततेनवा, द्वितीयेदोषमाह(तत्सामग्रीति)साक्षात्कारसामग्र्यभावेभ्रमसामग्र्युच्छेदेपि तत्साक्षात्कारानुत्पत्तेरित्यर्थः । आद्ये दोषमाह (तस्यांचेति) तत्वसाक्षा त्कारसामग्रीसत्वेभ्रमसामग्रीसत्त्वेपि प्राथमिकतत्वापरोक्ष्यवत् द्विती

त्यक्षप्रतिबन्धकतया तदुच्छेदकल्पनामितिचेत् । किमत्र स्वाभाविकत्वं, किंसामग्र्यांसत्यांस्वरसवाहित्वं, उतनित्यस्वाभाविकत्वम् । आद्येप्रागपि कथं तदवस्थानेप्रत्यक्षोदयः अन्योन्याश्रयणात् । द्वितियेपि नित्य स्वाभाविकप्रत्यक्षस्यच किन्नामप्रतिबन्धकम् । अयमत्रसंग्रहश्लोकः ॥ भ्रांतिकारणसद्भावेप्रत्यक्षस्यह्यसंभवः । सम्भवेनिष्फलैवस्या त्तदुच्छेदस्य कल्पना ॥ स्वानुवृत्त्यर्थमुछेद स्सामग्र्यैवानुवर्त्तनात् । प्रतिबन्धनिवृत्त्यर्थमुच्छेदेप्रथमं कथं ॥ प्रत्यक्षंकारणोच्छेदेतदुच्छेदस्ततोपिचेत् । अन्योन्याश्रयणंतुस्या त्प्रतिबन्धोनचात्मनीति ॥ नापिचतुर्थः, प्रागभावस्या साध्यत्वात् , तदनुवर्त्तनस्याप्यंतत स्तत्प्रतियोगिकारणोच्छेदको

पादे रप्युत्पत्तिसंभवादित्यर्थः (नित्येति) नित्यत्वात्मकस्वाभाविकत्वमित्यर्थः। किं प्रतिबन्धकनिवर्तकं नित्यज्ञानमेव, उत स्वरसवाहि । आद्ये दोषमाह (अन्योन्येति) (द्वितीये दोषमाह (नित्येति) नित्ये- प्रतिबन्धकस्याभावात् , तन्निवर्तकत्वन्नस्वारसिकप्रत्यक्षस्य कल्प्यमित्यर्थः। ननु - भ्रान्तेः पुनरप्यनुत्पादार्थं तत्सामग्र्युच्छेदकत्वम् प्राथमिकप्रत्यक्षस्य कल्पनीयमितिचेत् , न , सामग्र्या मिथ्यात्वे तस्या अपि- स्वरूपतस्सत्त्वाभावेन प्रच्युत्यसंभवात्तस्या अपि अनिवृत्तिस्तद्भ्रान्तिकारणनिवृत्तिरित्येव वाच्यम् तत्राप्येवमित्यनवस्था, सत्यत्वे नापरोक्षज्ञाननिवर्त्यत्वं तवेष्टमितिभावः । स्वाभाविक प्रत्यक्ष प्रतिभन्धकतया तदुच्छेदकल्पन मित्यत्र प्रागुक्तविकल्पे प्रथमाशिरसि दूषणमाह । (प्रतिबन्धेति) द्वितीयेपि पूर्वोक्तविकल्पमभिप्रेत्य प्रथमशिरसि दोष माह (प्रत्यक्षमिति) प्रत्यक्षं भ्रान्तिकारणोच्छेदे सत्येव वाच्यम् , तस्य त्वया प्रत्यक्षप्रतिबन्धकत्तोक्तेः, तदुच्छेदस्तु यदि प्रत्यक्षेण स्यात् , तदान्योन्याश्रयइत्यर्थः । द्वितीय आह (प्रतिबन्ध इति) आत्मरूपे अपरोक्षे न प्रतिबन्धकं नित्यत्वादित्यर्थः। क्वचित्तु न द्वितीयइत्यतःप्रागेवान्योन्याश्रयेणादितिपाठः, सतु सुगमः, संग्रहोपि तदनुसारेण योज्यः (तदनुवर्तनस्येति) प्रागभावपरिपालनंहि सत्यां सामग्र्यां कार्यविलंबायोगात् प्रतियोगिकारण विघटनेनैव वाच्यम् , तच्च नि

द्विनिक्षेपात, तस्यच निरस्तत्वात् ॥ न पंचमषष्ठौ, परोक्षादपि तत्सिद्धेः, प्रत्यक्षमपि हि द्विचन्द्रादिज्ञानमनुवर्तमानं परोक्षेण चन्द्रैकत्वानुमानादिना बाध्यते, तावतैव चन्द्रद्वित्वाध्यवसायशैथिल्यं जायते । अन्यथा - देहात्मभ्रमवतामनुमानेनागमेन वा देहातिरिक्तात्मविस्रम्भो नस्यात् । परोक्षबाधे भ्रमोनुवर्तत इति- चेत्, न तुल्यमेतादित्युक्तत्वात् ॥ संजातेप्यपरोक्षेपि बाधेकारणसंभवात । अंगुल्याद्यैर्भवद्भ्रान्ति रुपष्टम्भनहेतुभिः ॥ नापि सप्तमः, तस्या सांव्यवहारिकत्वेनै तदर्थोपायोपदेशायोगात, अन्वयव्यतिरेकागोचरत्वेना परोक्षपक्षपातविरहाच्च । एवं सामान्येना परोक्षज्ञानापेक्षायां कुत स्तत्कारणविशेषचिन्तेत्यनुत्थानमेव शब्दजन्यप्रत्यक्षवादस्येत्यभिप्रेत्य भाष्यकारैरिह न संरंभः कृतः"सत्यां सामग्र्यां ज्ञानानुत्पत्त्यनुपपत्ते" रित्यादिना । "द्रष्टव्य"इत्योर्दर्शनसमानाकारविधिपरत्वोक्तेश्चेद मपि दूषितममंस्त । समन्वयाधिकरण पूर्वपक्षेतु - परोक्त्यैव दूषयिष्यति " नच शब्दएव प्रत्यक्ष ज्ञानं जनयतीति वक्तुं- युक्तं, तस्यानिन्द्रियत्वा"दित्यादिना । अस्तुवा - कथंचिदापरोक्ष्यपरिशेषः । तथापि — प्रत्यक् पराङ्मुखत्वादि लक्षणविरुद्धव्याप्तयेन्द्रियपरित्यागे तुल्यन्यायतया वाक्यस्यापि परित्यागप्रसंगः ।

रस्तमित्यर्थः । भ्रमाननुवृत्तिरेव सत्यताध्यवसायशैथिल्यं तच्च परोक्षज्ञानान्तेति शंकते (परोक्षेति) (उक्तत्वादिति) प्रत्यक्षसिद्धेपि शुक्तेस्तत्वे विप्रलंभकवाक्या द्रजतधी रुदेत्येवे त्युक्तत्वादित्यर्थः । (अपरोक्षेपीति) भ्रान्तिरपीत्यन्वयः । (एतदिति)अपरोक्षज्ञानद्वारा एतदर्थस्य श्रवणाद्युपायस्योपदेशायोगात् । प्रत्यक्षपरिशेषमभ्युपगम्य वाक्यपरिशेषं दूषयति (अस्तु वेति) (प्रत्यगिति) आदिशब्देन मनस्यागहेतु स्सोहमित्यस्मिन्नर्थे ऽ स्वात्सन्त्वच : मनुमानपरित्यागहेतुरापरोक्ष्यविद्वेषित्वञ्चगृह्यते, प्रत्यक्पराङ्मुखत्वादिलक्षणेन साध्यविरुद्धेन व्याप्तयेत्यर्थः (तुल्येति) वाक्यस्या प्यापरोक्ष्य विद्वेषशीलत्वादि

दर्शना दर्शनाभ्यां विशेषइतिचेन्न, तदसिद्धेः । तत्सन्देहेपि न विरुद्ध व्याप्तिरिति चेन्न । इन्द्रियादिष्वपि प्रसंगात् , । अथ - सत्यामेव विरुद्धव्याप्तौ गत्यन्तराभावात् तदनादरेण वाक्यस्यापरोक्षधीहेतुत्वं कल्प्येत, हन्त तर्हि इन्द्रियादिष्वेव भक्तिरियं प्रयुज्यतां । तथाच- सिद्धे गत्यन्तरे किं वाक्येन । अयन्तु निर्णयः । विरुद्धव्याप्तिसद्भावो वा क्यस्यापि तथाभवेत् । असद्भावोयदिभवेत् समएव द्वयोरपि ॥ दश मस्त्वमसीत्यादौ भवेद्वाक्यात्परोक्षधीः । सामग्रयत्थापनात्पश्चा त्प्रत्य क्षादपरोक्षधीः ॥ नच - प्रत्यक्षादेरद्वैतगोचरत्वविरोधः, तेषामपि त्वद भिमतकूटयुक्तिभि स्तत्वमस्यादेरिवाद्वैतगोचरत्वस्थापनस्य शक्यत्वात् ।

यत्तु – प्रत्यक्षस्य न परोक्षात्परिभवइति । तदपि ज्वालैक्यबाधकभे दानुमानादिदर्शनेन निरस्तमेव ।

यदपि-ऐन्द्रियकप्रत्यक्षाच्छास्त्रजन्यप्रत्यक्षस्य प्राबल्यमुक्तं । तदप्यसत्, एकदोषप्रसूतत्वादेर्दर्शयिष्यमाणत्वात् । *प्रत्यक्षं ब्रह्म गृह्णाति यदिचब्रह्मद

त्यर्थः (दर्शनेति) दशमस्त्वमसीत्यत्र दृश्यतइति भावः (तदिति) अत्रा प्यपरोक्षजनकत्वदर्शनस्या सिद्धेरिति भावः (तदिति) दर्शन सन्देहेपीत्यर्थः । (इन्द्रियेति) मनसि प्रत्यक्पराङ्मुखत्व सन्देहान्न विरुद्धव्याप्तिनिश्चयः प्रत्यग्विषयस्य शब्दस्या परोक्षजनकत्व सन्दे हदशायां तुल्यन्यायस्य तद्विषयस्यानुमानस्यापि तथेत्यभिप्राये णादि- शब्दप्रयोगः (इन्द्रियादिष्वेवेति) वस्तुतः अपरोक्षधीसामर्थ्यस्य इ- न्द्रिये क्लृप्तत्वा त्तस्यैव प्रत्यक्षविषयत्वकल्पनं युक्तमितिभावः । दशमो ह मिति ज्ञानेऽपरोक्षत्वानुभवः कथमित्यत्राह (सामग्रीति) शब्दोपनी तं दशमत्वं मनसैव गृह्यतइति भावः । (तेषामिति) भेदवासनानिरा से यथावाक्यस्यापरोक्षज्ञानजनकत्वं कल्प्यते एव मिन्द्रियस्यैव कल्प्य तामित्यर्थः (तदपीति) परिभवोहि नार्थनिवृत्तिः नापि प्रतीतिनिवृत्ति रित्युक्तम्, अतोऽप्रामाण्यबुद्धिः परिभवः पर्यवस्यति, प्रकृते ज्वाला भेदानुमानेन ऐक्यप्रतीते [illegible]ाण्यबुद्धिरस्त्येवेत्यर्थः । भ्रमान्तरप्रति-

श्यता। अब्रह्मालम्बनत्वेतु कथन्न बलवत्तरम्॥ यत्पुनःअपरोक्षज्ञानस्य मोक्षहेतुत्वं श्रुतिसिद्धमिति। तावन्मात्राभ्युपगमेपि न नः काचित् क्षतिः।

यत्तु - शब्दादेव शब्दस्यापरोक्षधीहेतुत्वं दर्शितम्। तदपि हास्यं, अन्यपरत्वस्य आकुमारंप्रसिद्धेः, साक्षात्कारहेतोर्मनस रसहायतया दृढव्यवसायहेतुतामात्रेणवा तदुपपत्तेः। यथाश्रुतग्रहणेचक्षुष्ट्वादेरपि स्वीकर्तव्यत्वात्। "श्रुतिस्मृतीतु विप्राणां नयने द्वे" इतिहिश्रूयते। "वेदान्तविज्ञानसुनिश्चितार्था" इत्यादिषु परोक्षव्यवसायमात्रमेवोच्यते। यत्तु-विज्ञानमिति विशेषणेन विशेषविषयत्वासिद्ध्या निश्चयहेतुत्वे सिद्धेपि सुशब्देनविशेषणा दपरोक्षनिश्चयहेतुत्वं सिद्धमिति। तदप्यत्यन्तपरिहास्यं, अकम्पनीय व्यवसायविवक्षया सुशब्दप्रयोगात्। यःपुनःतत्वमस्यादिवाक्यजन्यज्ञानत्वादिति प्रयोगः,सतज्जन्यश्रावणज्ञानेनैकान्तिकः। अतिप्रसंगश्च - वाक्यान्तरेष्वप्येवं प्रयोक्तुं शक्यत्वात्। परिहारस्यच समत्वात्। विषयजन्येपुच व्याप्तेस्संकोचात्॥ नवाक्यजन्यताहेतुः प्रत्यक्षत्वेतु किं पुनः। अर्थजन्यत्वमेवस्यात्

बन्धः परिभवइतिचेन्न, सञ्जातेप्यपरोक्षेपीत्यादिना अपरोक्षबोधेपि भ्रमाद्यनुवृत्तेः प्रागेवदर्शितत्वात्। (कथन्निति) द्वैतविषयत्वा दविरोधा द्बलाबलचिन्तैव का इतिभावः। निश्चितपदेन निश्चयहेतुत्वे सिद्धेपि सुविशेषणं - विशेषविषयत्वार्थस्या दित्यत्राह (विज्ञानमिति विशेषणेन विशेषविषयत्वसिद्ध्येति) । (तज्जन्येति) श्रवणं - श्रोतव्यइति विहितं विवक्षितम्, ततो जातं- श्रावणं, प्राथमिकेपरोक्षज्ञाने व्यभिचारइत्यर्थः। अग्निहोत्रादिवाक्ये प्रयोगो प्रयोजकइत्यत्राह (परिहारस्यचेति) मिथ्यार्थनिवृत्त्या अपरोक्षज्ञानकल्पनस्य निरासादिति भावः। योगजधर्माद्यजन्य जन्यत्वावच्छिन्नसाक्षात्कारित्वव्यापकं विषयजन्यत्वमुपाधिश्चेत्याह (विषयेति) (नवाक्येति) प्रत्यक्षत्वेतु न वाक्यजन्यत्व, हेतुः - प्रयोजकः, किन्तु अर्थजन्यत्वमेव हेतुस्स्यात् ततश्चा

तत स्सोपाधिकस्त्वयं ॥ वाक्यविषयप्रत्यक्षेपिवाक्यस्यैवार्थत्वा दर्थजन्यत्वोपाधेः साध्यव्यापकत्वाविरोधः । यश्च- स्वप्रकाशार्थोपदेशरूपत्वात् स्वतः प्रत्यक्षार्थविषयत्वाद्वेति, सोपि पूर्ववदेवानैकान्तः । दृष्टान्तस्यच साध्यविकलत्वं दर्शितमेवेति ॥

प्रतिप्रयोगश्च। विगीतंवाक्यं नस्वार्थविषयप्रत्यक्षज्ञानजनकं- वाक्यत्वात्

यं सोपाधिकइत्यर्थः । किं याव त्तत्वमस्यादिवाक्यव्यक्तयः पक्षः, उतश्रवणाद्यनन्तरभाविव्यक्तिमात्रं ? आद्ये मननात्प्राथमिकव्यक्तःवंशतोबाध मभिप्रेत्य द्वितीये तत्रैव व्यभिचारमाह (सोपीति)(दृष्टान्तस्येति) स्वप्रकाशत्वस्य दशमत्वस्यचा स्वप्रकाशत्वात्, स्वतःप्रत्यक्षत्वाभावाच्चेतिभावः । (विगीतोमति)

नन्तु - साध्येस्वशब्दस्य जन्यपरत्वे तत्त्वमसिवाक्यार्थ विषय प्रत्यक्षस्याप्रसिद्धेः तज्जनकस्याप्रसिद्ध्यातद्भेदसाधनमनुपपन्नं, जनकपरत्वे कस्यापिवाक्यस्यस्वार्थगोचरप्रत्यक्षजनकत्वाभावात् प्रतियोग्यप्रसिद्ध्या तद्भेदसाधनमनुपपन्नं, स्वार्थशब्देनस्वजन्यज्ञानविषयत्वं विवक्षित्वा इन्द्रियेप्रतियोगिप्रसिद्ध्युपपादानेबाधः,स्वस्यैवस्वजन्यश्रावणज्ञानविषयतयास्वार्थत्वात् विषयतयास्वगोचरज्ञानजनकत्ध्ाच्च । स्वार्थशब्देन भिन्नत्वमात्रं विवक्षित्वा स्वभिन्नविषयप्रत्यक्षजनकं नभवतीत्युक्तौ बाधोदृष्टान्तासिद्धिश्च, स्वजन्यश्रावणज्ञानस्य तकारत्वादिविषयत्वात । नन्वस्तु स्वशब्दोभिन्नपरएव, नच-तत्त्वमसिवाक्यार्थप्रत्यक्षाप्रसिद्धिः ; घटादिगोचरप्रत्यक्षस्यैव प्रमेयत्वसामान्यलक्षणप्रत्यासक्तिजन्यस्य तत्त्वमसिवाक्यार्थ गोचरत्वादितिचेन्न । बाधादेवतत्वमसिवाक्यगोचरसामान्यलक्षण प्रत्यासक्तिजन्यज्ञानस्यापि तत्वमसिवाक्यार्थगोचरतया वाक्यस्य तत्र जनकत्वात् । नच - सामान्यप्रत्यासत्तिजन्यज्ञानेसन्निहितविषयप्रतियोगिकलौकिकप्रत्यासत्ते र्जनकत्वाभावा न्नतस्य प्रत्यासत्तिद्वारकं जनकत्वमितिवाच्यं । सन्निकृष्टविषयांशे लौकिकप्रत्यासक्तेर्विद्यमानतया तस्याजनकत्वस्या ऽवर्जनीयत्वात् । नद्यगतिबद्धा सामग्रीकार्यन्नजनयमीतिकेनापिवक्तुंशक्यं, कस्यचित्

प्रतिबन्धकत्वकल्पनेच न किञ्चित्प्रमाणमस्ति । अस्तुतर्हि जनकपरमेव, नच - प्रतियोग्यप्रसिद्ध्यासाध्याप्रसिद्धिः, शब्दोवर्त्ततइति वाक्येस्वार्थविषयप्रत्यक्षजनकत्वस्य प्रसिद्धत्वादितिचेत्, न, तत्रैव-व्यभिचारात् । अस्तुतर्हिस्वजन्यज्ञानविषयप्रत्यक्षजनकत्वाभावस्सा-ध्यः, इन्द्रियेच प्रतियोगिप्रसिद्धिः, नचबाधः, विषयतातिरिक्तरू-पेण स्वजन्यत्वस्य विवक्षितत्वात्, वाक्यप्रत्यक्षस्य विषयतारूपेणै-व तज्जन्यत्वात्, स्वकरणकत्वंवा स्वजन्यत्वमिहविवक्षितमितिचेन्न । शब्दोवर्त्ततइत्यत्र व्यभिचारात् । अस्तुतर्हि स्वभिन्नविषयप्रत्यक्ष-जनकत्वाभावः, नच- तकारत्वादि प्रत्यक्षजनकत्वात् बाधः, स्व-गोचर प्रत्यक्षाविषयत्वस्य स्वभिन्नविशेषणत्वात्, यद्यप्येवं ने-न्द्रिये प्रतियोगिप्रसिद्धिः, तथापि शब्दस्पर्शादिप्रत्यक्षजनकेशरी-रेप्रसिद्धिरितिचेन्न । सर्वस्यापि शरीरादिविषययोगिप्रत्यक्षादिविषयत्वेना प्रसिद्धेरिति ।

उच्यते - साध्येस्वपदंभिन्नपरमस्तु, साध्यप्रसिद्धिश्च, सामान्यप्र त्यासत्त्या सर्वविषय प्रत्यक्षजनकेन्द्रिये । नचोक्तबाधः, स्वार्थवि षयत्वावच्छेदेन प्रत्यक्षजनकभेदस्य साध्यत्वात्, इन्द्रियस्य प्रत्यास-त्तिभूतसामान्याश्रयसर्वविषयावच्छेदेन प्रत्यक्षजनकत्वात्, विषयस्य च-स्वविषयतावच्छेदेनैव विषयतयाजनकत्वात् । न च - शब्दोवर्त्ततइत्यत्र व्यभिचारः, स्वागोचरवृत्तिकवाक्यत्वस्य हेतुत्वात्, शब्दावर्त्ततइत्यस्य स्वगोचरवृत्तित्वात । अस्तुवास्वपदं जनकपरं, नचोक्तव्यभिचारः, पूर्वव देवहेतुविशेषणात् । अस्तुवाविषयतानवच्छिन्न स्ववृत्तिकारणतानिरूपि-तजन्यताश्रयज्ञानविषयप्रत्यक्षजनकत्वाभावस्साध्यः-प्राग्वदेवहेतुविशेष-णाच्चन पूर्वोक्तव्यभिचारः । अस्तुवास्वकरणकत्वंस्वजन्यत्वं, नच पूर्वोक्त व्यभिचारः,ज्ञानप्रत्यक्षपदव्यत्यासेन स्वकरणक प्रत्यक्षविषयकज्ञानजनकभे दस्य साध्यत्वात् । अस्तुवा स्वगोचरप्रत्यक्षाविषय स्वभिन्नविषयप्रत्यक्ष जनकत्वाभावः, शरीरादौच प्रतियोगिप्रसिरुक्ता, नच - सर्वस्य शरी रादिविषययोगिप्रत्यक्षादिविषयत्वात् साध्याप्रसिद्धिः, योगजधर्मा-जन्यत्वेन स्वगोचरप्रत्यक्षविशेषणात् । अत्रच साध्येवाक्यत्वादित्येव हेतुरिति । प्रत्यक्षकरणं नभवतीतिवा, विषयतातिरिक्तरूपेण प्रत्यक्षज

ज्योतिष्टोमादिवाक्यवत् । तथा-विगीताधीः न स्वविषये प्रत्यक्षा-वाक्यजन्यत्वेसति वाक्येतरविषयत्वात् स्वर्गयागादिसंबन्ध बुद्धिवत् । नचात्रश्रुतिविरुद्धतयाकालात्ययापदेशः, श्रुतेरन्यपरत्वस्थापनात् । नच-दशमस्त्वमसीत्यादि वाक्येन तज्जन्यज्ञानेनवा नैकान्तिकता, तत्र साक्षात्कारप्रसंगस्यापि निषिद्धत्वात । नच- पूर्वैरेव हेतुभिस्सप्रतिसाधनता, उपलंभानुरोधेना नतिप्रसंजकव्याप्तिमूलतया प्रबलत्वात, समत्वेपि प्रकरणसमत्वापादनदशायामन्योन्यप्रतिरोधस्येष्टत्वेन तत्प्रसंगानुपपत्तेश्च । न च- विपक्षे बाधकविरहादप्रयोजकता, अविशेषात्, शब्दान्तराणामपि प्रत्यक्षज्ञानजनकत्वस्य बाधकस्यच सत्वात् । नचाप्रत्यक्षार्थविषयतयातेषां तदनुत्पादकत्वमिति वाच्यं । तथाप्ययंवटः दशमोय मित्यादिवाक्यानां

नकं न भवतीतिवा, प्रत्यक्षजनकतावच्छेदक विषयतातिरिक्तयावत स्ववृत्तिधर्मकमिति वा साध्यम् । अत्र चरमसाध्येविषयतातिरिक्तपदं-बाधव्यभिचारवारणाय । एवंच स्वतोपरोक्षार्थविषयत्वादे रनवच्छेदकत्वसिद्धचेष्टसिद्धिःएतेषुत्रिष्वपि साध्येषु वाक्यत्वादित्येव हेतुरिति । (विगीतेति) तत्त्वमस्यादिवाक्यजन्यातद्गोचराधीः पक्षः । स्वप्रकाशतया स्वांशे प्रत्यक्षत्वात् बाधवारणाय साध्ये स्वविषयइत्युक्तम् । वाक्येतिघटप्रत्यक्षे व्यभिचारवारणाय विशेषणं । वाक्यप्रत्यक्षवारणाय विशेष्यं । वाक्येतरपदं - वाक्यतरमात्रपरं । तेन वाक्यजन्यत्वे सातिवाक्याविषयत्वपर्यवसानं (अनतिप्रसंजकेति) अग्निहोत्रादिवाक्येष्वस्य परोक्षधीजनकत्वस्य तन्नयेन संभवाद्यथातत्त्वमस्यादिवाक्यजन्यज्ञानत्वेनापरोक्षधीजनकत्वसाधने तिप्रसंगः नतथास्मदुक्तव्याप्ताविति बलवत्त्वमिति भावः । (समत्वेपीति)स्थापनानुमानस्यहि प्रतिरोधो दोषः प्रत्यनुमानस्य तु स्थापनाप्रतिबन्धैकफलत्वान्न प्रतिरोधो दोष इत्यर्थः । वस्तुतोत्स्यैव विपक्षे बाधकमित्याह (नचेति) (अविशेषादिति) ज्योतिष्टोमादिवाक्य व्यावृत्ता वान्तरोपाधे रभावा दित्यर्थः ॥ प्रत्यक्षार्थविषयत्वं तत्त्वमस्यादिवाक्यस्य विशेषः, ज्योतिष्टोमादिवाक्येतु

तत्प्रसंगात्। नचेहभवता शब्दस्य साक्षात्कारहेतुत्वमिष्यते। इष्यतांवा। तथापि ज्योतिष्टोमादिवाक्यानां तत्प्रसंगोदुर्वारः। तत्रापि मनस्सहकृतशब्देनैव प्रत्यक्षज्ञानं जायतइति साहसस्य सुशकत्वात्, तावतैव तेषां प्रत्यक्षार्थविषयत्वस्यापिसिद्धे स्वांतरविशेषा निर्धारणादिति। अस्तुवा विपक्षेबाधकाभावः। सतुपूर्वेषामपि समानइति। तथापि प्रतिरोधमात्रंसिद्धं। नन्वस्ति पूर्वेषां विपक्षेबाधकं आत्मविज्ञानस्य मोक्षसाधनत्व श्रुत्यन्यथानुपपत्तिः, तथाहि- श्रुत्युपपत्तिभ्यांवाक्यार्थज्ञानादेवमिथ्याभूतसंसारनिवृत्तिरितिस्थिते प्रत्यक्षस्यभ्रमस्य परोक्षबाध्यत्वायोगेन प्रत्यक्षपरिशेषे ब्रह्मणिच सकलकरणागोचरे अनुमानादिषु च साक्षात्कारवैदेशिकेषु यदिवाक्यादप्यपरोक्षज्ञानं नस्यात्, अपवर्गोपि नस्यादेवेति। इदमपि दण्डवातसूदितदर्वीकरनर्त्तनं अस्याः परिपाटिकायाः आरंभएव निरस्तत्वात्। यः पुनरसावूहः —अपरोक्षत्वं तत्त्वमस्यादिवाक्यजन्यज्ञानवृत्ति - अपरोक्षनिष्ठात्यताभावाप्रतियोगित्वात् ज्ञानत्ववदिति। अत्रतावत् द्वास्थस्वरूपजन्यतद्विषयश्रावणसाक्षात्कारेण सिद्धसाधनता, प्रत्यक्षज्ञानहेतावींद्रियार्थसन्निकर्षे अर्थस्येन्द्रियस्यच तुल्यकक्ष्यत्वात्। अथ

तदभावान्नातिप्रसंगइत्यत्राह (नचेति) ननु कथं ज्योतिष्टोमादिवाक्ये तत्प्रसंगः अपरोक्षार्थ विषयत्वरूप प्रयोजकस्य तत्राभावा दित्यत्राह (तत्रापीति) अपरोक्षार्थ विषयत्वंहि अपरोक्षज्ञानविषयार्थ विषयत्वं, तथाचा परोक्षज्ञाने आपाद्यमाने ऽपरोक्षार्थविषयत्वमपि सहैवापादितंभवतीति तावान्तरविशेषइत्यर्थः। पूर्वेषां – त्वदनुमानानाम्। इहतुशब्देनार्थापत्तिरेव विपक्षबाधिकेत्युक्तश्रुत्याभ्यनिराकरोति। नन्वित्यादिना(वाक्यार्थज्ञानादिति) वाक्यार्थः-ब्रह्म, तज्ज्ञानादित्यर्थः, नतु वाक्यजन्यं विज्ञानं विवक्षितम्, उत्तरत्रब्रह्मणिचेत्यादिना करणपरिशेषात्। प्रत्यक्षस्य विषयजन्यत्वमुपपादयति (प्रत्यक्षेति) (अथेति) तत्त्वमस्यादिवाक्यस्या परोक्षज्ञानजनकत्वरूपोद्देश्यासिद्ध्यर्थं, ईश्वरयोगि प्रत्यक्षवृत्तितया सिद्धसाधनवारणार्थं च, साध्ये (तत्त्वमस्यादि

पुनस्तत्त्वमस्यादिवाक्यजन्यतदर्थविषयज्ञानवृत्तीति-साध्यंविशेष्येत,तथापि परोक्षतद्वाक्यार्थानुभवसंस्कारसहकृतश्रवणजन्यतदर्थप्रतिपादकत्व विशिष्टवाक्यस्वरूपसाक्षात्कारेणसिद्धसाधनतैव, सहिप्रत्यभिज्ञात्मा विशेषणतया अर्थंविशेष्य तथा वाक्यञ्चविषयीकरोति । अथतदर्थैकविषयकज्ञानवृत्तीति विशेषयसि । तथापि ब्रह्मेतरविषयत्वधर्मेण हेतोरनैकांतिकता । तत्खलुसंप्रतिपन्नेष्वपरोक्षेपुसर्वेष्वपि वर्त्तते, नपुनस्संशयत्वविपर्ययत्व चाक्षुषत्वादिवत् कुतश्चिदपरोक्षान्निवर्त्तते, तत्त्वमस्यादिवाक्यजन्येतुज्ञाने नैववर्तते। तत्त्वमस्यादिवाक्यव्यतिरिक्तजन्योपिब्रह्मसाक्षात्कारोस्तीतिचेत्, हंततर्हिवाक्यैकपरिशेषप्रयासंविस्मृतवानसि । तथासति वाक्यजन्यसाक्षात्कारकल्पनावैय्यर्थ्यंच, तत एव तत्कार्यसिद्धेः । यत्तु—परोक्षत्वं तत्त्वमस्यादिवाक्यजन्यज्ञान वृत्तीति त्यनुमाने सिद्धसाधनत्वमुक्तं। तत्र यदितत्त्वमस्यादिवाक्यजन्यज्ञानाभ्यापीति प्रयुंजीत, तदाकिंब्रूयाः। श्रुतिविरोधात् कालात्ययापदेशमेव ब्रूम इति चेत, हन्ताद्यापित्वयाश्रुति स्तपस्विनी कूटसाक्षिणी कल्प्यते । सातु यथार्थवादिनी न किञ्चित्त्वदभिमतं ब्रवीति । यत्तु - अपरोक्षत्वं ज्योतिष्टोमादिवाक्यजन्य ज्ञानवृत्तीति-

---

वाक्यजन्येति) (अथेति) तत्त्वमस्यादिवाक्यजन्यतदर्थमात्रविषयज्ञानवृत्तीत्यर्थः । सिद्धान्तेतत्त्वमसिवाक्यजन्यशाब्दानुभवसंस्कार सहकृत मनोजन्येसोहमितिप्रत्यक्षेसत्वेन सिद्धसाधनवारणार्थं, पूर्ववदुद्देश्यसिद्ध्यर्थंच,तत्वमसिवाक्यजन्येति विशेषणं। (तथापीति) ब्रह्मेतरविषयत्वे साध्याभावस्य निश्चितत्वा द्धेतोस्संदिग्धत्वात् सन्दिग्धानैकान्त्यमित्यर्थः । नच-अनुपदोक्तेमानसे सोहमस्मीति प्रत्यक्षे व्यतिरेकनिश्चयात्रसन्दिग्धानैकान्त्यमितिवाच्यम् । परमतेमनसोप्रमाणत्वात् तन्मतेनैवास्योक्तत्वात् । यद्वा तत्त्वमस्यादिवाक्यजन्यज्ञानान्यज्ञानत्वं वा विवक्षितं । (तत्त्वमस्यादिवाक्येति) वाक्यातिरिक्तजन्यस्यापि ब्रह्मसाक्षात्कारस्य सत्वात् , ब्रह्मेतरविषयत्वस्यच तत्राभावाद्धेत्वभावादेव न व्यभिचारइत्यर्थः । (अद्यापीति) श्रुतेरान्यपर्यस्योक्तत्वेपीत्यर्थः ।

प्रतिबन्ध्यनुमाने विपक्षे बाधकाभावाद्वैफल्यमुक्तं, तदत्रापि समानमेव । अर्थापत्तेः कल्पकासिद्ध्यादिनिरस्तत्वात् । परोक्षादपि ज्ञानात् प्रत्यक्षोपमर्दादेः प्रागेव समर्थितत्वात् । प्रत्यक्षापेक्षायामपि तत्त्वमस्यादिवाक्यव्यतिरिक्तजन्येनापि प्रत्यक्षेण बाधोपपत्त्या वन्यथासिद्धेः । अस्तिच योगिप्रत्यक्ष मदृष्टविशेषसहकृतान्तःकरणजन्यं आगमसमधिगम्यमास्तिकानां ।। श्रूयतेहि रामायणे ।। "रहस्यंच प्रकाशंच यद्वृत्तं तस्य धीमतः । तत्सर्वं धर्म वीर्येण यथावत्संप्रपश्यती" ति ।। यत्तु भाष्ये दर्शनसमानाकारत्वमुच्यते । तन्मोक्षसाधनभूताया ध्रुवानुस्मृतेरेव । नपुन र्धर्मवीर्यफलभूत योगिप्रत्यक्षं निषिध्यते तस्यापि श्रुतत्वात् । त्वदभिमतस्यतु श्रुतत्वं प्रतिक्षिप्तमिति तस्यैवासंभवः । यद्यपि - योगिप्रत्यक्षं फलमात्रमित्यस्मन्मतं, तथापि तदधीनायाः परिशेषासिद्धेरन्यथासिद्धेश्चोपन्यासो नानुपपन्नः । "क्लृप्तकल्प्य

(श्रूयतेहीति) "दर्शयतिभगवान् सनत्कुमार" इत्यत्र वाक्यरूपकारणस्य विवक्षितत्वात्, चाक्षुषज्ञानमुख्यस्य दृशेस्त्वत्रामुख्यत्वात्, क्लृप्तशब्दप्रमाणशक्त्यनुरोधेन परोक्षज्ञानएव दर्शनवदनेक विशेषविशिष्टावगाहनरूपगुणयोगाद्वृत्तिः । इहतुकरणान्तरासम्भवात् धर्मवीर्यस्य च पृथक्करणत्वेगौरवा न्मनस्सहकारित्वेनोपपत्ते स्संस्काराजन्यत्वेन स्मृतित्वाभावात् पश्यतेश्च दर्शनवाचिनस्साहश्यातिशयेन प्रत्यक्षत्वमुखेन लक्षणौचित्याञ्च संप्रपश्यतीत्यनेन प्रत्यक्षत्वसिद्धिरित्यर्थः । (मोक्षसाधनेति) 'स्मृतिलम्भेसर्वग्रन्थीनाम् विप्रमोक्ष' इति श्रुत्यनुसारात्तथोक्तमितिभावः । 'तस्मिन्दृष्टेपरावर' इत्यपिश्रूयत इतिचेन्न - प्रत्यक्षपरत्वेपि लक्षणयावाच्यत्वेन 'स्मृतिलंभ' इत्यव्यवहित साधनत्वस्वारस्यानुरोधेन दृशेर्दर्शनसमानाकारपरत्वौचित्यात् । ननु त्वन्मते योगिप्रत्यक्षस्य बन्धनिवर्तकत्वाभावात् कथं तेनान्यथासिद्धिरित्यत्राह (यद्यपीति) तन्मतेमिथ्याभूतबन्धस्यापरोक्षज्ञाननिवर्त्यत्वात्, योगिप्रत्यक्षमादायान्यथा सिद्धिस्स्यादेवेत्यर्थः

विरोधेतु युक्तः क्लृप्तपरिग्रह " इति न्यायात् । यदिच - यत्किंचि द्विपक्षे बाधकमित्यभिमानमात्रेण परिगृह्यानुमिनोषि । तदा - ज्यो तिष्टोमादिवाक्येपि भवादृशः कोपि तथा तदभिमत्या अनु मिनुयादेव । एवं सिद्धसाधनत्वा नैकान्तिकत्वा तिप्रसंजकत्वा भास सामानयोगक्षेमत्वान्यथासिद्धत्वादि दोषदूषितत्वा दनुमानाविरोधो त्प्रेक्षक्षणमेव निपुणधियां सिसाधयिषितस्य प्रामाणिकत्वा नुमिति मन्तर्गतां सूचयति । अतएवास्मिन्नर्थे महाविद्यादिप्रयोगा न्तरमनोरथोपि भग्नः । यत्तु - शब्दस्य प्रत्यक्षांतर्भावप्रसंगे- स्वतो परोक्षब्रह्मात्मविषयशब्दान्यत्वेसति अपरोक्षप्रमिति कारणत्वं- प्रत्यक्षान्तर्भावप्रयोजकमित्युक्तं , तत् तत्त्वमस्यादेरपरोक्षधीजनकत्वे वक्तव्यम् तत्तु नाद्यापि सिद्ध्यतीति तत्प्रसंगो दुर्वारः । तदे वं वाक्यजन्यसाक्षात्कारासिद्धेः परिशेषा त्तज्जन्यपरोक्षज्ञानेनैवाप्र- तिबद्धसामग्रीसमुद्भवेन बाधइति स्थितौ श्रवणादिविधिनैरर्थक्यं प्रागुक्तं सुस्थितमेव । ततश्च श्रुतवेदान्तानां संसारानुवृत्तिदर्शनविरोधो दुर्वारः । बाधितानुवृत्तिस्तु बाधिता जीवन्मुक्तिंच विस्तरेण दूषयिष्यामः ।

ननु अलौकिकप्रत्यक्षस्य प्रत्यक्षभ्रमानिवर्तकत्वा न्न योगिप्रत्यक्षे- णान्यथा सिद्धिरितिचेत्, तर्हि - लौकिकसन्निकर्षजन्यप्रत्यक्षस्यैव भ्रमनि- वर्तकतया शाब्दप्रत्यक्षकल्पनानुपपत्तेः, अलौकिकसन्निकर्षाजन्य प्रत्यक्ष- स्य भ्रमनिवर्तकत्वे गौरवात् (तत्त्विति)अन्यत्रप्रत्यक्षान्तर्भाव प्रयोजकत्वेन- क्लृप्तस्य प्रत्यक्षकरणत्वस्य शब्देपि सत्वात् प्रत्यक्षान्तर्भावस्स्यात्, नच - अन्यत्रब्रह्मात्मविषयशब्दान्यत्वं तत्प्रयोजकत्वेन क्लृप्तं, तत्त्वमस्या- दिवाक्यस्यापरोक्षधीजनकत्वस्याद्याप्यसिद्धेरित्यर्थः ।

यदाह नवीनः-आत्मातावत् स्वतोपरोक्षः "यत्साक्षादपरोक्षा" दिति श्रुतेः, तत्रसाक्षादितिज्ञान क्रियाव्यवधानस्य निषिद्धत्वात । घटादिकंचा- परोक्षात्मन्यध्यस्तमिति सएव तदपरोक्षता, तदपरोक्षानुभवस्य तत्सत्ता- नुभावस्येच तदधिष्ठानात्मगोचरत्वात् । तर्हि सत्वमिवघटादेरपरोक्षत्वमपि

सर्वदास्यादिति चेत्, न, प्रमातृचैतन्यतादात्म्यस्य सर्वदा असत्वात्। अतएव देवदत्तस्यापरोक्षतादशायां सर्वस्यापि घटादिरपरोक्षस्स्यादिति निरस्तम्। तदवच्छिन्नचैतन्यस्य अन्यं प्रतिभिन्नत्वात्। अतएव घटापरोक्षत्व दशायां रसगुरुत्वादिक मप्यपरोक्षं स्यादिति निरस्तं। चक्षुर्जन्यवृत्तेरसाद्यवच्छिन्नचैतन्यानभिव्यञ्जकत्वात्। तज्जन्याया एव वृत्ते स्तदपरोक्षता व्यंजकत्वात्। सुखाद्यवच्छिन्नचैतन्यं च वृत्तिविनैवाभिव्यक्तं, तस्यानावृतसाक्ष्यध्यासात्। तर्हि - धर्माधिकम प्यपरोक्षं स्यादितिचेत्, न, तस्यानुद्भूततया ऽप्रत्यक्षत्वात् स्वरूपविशेषस्य परमतइव तत्राप्यपेक्षितत्वात्। यथा संयुक्तसमवाये सत्यपि धर्मादेरपरोक्षज्ञानजनकत्वं, एव मस्मन्मते तस्यापरोक्षता ऽनभिव्यंजकत्वात्। तस्माज्जडमुद्भूतं यदायदभिन्नचैतन्याभिन्नं तत्तदा तस्या परोक्ष तादात्म्यात् भवत्यपरोक्षं। ज्ञानापरोक्षत्वन्तु चैतन्यस्य स्व रूपेणैव, वृत्ते स्त्वपरोक्षार्थ विषयत्वं। नच - अपरोक्षार्थ विषयत्वमेव ज्ञानस्यापरोक्षत्वं चैतन्य वृत्ति साधारणमिति वाच्यम्, चैतन्यस्य - सुखसाक्षात्कारत्वाभाव प्रसंगात्। अतएवा नुमित्यादिर्नापरोक्षः लिंगादिजन्य वृत्त्यभिव्यक्त चैतन्यस्यार्थभिन्नत्वात्। नच - योगिप्रत्यक्ष स्याप्रत्यक्षत्वप्रसंगः। तस्याप्युद्भूतविद्यमानार्थें व्यवहितेपि चक्षुरादिसंप्रयोग संभवेन विषय चैतन्याभिव्यक्तेस्सत्वात्। अविद्यमानेऽनु द्भूते नतज्ज्ञानं प्रत्यक्षं। किन्तु - योगाराधितपरमेश्वरोपदेशजन्यं परोक्षम्। अतएव योगिनां व्यवहितार्थज्ञाने ध्यानादिक मर्थवद्भवति। धर्मविशेषजन्य ज्ञानाभासोवा। नन्वेवं - अपरोक्षार्थविषयानुमितेरप्यपरोक्षत्वं स्यादितिचेत्, सत्यं, ज्ञानवत्तस्याअप्य परोक्षविषयिण्या अपरोक्षत्वात। अतएव पर्वतांशेऽनुमितिस्साक्षात्करोमीत्यनुभूयते - नन्वेवं - अहंकाराद्यतिरिक्तात्मानुमिति रप्यपरोक्षास्यादिति चेत्, यद्य प्यपरोक्षार्थविषयत्वमापाद्यते, तस्यार्थः आनुमिति विषयस्य साक्षात्करोमी त्यनुभवविषयत्वं, तदस्यैव, चैतन्यं साक्षात्करोमीत्यनुभवात्। नचैवं - अनुमितेरपि साक्षात्कारतया ऽनुभवप्रसंगः। अपरोक्षार्थ विषयकज्ञानत्वस्या प्यनुभूयमानत्वात् घटादिविषयेन्द्रियजन्यज्ञानेष्वपि तोतिरिक्तसाक्षात्कारताननुभवात्। नचैवमनुमित्याप्यविद्या निवृत्तिप्र

संगः । देहातिरिक्तात्मानुमिति गोचरसाक्षिविषयाज्ञानाभावात् पूर्णब्र-ह्मविषयाज्ञानस्य भिन्नविषयानुमित्या निवृत्त्यसम्भवात् । शुद्धे सत्य ज्ञानानन्दात्मके ब्रह्मणि नियमेन पक्षसाध्यादि वैशिष्ट्य विषयानुमिति र्नसंभवत्येव । तत्त्वमस्यादिवाक्य सन्निधावेव " तस्य तावदेव चिरं यावन्नवि मोक्ष्य " इति श्रवणेन" वेदान्तविज्ञान सुनिश्चितार्था " इति-वचनेनच श्रुतिजन्यज्ञानस्यैव मुक्तिसाधनत्वावगमात् । नचैवं - आत्मानुमतेरपि प्रत्यक्षप्रमात्वेन व्यवहारप्रसङ्गः प्रत्यक्षव्यवहारस्येन्द्रि-यजन्यमात्रगोचरत्वात्। नच-चक्षुरादाविवापरोक्षप्रमाणव्यवहारापत्तिः । अत्मानुमानं ह्यन्यत स्सिद्धापरोक्षताविशिष्टार्थविषयतया दैवादपरोक्षं नत्व र्थस्यापरोक्षताया निमित्तं । चक्षुरादिकंत्वर्था परोक्षतायां प्रयोजकमित्यनेनैव विशेषणतन्मात्रगोचरोपरोक्ष व्यवहारः । तस्मात् तत्त्वमस्यादि वाक्यजन्यज्ञानं न परोक्षं-अपरोक्षार्थविषयत्वात् चाक्षुषज्ञानवत् । तत्त्वमसि वाक्यार्थ विषयज्ञानमपरोक्षं-अविद्यानिवर्त्तकत्वात् संप्रतिपन्नवत् । नचेन्द्रियजन्यत्वमुपाधिः, त्वदभिमताजन्यप्रत्यक्षे सुखादि प्रत्यक्षे दशमस्त्वमसीति ज्ञानेच साध्याव्यपकत्वात् । नच जन्यज्ञानस्य परोक्षत्वाभावे इन्द्रियजन्यत्व मुपधिः, जन्यज्ञानापरोक्षत्वे लिंगजन्यत्ववत्तस्याप्यप्रयोजकत्वात्, अपरोक्षार्थविषयस्यैववृत्तावपरोक्षतारूपत्वेन तस्यापरोक्षत्वाभावव्याप्तेश्च । अत एवनशब्दाजन्यत्वमुपाधिः । अन्यथा तत्त्वमसिवाक्या दपरोक्षज्ञानाभावे अविद्यानिवृत्त्यभावादनिर्मोक्षप्रसंगाच्चेति ।

अत्रोच्यते - अस्तितावल्लोके ज्ञानार्थयो रपरोक्षत्व व्यवहारः, तत्रयद्यर्थगत मपरोक्षत्वं तद्विषयत्व निबन्धन एवज्ञानेतद्व्यवहार इत्युच्यते, तदादेवदत्तेन साक्षात्क्रियमाण घटविषयकशाब्दं ज्ञानं यज्ञदत्तस्य जाते तदुभयवेदिन श्शाब्दज्ञाने अपरोक्षव्यवहार प्रसंगः । स्वाश्रयं प्रत्यपरोक्षार्थ विषयत्व निबन्धनो ज्ञानेऽप्रत्यक्षत्वव्यवहार इतिचेत्, स्वाश्रयं प्रतीत्यत्र विवक्षितं स्वाश्रयप्रति संबन्धित्वं,किं स्वाश्रयाभिन्नत्वं,अन्यद्वा? नाद्यः, लौकिकानां प्रमात्रर्थयोर्भेद प्रतीतावपि, ज्ञाने अपरोक्षव्यवहारात् । नद्वितीयः, अनिर्वचनात् । स्वाश्रय संबन्ध्यपरोक्षभिन्नत्वंतदिति चेन्न , मदीयत्वेनभासमानस्य वृत्त्यवच्छिन्नापरोक्ष चैतन्यस्य विषया द्भेदस्यैव प्रतीतेः । तस्मात् स्वाश्रयसंबन्ध्य

परोक्षप्रतीति विषयत्वमेव तदितिवाच्यम् । तथाच ज्ञानगतमापरोक्ष्यं अर्थेतुतान्निबन्धनं वाच्यं । किंच- ज्ञानापरोक्ष्य पक्षे तद्विषयत्वमात्र मेवार्थाप रोक्ष्यं । अर्थापरोक्ष्यपक्षे तु उक्तप्रकारेणार्था परोक्ष्यं निर्वाच्यमितिगौरवं ।

यदुक्तं-अपरोक्षत्वं ज्ञानगतं जात्यादिरूपं वक्तुमशक्यमित्यर्थ मुखमेव ज्ञानेतद्वाच्य मिति । तन्न– अर्थेपि निर्वक्तुमशक्यत्वात् । नहि ब्रह्मणि संवित्त्वातिरिक्तमपरोक्षत्वं किंचिद्वक्तुं शक्यं, यत्सत्वमिव तत्तादात्म्या दन्यत्रप्रतीयेत ! संवित्त्वंतु नापरोक्षत्वं, घटो नसंविदिति भेदप्रतीता वपि घटोपरोक्ष इति व्यवहारात् । यदिच- व्यवहारबलात विशिष्यानि रुक्तमपि किंचिदर्थेऽङ्गीक्रियते, तर्हि ज्ञानएव तदिष्यतां ॥

ननु-यदिप्रत्यक्षज्ञान विषयत्वाद्विषये प्रत्यक्षत्वव्यवहारः, तदासामान्य ज्ञान विषयत्वात् परमाणुरपरोक्षइति व्यवहारापत्तिः,शब्देन काशीस्थपदार्थं जानतःकाशीस्थपदार्थं जानामीत्यनुभवतः काशीस्थः पदार्थोऽपरोक्ष इत्यनु भवप्रसंगः,अन्धस्य शाब्दंशौक्ल्यानुभवमनुभवतश्शौक्ल्य मपरोक्षमित्यनुभ वापातः,तथा-दण्डश्चयमासीदित्यनुभवेदेवदत्तेदण्डो ममेदानी मपरोक्षइतिव्य वहारप्रसंगइति चेत,नतावत्परमाणा वपरोक्ष्यव्यवहारापत्तिः । लौकिकै स्तज्ज्ञानस्य सन्निहितव्यक्त्यतिरिक्तपरमाण्वादि विषयत्वापरिज्ञाना त् , तत्परिज्ञातॄणान्तु विदुषां भवत्येव व्यवहारः । नापि काशीस्थः पदार्थो ऽपरोक्षइतिवा, शौक्ल्यमपरोक्षमितिवानुभव प्रसंगः । ज्ञानस्य स्व यं प्रकाशतया तदनुव्यवसायाभावेन ज्ञानस्य तत्राप्रत्यासक्तित्वात् । प्रत्यासक्तिपक्षेऽपि तदंशे प्रत्यक्षत्वव्यंजकस्य तदंशे प्रत्यासत्तिजन्यत्व स्याज्ञानात । अतएव दण्डांशेपि न प्रत्यक्षत्वव्ययहारः । किंच - त वापि प्रत्यक्षज्ञानविषयत्वस्य सत्वाद्दण्डं चाक्षुषाजानामि प्रत्यक्षेण जानामीत्यनुभवस्स्यात् । यदिचेष्टापत्तिस्तदास्माकमपितुल्यं । देवदत्तः प्रत्यक्षः दण्डस्तु नेति व्यवहारोपि तदंशे प्रत्यासक्तिजन्यत्वस्य व्यंजकस्याज्ञानात् देवदत्तवत्स्वतन्त्रप्रत्यक्षाविषयत्वाभावाद्वा देवद त्तं विहाय दण्डस्याप्रत्यक्षत्वात् । किंच – चाक्षुषत्वं यदि – च क्षुर्जन्यज्ञानविषयत्वं स्यात , तदा दण्डेपि तत्सत्वाद्दण्डो ममे दा- नीं चाक्षुषइति व्यवहारापत्तेश्चाक्षुषत्व मप्यपरोक्षवत् ज्ञाननिबन्धनमेवा

र्थगतं स्वीकार्यं स्यात् । किंच – वन्हिमनुमिनोमीतिवत् पर्वतमनुमिनोमी त्यव्यवहारात् अनुमेयत्वमप्यनुमिति विषयत्वा दन्यत्स्यात् । तस्मात् ज्ञानगतमेवाऽपरोक्ष्यं , " यत्साक्षादिति " श्रुतिस्तु स्वप्रकाशतादिपरत्वेनाप्युपपन्ना, साक्षादिति - घटादाविव ज्ञानान्तराधीन साक्षात्त्वस्य निषेधसंभवात् । किंच - यदि सत्तानुभवइव परोक्षत्वानुभवोपि तदधिष्ठानात्मगोचरस्स्यात, तदा सत्ववदपरोक्षत्वमपि निष्प्रतियोगिकं स्यात् । अतः – किंचित् प्रति कदाचिदपरोक्षं किंचित् प्रति कदाचिन्नेति न स्यात । यदप्युक्तं– अपरोक्षार्थ विषयत्वं वृत्ते रपरोक्षत्वमिति । तत्रापरोक्षत्वमित्यस्य अपरोक्षव्यवहारनिमित्तमित्यर्थः । तथाच – प्रत्यक्षव्यवहारस्य इन्द्रियजन्यमात्रगोचरतयेति स्ववचनविरोधः । नच – नेदं लौकिकंव्यवहारनिबन्धनं, किन्तु – परीक्षकव्यवहारनिबन्धनमिति वाच्यम् । एतस्य नैय्यायिकाद्यपरोक्षव्यवहारनिबन्धनत्वाभावात् । नच – त्वत्समयपरीक्षकव्यवहारनिबन्धनं , त्वदभिमतपारिभाषिकप्रत्यक्षत्वसाधनेपि उभयसंप्रतिपन्ना परोक्षनिष्ठस्यास्मदभिमतस्य परोक्षव्यवहार निबन्धनस्य शाब्दज्ञाने असाधनेनार्थान्तरत्वात । नच – सर्वत्रापि इदमेव व्यवहारनिबन्धनं , नतु - त्वदभिमतं, इदन्तवशाब्दज्ञानेप्यस्तीति साध्यतइति वाच्यम् । स्वोक्ति विरोधाद्दर्शितत्वात् । किंच – किमत्रापरोक्षार्थविषयत्वंसाध्यते , उतापरोक्षताशून्ये नाध्यस्तार्थविषयत्वं ? । आद्येपि ब्रह्मणोपरोक्षत्वे सिद्धे तद्विषयत्वं साध्यते, उतासिद्धे । नाद्यः,सिद्धसाधनात् । नहि तत्त्वमस्यादिवाक्यस्य ब्रह्मविषयत्वे कश्चित विप्रतिपद्यते । नन्वस्तु द्वितीयः पक्षः, तत्र ब्रह्मविषयत्वस्य सिद्धत्वा दपरोक्षत्वसाधने पर्यवस्यतीति चेन्न । स्वप्रकाशत्वादिना प्रतितस्यापि सिद्धत्वात् , अन्यं प्रति साधनेपि सिद्धसाधनमेव नैय्यायिकादिभिरपीश्वरस्यापरोक्षत्वांगीकारात् । ननु - तै स्स्वकीयापरोक्षज्ञानविषयत्वेना परोक्षत्वांगीकारेपि स्वरूपत आपरोक्ष्यंनांगीकृतमितिचेत् , तर्हि किं घटादावपरोक्षं तादृशं तैरंगीकृतं ! अतस्साध्यविकलो दृष्टान्तः । घटाद्यधिष्ठान चैतन्यांशमादाय साध्योपपादने चैतन्ये अपरोक्षत्वसिद्ध्यसिद्धिभ्यां

तदेव मनुमाना गमा र्थापत्तीनां प्रतिक्षेपात् प्रत्यक्षोपमानादेश्च तत्रासंभवात् त्वयाप्यनंगीकृतत्वाच्च निष्प्रमाणतया तत्त्वमस्यादेः साक्षात्कार जनकत्ववचनं प्राचा माचार्यवन्दकानां प्रलोभनमात्रमित्युत्पश्यामइत्ति ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकट
नाथस्य वेदान्ताचार्यस्य कृतिषु
शतदूषण्यां शब्दजन्यप्रत्यक्षभंगवाद स्सप्तमः ॥

सिद्धसाधनसाध्यवैकल्ये । न द्वितीयः , बाधात् । किंच - अनावृतसाक्षिचैतन्याभिन्नत्वं यद्यापरोक्ष्यं, तदा कश्चन्द्रइति प्रश्नस्थले चन्द्रस्वरूपस्य ज्ञातत्वेपि त दनवधारणात्मकमिति नाज्ञाननिवृत्तिरिति त्वया भिधानात् । तत्र चन्द्रस्यानावृतसाक्ष्यभेदाभावेनापरोक्ष्याभावा त्तद्विषयकज्ञानस्याप्यापरोक्ष्य मनुभूयमानं भज्येत । अनभ्यासदशायां जलज्ञानस्य उत्तरकाले संशयदर्शनेन त्वयानवधारणत्वांगीकारात् । तस्मा दावरणानिवृत्तेस्तस्यापरोक्षत्वं नस्यादिति ॥

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगत
परावरतत्त्वयाथात्म्येन तदेकदेवतेन तच्चरणपरिचरण
परायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन
र.मानुजदासेन विरचितायां
शतदूषणीव्याख्यायां चण्डमारुताख्यायां
शब्दजन्य प्रत्यक्षभंग स्सप्तमस्कंधः

श्रीमतेरामानुजायनमः ।

श्रीमतेनिगमान्तमहादेशिकायनमः ।

॥ अथ अष्टमोवादः ॥



शास्त्रैक्येविषयाद्यभेदनियते संगत्यधीनक्रमे
कर्मालोच्य तदंगिकामथपरांविद्यामुपादित्सुभिः ।
यस्त द्वेद्यतया स्वयं फलतया प्यारोहतिज्ञेयतां
कुर्वीतैष विभु श्श्रिया सह मम स्वान्तं निजान्तःपुरम् ॥ * ॥

परिमितगुणान्नानादेवान् फलंफलसाधना
न्यधिगतशुचस्सर्वंदुष्टं समीक्ष्यवृणीमहे ।
हरिमधिगत[तं]त्रय्यन्तार्या[र्यं]हरेश्वरणौचत -
त्प्रसदनकरीर्विद्या श्श्रुत्यन्तगाश्चवृणीमहे ॥ * ॥

शश्वायमाणकुदृगात्तकुतर्ककृत्त पूर्वापरांगघटना विकसन्मुदेव ।
मीमांसयाप्रकटितागमितार्थसार्थं नित्यं रमानिधिगुरुं शरणंप्रतीमः॥

(शास्त्रैक्यइति) सर्वत्र प्रतिपाद्यैक्यादेवहि वाक्यैक्यं, अत इहापि वेदार्थस्यवा साराधनब्रह्मणोवा विषयत्वा देकग्रन्थता । आदिपदेन व्याख्येयग्रन्थैक्यं गृह्यते । तदैक्यंहि वामनजयादित्यवृत्त्योरिवैक्यहेतुः । अनेन वक्तृभेदात् भेदशङ्कानिरस्ता । (संगत्यधीनइति) त्रिवर्गप्रथमप्रावण्यादिना क्रमेच सिद्धेसतीत्यर्थः । (परामिति) सद्विद्यादिकां ब्रह्मविद्यामित्यर्थः । (तदिति) परविद्याविषयतया फलतयाच विचार्यतामधिरोहतीत्यर्थः । (कुर्वीतेति) एवं मीमांसया प्राप्यत्वेन प्रापकत्वेनच निर्णेतव्योपि स्वकृपामेव न्यायस्थानेऽभिषिच्य स्वस्यैवप्रयोजनतया मम स्वान्ते नित्यं सन्निधत्तामित्यर्थः । न्यायतो निर्णये क्रियमाणे दैवतान्तरादिविरुद्धार्थानां प्रसंगे तन्निषेधः कार्यः, कृपयैवतत्सन्नि-

इहतावदानन्तर्यार्थे प्रचुरप्रसिद्धिक मथशब्द मादौ प्रयुञ्जानस्य सूत्रकारस्य तत्संभवे तदर्थतै वाभिमते त्वंगीकार्यम् । तत्संभवश्च यदि नियतपूर्ववृत्तमसाधारणं तथात्वज्ञापने सप्रयोजनंच किमपि स्यात् , तदास्यात् । अन्यथा नस्यात् । यथा - "अथ योगानुशासन" मित्यादौ । नहि यदृच्छागतं यत्किञ्चिन्निमेषोन्मेषादिकं मक्षिकासंचारादिकं वा पूर्ववृत्ततयात्र वक्तुं युज्यते, तस्य सर्वत्र संभवात् , अभिधानप्रयोजनविरहाच्च । अतएव सर्वपुरुषव्यापारसाधारणापेक्षित भोजनादिपूर्ववृत्तत्वोक्तिरपि निरस्ता, विशेषनियमाभावात् । अवधानात्ममनस्संयोगादिकमपि न विचारविशेषंप्रति विशेषहेतुः, सर्व शास्त्रसाधारण्यात् । सामग्रीतु तथास्यात् , तदुक्तिरपि यदि साम

धाने तेषां प्रसंगएव नास्ती त्यन्तःपुरशब्दंप्रयुञ्जानस्यभावः । नहिराज्ञा मन्तःपुरे पृथग्जनानां प्रसंगोस्ति, येन तन्निष्कालनाय यत्नः कर्तव्यः ।

इहवादे साधनचतुष्टय पूर्ववृत्त स्याथशब्दविवक्षितत्वनिरासपुरस्सरं कर्मविचारपूर्ववृत्तत्वं व्यवस्थाप्यते । तत्रा थशब्दस्यानन्तर्यार्थत्वे निर्णीतेहि तच्चिन्तावकाशः, अत उपोद्घातेनाथशब्दस्याऽनन्तर्यार्थत्वं पूर्व पक्षिमुखेन व्यवस्थापयन् पूर्वपक्षमाह (इहतावदिति) नित्यानित्यविवेकस्यैव पूर्ववृत्तत्व मिति कुतो निर्धार्यते, अन्यस्यापि संभवादित्यत्राह (तत्संभवश्चेति) (अथ योगेति) तत्र हि सप्रयोजनाभिधानस्य नियतपूर्ववृत्तस्याभावा दथशब्दो धिकारार्थत्वेन व्याख्यातइत्यर्थः । एव मन्यथा न स्यादित्येतस्योदाहरणं दर्शितम् ! एवमपि – कथमन्येषां निरासइत्याशंक्याह (नहीति) यदृच्छयेत्यनेन नियमा भाव स्सर्वत्रेत्यसाधारण्याभावश्च ख्याप्यते । तथात्वज्ञापने सप्रयोजनं चेत्यनेना पीदं निरस्तमित्याह (अभिधानेति) अतएवे त्येत द्विवृणोति (विशेषेति) भोजनादे रपेक्षितत्वात् पृथङ्निरासः । (अवधानेति) इन्द्रियाणां विषयान्तरासंचारः - अवधानं, विचारज्ञाननिय-

प्रीत्त्वेन, तदपि सर्वकार्यसाधारण्यात् तदभिधाननैरर्थक्याच्च निरस्तम् । तेन सामग्रीविशेषविशेषकं विशेषकारणमेव वाच्यम् । अत स्सप्रयोजनाभिधानासाधारण नियतपूर्ववृत्तवस्तुगवेषणे नित्यानित्य वस्तुविवेकादि साधनचतुष्टयं पूर्ववृत्तं, तस्यैव ब्रह्मजिज्ञासायां नियमेनापेक्षितत्वात्, तदुक्ते श्चाधिकारिविशेषप्रतिपादनार्थतया सप्रयोजनत्वाच्चेति यदुक्तं तत्परामृशामः ।

तत्र नित्यानित्यवस्तुविवेकस्तावत्कथंभूतइति । किं इदंवस्तुनित्यमिदं वस्त्वनित्यमित्येव मात्मा, उतनित्यानित्ययोर्वसतीति नित्यानित्यवस्तु-तच्च नित्यानित्ययो धर्मः - हेयत्वोपादेयत्वे इत्यर्थः इति वाचस्पतिकल्पित-प्रकारइति? । तत्र नप्रथमः । तस्य वेदान्तश्रवणात्पूर्वमसिद्धत्वात् । तत्रैवह्यात्मादेर्नित्यत्वं वियदादेश्चानित्यत्वं विविच्यते । तथाच्चान्योन्याश्रयणम् ॥ * ॥ वेदान्तश्रवणेसिद्धे नित्यानित्यविवेकधीः । नित्यानित्यविवेकेन वेदान्तश्रवणन्त्विति ॥ * ॥ अथ—यदि शास्त्रान्तरात्तद्विवेकइति मन्यसे । तदा विपरीतविवेकापात्तिः । वियदादयोवैशेषिकादिभि र्नित्याएव परिगृह्यन्ते, आत्मादयश्च सौगतादिभिरनित्या असन्तोवा । अथा दूरविप्रकृष्टसांख्ययोगशीलनेन तद्विवेकइतिचिन्तयसि । तर्हि - तत्रैवा त्मानात्मविवेकसिद्धेः किं ब्रह्ममीमांसया । अनन्यलभ्यंहि शास्त्रफलम् । विशेषज्ञप्त्यर्थमिति चेन्न, निर्विशेषे त

त पूर्ववृत्तत्वा दवधानात्ममनस्संयोगादेः पृथक्तिरासः । (तत्रैवेति) आदिशब्देन कालादिः स्वमतेन गृह्यते । (विपरीतेति) वेदान्तै यादृशो नित्यानित्याविवेकोऽभिमतः, तद्विरुद्धनिश्चयएव शास्त्रान्तरै र्भवतीति न तस्य तत्रोपयोगइति भावः । विरुद्धनिश्चय मेवोपपादयति (वियदादयइत्यादिना) (तर्हीति) आत्मानात्मविवेकार्थाहि ब्रह्ममीमांसा, तस्यच तत्रैव सिद्धे ब्रह्ममीमांसायां प्रवृत्ति र्नस्यादित्यर्थः । अनयापि तत्सिद्धे स्तत्रापि प्रवृत्तिस्स्यादित्यत्राह (अनन्यलभ्यमिति) नियतापेक्षितेन शास्त्रान्तरेण विवेकसिद्धा वेतस्य निष्फलत्वमेव

दयोगात् । आत्माद्वैतसिद्ध्यर्थमिति चेन्न, स्वात्मनो नित्यनिर्लेपत्वादि व्यवसायमात्रेण समीहितासिद्धौ स्वव्यतिरिक्तात्मसदसद्भाव चिन्तनस्य ध्वांक्षदन्तपरीक्षायमाणत्वात् । आत्मव्यतिरिक्तमिथ्यात्वावसायार्थमित्येतदपि ततएव दत्तोत्तरम् । तस्य सौगतसमयेपि सुलभत्वाच्च । उक्तंहि—योगाचारेण " अविभागोऽपि वित्यात्मा विपर्यासितदर्शनैः । ग्राह्यग्राहकसंवित्ति भेदवानिव लक्ष्यते " इति । अथ -- वेदविरुद्धतन्त्रत्वा त्ततो न निश्चयइत्याशयः, तर्हि सूत्रकारै

स्यादिति भावः । (स्वात्मन इति) मोक्षोपायाधिगमार्थंहि ब्रह्ममीमांसायां प्रवृत्तिः, सांख्यशास्त्र एवाऽत्मनो निर्लेपत्वादिव्यवसायस्य मोक्षसाधनतया प्रतिपादनात् ब्रह्मण स्स्वव्यतिरेकानतिरेकचिन्ताया व्यर्थत्वात् ब्रह्ममीमांसायां प्रवृत्ति र्नस्यादित्यर्थः । अस्तुवा - आत्मव्यतिरिक्तमिथ्यात्वाध्यवसायस्यैव मोक्षोपायत्वबुद्धिः, तथापि सौगतसमयेपि तत्सुलभमित्याह (तस्येति) (तर्हीति) सूत्रकारै र्निराकरिष्यमाणत्वात् सांख्यादिशास्त्रमपि वेदविरुद्धमेव, अतस्तेन नित्यानित्यवस्तुनिर्धारणाश्वास स्तव न संभवतीत्यर्थः ।

ननु वेदान्तशास्त्रएव सांख्यशास्त्रप्रामाण्यस्य निराकरिष्यमाणत्वात् तत्प्रवृत्तेःप्रा क्सांख्यशास्त्रप्रामाण्यव्यवसाय सम्भवात् ततो नित्यानित्यवस्तुविवेक स्सम्भवत्येवेति चेत् , तर्हि, वेदान्ते सौगतशास्त्रस्यापि निराकरिष्यमाणत्वात् तत्रापि वेदान्तप्रवृत्तेःप्रा क्प्रामाण्यबुद्धिस्स्यादिति तेन मिथ्यात्वाध्यवसायो दुर्वारः । यदि कर्ममीमांसायामेव तन्निराकरणेन तत्परिचयात् तदधीनलोकप्रवादाद्वा तदप्रामाण्यनिश्चयः, इह तन्निराकरणन्तु तद्दार्ढ्यार्थमेव । तर्हि – कर्ममीमांसायामेव विरोधाधिकरणेन सांख्यशास्त्रस्यापि निरासात् तत्परिचया त्तदधीनलोकप्रवादाद्वा तदप्रामाण्यनिश्चयः, इह तन्निराकरणन्तु तद्दार्ढ्यार्थमेवेति स्यात् । अत स्सौगततन्त्रसमानयोगक्षेमत्वमेवेति भावः । सूत्रकारैर्निराकरिष्यमाणत्वोक्तिश्च नाधिकारिणो प्रामाण्यज्ञानार्थं, किन्तु - वास्तवाप्रामाण्यप्रदर्शनार्थमिति ज्ञेयम् । किञ्च -

रेव तद्व न्निराकरिष्यमाण सांख्यादितन्त्रेष्वपि नाश्वसिहिं । नहि त-
द्वा तादृग्वेति कश्चिद्विशेषइति न्यायात् अविरुद्धांशं स्वीकुर्मइति
चेत् ; क स्तर्हि सौगतेषु ते प्रद्वेषः । तेष्वपि भवदुपजीव्यावहवोर्थरा
शयस्सन्ति । कथंचायमर्थो न विरुद्धः अयन्तु विरुद्धइति वेदान्तश्रव
णात् पूर्वमवगच्छसि? । तथाच तत्राप्यन्योन्याश्रयणम् । हितोपदे-

---

ब्रह्मविचाराधिकारिणि स्सांख्यशास्त्राप्रामाण्यज्ञान मावश्यकमेव, अन्य
था तत्राप्रामाण्यज्ञानाभावेन तत्प्रतिपाद्यसत्यत्वविरोधि प्रपञ्चमिथ्या
त्वप्रतिपत्तये तत्प्रतिपादकब्रह्ममीमांसायां प्रवृत्त्यसम्भवात् । तत्रच -
यदि सांख्यशास्त्रान्नित्यानित्यविवेकात्प्रागेव वेदविरोधज्ञानं स्यात् , त
दा तत्राप्रवृत्तेः नित्यानित्यविवेकएव न स्यात् । अथतु प्रवृत्तस्य -
नित्यानित्यविवेकानन्तरं तत्र वेदविरोधज्ञानं, तदा जातोपि नित्या-
नित्यविवेको न मुमुक्षाद्वारा ब्रह्मविचारोपयोगीस्यात् , अनाश्वासग्र
स्तत्वात् ।

ननु महर्षिप्रणीतस्य सांख्यतन्त्रस्य कथं निरासइत्यत्राह (न-
हीति) वेदविरुद्धत्वाविशेषात् सौगततन्त्रवदेव तन्निराकरणमिति-
भावः । यद्वा - सौगततन्त्रे प्रवृत्त्यभावउक्ते महर्षिप्रणीते सांख्यतंत्रे
कथं प्रवृत्त्यभाव इत्यत्राह (नहीति) नहिसौगतसमयत्वादप्रवृत्ति-
रुक्ता, किन्तु - वेदविरोधित्वेना प्रामाण्यादेव, अतः प्रयोजकत्वावि
शेषात् तस्मिन्निव तादृशेपि प्रवृत्ति र्नस्यादेवेति भावः । (तेष्वपी-
ति) ततश्च मिथ्यात्वाध्यवसायार्थं सौगतमतेपि प्रवृत्तिस्स्यादिति भा
वः । (कथंचायमर्थइति) आत्मनित्यत्व मविरुद्धं, अन्यत्तुविरुद्ध
मिति वेदान्तै रात्मनित्यत्वादिनिर्णयात्प्रा क्कथं निश्चयित इत्यर्थः । त-
थाचा विरुद्धांशं स्वीकुर्मइति न युक्तमिति भावः (तथाचेति) वेदा
न्तश्रवणानन्तरं अविरोधज्ञाना दविरुद्धसांख्यांशश्रवणं, तच्छ्रवणे अ-
धिकारसिद्ध्या वेदान्तश्रवण मित्यन्योन्याश्रय इत्यर्थः । (हितेति)
अयमर्थोऽविरुद्धइत्यधिगच्छामीति शेषः ।

शि पित्रादिवचनविस्रम्भादिति चेत् , तर्हि - ततएव नित्यानित्यवस्तुविवेकोपि सिध्यति, किं सांख्यादिकपोलजलकणिकास्वादेन । अस्त्वेवमपि का नोहानिरितिचेत् , वेदान्तश्रवणहानिः । तदुपदेशमात्रेणाल्पसास्तिकवत् समस्तार्थविस्रम्भोपपत्तेः । सर्वस्यापि विवेकस्य आत्मानात्मविवेकार्थतया तत्सिद्धौ ज्ञातव्यान्तरपरिशेषाभावात् ।

नन्तु यस्य पुरुषस्य हितैषिवचनात् नित्यत्वादावेव विस्रम्भो जातः, अर्थान्तराणां हितैषिणानुपदेशा दविस्रम्भः, तस्य शास्त्रश्रवणं सेत्स्यति , नचैवंसति - आत्मनित्यत्वस्य पूर्वमेव ज्ञाततया जिज्ञास्यत्वाभावेन , आरम्भसूत्रविषयत्वाभावात् इह निरूपणं न स्यादितिवाच्यम् , प्रसंगादपि तदुपपत्तेरित्यत्राह (सर्वस्यापीति) विवेकस्य विवेकसाधनस्य ।

नन्तु - नित्यानित्यवस्तुविवेके जातेपि आत्मैकत्वं न ज्ञातम् , अतएवहि " आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त " इत्युक्तम् , तथाऽनन्दात्मकत्वं प्रपंचमिथ्यात्वंच नज्ञातमेवेति चेन्न। आत्मैकत्वादिज्ञानस्य सत्यमिथ्याविवेकस्यच श्रवणात् प्रागेव वाच्यत्वात् । तथाहि - आत्मनित्यत्वज्ञानंहि तस्यैवानन्दात्मकस्य प्राप्यताज्ञाना न्मुमुक्षाहेतुर्भवति , नान्यथा । नह्यतिशयित नित्य पुरुषार्थस्य - प्राप्यताज्ञानंविना क्षुद्रा दनित्याच्च पुरुषार्था न्निवृत्तिः । नापि नित्यस्यानन्दात्मकस्य स्वस्यैव प्राप्यताज्ञानं मुमुक्षाहेतुः तस्यानादिसिद्धताज्ञानेन श्रवणादिप्रवृत्त्यनुपपत्तेः । अतो ब्रह्मस्वरूपस्या खण्डानन्दात्मकस्य प्राप्यताज्ञानादेवेतिवाच्यं । ततश्च भिन्नस्याभेदासंभवा दभेद एवपारमार्थिकः । किंचिज्ज्ञत्व सर्वज्ञत्वादिभेदो मिथ्यैव । अतो भेदभ्रम निरासेन ब्रह्मैव प्राप्यमिति बुद्ध्यैव मुमुक्षोत्पत्तिरिति किंनाम ज्ञातव्य मवशिष्यते । एवमात्मैकत्वादिकमपि ज्ञानव्यमेवे त्यभिप्रेत्यै व " आत्मानात्मविवकार्थतये " त्यनुगृहीतं, नतु नित्यानित्य विवेकार्थतयेति , त्वदभिमत स्सर्वोपि विवेकस्सिद्ध एवेतिहि सामान्यनिर्देशस्य भावः ।

एतेन यदाहनवीनः - नतावन्नित्यानित्यविवेकासंभवः, आमनुष्या दाब्रह्मलोकं कर्मकार्यंच सर्वं मनित्यं घटादिवत् "तद्यथेह कर्मचितोलोकः क्षीयत" इति श्रुतेश्चेति न्यायानुगृहीत स्पष्ट श्रुत्यैव विचारात्प्रागेव कर्मफलस्या नित्यत्वावधारणसंभवात्, आत्मा च नित्य इत्यवगम्यते । अन्यथा - कस्यापि मते मोक्षाय प्रवृत्त्यसंभवात् । तस्यानन्दरूपत्वमपि परमप्रेमास्पदत्वात् "आनन्दाद्ध्येवखल्वि" त्यादि वाक्याच्च निश्चीयते । नचैवं - विचारानारंभप्रसंगः, अन्यस्याप्येवं निश्चेतुं शक्यत्वादिति वाच्यम् । यत्रहि मानान्तरविरोधो वर्तते, तद्धि शब्दश्रवणमात्रान्न निश्चेतुं शक्यम् । अद्वैतसमन्वयश्च तत्तत्पूर्वपक्ष न्याय मानान्तरादिना प्रथमं विरुद्धतया प्रतीयत इति न वाक्यमात्रा न्निश्चेतुं शक्यते । ब्रह्मणो नित्यानन्दरूपत्वन्तु न मानान्तरेण विरुद्धतया प्रतिसन्धीयतइति तच्छब्दादेव निश्चेतुं शक्यते । नहि परमात्मनस्सुखाभेदे प्रत्यक्षविरोधोस्ति । नचानित्यसुखस्य नित्यात्माभेदविरोधः ; अनुकूलतर्काभावेन सुखमात्रे अनित्यत्वावधारणायोगात्, सौषुप्तिकसुखावमर्शदर्शनेन जीवसुखस्यापि नित्यतया तद्विनाशबुद्धे रन्यविषयत्वावधारण सम्भवात् । किंच - येन यदेकं न्यायेन निश्चितं, तेन इतरदपि न्यायेन निश्चेतव्यमिति न नियमः, पुरुषाणाञ्च विचित्रबुद्धितया न्यायानाञ्चालौकिकविषयतयाऽति सूक्ष्मतया तन्नियमानुपपत्तेः । अन्यथा - धूमाग्न्योर्व्याप्ति स्सर्वैरेव गृहीतेति सर्वापि व्याप्तिरेवं ग्राह्येति वैशेषिकादिग्रन्थान्तरारम्भो व्यर्थएव स्यात, एतादृशएव पुरुषोस्मिन् शास्त्रेधिकारी । तदुक्तम् " नात्यन्तमज्ञो नो तज्ज्ञस्सोस्मिन् शास्त्रेधिकारवा"निति । एवञ्च ब्रह्मसुखस्य जीवसुखस्यच नित्यत्वं तदितरभोगानाञ्चानित्यत्वं सुनिरूपणं, ततो वैराग्यं । नचैवं - रंहतिपादवैयर्थ्यं । नहि - तत्र नित्यानित्यनिरूपणमुखेन वैराग्यं । किन्तु - संसृतिप्रकारनिरूपणेन पूर्वोत्पन्नस्य दृढीकारःक्रियते । वैराग्योत्कर्षेन्द्रियोपरम दाढ्र्येन मुमुक्षाद्वारा श्रवणादिदार्ढ्यसंभवात् प्राग विरक्तस्य स्वकाम्यफलाविरोधि ब्रह्मज्ञानप्रवृत्त्यनुपपत्त्यैवमेव वक्तव्यत्वात । एवं - वैराग्ये शरीरेन्द्रियचेष्टाया मनोवृत्तेश्च -

निमित्ताभावाच्चित्तेन्द्रिययो र्व्यापारोपरमरूपौ शमदमौभवतः, ताभ्यां च तितिक्षादिः, ततश्चाविक्षिप्तचित्तो निरस्तानर्थप्रतानानतिशयानन्द गळिताखिलभेद मात्मानं वेदान्तवाक्येभ्यो धिगम्य मुमुक्षुर्भवति, ततो "ब्रह्मविदाप्नोति" "तरतिशोक" मित्यादिश्रुतितो ज्ञानस्य मोक्षहेतुतां निश्चित्य जिज्ञासतइति। तदपि निरस्तं, ज्ञातव्यान्तरपारिशेषाभावादेव। तथाहि - मुमुक्षासिद्धयेहि नित्यानित्यविवेकादेः पूर्ववृत्तत्वमिष्यते, तत्र यद्यद्वैतनिश्चयाभावेऽपि मुमुक्षा जायेत, तर्ह्यानन्दत्वनित्यत्वयो र्निधारणंदा किमर्थमपेक्ष्यते। नित्यपुरुषार्थनिर्धारणाभावे अनित्यसुखवैराग्याभावेन कथ म्मुमुक्षेति यदिपश्यसि, तदास्वर्गाद्यत्व योग्यता ज्ञानाभावे कथं सा, कथंचाद्वैतज्ञानंविना अभेदलक्षण प्राप्तियोग्यताज्ञानमित्यपि पश्य। किंच - ब्रह्मविचारारंभोहि संदिग्धार्थनिर्णयाय प्रतिज्ञायते, आनन्दत्वमपि जगत्कारणे सन्दिग्धमेव, कारणत्वस्य प्रधानचेतनगतत्वसन्देहे नानन्दपदस्यापि मुख्यगौणार्थसन्देहात, "आनन्दाद्ध्येवे" ति वाक्यार्थनिर्णयाभावात्। तथा नित्यत्वमपि सन्दिग्धमेव, "नात्माश्रुते" रित्यादिना तस्यापि विचारात्, "विज्ञानघनएवैतेभ्योभूतेभ्य स्समुत्थायतान्येवानुविनश्यती" त्यादिना विनाशप्रतीतेः स्तस्य विचार्यत्वाच्च। "अदुःखमसुखंसम" मित्यादिनाऽनानन्दत्वप्रतीते रानन्दत्वमपि विचार्यम्। किञ्च - श्रवणस्य मुमुक्षाधिकारकत्वे सिद्धेहि मुमुक्षार्थं नित्यानित्यविवेकादेः पूर्ववृत्तता, तदेवतुकुतः, मुमुक्षाहि - मोक्षसाधनेधिकारः। नच - श्रवणं मोक्षसाधनमिति तवाभिमतं, किंतु मोक्षसाधनापरोक्षसाधनमिति, ततश्चापरोक्षकामनैव श्रवणाधिकारस्स्यात्, नमुमुक्षा। ननु - मुमुक्षाविरहेतत्साधनेकामनानस्यात्, अतो मुमुक्षा परम्परया श्रवणाधिकार इतिचेत्; स्यादेवं, यद्यपरोक्षज्ञानस्य मोक्षसाधनत्वं निर्णीतंस्यात्, तच्चसन्दिग्धमेव।

ननु - स्पष्टार्थश्रुत्या न्यायनिरपेक्षमेव दर्शनस्यमोक्षसाधनत्वमवगम्यतइतिचेन्न। दर्शनस्य मोक्षसाधनत्वे विप्रतिपत्तेस्तन्निर्णयस्य अद्वैतस्येव पूर्वपक्षयुक्तिनिराकरणसापेक्षत्वात्।

ननु - नैतद्विचारःप्रतिज्ञाविषयः किंत्वद्वैतविचारएव, अतोबहिरेवै

तद्विचार्यंशास्त्रमधिकरोतीतिचेत् , तर्हि - तस्यैकाधिकरणसाध्यत्वा दितरवैयर्थ्यं । अद्वैतोपयोगितया कारणत्वादिकमपिचिंतनीयमितिचेत्, तर्हि-तदर्थमेव बन्धस्य ज्ञाननिवर्त्यत्वमपि चिन्तनीयम् ।

ननु – नब्रह्मविचारमात्रस्यकर्तव्यत्व मिह प्रतिज्ञायते, किंतु " श्रोतव्य " इति विध्युपयोगिन्यायप्रतिपादकत्वा द्विहितविचारस्य कर्तव्यत्वं प्रतिज्ञायते, " श्रोतव्य " इत्यस्यचब्रह्मदर्शनाय विचारः कार्यइति ह्यर्थः, ब्रह्मदर्शनोद्देशेनविचारविधानंच ब्रह्मदर्शनस्य " निचाय्य तंमृत्युमुखात्प्रमुच्यते " इत्यादिभि र्वेदान्तवाक्यै र्मीमांसिते मोक्षसाधनत्वे सिद्धएव , तस्मा ज्ज्ञानस्य मोक्षसाधनत्वोपयोगिन्यायोपजीवनेनैव श्रोतव्यइति वाक्यप्रवृत्ते स्तदर्थविचारात्मक मिदमपि सूत्रं तदुपजीवनेनैव प्रवृत्तमिति नतन्न्यायकर्तव्यतैतत्सूत्रस्य विषयइति-चेत्; स्यादेवं , यदि श्रोतव्यइतिविधिस्स्यात् , नतावदयमपूर्वविधिः ; शक्तितात्पर्यावधारणरूपस्य तदनुकूलव्यापाररूपस्यच श्रवणस्य " द्रष्टव्य" इति विवक्षितवाक्यार्थज्ञानकारणताया लोकसिद्धत्वात् - असंभावनाविपरीतभावनाविरहे गृहीतशक्तितात्पर्यस्यवाक्यस्या वधारणजनकत्वमपि लोकसिद्धमेव , तथा सन्निकृष्टविषये दशमस्त्वमसीत्यादौ वाक्यस्यापरोक्षज्ञानजनकत्वमपि लोकसिद्धमेव, तव्यप्रत्ययेच परिपन्थिनि जाग्रति कर्मपदाभावेच कथं दर्शनफलोद्देशेन विधिः, दर्शनस्य विधानासंभवादिति चेन्न । तत्सम्भवस्य स्थापनात् ।

यत्तु कैश्चिदुक्तं – आपातदर्शनभिन्नं कृतिसाध्यत्वेनविधानार्हं प्रतिवाक्य मय मस्यवाक्यस्यार्थ इति सिद्धार्थोक्तिरूपेण गुरूपदेशेनानेकशाखास्थवाक्यार्थग्रहणमात्रं श्रवणम् । तच्चाज्ञानमात्रविरोधि , न तु मननमिव संशयादिविरोधि, मननरूप न्यायावतारांग संशयधर्मिज्ञानरूपत्वात । मननन्तु अयमेव वाक्यार्थो युक्तो नान्य इति निर्णयहेतु युक्त्यनुसन्धानम् । निरन्तरं निध्यानं - निदिध्यासनं । इत्थमेव श्रवणादीनां भेदः । विचारादिविधिस्त्व पूर्वविधिः, ब्रह्मज्ञाने वेदविचारहेतुताया अत्यन्ताप्राप्तत्वात् । नहि वेदार्थज्ञानाय वेदविचारः क

र्तव्यइति वचनव्यक्तिः ; ब्रह्मज्ञानस्योद्देश्यत्वात् । नापि – ब्रह्मज्ञानाय ब्रह्मविचारः कर्तव्यइति; तथात्वे ब्रह्मणो विधेयविशेषणतया गुणत्वापातात् । किन्तु – ब्रह्मज्ञानाय वेदविचारः कर्तव्यइत्येव वचनव्यक्तिः । यद्यपि - ब्रह्मपरवेदविचारएव ब्रह्मविचारः, तथापि न ब्रह्मविचाररूपेण विधानं, किन्तु वेदविचाररूपेण । तथाच श्रुतिः; " तस्मादेनं सर्ववेदानधीत्य विचार्यच ज्ञातुमिच्छे " दिति । एवंच यथा घटादा वितरभेदे सिद्धेपि पृथिवीत्वोपहिते तदसिद्धेः पृथिवी इतरेभ्यो भिद्यत इत्यत्र न सिद्धसाधनता । यथावा स्थानप्रकरणाधिकरणोक्तरीत्या राजसूयान्तर्गतेष्टिपशुसोमेषु प्रातिस्विकरूपचोदकत इति कर्तव्यताप्राप्तावपि राजसूये तदप्राप्तिः । तथा वेदविचारत्वोपहिते ब्रह्मज्ञानहेतुतया अप्राप्ते रपूर्वविधिता । नहि कर्मकाण्डेन ब्रह्मकाण्डेप्यवान्तरकारणादिवाक्येन पदवर्णस्वरादिना आपाततोपि ब्रह्मधीरस्ति । यद्वा – निदिध्यासनस्या व्यक्तस्वभावब्रह्मसाक्षात्कारहेतुता नान्यतः प्राप्तेति ख़लावदपूर्वविधिः । तथा – अज्ञातादौ निदिध्यासनासम्भवेन श्रवणमननयो र्लिंगादेव प्राप्तावपि नियतविषयक निदिध्यासनविषय गुणान्यगुणेषु लिंगेन तयोरप्राप्ते स्तद्विधिरप्यपूर्वविधिरेव । एवंच श्रवणमननयो र्निदिध्यासितव्य गुणांशे दृष्टद्वारेण अन्यत्र त्वदृष्टद्वारेण निदिध्यासनांगतेति ध्येयमिति ।

अत्रोच्यते - श्रवणेताव द्गुरुशाखयो र्नान्तर्भावः, " श्रोतव्य " इत्यत्र तद्वाचक पदाभावात्, शाब्देर्थे अयमर्थश्श्रुत इत्यादि बहुलप्रयोगात् " श्रोतव्य " इति शाब्दज्ञानमेव स्वरसतः प्रतीयते । " आत्माश्रोतव्य " इत्यभिधानात्, आत्मनिच वेदान्तानामेव प्रमाणत्वात् तस्य शाब्दज्ञानस्य वेदान्तजन्यत्व मवगम्यते । तत्र तर्कस्यापि सहकारित्वात् मीमांसितवेदान्तजन्यत्व मवगम्यते । तस्य गुर्वधीनत्वं वाक्यान्तराधीनमेव । एवंचसति " श्रोतव्य ' इति शाब्दज्ञानमात्र मात्मसमभिव्याहारलब्ध वेदान्तजन्यं ज्ञानंवा, नविधेयं, तस्याध्ययनकालएवसिद्धेः । नापि न्यायोपबृंहितवेदान्तजन्यं ज्ञानं । साङ्गवेदाध्ययनेना पातप्रतीतोभयभाग पुरुषार्थ तत्साधनस्य जिज्ञासोः

पाठक्रमात् त्रिवर्गे प्रथमप्राबण्याच्च कर्मविचारे प्रवृत्तस्य निर्णयेन प्रतिबन्धकाजिज्ञासापगमे रागादेव वेदान्तविचारे प्रवृत्तेः । किञ्च-ध्यानस्य मोक्षसाधनत्वविधाने ध्येयावधारणस्य ध्यानसाधनत्वस्य लोकसिद्धत्वा द्ध्यानार्थिन स्स्वतएव विचारे प्रवृत्तेः नाविचारस्यविधेयता । अतएव श्रवणदशावगत न्यायातिरिक्त साधक बाधक परिहारतद्विरुद्धार्थनिरासात्मक म्मननमपि श्रुतार्थ प्रतिष्ठात्मकत्वात् स्वत एव प्रवृत्ते र्नविधेयं । एतेन – पराभिमत न्यायमात्रानुसन्धानात्मकमपि दत्तोत्तरं । ध्यानार्थिनो ध्येयावधारणे लोकतएवप्रवृत्तेः ।

यच्च - विचारविध्यात्मकस्वाभिमतमननविधिसमर्थनं, तद्वेदार्थज्ञानायवेदविचारः कर्तव्यइति वचनव्यक्तौ नकश्चिद्दोषः । वेदपदेनवेदान्तविवक्षायां ब्रह्मणएव वेदार्थतया उद्देश्यत्वाविरोधात्, वेदमात्रविवक्षायामपि नैवं वचनव्यक्तौ दोषः, विधित्वेसिद्धेहि सदोषः, तदेवचेदानीं विप्रतिपन्नं । अनुवादे त्वेवं वचनव्यक्तावपि नदोषः ।

यच्च - ब्रह्मज्ञानायब्रह्मविचारःकर्तव्यइतिवचनव्यक्तौदोषजातःसदतदीयैरेवदूषितः । भगवतःप्राधान्यंनाम तद्दर्शनादि फलभूत प्रीत्यवच्छेदकत्वमेव, नान्यत्, अनिर्वचनात्, तच्च साधनभूतदर्शनाद्यवच्छेदकत्वेऽप्यविरुद्धं, एकस्यैव राज्ञः फलीभूतप्रीत्यवच्छेदकस्यापि तत्साधनसेवावच्छेदकत्व दर्शनात् । नहि राजसेवा राज्ञानवच्छिन्नप्रीतिहेतुः नवा स्वयं तदनवच्छिन्ना प्रीतिहेतुरिति । किञ्च – वेदस्या निदिध्यासितव्यत्वात् वेदार्थमात्रस्यच निदिध्यासनाङ्गीकारात् ब्रह्मनिदिध्यासनमेवविधेयं, तदन्तिस्यात ब्रह्मणोगुणत्वप्रसंगात् ।

यच्च-ब्रह्मज्ञानायवेदविचारइति वचनव्यक्तिरिति । तन्न । तत्र वेदपदेनवेदांतविवक्षायां नविधिसंभवः ब्रह्मजिज्ञासो स्तत्प्रतिपादक वेदान्तविचारे स्वतएव प्रवृत्तेः, नचायमधिकारी ब्रह्मणोवेदान्तवेद्यत्वं नजानातीति वाच्यम् । प्रधानादिव्यावृत्तिसन्देहेऽपि अध्ययनकालएव वेदांतानांब्रह्मपरत्वावगमात् । अन्यथा " आत्माश्रोतव्योमन्तव्य" इत्युक्ते कुतस्समागताविचारस्य वेदान्तविषयता, आत्मनोविचार्यत्वप्रतिपादनात्, तत्त्व वेदान्तानामेव प्रामाण्यावधारणाद्धि विचारस्य त द्विषयताप्रतीतिः

ननु- वेदपदेन वेदमात्रं विवक्ष्यते; अत्र वेदान्तविचारस्य ब्रह्मज्ञानहेतुतायाः प्राप्तत्वेपि नवेदविचारस्य प्राप्तंतति चेत्, तत्र यदि कर्मविचारस्य ब्रह्मविचारहेतुताया अप्राप्तिं मन्यसे, तर्हि नब्रह्मविचारे विधिः । सत्यं; "श्रोतव्य" इति विधिसमर्थनमेव सिषाधयिषितं नतुब्रह्मविचारविधिसमर्थनमितिचेत्, किं कर्मविचारस्य तादर्थ्यं दृष्ट द्वारा उतादृष्टद्वारा? नाद्यः, असिद्धेः, विधिवैयर्थ्याच्च । नद्वितीयः । दृष्टद्वाराभ्युपगमेहि आत्मविचारस्य वेदविषयतास्यात् तद्विचारस्य तत्प्रमाणविषयत्वादिति, अदृष्टद्वारत्वाभ्युपगमे "आत्माश्रोतव्योमन्तव्य" इत्युक्ते कोहि वेदस्यप्रसंगः ।

ननु - वेदस्य आत्मप्रमाणत्वादेव वेदविचारो विधीयते, तत्रैकदेशद्वारा दृष्टार्थता, अंशान्तरे त्वदृष्टार्थतेतिचेत्; तथासति वाक्यस्या ऽमनिप्रामाण्यात् वाक्यविचारत्वेन सर्ववाक्यविचार विधिः प्रसज्येत । अपिचैवमेकदेशेनुवादः एकदेशेविधिरितिस्यात्, पदार्थैकदेशेविध्यन्वयोनुपपन्नएव । यदिच ब्रह्मविचारस्यापि वेदविचारत्वेन वेषेण ब्रह्मविचारहेतुत्वेना प्राप्तिम्मन्यसे; तत्रकिं वेदान्तेवेदत्वं नावगतं? अवगतमेव तत्रवेदत्वं तद्विचारे वेदविचारत्वंच, किंतु वेदविचारत्वावच्छेदेन कारणत्वं नावगतमितिचेत; किं सर्वविचाराणां कारणत्वं नावगतमिति मन्यसे ? तर्हि सर्वविचारकारणता बोध्या तत्रवेदान्तविचारे ऽनुवादो दुष्परिहरः ।

ननु - वेदविचारत्वस्य कारणतावच्छेदकत्व मनवगतमितिचेत्; तथासति वेदविचारत्वेन कारणत्वबोधनं स्यात् । नच श्रोतव्यवाक्यस्य तथाविधं सामर्थ्यं पश्यामः । नापि - "तस्मादेन" गिति वाक्येनतथाविधिः; "सर्ववेदान्विचार्ये" त्युक्ते नहि सोर्थः प्रतीयते, किंतु सर्वेषां विचाराणां तत्तत्प्रातिस्विकरूपेण साधनत्वम् ।

ननु - सर्ववेदविचारत्वं कारणतावच्छेदकत्वेन बोध्यत इतिचेन्न । अतीतानागतव्याधिकरणविचाराणां कारणत्वासंभवेना योग्यत्वात् । सर्वत्वस्य वेदविशेषणत्वे सर्ववेदसंबन्धिन एकस्य विचारस्यालाभात् । सर्ववेदसंबन्धिनो ये विचारा इत्युक्तेतु प्रातिस्विकरूपेण तत्तद्वाक्यविचारकारणतापर्यवसानात् । तत्तद्वाक्यविचाराणां समुदायः

कारणं बोध्यतइति चेन्न। सर्वत्वस्य वेदविशेषणतया प्रतिवाक्यं विचारलाभेपि विचारसमुदायबोधक पदाभावात् । दृष्टान्तश्च विषमः, पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिपक्षे तादृशोद्देश्यप्रतीतिजननसामर्थ्य मस्त्येव, इहतु त्वदुद्देश्यप्रतीतिजननसमर्थं किमपि वाक्यं न दृश्यत इत्युक्तमेव । राजसूयदृष्टान्तश्च विषमः, तथाहि – राजसूये बहव इष्टिपशुसोमयागा स्सर्वे फलवन्तः समप्रधानाः, तत्राभिषेचनीयोनाम सोमयागः, तत्सन्निधौ विदेवनादय स्समाम्नाताः, ते किं सर्वस्य राजसूयस्यांगं उताभिषेचनीयस्यैवेति ? यदि सन्निधिर्बलीयान् अभिषेचनीयांगं, अथ प्रकरणं ततो राजसूयस्येति । तत्र सन्निधिविशेषादभिषेचनीयांगत्वे प्राप्ते – अभिधीयते; प्रकरणाविशेषात् सर्वार्थता । नन्वभिषेचनीयस्याप्यस्त्येव फलवत्त्वात्प्रकरणं; यद्यप्यस्ति तदप्यन्येषामप्यस्तीति तादर्थ्यमपि युक्तं । यदिचपरमविशेषतस्सर्वेषामाकांक्षायामपि पाठसन्निधिविशेषादभिषेचनीयस्य विशेषत आकांक्षां कल्पयित्वा तादर्थ्यं स्यात् ततश्च विप्रकर्षः, सर्वार्थताहि क्लृप्ताकांक्षासस्सुखं गम्यते, अभिषेचनीयस्य त्वाकांक्षाकल्पनीयेति । एतेनाग्नेयादीनां धर्मसाधारण्यमपि व्याख्यातमिति । इह सन्निधेः प्रकरणस्य बलवत्त्वं व्युत्पाद्यते, नतु तत्राकारान्तरेणाकांक्षानिवृत्ता घप्याकारान्तरेणाकांक्षाव्युत्पाद्या । यदपि शास्त्रदीपिकायामुक्तं – "अपिच नास्त्यभिषेचनीयस्य प्रकरणं, प्राकृतेनेत्थम्भावेन कथम्भाकांक्षापूरणात् । नन्वन्येषामपीष्टिपशुसोमानां विकृतित्वान्नास्त्येव प्रकरणम्, सत्यम्; प्रातिस्विकरूपेण नास्ति राजसूयात्मनात्वस्त्येव, कथं, श्रुत्यादिविहितांगसन्दंशात्तद्वशेन निवृत्ताप्याकांक्षापुनरुत्थाप्यते, पवित्रादारभ्यक्षत्रस्य धृतियावदङ्गविधिषु प्रायेण 'राजसूययज्ञेनाऽत्पुनाति, राजसूयेनेजानस्सर्वमायुरेती' तिराजसूयपरामर्शात्तावन्तं देशमनुवृत्तो राजसूयकथंभावश्शक्तोति तन्मध्यपतितानि त्रिदेवनादीनि गृहीतु" मिति तत्रापि राजसूये प्रकरणाभावमाशंक्य सन्दंशन्यायात्तत्समर्थने तात्पर्यम्, नत्वाकारान्तरेण धर्मप्राप्तावप्याकारान्तरेणाप्राप्ते रांकांक्षाप्रतिपादने तात्पयम्; तथासति किं मुत्थापिताकांक्षोपयोगित्वेनाकारान्तरोपन्यासः ,

किंवा स्वारसिकाकांक्षाप्रयोजकत्वेन? नाद्यः; आतिदेशिकांगान्वयेन निराकांक्षत्वे प्यौपदेशिकांगान्वयार्थं तंनैवाकारेणाकांक्षोत्थापनस्य बहुशो दर्शनात्। नद्वितीयः; सन्दंशवशेननिवृत्ताप्याकांक्षा पुनरुत्थाप्यत इत्युक्तिविरोधात् । राजसूयात्मना त्वस्त्यैवेतितु विदेवनादीनां समुदायान्वयरूपसिद्धान्तसिद्ध्यर्थं समुदायाकांक्षाप्रतिपादनपरम् । किंच वेदान्तविचारांशे लोकतएव प्रवृत्तिसिद्धे स्तदंशे नविधेः प्रयोजकत्वं, किन्तु पूर्वभागविचारांशएवेति, विधे र्विधेयैकदेशप्रयोजकत्वमस्वरसमापद्येत । अनेनैव यद्वेत्यादिकमपि दत्तोत्तरं। किंच किमात्मा श्रोतव्य इत्यत्रात्मशब्दो निदिध्यासितव्य गुणेतरगुणे व्युत्पन्नः, येनैवं ब्रवीषि, तथासति निदिध्यासितव्यगुणानां विचार्यतान स्यात्। सामान्यत स्सर्वेगुणा विवक्षिताइति चेत; तर्हि निदिध्यासनस्यापि सर्वगुणविषयत्वादस्यैवात्मशब्दस्य "निदिध्यासितव्य" इत्यत्राप्यनुषंगेणार्थं वैरूप्यायोगात्।

यत्तु- कैश्चिदुक्तं,"द्रष्टव्यश्श्रोतव्य " इत्यादयो दर्शनादीनां विधायकाएव। "आत्मनि खल्वरेदृष्टे श्रुते मते विज्ञाते इदं सर्वं विज्ञात "मित्युपक्रम्य तदुपसंहारे" एतावदरेखल्वमृतत्व " मिति एतावच्छब्देन प्रकृतदर्शनादिचतुष्टयं परामृश्य तस्य लांगलं जीवनमिति वत्साधनेसाध्योपचारेणाविशेषेणामृतत्व साधनत्वप्रतिपादनात् । दर्शनादयश्च दर्शपूर्णमासाभ्यामिति द्वन्द्वेनेव " एतावदरेखल्वमृतत्व" मित्येतावच्छब्देन परामृत्युतुल्यवत्फलसम्बन्ध प्रतिपादनात् समप्रधानाः । ननु श्रवणादीनां पूर्वपूर्वस्य उत्तरोत्तरद्वारैव मोक्षसाधनत्वात् न समप्राधान्यमुपपद्यतइति चेत; एतावदित्यादिभिश्श्रवणादीनां दर्शनवन्मोक्षसाधनत्वे सिद्धे आधानवदुपकारकत्वेपि प्राधान्याविरोधात। यद्यप्यसाक्षात्कृत स्वर्गादिभावनायाइवा व्यक्तस्वभावब्रह्मनिदिध्यासनस्यापिताहशब्रह्मसाक्षात्कारहेतुतानलोकतःप्राप्ता,तथापि तस्यमोक्षेजनयितव्ये दृष्टसन्निहित परमात्म दर्शनद्वारकत्व संभवे अदृष्टद्वार कल्पनस्य अन्याय्यत्वेन दृष्टपरमात्मदर्शनमेव द्वारं कल्प्यते । अतो नाकृतनिदिध्यासनस्यापि परमात्मसाक्षात्कारप्रसंगः, तत्तदधिकार्यनुसारेण नियत तत्तद्गुणवत्तया परमात्मध्यानविध्यपेक्षित तत्तद्गुणत्वावधारणाय फलव.

दर्थावबोधपर्यन्ताध्ययनविधिना तत्तद्गुणवत्त्वविषयक श्रवणमननाक्षेप संभवेऽपि तदन्यगुणविषयक श्रवणमननाक्षेपासंभवेन नियतविषयक ध्यानाख्यनामक निदिध्यासनविषयगुणान्य गुणवत्त्वविषयक श्रवणमननयोरत्यन्ताप्राप्त्या "श्रोतव्योमन्तव्य" इतिविधेरप्यपूर्वविधित्वं । तत्रश्रवणस्य मोक्षेजनयितव्ये दृष्टं सन्निहितंच मननमेवद्वारं, मननस्यतु मोक्षेजनयितव्ये ध्येयान्यगुणांशे अदृष्टं ध्येयगुणांशेतु ध्यानोपकारकत्वमपीति ।

केचित्तु- श्रवणमननयोर्नविधिः, अर्थावबोधपर्यन्ताध्ययन विधि तस्तत्तयोः प्राप्तेः, अतस्तयोरनुवादः, निदिध्यासनस्यतु मोक्षेजनयितव्ये दृष्टं दर्शनं द्वारं, दर्शनेत्वदृष्टं द्वारं। नचैवं -मोक्षं प्रत्येवादृष्टं द्वारमस्त्वितिवाच्यं । मोक्षंप्रति द्वारकल्पनादशाया मदृष्टस्यानुपस्थितत्वादिति।

अत्रोच्यते यदुक्तं "एतावदरेखल्वमृतत्व" मित्यादिना चतुर्णां मोक्षसाधनत्वेन विधानमिति । तन्न । प्रयोजकत्वमात्रेण तत्र सामानाधिकरण्योपपत्तेः । लांगलं जीवनमितिवत् । नहि लांगलं साक्षाज्जीवन हेतुः, अपितु कर्षणादिबहुव्यापारव्यवधानेनैव । निदिध्यासने मोक्षार्थं विहिते लोकसिद्धतत्साधनभावयोः श्रवणमननयो र्लोकतएव प्रवृत्त्युपपत्तौ तत्राप्यकस्मादेव गुरुभूतविधिव्यापार कल्पनानुपपत्तेः ।

यदुक्तं- निदिध्यासनस्य दृष्टपरमात्म दर्शनद्वारकत्वं कल्प्यत इति । तन्न । "स्मृतिलम्भेसर्वग्रन्थीनां विप्रमोक्षः" "तस्मिन्दृष्टेपरावारे" "भिद्यते हृदयग्रन्थि" रित्युभयत्रापि तुल्यवन्मोक्षसाधनत्व प्रतिपादनात्। दृष्टद्वारत्व संभवे तद्ग्राह्यमितिचेन्न। त्वयैव तदसंभवस्योक्तत्वात् । नहि निदिध्यासनस्याव्यक्तस्वभाव ब्रह्मसाक्षात्कारहेतुतान्यतः प्रातेतिह्यवोचः । तज्जन्यस्यादृष्टत्वेपि तत्स्वरूपं दृष्टमितिचेन्न । यत्रतज्जन्यं तत्फलजननयोग्यंच दृश्यते तत्र ह्येतन्न्यायप्रवृत्तिः, दृष्टमेव ह्यवहननस्य तुषविमोकसाधनत्वं, तुषविमोकश्चयोग्यएव पुरोडाशादिषु । अन्यत्र नैतन्न्याय प्रवृत्तिसंभवः। अदृष्टकल्पना भीत्या दृष्टं द्वारं कल्पयत स्तदर्थं पुन रदृष्टकुहरकल्पना पातात् । दृष्टद्वार कल्पनादशायां नतदुपस्थितिरितिचेन्न । दृष्टंहिद्वारत्वेन कल्प्यते, नस्वरूपेण, तथाकल्पनायांच तज्जन्यादृष्टोपस्थितिरनिवार्या ।

तस्माद्ध्यानभक्तिप्रत्यक्षात्मक मेकमेवज्ञानं मोक्षसाधन मित्यनुगृह्णन्ति वेदान्तरहस्यवेदिनः । अस्तुतर्हि नियमविधिः । यद्यप्यात्माविचारितवेदान्तैरेव ज्ञातव्य इति वेदान्तनियमोनसंभवति । आत्मनि वेदान्तातिरिक्त प्रमाणाप्रसक्तेर्व्यावर्त्याभावात् । नच-लौकिकत्वप्रतिपत्ता वुपायान्तरवल्लौकिकात्मज्ञाने मनःप्रमाणं प्रसक्तमितिवाच्यं । सिद्धान्ते मनसोप्रमाणत्वात्, उपादानतया तस्यशब्देना प्यपेक्षितत्वात् । नाप्यनुमानं, "नैषातर्केणे" ति निषेधशास्त्रादेव तत्सिद्धेः । श्रुतिसमान विषयस्य तस्य "मन्तव्य" इति श्रुत्यैव सहायत्वेनाङ्गीकारात ; भिन्नविषयस्यतु विवक्षित श्रुत्यर्थे प्रामाण्यप्रसक्ते र्नंनिवर्त्यत्वं । नापि पुराणवाक्यं व्यावर्त्यं ; " इतिहासपुराणाभ्यां वेदं समुपबृंहये " दिति तस्यापि वेदार्थज्ञानोपाय त्वोपगमात् । नाप्यात्मविषय-प्राकृतगाथा व्यावर्त्या , नस्छेक्षित वाक्यान्मुमुक्षूणामपि वेदाधिकारिणां तस्या निषिद्धत्वात् । नापि वेदान्तानां विचारेणैवात्माज्ञातव्य इति विचारानियमो प्युपपद्यते । तत्रापि व्यावर्त्याभावात् । नच-गुरुमुखं श्रवणं नियम्यतइति वाच्यं । "तद्विज्ञानार्थ"मिति ज्ञानार्थं गुरूपसदनविधिनैव स्वतन्त्रश्रवणस्य व्यावृत्तत्वात्, अन्यथा तद्विधेरदृष्टार्थतापत्तेः । नचा विचारित वेदान्तवाक्यं व्यावर्त्यम् । तन्मात्रा न्निर्णयानिष्पत्तेः । नापि मुमुक्षूणां मोक्षसाधनज्ञानायात्मैव श्रोतव्य इत्यात्मा नियम्यते; आत्मनोऽवि श्रेयत्वात्, अनात्मविचारस्य मुमुक्षुजिज्ञासितात्म ज्ञानानुपायत्वेनस्वतएव व्यावृत्तत्वात् । तथापि मुमुक्षूणा मद्वैतात्मविषय वेदान्तविचारो नियम्यते, तद्वाक्यस्थात्मशब्दस्य " इदंसर्वं यदयमात्मा" "आत्मनिविज्ञाते" सर्वमिदं विज्ञात " मित्येवमादि तत्प्रकरणस्थ वाक्यपर्यालोचनया अद्वैतात्मपरत्वात्, भिन्नात्मविषयवाक्यश्रवणं व्यावर्त्यते, ततो मुक्तिसाधनज्ञानासंभवात । नचैवम्मुमुक्षुः स्वतो निवृत्तइति वाच्यं; आपातप्रतीतिदशायां "द्वासुपर्णे"त्यादि वाक्यात " जुष्टंयदापश्यत्यन्यमीशमस्यमहिमानमिति वीतशोक " इति भेदज्ञाना च्छोकनिवृत्ति प्रतिपादनात

मुक्तिसाधनज्ञानार्थिनो विचारविध्यभावनियमेन ततो निवृत्त्यसंभवात् । नच आपातप्रतीतिदशायां "उदरमन्तरंकुरुत" इत्यादिप्रत्याख्यात भेदज्ञानस्या नर्थहेतुत्व प्रतिपत्तेर्न मुमुक्षो स्तत्र प्रतिपत्तिरितिवाच्यं; "तस्मादेकाकीबिभेती" त्यभेदज्ञानेपि तद्दशायां भयप्रतिपत्तेः । "नान्योतोस्तिद्रष्टे" तिभेदनिषेधश्च आत्ममात्रभेदविषय ईश्वरभेदनिषेधविषयो वेति न तदा निश्चेतुं शक्यते । तथाच यथा "व्रीहीनवहन्ती" त्यादौ दृष्टपुरोडाशहेतुभूत तण्डुलनिष्पत्तिमात्रस्य साधनान्तरसाध्यत्वे प्यपूर्वजनकत्वांशेऽ वहननंनियम्यते, एवमत्राप्यात्मज्ञानमात्रस्य तर्कितसाधनान्तरसाध्यत्वयोग्यतायामपि अविद्यानिवृत्तिसमर्था द्वैतात्मज्ञानसाधनीभूत वेदान्तश्रवणं पक्षे अप्राप्तं विधीयते, अर्थाच्च प्राग्विधिप्रवृत्ते र्नखविदळनादिव द्भ्रमगृहीत साधनान्तरव्यावृत्तिः । ततश्च भेदप्रवणचित्त स्तच्छास्त्रेपि कदाचित्प्रवर्तेत, तन्माभूदिति दयावतीश्रुतिराह "आत्मावा अरे द्रष्टव्य श्श्रोतव्योमन्तव्य" इति । नच-वस्तुतोयत्साधनं तदेवव्यावर्त्यमिति नियमः, किंतु यद्व्यावृत्ति बोधनं विना नियम्यमानस्य पाक्षिकप्राप्तिर्ननिवर्तयितुं शक्यते, तत्तस्य निवर्त्यं, लौकिकतुषविमोकेपि नखविदळनादे र्वस्तुतस्साधनत्वाभावात्, तज्जातीयसाधनत्वन्तु प्रकृतेपि, शरीरातिरिक्तात्मज्ञानमात्रे भेदशास्त्रस्यापि साधनत्वात्, स्वातन्त्र्येण पुराणवाक्ये प्रवृत्तिर्वा निवर्त्येति केचिदिति ।

अत्राभिधीयते ; आपातप्रतिपन्नवेदार्थं प्रति न नियमः, आपातप्रतीतिदशायां कुत्रापि प्रवृत्त्यसम्भवात् । नच कृष्यादाविव प्रवृत्तिः । "मृत्योस्समृत्युमाप्नोती" त्यादिनाऽनर्थश्रवणात् । नच - कृष्यादावनर्थ प्रतीतिः, किन्तु फलाभावशंकामात्रमेव । नच गृहीतभेदतात्पर्यकवेदान्तं प्रति नियमः, तेनास्यापि भेदतात्पर्यस्यैव ग्रहेण तंप्रत्यस्य वाक्यस्य त्वदुक्तार्थबोधकत्वासिद्धेः । नच - गृहीताभेदतात्पर्यकवेदान्तंप्रति, विचारादेव तात्पर्यावधारणेन निवृत्तविचारंप्रति विचारविधिवैयर्थ्यात्, सर्वस्याप्यात्मविषयवेदान्ततया व्यावर्त्यासिद्धेश्च ।

ननु-आपातप्रतीतिदशाया मद्वैतपरत्वेन प्रतिपन्नवाक्याविचारस्य विधेय तया तद्दशायां द्वैतपरत्वेन प्रतिपन्नवाक्य विषयकवि-चारो व्यावर्त्यइति चेन्न ; तद्बोधकपदाभावात् , भेदाभेद श्रुत्योरविरोधाय भेदश्रुतेर्विचार्यत्वाच्च । किंच न्यायवशाद्धि अस्याश्श्रुतेरद्वैतार्थपरत्वं ज्ञायते , नतु वाक्येनैव, अद्वैतं श्रोतव्यमिति वाक्याद-र्शनात , तस्मा दिहेवान्यत्रापि न्यायेनैवा द्वैतपरत्वस्य ज्ञानान्नतस्य व्यावृत्तिसंभवः ।

ननु - एतस्मिन्नेव वाक्ये उपक्रमा दितात्पर्यलिंगेन यदा अद्वैतपरत्वं निश्चितं नान्यत्र , तस्यां दशायां संप्रति नियमउपपद्यत इतिचेन्न । एतच्छ्रुतिविरुद्धतया ज्ञातस्य भेदवाक्यस्य तत्वपरत्वज्ञाने सति अद्वैतपरत्वेनैव निश्चयेन व्यावर्त्यत्वासिद्धेः, अतत्वपरत्वेन नि-श्चयेतु प्रवृत्तेरेवाप्रसंगात् । किंच एवं पुरुषदशाविशेषमवलम्ब्य विधि प्रवृत्तौ वैतुष्यस्यावहननसाध्यत्वानवबोधदशा मवलम्ब्य व्रीही नव हन्तीत्यस्याप्यपूर्व विधित्वप्रसंङ्गात । किंच- आत्मदर्शनायहि"आत्माद्रष्ट व्य"इत्यनूद्य श्रवणनियमः क्रियते - सच प्रकरणादद्वैतात्मैवेति तद्दर्शने भेदविचारस्याप्राप्ते र्न नियमः । किंच - किं मद्वैतवाक्यवि-चार मेव कुर्यां न्न द्वैतवाक्य विचार मिति नियमः , उताद्वैत निर्णयफलकविचारमेवकुर्या न्न द्वैतनिर्णयफलकमिति ? नाद्यः । अद्वैतवाक्यएव द्वैतपरत्व साधकविचारसंभवात् तस्याव्यावृत्तेः । समीचीनविचारएव विवक्षितइतिचेत्; तर्हि अद्वैतवाक्यएवा समी चीनविचारो व्यावर्त्यस्स्यात् , नतु द्वैतवाक्यविचारः । ननु द्वैतवाक्यां शेपि नियमात द्वैतवाक्यविचारोपि व्यावर्त्यइतिचेत् । एवंसति द्वै-तवाक्ये अद्वैतपरत्वसाधकविचारसंभवात् तद्व्यावृत्तिप्रसंगात , नचै-तत्त्वयेष्यते । किंच - अद्वैतवाक्यविचारेपि सामीचीन्येचज्ञातेसमीची-नेप्रवृत्तेरसमीचीनान्निवृत्तेश्च ननियमापेक्षा, तदपरिज्ञानेच ननियमेन समीचीनप्रवृत्तिसिद्धिः । नापिद्वितीयः उभयविधविचाराणां पूर्व मज्ञानेनियमविध्यसंभवात , ज्ञानेचविचारारंभवैयर्थ्यात ।

यदुक्तं भ्रमगृहीतसाधनव्यावृत्त्यर्थमेव नियम इति, अस्त्वेवं; तथापि यदि नियमेन विना भ्रमनिवृत्तिर्न स्यात तदा हि नियमस्स्यात्। न च नियमेन विना साधनत्वभ्रमो विद्वद्वचनादेर्निवर्तते, इह तु नियमाभावेऽपि न्यायानुगृहीतैर्ज्ञानस्य मोक्षसाधनताप्रतिपादकवाक्यै ज्ञानस्याद्वैतविषयस्यैव मोक्षसाधनताप्रतिपत्तौ कथं द्वैतज्ञानस्य मोक्षसाधनत्वभ्रमः। वस्तुतस्तु यदि भ्रमगृहीतसाधनव्यावृत्त्यर्थो नियमस्स्यात्, तदा "उरुप्रथस्वे" ति मन्त्रस्य प्रथनप्रकाशकत्वलिंगेन पुरोडाशप्रथने विनियोगे मन्त्रान्तरेऽपि प्रथनप्रकाशकत्वलक्षणलिंगभ्रमात्तस्यापि तत्रैव विनियोगभ्रमे अनुष्ठेयार्थप्रकाशनलक्षणकार्यस्य एकेनैव मन्त्रेण सिद्धौ मन्त्रद्वयं वैकल्पिकमेवेति बुद्धौ सत्यां "उरुप्रथस्वेति पुरोडाशं प्रथयती" ति तदर्थशास्त्रं मन्त्रान्तरनिवृत्त्यर्थं नियमविधिरेव स्यात्, नानुवादः। किञ्च भ्रमगृहीतसाधनव्यावृत्त्यर्थं नियमं वदन्कथावाचापक्षान्तराणि निराचकर्थ। पूर्वभागस्यापि "सर्वे वेदा यत्पदमामनन्ती" त्यादिना ब्रह्मणि प्रामाण्यभ्रमात वेदान्तनियमो युज्यत एव। "नैषा तर्केणे" ति श्रुत्यनुसन्धाने अनुमानस्यापि निवर्त्यत्वं युज्यत एव। "नम्लेच्छितवा" इत्यादिवाक्यस्य तदर्थस्य वा स्फुरणदशायां प्राकृतगाथायाश्च सार्थत्वेऽपि न हानिः। किञ्च निषिद्धानुष्ठानेन दुरितापूर्वोत्पत्तावर्थाद्दृष्टलाभस्याप्यनिवारणान्नियमेन विना न निवृत्तिः। किञ्च "नम्लेच्छितवा" इति गाथोच्चारणस्य निषेधेऽपि तद्विचारस्य न निषेधः। तथा गुरूपसदनस्यादृष्टार्थत्वभ्रमवतो गुरुमुखश्रवणनियमे वा का हानिः। तथा विरोधास्फूर्तिदशायां विचारितवाक्यादपि निर्णयोत्पत्तेरविचारितवेदान्तव्यावृत्तौ वा हानिः का? तस्मात्त्वदुक्तः पक्षश्शंकितुमप्यनर्हः। यद्यपि त्वद्दूषिताः पक्षाश्शंकार्हाः। तेऽप्यपरोक्षसाधनान्तरस्याव्यावर्त्यतयैव निरस्ताः।

एतदुक्तं भवति, किमुत्पन्नमप्यवधारणं नियमादृष्टाभावादनिवर्तकं? उत नियमादृष्टाभावादवधारणमेव नोत्पद्यते? आद्ये मोक्षस्यादृष्टसाध्यत्वप्रसंगः। द्वितीयेऽनुभवविरोधः। दृढतरविश्वस्तोपदेशादिनाप्यवधारणं जायत एव। अपरोक्षार्थविषयत्वात् त्वद्रीत्याऽपरोक्षमेवेति। एवं च यदि तृणारण्यादिरूपाननुगतकारणेष्वनुगता शक्तिः कारणतावच्छेदकत

येष्यते, तदा नियोगीयव्रीहिष्वपि अवहननसाध्यतुषविमोकंप्रति नखवि दळनादेः स्वसाधनत्वमस्त्येव। नच - तदनुष्ठानेपि यागनिर्वृत्तिप्रसंगः। नियमादृष्टाभावात्। यदि च कारणाननुगमे कार्यवैजात्यं कल्प्यते तदोद्देश्यतावच्छेदकधर्माधिकरणे यद्वस्तु तत्साधनं तदेव नियमनिवर्त्यं, नियमेन विना ततो निवृत्त्यसंभवात्। उद्देश्यतावच्छेदकीभूततुषविमोकत्वाधिकरणे क्वचिद्विदळनस्यापि साधनत्वमस्त्येव। नच--मोक्षसाधनज्ञानत्वरूपोद्देश्यतावच्छेदकाधिकरणे भेदविचारस्य साधनत्वमस्ति। ननु नियोगीयतुषविमोकत्वमेवोद्देश्यतावच्छेदकमितिचेन्न। उद्देश्यपदेन प्रवृत्तिद्वयोद्देश्यस्य निवक्षितत्वात्। तथाच नियमाप्रवृत्तिदशाया मेतदधिकारिणः प्रवृत्तिद्वयप्रयोजकीभूतधर्मे तात्पर्यं। वस्तुतस्तु--तुषविमोकत्वमेव इष्टतावच्छेदकं, नत्वेतन्नियोगीयतुषविमोकत्वं, तस्य पूर्वमज्ञानात्। तस्मात् यथा सुखत्वेनेष्टत्वेपि तत्स्वसंबन्धितया काम्यते, तथावैतुष्यमपि स्वकीयनियोगीयव्रीहिगततया काम्यते। अन्यथा यत्रावघातोपक्रमानन्तरं दैवाद्विघाताद्वैतुष्यानिर्वृत्तिः तत्र इष्टतावच्छेदकस्वरूपस्या प्रसिद्धत्वेन इच्छाया दुरुपपादत्वात्। एतेन स्वातन्त्र्येण पुराणवाक्ये प्रवृत्ति र्व्यावर्त्यतइत्यपि निरस्तं, ततोप्यपरोक्षज्ञानस्या विद्यानिवृत्ते श्चावश्यं भावात्। सप्रकारकात्मसाक्षात्कारे मनसः कारणत्वेन आत्मज्ञानत्वसामान्येन निर्विशेषात्मज्ञानेपि तस्य प्रसक्तेः स्तद्व्यावृत्तये नियमइतिकश्चित्। तन्न। शाब्दज्ञानेपि मनसः कारणत्वेना व्यावर्त्यत्वात्। करणत्वेन व्यावर्त्यतेतिचेन्न। त्वन्मते मनसः करणत्वासिद्ध्या प्रसक्त्यभावात्। अस्तुवा - करणत्वं, तथापि मनसोऽसाध्यत्वान्न तस्य व्यावर्त्यता। नच - मनः प्रणिधानं व्यावर्त्यम्। तस्या त्मप्रत्यक्षे कारणत्वाभावेना त्मत्वस्य तत्राप्रसञ्जकत्वात्। नह्यहमिति प्रत्यक्षे प्रणिधानमपेक्ष्यते। ननु - सूक्ष्मार्थग्रहणे प्रणिधानस्यापेक्षितत्वा त्तेनरूपेण तत्प्रसक्तमितिचेत्; बहुकालं प्रणिधानेपि सद्वितीयात्मनएव प्रतीयमानतया तदकरणत्वस्य लोकतएव निश्चयात्। किञ्च - प्रणिधानस्य परिज्ञाताकारातिरिक्ताकार परिज्ञान हेतुत्वादर्शनादपि तत्साध्यत्वाभावो लोकतएवावगतः। किञ्च - प्रणिधा

नस्यावधानरूपत्वा त्तदपि विचारेणापेक्षितमेव । तस्मा न्ननियमविधि सम्भवः । ननु - सिद्धान्ते स्वतन्त्रपुराणादिविचार व्यावृत्त्यर्थो नियमः किं नस्यात् । न । तस्यापि श्रवणत्वेन ग्राह्यत्वात्, तद्व्यावर्तकपदाभावात्, " श्रावयेच्चतुरोवर्णा " निति तस्यापि श्रवणत्वोक्तेः । नापि स्वतन्त्रस्यानुमानस्य व्यावर्त्यत्वं । शास्त्रयोन्यधिकरणेन तन्निरासात् । किञ्च - श्रवणस्य निदिध्यासनसमानविषयत्वा न्निदिध्यासितव्यगुणे स्वतन्त्रानुमाननिवृत्त्यर्थो नियमस्स्यात्, तत्र तद्गुणविशिष्टनिदिध्यासनस्य तदपरोक्षस्यवा मोक्षसाधनत्वेनाज्ञाने तदर्थमनुमाने प्रवृत्तिर्नस्यात्, तज्ज्ञानेच श्रुत्या गुणवैशिष्ट्येपि ज्ञाते नानुमाने प्रवृत्तिः । सिसाधयिषयानुमानंच मननान्तर्गतमेवेति न निवर्त्यम् । अस्तु तर्हि - मननविधिः श्रुतेर्थे जिज्ञासाविरहादपूर्वविधिरेव, विहितेच सिषाधयिषयानुमानं संभवत्येवेतिचेत् । न । नह्येतत्पदमनुमाने व्युत्पन्नं, किन्तु ज्ञानमात्रे, अतः प्रकृते शाब्दज्ञानस्य तदधीनध्यानस्य च " श्रोतव्यो निदिध्यासितव्य " इत्युक्ते गोबलीवर्दन्यायेन श्रवणाद्यतिरिक्तं ज्ञानं मन्तव्यइत्युच्यते । ननु - गोबलीवर्दन्यायात् संकोचेसति लक्षणयैव त्वदिष्टार्थबोधनं वाच्यं, ततश्चानुमानमेव लक्षणया विधीयतामितिचेन्न । अनुवादेहि यथाप्राप्तयनुवादाल्लक्षणानदोषाय, विधौतु लक्षणादोषएव - अन्यथा विधित्वसिद्धये सर्वत्र लक्षणाया स्सुलभत्वात् क्वाप्यनुवादो नस्यात् । अस्तु तर्हि कार्यत्वाद्यनुमानस्य श्रुतिविचारस्यच नियमेन प्राप्ता वाज्यभागौ यजतीतिवं देकस्मिन् शेषिणि शेषद्वयप्राप्तौ शेषान्तरनिवृत्तिफलक परिसंख्येति; तत्राखण्डोपकारकस्य समुच्चिताज्यभागस्य प्रयाजादि साध्यत्ववद् दिह ज्ञानस्य समुच्चितप्रमाण साध्यत्वाभावात् शब्देतिकर्तव्यताभूत तर्कसाहित्यस्य चेष्टत्वा न्नपरिसंख्येति । तस्माच्छ्रोतव्यइत्यस्य विधित्वाभावान्नविध्युपयोगिन्यायप्रतिपादकं सूत्र मिति । तस्माच्छ्रोतव्यइति विहितविचारप्रतिज्ञारूपत्वासंभवात कृत्स्नविचारस्यापि प्रतिज्ञाविषयतयात्मनित्यत्व ज्ञानमोक्ष ! तत्वादि विचारस्यापि तदन्तर्गतत्वा न्नतद्धि

परिशेषेच निर्गुणत्वव्याघाताच्च । ख्यातिलाभपूजार्थप्रवचनादिकौतुकात्स्वयं तत्परीक्षणमिति चेत्, हन्तैवं साधु शमदिसाधनसम्प्रत्सम्पादिता । कामक्रोधादेरेव वेदान्तश्रवणनिमित्तत्वेनोपादानात् । ख्यातिलाभाद्यर्थश्रवणेच नित्यानित्यवस्तुविवेकादेः क्वोपयोगः ।

अथ वैधत्वान्मीमांसाश्रवणस्य स्वयं विमर्शइति, तदपि न, अर्थनिश्चयसिध्द्यर्थत्वाद्विमर्शस्य । निश्चयो यद्युपदेशात् सिध्यति, किं वृथा प्रयासेन । अन्यथा प्रदक्षिणनमस्कारादिवददृष्टार्थत्वमेव स्यात मीमांसाश्रवणस्य । नच मीमांसाश्रवणस्य वैधत्वमिति प्रागेव समर्थितम् । अस्तुच वैधत्वम्, तथापि नित्यानित्यवस्तुविवेकस्यापि स्वेतिकर्तव्यताभूतमीमांसाधीनस्यैव विधिना स्वीकारात् तथाविधस्यच तस्य अविरोधलक्षणसाध्यत्वा न्न पूर्वत्वसिद्धिः ।

वेकस्य पूर्ववृत्तत्वसंभवः । तर्ह्यगत्याब्रह्मणि ज्ञातव्याकारान्तरमिष्यत इत्यत्राह (परिशेषेचेति) तर्हि जगत्कारणत्वादिकमेव ज्ञातव्यंस्यात्, तथाच तेन तदुपयोगिसार्वज्ञ्यादिभिश्च सविशेषत्वान्निर्विशेषत्वभङ्गइत्यर्थः । मिथ्याभूतकारणत्वादिपरत्वेच साधु तत्त्वावेदकत्वं मोक्षार्थत्वंच वेदान्तशास्त्रस्यो पपादितं स्यात । (प्रवचनादीति) आदिशब्देन जल्पादि कथा प्रवर्तनं गृह्यते । (अन्यथेति) यद्यर्थज्ञानवन्तं प्रत्यपि विधीयेत शब्देऽर्थः । अर्थज्ञानवन्तं प्रत्यपि वैधत्वे नियमविधित्वभंगा दपसिद्धांतोपातिभावः । फलस्यासिद्धत्वा न्नतदर्थश्रवण मित्युक्तं, इदानीं रागप्राप्तत्वा न्नविधिसंभवइति पूर्वोक्तंस्मारयति (नचेति) (तथापीति) विधिर्मीमांसायाः स्वेतिकर्तव्यतात्वेनान्तरंगत्वा त्तज्जन्यमेव नित्यानित्यविवेकं विचाराधिकारतया स्वीकरोति नतूपदेशसाध्यं, तादृशमीमांसाधीनश्चनित्यानित्यविवेको द्वितीयाध्यायसाध्यइति नतस्य पूर्वत्वमित्यर्थः । तर्ह्यस्मादेवासंभवादौपदेशिको नित्यत्वादिविवेकोधिकारतया स्वीक्रियतइतिचेन्न ; उपदेशतएव फलसिद्ध्या तदसंभवस्याप्युक्तत्वात्, सूत्रबहिष्ठविचाराधीन नित्यानित्यविवेकस्याधिकारत्वेच द्वितीयाध्याये तन्निरूप

यदि चैवं वेदान्तश्रवणमिच्छसि, तदा कर्ममीमांसायां कुतस्ते कोपः । श्रूयते हि "स्थाणुरयं भारवाहः किलाभूत्, अधीत्य वेदं न विजानाति योऽर्थ"मिति । तेन कर्मभागश्रवणपूर्वकमेव ब्रह्मभागश्रवणमिति सिद्ध्यति । न तावदनधीतवेदस्य वेदान्तश्रवणमुपपद्यते - अनधिकारात् । नचोपनिषन्मात्राध्ययनं कस्यचित् शास्त्रार्थः; स्वाध्यायोऽध्येतव्य इत्यखण्डग्रहणात् । तस्मात् स्वाध्यायविध्यवणाच्च । कृत्स्नाध्ययने च कृत्स्नार्थविचारमेव विधिः प्रयुङ्क्ते । तथाच ब्रह्मविचारात् पूर्वं पश्चाद्वा कर्मविचारोऽपि कर्तव्य एवेति पश्य । तथाच सति यदि साधनचतुष्टयसंपत्तिपूर्वकम श्रूयन्त वेदान्ताः; कथमसौ पुनरनपेक्षितं विरुद्धत्वाभिमतं कर्मजिज्ञा

सांप्रयम् । (कर्ममीमांसायामिति) तत्रवैधत्वं कुतोनेच्छसीत्यर्थः । (तेनेति) अविशेषेण पूर्वोत्तरभागात्मक कृत्स्नवेदविचारस्यापि कर्तव्यतां बोधयन्नयं विधिरनुष्ठयस्य क्रममाकांक्षमाणो वेदक्रमानुसारेण तदितिकर्तव्यताभूत विचारक्रम मंगीकरोतीति पूर्वमीमांसायाः प्राथम्यं सिध्यतीत्यर्थः । प्रकारान्तरेणापि क्रममुपपादयति (नतावदिति) (अनधिकारादिति) स्थाणुरयमिति वाक्ये अधीतवेदस्तं विचारयेदिति विधिपर्यवसानेन अध्ययनस्य तदधिकारत्वादितिभावः । उपनिषन्मात्राध्ययने तद्विचारोयुक्तः अधिकारस्यसत्त्वादित्यत्राह (नचेति) (कस्यचिदिति) कस्यापिमते अध्ययनविध्यर्थोनभवतीत्यर्थः । विहिताध्ययनस्यैवविचारविधौ निमित्ततयाऽनुवादात् कृत्स्नस्वाध्यायाध्ययनस्यैव विधानान्नैकदेशाध्यायिनो विचाराधिकार इतिभावः । कृत्स्नाध्ययनस्याधिकारत्वेऽप्येकदेशविचारः कुतोनस्यादित्यत्राह (कृत्स्नेति) अधीत्यवेदं विचारयेदित्यत्राधीतस्वाध्यायमात्रस्यैव विचारविषयतया प्रतीतेरितिभावः । विचारद्वयकर्तव्यतायां सिद्धायां ब्रह्मविचारादनन्तरं कर्मविचारासंभवात् ततः पूर्वत्वं कर्मविचारस्येत्युक्तं - इदानीं विचारद्व

सेतेति परिशेषात्कर्मविचारस्य पूर्वत्वसिद्धिः । यदातु कर्मपूर्वं विचारितं तदा "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणोनिर्वेदमाया" दित्यादिश्रुतिसिद्धप्रकारेण ब्रह्मबुभुत्सासंभवतीत्यतोपि क्रमानियमइतिकर्मविचारस्य पूर्ववृत्तत्वमवश्याश्रयणीयम् । एवं रागप्राप्तश्रवणपक्षेपि क्रमसिद्धिः, रागोऽपि हि सांगाधीतसशिरस्कवेदस्या पातप्रतीत सर्ववेदभागार्थस्य कर्मब्रह्मभागयोरविशेषेण सातिशयनिरतिशय समस्त पुरुषार्थप्रतीत्या वुभयत्राप्यविशेषेण प्रवर्तते क्रममपेक्षमाणः स्वाध्यायानां सर्वेषां प्रायशः कर्मोपक्रमत्वात् सारस्वतांगवत् मुख्यक्रमानुरोधेन स्वाध्यायेतिकर्तव्यताभूतमीमांसाक्रमं प्रयुञ्जानः "कांक्षन्तः कर्मणां सिद्धिं यजन्तइहदेवताः । क्षिप्रंहि मानुषे लोकेसिद्धिर्भवतिकर्मजा" इति न्यायेन त्रिवर्गप्रथमप्राबल्यरूप मर्थक्रमं चापेक्षमाणः; "यज्ञेन दानेने"त्यादिना यज्ञाद्यंगकोपासनविधौ यज्ञादिदृष्टान्तेषु यज्ञादिकल्पनेच पदार्थभूतयज्ञादिस्वरूपाधिगम साकांक्षतया पूर्वमेव कर्मविचाराक्षेपं पश्यन् ब्रह्मविद्यांगभूत कर्मसमृद्ध्यर्थतया ब्रह्मदृष्टिरूपतयाच शारीरकेमुख्यसंगतस्यो द्गीथविद्यादेश्च कर्मे-

---

यकर्तव्यतायां बुभुत्सोत्थापकत्वेनोपजीव्यत्वात् कर्मविचारस्य पूर्ववृत्तत्वमित्याह (यदात्विति) प्रसंगादाह (रागेति) (मुख्यसंगतस्येति) अनेनप्रासंगिकापेक्षितत्वमात्रेण कर्मणः पूर्ववृत्तत्वनियमोनयुक्तः, साक्षात्संगतस्य तत्सापेक्षत्वेहि तथा स्यात्, अथशब्दे प्रतिज्ञातार्थापेक्षया पूर्ववृत्तत्वं हि प्रतीयते, नच प्रसंगसंगतोर्थः प्रतिज्ञाविषयइति निरस्तम् । प्राप्यत्वेन प्रापकत्वेनच प्रतिपन्नस्य ब्रह्मणस्तथैव जिज्ञास्यत्वात्, तेनैव रूपेण विषयतया उपासनस्य तदुपयुक्तानांच प्रापकप्रतिज्ञान्तर्भावेण उपासनार्थकर्मसमृद्धयर्थोद्गीथानामपि साक्षात्संगतत्वात् । नचेह कर्मनिरूपणमपि शंकनीयं । कृतकरत्वमसंगात् । ननु तर्हि कर्मसमृद्ध्यर्थत्वादुद्गीथादेः पूर्वकाण्डएव निरूपणंस्यादित्यत्राह (ब्रह्मदृष्टीति) ब्रह्मज्ञानंविना तन्निरूपणं नसंभवतीतिभा

गाश्रयतया तदाश्रयांगकर्मपरिज्ञान ज्येष्ठतामालोचयन् कर्मब्रह्ममीमांसयोः क्रमेण पुरुषं प्रवर्तयति । किञ्च - प्रसंगचिन्तितस्याप्यर्थस्य प्रकृते केनचिदुपयोगेन भवितव्यं, तत्र यद्यपि विद्यारूपत्वाविशेषादिहोद्गीथविद्यादीनां प्रसंगस्संभवति, तथापि तच्चिन्तनस्यात्र क उपयोगः । कर्मिणां तदनुष्ठानेन कर्मसाद्गुण्यार्थमिह चिन्तेति-चेन्न; कर्मनिष्ठस्यात्रशास्त्रे त्वयाधिकाराभावकथनात् । अथ यदि-कर्मविन्मध्ये समागत्य स्वोपयुक्तांशं कश्चिच्चिन्तयत्विति मन्यसे; तदसत्, अनिरूपितब्रह्मस्वरूपस्य ब्रह्मदृष्टिरूपासु तासु चिन्तनानवकाशात् । तदाह- " उद्गीथाद्युपासनानि कर्मसमृद्ध्यर्थान्यपि ब्रह्म दृष्टिरूपाणि ब्रह्मज्ञानापेक्षाणी " त्यादि । अथ सएव कर्मार्थं ब्रह्मापि चिन्तयेत्, तर्हि ततएवैकशास्त्रयं तावत्सिद्धं -

---

वः । शारीरकएव मुख्यसंगतत्वरूप विशिष्टसाध्ये कर्मसमृद्ध्यर्थता मुख्यांशहेतुः । सच भागद्वयसाधारणः । कर्मसंबन्धिसमृद्धिहेतुत्वस्य कर्मभागनिरूपणहेतुत्वात् । कर्मसमृद्धिर्हि कर्मफलप्रतिबन्धनिरासः । अतः विद्यारूपफलप्रतिबन्ध निरासकत्वस्य इह निरूपणहेतुत्वाच्च, ब्रह्मदृष्टिरूपतात्विहैव संगतत्वहेतुः । पश्यन्नालोचयन्निति रागसमानाधिकरणत्वात तन्निष्ठत्वोपचारः । ब्रह्मविद्यांगकर्मसमृद्ध्यर्थतया साक्षात्संगतिरित्युक्तं, इदानीं प्रसंगसंगतेरसंभवाच्च साक्षादेव संगतिरित्याह (किंचेति) यद्यत्र प्रसंगतश्चिन्त्यते तस्य तत्रोपयोगेन भवितव्यं अत इहाप्युपयोगो वाच्यइत्यर्थः । ननु विद्यारूपत्वेन साजात्यमेवेह प्रसंगः नचोपयोगाभावेन तदसंभवः इत्यत्राह (यद्यपीति) नहि वयं विद्यारूपत्वेन साम्याभावं ब्रूमः, किन्तु तस्मिन्सत्युपयोगाभावे प्रयोजनाभावात निरूपणं न स्यादित्युपयोगो वाच्यइति स च नेहास्तीत्यर्थः । उपयोगमात्रादेव सप्रयोजनत्वं न त्विहोपभोगेनेत्यभिप्रायेण शंकते (कर्मिणामिति) (ततएवेति) यदि कर्मार्थमुद्गीथनिरूपणाय ब्रह्मचिन्तयेत्, तर्हि ब्रह्मचिन्तया उद्गीथद्वारा कर्मा

प्रागुक्तनयेनक्रमश्च । गुणप्रधानभाववैपरीत्यमेव तु भवता साधितं। ब्रह्मविदस्तु तच्चिन्तयाकोपयोगस्त्वन्मते । कर्मविद्भ्यस्तदुपदेशउपयोगइतिचेत्तर्हि कर्मापि चिन्तयेदविशेषात् । अथ विविदिषार्थकर्मसाद्गुण्यसिद्ध्यर्थमिति पश्यसि; तथाप्यनुपयोगएव - विविदिषायां जातायामेव श्रवणे प्रवृत्तेः, तत्रापि पूर्ववत्परोपदेशार्थत्वायोगात् । कर्मणांच वेदनांगत्वस्य प्रागेव स्थापितत्वात् न विविदिषांगकर्मसिद्धिः । ब्रह्मविद्याभ्यः पृथक्करणमेव प्रयोजनमिति चेन्न; तस्यैकाधिकरणमात्रसाध्यत्वात् , तथाचात्र चिन्तनस्यादर्शनात् प्रकारा

र्थत्वात् कर्मब्रह्मविचारयोरैकशास्त्र्यं सिद्ध्यतीत्यर्थः । नैतावदेव , अनिष्टान्तरमपि तव सिद्ध्यतीत्याह (प्रागिति) ऐकशास्त्र्येसति क्रमाकांक्षायां मुख्यक्रमानुरोधादिन्यायेन क्रमोपि सिद्ध्येदित्यर्थः । बाधकान्तरमप्याह (गुणप्रधानेति) ब्रह्मोपसर्जनतया हीतरेषां निरूपणमुचितं , त्वयातु ब्रह्मणएव इतरोपसर्जनतया निरूपणमुक्तमित्यर्थः । त्वदिष्टं किमपि न साधितमित्यवधारणार्थः । एवमनिष्टप्रसंगात्त्वयैव मुपयोगो वक्तुं न शक्यतइति स्थितम् । एव मुपयोगमात्रेण सप्रयोजनत्वमंगीकृत्योक्तं, इदानीं मिहोपयोगाभावे एतदधिकारिणस्तत्र प्रवृत्त्यसंभवादिह तन्निरूपणं नस्यादित्याह (ब्रह्मविदास्त्विति) (कर्मापीति) ब्रह्मविदिति शेषः । यदिच मोक्षसाधनश्रवणादिव्यासक्तस्य मुमुक्षो स्तदसंम्भव इति मन्यसे; तदोद्गीथादिचिन्तायामपि तुल्यमिति भावः । ननु - स्वस्य विविदिषायां जातायामपि परस्य विविदिषोत्पादनाय तदर्थकर्मसाद्गुण्यार्थन्तंप्रत्युपदेशाय उद्गीथादिचिन्तनमित्यत्राह (तत्रापीति) कर्मणोपि विचारप्रसंगादित्यर्थः । (न विविदिषांगकर्मसिद्धिरिति) विद्यांगकर्मसमृद्ध्यर्थत्वं तु त्वया नेष्यत इतिभावः। एवमिहोपयोगे वाच्ये साक्षात्संगतिरेवेति स्थितं। नचैवं प्रसंगसंगत्युच्छेदः । कर्मविचाराधिकार्युपयोगितयैव शेषलक्षणे संगतस्याप्यौपादानिकशेषत्वस्य प्रयुक्त्यध्याये चिन्तनात् ।

न्तरेष्वेतु बहुशोत्र तासां चिन्तनात् । एवं कर्मविन्निरूपणे ब्र ह्मवेदनापेक्षणात् ब्रह्मनिरूपणेच कर्मवेदन सापेक्षत्वात् अन्यत रविदो ऽशक्यनिरूपणासूद्गीथविद्यासूभयविदएव चिन्तनावकाशइति फलितं । शारीरकेच ब्रह्मस्वरूपंनिरूपणानन्तरमेव तच्चिन्तनं सूत्रितं । तस्मादत्रैव साक्षात्संगतस्य तच्चिन्तनस्य प्रधानोपयोगापेक्षायां अं गभूतकर्मसमृद्धिद्वारां गिनो वेदनस्य शीघ्रनिष्पादनं नाम महानुप्र योगः। तदप्याह " तान्यपि कर्माण्यनभिसंहितफलानि ब्रह्मावियो त्पादकानीति तत्साद्गुण्यापादकान्येतानि सुतरामिहैव संगतानी " ति। किंच " अर्केचेन्मधुविन्देत किमर्थं पर्वतं व्रजेत् । इष्टस्या र्थस्यसंसिद्धौ कोविद्वान्यत्नमाचरेत् ॥ " इतिन्यायात्कर्ममात्रेण चेद मृतत्वंलभ्येत कः पुनः कर्मांगकात्कर्मसमुचिताद्वा ज्ञानादमृतत्वं लि प्सेतेत्येतदप्युक्तं प्रागेव । अतोपि कर्मण्येव प्राक्प्रवृत्तिः - कर्मणितु निरूपिते न्यायपरिश्रान्तचेतस्तयोत्तरोत्तरातिशयित , कर्मविधानादि-

---

हेत्वन्तरेणापि साक्षात्संगतिं साधयति (एवमिति) विचारद्वयसापे क्षतया पृथङ्निरूपणीयस्यास्य ब्रह्मचिन्तायां निरूपणं तत्रैव साक्षात्संग तिं द्योतयतीत्यर्थः । ननु प्रसंगादपि तत्र तन्निरूपणोपपत्तेः कथं - साक्षात्संगतिरित्याशंकानिरासाय ब्रह्मस्वरूपनिरूपणानन्तरमेवेत्यु- क्तम् । यदिद्युद्गीथादिचिन्ताप्रसंगतस्स्या त्तदा ब्रह्मविद्यानिरूपणानं न्तरं स्यात् , सातु ब्रह्मविद्याभ्यः प्रागेव ब्रह्मनिरूपणानन्तरं क्रियत इत्यर्थः। साक्षात्संगतौवा कथमिहोपयोग इत्यत्राह (प्रधानेति) नित्य फलेच्छायामपि कर्मणएव पूर्ववृत्तत्वमित्याह (किंचेति) (संसिद्धा विति) अयत्नेनेति शेषः (कर्ममात्रेणेति) आपातप्रतीतिदशायां त- त्राप्यक्षयफलत्वप्रतीते स्सर्वेभ्यः कामेभ्यइत्यादिना सर्वान्तर्भावेण मो क्षफलत्वप्रतीतेश्चेति भावः । (न्यायपरिश्रान्तेति) सम्यगभ्यस्तन्या यतयेत्यर्थः (उत्तरोत्तरेति) प्रयत्नतारतम्यात्फलतारतम्यासिद्धिः; त- च्च स्वरूपतः कालतोवा वाच्यम् , तथाऽऽवृत्तिविधानादपि तत्सिद्धि

भिः कर्मणामल्पास्थिरफलत्वमवसाय तत्संवादकानिच "परीक्ष्य लोका" नित्यादीनिवाक्यानि प्रागापातधीजनकान्यपि निरूपित संवादाद्यथाश्रुतार्थानि सामान्यतो निश्चित्यानन्तस्थिरफलस्य केवलकर्मभिरलभ्यतां मत्वा प्राचीन कर्मोपस्कृतज्ञानसाध्यानन्तस्थिरफलापातप्रतीत्या प्रतिबन्धकराहितया सञ्जातबुभुत्सातिशयः शारीरकशास्त्रमारभेतेति स्थितमेतत्। कथंच नित्यानित्यवस्तुविवेकसिद्धये शास्त्रान्तरावकाशः ; प्रागुपनयनात् कामचारवादभक्षितया यथोपलब्धकुक्षिभरेर्बालस्य शास्त्रान्तरावतारशंकापि नास्ति , उपनीतस्य -

---

रित्यर्थः । (निरूपितेति) अनित्यत्वप्रतिपादकांशस्य निरूपणसंवादित्वादंशान्तराण्यपि यथाश्रुतार्थएव न्यायसंवादीनीति सामान्यतो- निश्चित्येत्यर्थः । अत्र निश्चयशब्देन समानकोटिकसंशयविरोधित्वं विवक्षितम् । एतन्निश्चयानन्तर मुत्कटकोटिकएव संशयो भवति नतु समानकोटिकइति भावः । तेन नापातप्रतीत्येति वक्ष्यमाणविरोधः । (प्रतिबन्धकराहित्येति) उक्तरीत्या प्रथमभाविनी कर्मजिज्ञासानिवृत्तेति भावः । (बुभुत्सातिशयइति) पूर्वोक्तसामान्यनिश्चयो तिशयहेतुः । एवं नित्यानित्यवस्तुविवेकस्यौपदेशिकत्वे कृत्स्नस्यौपदेशिकत्वसम्भवाद्विचारवैय्यर्थ्यमुक्त्वा विधिबला द्विचारमाशंक्य विध्यंगीकारेपि कर्मणएव पूर्ववृत्तत्वं स्यादित्युक्तप्रसंङ्गाद्रागप्राप्तिपक्षेपि क्रमनियम उपपादितः । एवं मौपदेशिकनित्यानित्यविवेकपक्षो दूषितः । शास्त्रजन्यनित्यानित्य विवेकपक्षे दोषान्तरमाह (कथंचेति) (कामचारेति) ततश्च यथेच्छाचारिणो ह्युपनीतस्य अलौकिकपुरुषार्थेच्छाविरहेण तदर्थं प्रवृत्तिर्न सम्भवति । नच - शास्त्रान्तरप्रवृत्तेः कामचारान्तर्भावः । बह्वायाससाध्यत्वात् । नच - ख्यात्याद्यर्थं प्रवृत्तिसंभवः; बालंप्रति तस्य पुरुषार्थत्वासिद्धेः; तादृशपुरुषार्थोपि तस्य प्रसिद्धकामचारादावेव , एतदभिप्रेत्यैव तस्य भोजनैकप्रयोजनकत्वमुक्तं, (यथोपलब्धकुक्षिम्भरेरिति) ननु कर्मविचारानन्तरं अध्यापकाभावादिना

वेदाध्ययने नियुक्तत्वात् अधीतवेदस्यापि तदर्थविचारे विधिना रागेणवा प्रेरितत्वात् तयोश्च विंशतिलक्षणीश्रवणमन्तरेणानुपरमात् । अक्रमप्रवृत्तांस्तु नशास्त्राधिकारिणइति स्वीकुर्मः । अन्यथेदानीमेव - अकृतव्रतस्य अनधिगतांगस्य लिखितपठितस्वाध्यायस्यैव मीमांसाधिकारप्रसंगात् सौगतादीनामप्य स्मन्मतदूषणार्थिनां ब्रह्मविचाराधिकारप्रसंगाच्च । अतो हेत्वन्तरा न्नित्यानित्यवस्तुविवेकोय माशामोदकायते । तेनान्यस्मात्तदसिद्धौ न तद्वतो ब्रह्मविचारः, तेनैव तद्वत्तेतितु मिथस्संश्रयः पुनरुन्मजति । एतदभिप्रायेण भाष्यम् "नित्यानित्यवस्तुविवेकादयश्च मीमांसाश्रवणमन्तरेण न सम्पत्स्यन्त" इत्यादि. । एतेनैव द्वितीयोपि कल्पो दूषितइति भाष्यकाराभिप्रायः । तथाहि - यदि नित्यानित्यौ पदार्थौप्रमाणेन निश्चित्य तद्वते हेयोपादेयत्वे विविच्येते तदा पूर्वोक्तमेवोत्तरम्, चक्रकापत्तेः । अथ नित्यमस्तिचेत्तदुपादेयं अनित्यंचेदनुपादेयमित्येव मात्मविवेकः, तदपि मन्दम्; अपुरुषार्थत्वे नित्यस्याप्यनुपादेयत्वात्, अनित्यस्यापि-

---

ब्रह्मविचारप्रवृत्तिप्रतिबन्धे ख्यात्याद्यर्थं सांख्यादिशास्त्रे प्रवृत्तिर्युज्यत एवेत्यत्राह (अक्रमप्रवृत्तांस्त्विति) अध्ययनविधिप्रयुक्त क्रमातिक्रमेण प्रवृत्तानित्यर्थः । (मीमांसाधिकारप्रसङ्गादिति) अतश्च "अथातोधर्मजिज्ञासे" त्यत्र वेदाध्ययनानन्तर्य मथशब्दार्थो न स्यादिति भावः । एवं "अथातश्शेषलक्षण" मित्यादावपि पूर्वपूर्वाध्यायार्थवृत्तता अथ शब्दार्थो न स्यात् । (सौगतेति) तथाच साधनचतुष्टयस्यापि पूर्ववृत्तत्वं तव नसंभवतीति भावः । हेयोपादेयत्वविवेकइति द्वितीयकल्पं दूषयति (एतेनेति) (पूर्वोक्तमिति) अन्योन्याश्रयइत्यर्थः । चक्रक मपिहि तद्गर्भमेव, श्रवणेन नित्यानित्यनिश्चयः तेन हेयोपादेयताज्ञान मनेनश्रवणमिति चक्रकमित्यर्थः । (अपुरुषार्थत्वइति) पुरुषार्थशब्दस्सुखादिपरः, उपादेयत्वशब्दइच्छाविषयत्वपरः ; विवेकिना मनित्यमनुपादेय

पुरुषार्थताया मुपादेयत्वात् । अतएवह्यनित्यस्वरूपस्य मोक्षसाधनतया नुष्ठानं । अथ पुरुषार्थेषु नित्यमस्तिचेत् तदेवोपादेयमिति विवेकः; एवं विधसंशयात्मकविवेकस्तु शास्त्रान्तरे कर्मविचारेपि प्रवर्तयितुमलमिति नासाधारण्यम्, तत्रापिहि"अपामसोमममृता अभूम" "अक्षय्यँहवैचातुर्मास्यया जिनस्सुकृतंभवती " ति नित्यफलापातप्रतीत्या संशयउपपद्यते । वस्तुतस्तत्रनित्यफलं नास्तीतिचेत्किमतः ; अधिकुर्वाणस्य तदनिश्चयात् । आप्तवाक्यादेवादौ निश्चिनोतीतिचेत्; तर्ह्यत्रापि ततएव नित्यमस्तीति निश्चिनुयादिति नित्यमस्तिचेदित्येवं रूपयच्चुपनिबन्धनानुपपत्तेः । तथानिश्चयेच प्रागवदेवोत्तरं । यदि नित्यमस्तीति सामान्यतो विस्रम्भः; तर्हि इदं नित्यंइदमनित्यमिति विविच्योपदिष्टेपि शक्यं विश्वसितुं; तथाच वृथा-वेदान्तवाक्यविचारइति । याच शमदमादिसाधनसम्पत् सा किं-श्रवणौपयिकतादात्विकावधानरूपा विवक्षिता; उत "शान्तोदान्त" इत्याद्युक्तजितेन्द्रियत्वरूपेति । पूर्वस्यास्तावद्धेतुत्वमिच्छामः, तस्यास्सर्वग्रन्थश्रवणसाधारण्यात् नासौ वेदान्तश्रवणे विशेषइति नात्र तद्विवक्षा युक्ता । सांख्यादिश्रवणेऽपिहि तादृग्विधतादात्विकशान्त्यादि सम्पद्युक्तैव । द्वितीयातु न श्रवणं प्रति साधनं - " शान्तोदान्त उपरतस्तितिक्षुस्समाहितोभूत्वाऽऽत्मन्येवात्मानं पश्ये " दिति दर्शनसाध

मेवेत्यत्राह (अतएवेति) सामान्यतो वेदान्ते नित्यमस्तीति निश्चये-दोषान्तरमाह (तथेति) विवृणोति (यदीति) (नित्यमिति) ननु-यस्य सामान्येन वेदान्तवाक्यानि नित्यपुरुषार्थप्रतिपादकानीत्युपदेशः, विशिष्यतु नोपदेशः, तं प्रति विचारस्सार्थक इति चेन्न; नित्यफल सम्भावनयापि प्रवृत्त्युपपत्तेः, तस्याश्च सांगाध्ययनादेव सिद्धत्वात् , औपदेशिकनित्यत्वावधारणस्य कल्पनानुपपत्तेः । तर्हि भग्नं कर्मविचारस्य पूर्ववृत्तत्वमित्यत्राह (तस्याइति) श्रवणद्वारा दर्शनांगत्वं श्रु-

नतया तच्छ्रुतेः । नच -- तद्दर्शनं श्रवणफलमिति दर्शनसाधनभूतश्र वणांगत्वं शमादीनामिति वक्तुं युक्तं ; श्रुतहानाश्रुतकल्पनादि दो षप्रसंगात् । अविधेयज्ञानत्वाद् शब्दजन्यप्रत्यक्षयोश्च निरस्तत्वात् । एषांच शमादीनां ब्रह्मविद्यांगतयोपादेयत्वं साधनलक्षणे शमदमा धिकरणेऽवगन्तव्यम् । अतएते शमादयः कथं शारीरकश्रवणात्पू र्वमुपात्तास्सुः । अयमत्रसंग्रहः -- शान्त्यादयोविधास्यन्ते विद्यांगत्वेन संयुताः । शास्त्रारंभे कथं तेषां उपयोगस्तवयोच्यते ॥ * ॥ इदंचोक्तं भाष्ये-- " नित्यानित्यवस्तुविवेकादयश्चे " त्यादिशब्देन संग्रहात् । तथाशमादी नां साधनत्वावगतेः कर्ममीमांसापेक्षतया कर्मविचारपूर्ववृत्तत्वस्य तुल्यजाव मप्युक्तम् -- "एषांसाधनत्वंच विनियोगावसेयं, विनियोगश्चश्रुतिलिङ्गादिभ्यः सचतार्तीय" इति । यद्यपि शारीरकमीमांसायामेव अपेक्षिताः श्रुतिलिङ्गा दयोऽपि व्युत्पादयितुं शक्यन्ते; तथापि संगतिविशेषा त्सामान्यत स्तृतीयाध्यायएव तद्व्युत्पादनं प्राप्तमिति सिद्धोपयोगमात्रमत्रकर्तव्यं, नपुनस्तद्व्युत्पादनेप्रयतितव्यं । इदंच तार्तीयश्रुत्यादिसापेक्षत्वाभिधानं प्रदर्शनार्थं; कथंवेदप्रामाण्यस्थापनमन्तरेण तदर्थभूतब्रह्मविचारोपिस्यात्, तत्प्रामाण्यंच प्रथमाध्यायसाध्यं, कथंच सामान्यतश्शास्त्राणां शास्त्रा र्थानांच द्वैतीयभेदाभावेदुरनुष्ठानतादुस्थं प्रामाण्यं प्रतिष्ठितंभवेत ;

त्यर्थंइत्यत्राह (नचेति) (श्रुतेति) " शान्तः पश्ये" दिति स्वरसतश्श्रुत- स्य साक्षात्साधनत्वस्य त्यागः अश्रुतस्य श्रवणसाधनत्वस्य कल्पनं- चेत्यर्थः । ननु - दर्शनस्याविधेयत्वेन तदंगत्वासंभवा न्मनननिदिध्या सनयोश्चांगत्वेन मुख्यांगत्वे सम्भवति तदंगत्वकल्पनायोगात् श्रवणं प्रत्यंगत्वमित्यत्राह (अविधेयेति) किञ्च - श्रवणांगत्वेपि फलोप- कार्यंगत्वा च्छमादेः पूर्ववृत्तत्वमित्यपि द्रष्टव्यम् । त्वन्मते दर्शनसा- धनतया श्रवणविधानञ्च न सम्भवतीत्याह (शब्दजन्येति) श्रवणे प्र वृत्त्यनन्तरमेव विचारेण ब्रह्मविद्यांगत्वमवधार्यानन्तरमेव ब्रह्मविद्यार्थ

कथंवा विद्याख्येषु शास्त्रार्थविशेषेषु भेदाभेदचिन्तावकाशः, तेनशब्दा न्तरादयोद्वैतीया विशेषतश्चिन्त्याः । तार्तीयोपयोगस्तु दर्शितस्थलान्तरे भाव्यः, श्रुतिलिङ्गादेस्सर्वत्राप्रेक्षणात् । उद्गीथविद्यादेः क्रत्वर्थत्वपुरुषार्थत्वा दिविमर्शस्तु तौर्यप्रयुक्तिसापेक्षः, षोढाविभक्तपाश्चमिकक्रमप्रमाणापेक्षिणी चार्चिराद्यातिवाहिकगण पौर्वापर्यव्यवस्था, कर्तृलक्षणन्यायोपजीविनीच ब्रह्मविद्याधिकारवर्णाश्रमादि धर्मविशेषस्थापना । एवं " तेषामेकैकएव तावा न्यायानसौपूर्वं " इत्यादिष्वप्यतिदेशादिसापेक्षत्वमनुसन्धेयम् । सूत्रकारोऽपि"तदुक्त"मित्यादिना कर्ममीमांसायां सामान्यन्यायान् प्रथ क्सिद्धानुदाहरतीति भवद्भिरपिव्याख्यातमेव । नचायं शारीरकेवक्तव्य मेवतन्द्रालुतया परोपजीवनेन दर्शयतीति वाच्यम् , तत्र तत्रैवतत्सं गतेः स्थापितत्वात् । नच - प्रसिद्धैर्न्यायैः स्वयमेववेदप्रामाण्यादिकं विचारयामः किं जैमिनीयेनेतिवाच्यम् । तथापि कर्मविचारपूर्ववृ त्तत्वस्यदुष्प्रतिक्षेपत्वात , तत्रविचारसागरे परिप्लवमानानां यदिजैमिनि ना कर्णधारायितं, सएवक्षम्यतामपराधः । एवंच लोकोत्तरप्रज्ञेन भवता बादरायणीयमपि नादरणीयमविशेषात । नचायं क्रमनिय मोऽर्थस्वभावादापतन् जैमिनीयो बादरायणीयोवा, येन तत्राभ्यसूयि ष्यसि । अतः कार्त्स्न्येन कर्ममीमांसासापेक्षत्वप्रदर्शनार्थमेव शमादिसा धनत्वावगते स्तार्तीयापेक्षाभाषणं । यद्यपीहामुत्रफलभोगविरागमुमुक्षुत्वे

तया तदनुष्ठाना नतरस्य श्रवणात्पूर्वत्वं युक्तमित्याह (एषामिति) विधास्यन्ते - ब्रह्मविद्यांगत्वेन कर्तव्यतया निरूपयिष्यन्ते । (तत्रैवे- ति) मुख्यक्रमाद्यनुसारेण कर्मविचारपूर्वत्वे सिद्धे तत्रापेक्षिततया न्यायानां तत्रैव संगतत्वादित्यर्थः । ततश्च एतदधिकारिणा तेषां न्या यानां ज्ञातत्वादेवेहानिरूपणं, नतु तन्द्रालुत्वादिति भावः । (दुष्प्र तिक्षेपत्वादिति) मुख्यक्रमानुरोधन्यायादिति भावः । इष्टापत्ति माशंक्य तत्रानादरेपि मुख्यक्रमादिसिद्धे क्रमे नाभ्यसूया कार्येत्याह (नचाय मिति) नन्वेवंसति मुख्यक्रमादेरेव पूर्ववृत्तत्वसाधकत्वं नतु न्याय-

पूर्ववृत्तत्वेनभाषिते—(यद्यपि इहामुत्रफलभोगविरागो मुमुक्षुत्वंचे त्युभयं नियतपूर्वमसाधारणं सप्रयोजनाभिधानं चेत्यभ्युपगच्छामः, तथोक्तं भाष्ये –) :" अधिगताल्पास्थिरफलकेवलकर्मज्ञानतया सञ्जातमोक्षाभिलाषस्य अनन्तस्थिरफलब्रह्मजिज्ञासाह्यनन्तरभाविनी" ति; तथापि पुरुषप्रवृत्तिक्रमविशेषसूचनस्वारस्यात्, कर्मविचारपूर्ववृत्तत्वो क्त्यैवतयोरप्यर्थलब्धत्वात्, अनन्तास्थिरफलतया प्रथममापात प्रती तकर्माख्य प्रतिबन्धकनिवृत्तिसूचनेन निर्विघातब्रह्मविचारारम्भद्योतनात्, यज्ञादिवाक्यार्थापेक्षित पदार्थनिश्चयवत्तव्यंजनाद्यथावस्थितब्रह्मतदुपासना दि तत्त्वावगमहेतुभूत न्यायकलापशीलनोद्भेदात् अपवर्गोपायभूतोपासनापे क्षिता नभिसंहितफलसहकारिवर्गस्वरूपनिश्चयांशोपजीवनाभिप्रायाच्च कर्मविचारस्यैव पूर्ववृत्तत्वोक्तिः प्रयोजनवत्तामेतीति तामेवाद्रियामहे । अव्यवहितं पूर्ववृत्ततया वक्तव्यमितिचेत्तर्हि मुमुक्षुत्वमेकमेव त्वयापि वक्त व्यम् । तदर्थतया पूर्वेषामुक्तिरितिचेत्तुल्यम् । प्रयोजनाधिक्यं मिथःसंश्र याद्यभावश्च विशेषः । एतेन तापत्रयाभिहतिपूर्ववृत्तत्ववादिनोपि - प्रत्युक्ताः, तापत्रयाभिहतिमात्रस्य मन्त्रौषधिनीतिशास्त्रादि प्रवृत्ति साधारण्यात् । दृष्टानु श्रविकविषयवितृष्णा पर्यन्तायास्तु तस्याः क र्मविचारसापेक्षत्वस्थापनात् । तथोक्तं सांख्यैरपि " दुःखत्रयाभिघा ता ज्जिज्ञासातदुपघातकेहेतौ । दृष्टेसापार्थाचे न्नैकान्तात्यन्ततोभावा त् ॥ दृष्टवदानुश्रविकस्सह्यविशुद्धः क्षयातिशययुक्तः " इति । एवं कर्मपरीक्षोपबृंहितैव सा भाष्येप्युक्ता " तापत्रयातुरै रमृतत्वाय स एव जिज्ञास्य " इति । श्रुतिश्च " परीक्ष्यलोकान् कर्मचितान् ब्रा ह्मणो निर्वेदमायात " इत्यादिका । अतः " अथातोब्रह्मजिज्ञासे " त्यत्र न साधनचतुष्टयाद्यानन्तर्यं सूत्रकृदभिप्रेतं, अपितु कर्मवि चारानन्तर्यमेव । तथाच वृत्तिकारः " वृत्तात्कर्माधिगमादनन्तरं ब्र ह्मविविदिषे " ति । अयंच पक्षो भास्करैरप्यंगीकृतः । निरीश्वरमी मांसकैरपि " कृत्स्नाध्येतुर्निश्शेष वेदार्थविज्ञानाय मीमांसारम्भ " इति

वदाद्भिः कर्मोपक्रमं शास्त्रमर्थतो ब्रह्मविचारशिरस्कमित्यभ्युपगन्तव्यमेव । नच द्वादशाध्यायमात्रे शास्त्रं पर्यवसितं; शवरस्वामिप्रभृतिभिः संकर्षकाण्डांशस्य सूत्रोपादानात, शास्त्रान्तरत्वादुपनिषद्भागचिन्तेति पक्षस्यच त्वदीयैः कैश्चित्परिग्रहादिति ।

इति श्री कवितार्किकसिंहस्य सर्वतंत्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदांताचार्यस्यकृतिषु
शतदूषण्यां साधनचतुष्टय पूर्ववृत्तत्व भंगोऽष्टमः ॥

सापेक्षताया इतिचेत्, सत्यम्, शास्त्रापेक्षितानां न्यायानां कर्मविचारे सिद्धतया कर्मविचारस्य अथातश्शब्दपरामर्श योग्यताप्रतिपादनपरत्वाद्भाष्यस्य ।

इति श्रीवाधूलकुलतिलक श्रीनिवासाचार्य पादसेवासमधिगत परावरतत्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्ध महाचार्यापरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्यायां चण्डमारुताख्यायां साधनचतुष्टय पूर्ववृत्तत्वोक्ति भंगोनाम
॥ अष्टमस्कन्धः ॥

श्रीः।

श्रीमते रामानुजायनमः।

श्रीमते निगमान्तमहादेशिकायनमः ।

अथ नवमोवादः ॥

हयग्रीवसुधासिन्धु हर्षहेषारवोर्मयः ।
जयन्ति वादवेलान्तक्षिप्त बाह्यकुदृष्टयः ॥

(हयग्रीवेति) चन्द्रदर्शनजन्यहर्षेण समुद्रोर्मिषूत्कटत्व दर्शना दत्राप्युत्कटत्वसिद्धये हर्षाधीनत्वमाह (हर्षेति) तेन दूरक्षेपो व्यज्यते, ऊर्मयोहि वेलान्ते क्षिपन्ति - हेषास्तु वेलान्तादपि क्षिपन्ति, उपाध्यनुक्त्या सुधापदेनानन्दस्य विवक्षितत्वाच्च स्वाभाविकानवधिकातिशयानन्द लाभेन चन्द्रदर्शनजन्यहर्षादतिशयो हि गम्यते, तेन प्रसिद्धोर्मिभ्योतिशयसिद्धिः । वादवेलान्तादित्यर्थः । पंचमीति योगविभागेन तपरइतिवत्समासः । वादस्य वेलात्वेन रूपणात् भाष्यकारादीनां हयग्रीवात्मक सुधासिन्धुतया तदुपदेशसूक्तेर्हेषात्वेनच रूपणं विवक्षितमिति गम्यते। उपदेशस्य वादवेलान्तात् क्षेपकत्वोक्त्या-हेषात्वरूपणेनच, 'एतच्च विस्तरेणे' त्यतः प्राचीनग्रन्थस्योपदेशरूपत्वमुत्तरग्रन्थस्थशंकानां परिहारगर्भत्वं, तस्य अस्पष्टत्वंच व्यज्यते, तेन-वादान्तरे ष्विव सिद्धान्ताकथनात् ग्रन्थो न पूर्णइति न भ्रमितव्यम् । सिद्धान्ताकथनेन कथानधिकारे कथानधिकारकथा कथंप्रवर्तेतेति शंका परिहारमभिप्रैति। याथात्म्यविद्भिरित्यनेन निश्शेषमेव शंका परिहृता। अयं भावः ; ॥ ※ ॥ याथात्म्यंहि प्रमाणानां साधकत्वे प्रयोजकं । तच्च-सत्वं परन्यायात्ततो मानमसाधकम् ॥ प्रातिभासिकमानेन व्यावहारिकसाधने। व्यावहारिकमानेन तत्वंसिद्ध्येन्नचान्यथा ॥ प्रातिभासिकमानेच काचित्सिद्धिस्ततोनच। किंतमानान्तरादेव संवादान्नैवसाधकम् ॥ स्वान्यार्थगोचरज्ञान मनुमापकमुच्यते। तेन तत्वान्तवाक्यानां हेतूनां

विस्तरेण कुदृष्टिमतमनुभाष्य " तदिद"मित्यादिना " न्यायानुगृहीतवाक्य प्रत्यक्षादिसकलप्रमाणवृत्त याथात्म्यविद्भिरनादरणीय " मित्यन्तेन शिष्यान् प्रत्युपदिशतो भाष्यकारस्यायं भावः, संगतानामिव प्रच्छन्नसंगतानामपि कथायामनधिकार इति । वेदार्थसंग्रहेच स्पष्टमाह– " सर्वशून्यवादिनो ब्रह्मव्यतिरिक्तसर्ववस्तुमिथ्यात्ववादिनश्च स्वपक्षस्थापकप्रमाण पारमार्थ्यानभ्युपगमादभियुक्तैर्वादानधिकारएव प्रतिपादितः, " अधिकारोनुपायत्वान्न वादे शून्य वादिनः । " इति । अयमाशयः -- ॥ * ॥ यदिप्रपंच मिथ्यात्व वादी वादाधिकारितां । भजेन्माध्यमिकस्यापि भवेद्वादाधिकारिता ॥ तथाच ब्रह्मतत्त्वंते निर्गुणं निष्प्रमाणकं । कथं मध्यम बौद्धस्य विवादे

च्यप्रमाणता ॥ असाधकाभिमानस्य योग्यैस्वमतर्नीतितः । साधकत्वभ्रमेणैव कथासनमनुत्तमम् ॥ प्रम.णभूयैरारूढं प्राप्तिसन्तिदुर.वना । निष्कासनीयास्तेसर्वे वादगोष्ठीसभीपतः ॥ * ॥ इति । 'विस्तरेणानुभाष्य-शिष्यान् प्रत्युपदिशत' इत्यनेन सर्वत्र शिष्यान् प्रत्येवोपदेशाः क्रियन्ते, मायिककुतर्केन्द्रजालैस्सात्विकान् कुदृष्टयो वशमानयेयुरित्यधिकारमारोप्यतैस्सहविवादाभिनयेकृते शिष्याणां हृद्यताभवतीति तदभिनयः क्रियतइति सूच्यते । " परमपुरुषचरणीयताहेतुगुणविशेष विरहिणामनादि पापवासनादूषिताशेष शेमुषीकाणा " मित्यादिना सौगतसाधारण धर्मोक्त्याऽस्याधिकारे तद्गुरोरप्यधिकारो भवेदिति प्रतिवन्दिरभिप्रेतेत्याह (अयंभावइति) सर्वशून्यवादिनइत्यारभ्य शून्यवादितइत्यन्तो वेदार्थसंग्रहग्रन्थः । अभियुक्ताः - पूर्वतन्त्रव्याख्यातारः । (अनुपायत्वादिति) प्रमाणतर्काणां तन्मते शून्यत्वात् तन्मतेनैवानधिकारइत्यर्थः । शून्यवादिविषयस्य कथं प्रकृतसंगति रित्याशंक्याह (अयमाशयइति) प्रतिबन्द्युत्थापकत्वान्नासंगतिरिति भावः । मध्यमो-माध्यमिकः । सहि कथानधिकारा न्निष्कासनीय इति मन्यसे तवापि तादृशत्वात् त्वना [illegible] निष्कासनमिति भावः । नापलभ्यतइत्ययमा

र्नापलप्यते ॥ * ॥ एतच्चविस्तरादुपपादयामः । तत्र यत्तात्र त्खण्डितं; कथकयोः प्रमाणादिसत्ताभ्युपगमः कस्यहेतोः ? किंतत्सत्ता भ्युपगमसाहित्यनियतस्य व्यवहारस्यान्यथा प्रवर्तयितुमशक्यत्वात् ? उ ततद्व्यवहारंप्रति तस्यहेतुत्वात् ? लोकव्यवहारसिद्धत्वात्? तदनभ्युपगम स्य कथाफलातिप्रसंजकत्वाद्वा । न प्रथमः; तमंतरेण तत्तीर्थकरैस्तद नुसारिभिश्च व्यवहारस्य प्रवर्त्यमानत्वात् । अन्यथा भवतस्तन्निरास प्रयासानुपपत्तेः । साधनबाधनक्षमो व्यवहारः प्रमाणादिसत्ताभ्युपग मसाहित्यनियतइति तमन्तरेण तत्क्षमत्वं न स्यादिति चेन्न; सा धनबाधनक्षमत्वं प्रति सद्वचनाभासत्लक्षणयोगित्वस्यैव प्रयोजकत्वा त् । सत्वाद्यभ्युपगमे सत्यप्याभासे तदक्षमत्वस्य सर्वसम्मतेः । अ स्मद्वाक्येचाभासत्वस्य दुरुपपादत्वात् । सत्तानभ्युपगममात्रेणाभासत्वो क्तौ सत्ताभ्युपगमेन भवद्व्यवहारएवाभासइति विपरिवर्तप्रसंगात् ।

शय इत्यन्वयः । इत्थं संक्षिप्तोऽर्थो विस्तरेणोपपादनीयइत्यत्राह (एतच्चेति) पूर्वपक्षविस्तरा त्परमुखेन सिद्धान्त्याशयोद्घाटनादुपपादयाम इत्यर्थः । पूर्वपक्षमाह (तत्रेति) यत्खण्डितं तत्र तावदित्यन्वयः । तस्य - प्रमाणादिसत्ताभ्युपगमस्येत्यर्थः । कथाफलमन्यतरार्थनिर्धारणम् । प्रमाणसत्तानभ्युपगमे प्रतिवाद्यभिमतार्थः कथं नसिद्ध्येदिति भावः ।। (तत्तीर्थकरैरिति) - सिद्धान्तिवाक्यप्रस्तुताः शून्यमिथ्यावादिनो गृह्यन्ते । तदपलापे बाधकं तत्सम्मत्यैवाह (अन्यथेति) प्रमाणतर्कयोरसत्त्वे साधनबाधनक्षमता न स्यादर्थक्रियाकारित्वासंभवात् । तन्निरासप्रयासश्चाधिकाराभ्युपगमा दप्युपपद्यतइत्याशंकते (साधनबाधनेतिं) (सद्वचनेति) सद्वचनाभासः - साधुवचनप्रतियोगिकाभासः, (आभासत्वमिति) दृश्यतइतिशेषः । ननु प्रमाणादिसत्तामनभ्युपगच्छन् परीक्षकः कथं प्रमाणादिभिर्व्यवहरेत्, ततश्च व्यवहारएव नस्यात्, तस्यैवासिद्धौ कथं प्रतिवादी पूर्ववाद्युपन्यस्तप्रमाणादेराभासत्वं साधयेत्, कथंच इदमेवंत्वात्सल्लक्षणयोगि, इदमेवंत्वादसल्लक्ष

अस्तिच सत्ताभ्युपगमेसत्यपि असिद्धविरुद्धादेराभासत्वं । ननु प्रमाणादिसत्ताभ्युपगमाभावे व्यवहारस्यैव धर्मिणोऽसिद्धौ तस्य कथमाभासत्वसाधनं, कथंवा सद्वचनाभास लक्षणयोगित्वादि प्रयोजकावधारणामुखेन दूषणदूष्यादि व्यवस्थापनं; सर्वेषां स्थापनबाधनानां प्रमाणाधीनत्वात् ; मैवं सत्ताभ्युपगममात्रेण प्रसिद्धिसिद्धैः प्रमाणादिभिरस्माकं व्यवहारोपपत्तेः । उक्तञ्चेष्टसिद्धिकारैः— " सत्यं; प्रसिद्धिरस्ति, अतएव व्यवहरामः, किन्तु नास्यामूलंपश्याम " इति । यथाप्रमाणादीनि सद्रूपाणि स्वीकुर्वता भवता प्रमाणं साधकं नतदाभासइत्यादि व्यवह्रियते तथा व्यवहारिभिरेव सर्वैः प्रमाणादिसत्त्वासत्त्वचिन्तायामुदासीनैः कथाप्रवर्त्यतामिति ह्यादिशामः । यदिचैवं नानुमन्यसे तिष्ठामस्त्वयास्मास्वारोपिते सत्तानभ्युपगमपक्षे । तथापि सांप्रति त्वदुक्तमाश्रया सिद्ध्यादिदूषणं दुर्वचं, दूषणंहीदं कथायां प्रवृत्तस्यैव वाच्यम् - न पुनराहरतो विहरतो वा । साच कथा कयापि मर्यादया प्रवर्तनीया , तत्र वादिप्रतिवादिभ्यां सत्वाभ्युपगमे तादृक्पर्यनुयोगाऽनवकाशः । उभाभ्यामसत्या

णयोगि - अतइदंदूषणेन दूष्यमिदं नेति व्यवस्थास्यात् , स्थापनानां बाधनानांच प्रमाणाधीनसिद्धित्वात् , प्रमाणस्यैवासत्त्वे कथं लक्षणयोगादिनिर्धारणमिति शंकते (प्रमाणादीति) (सत्ताभ्युपगममात्रेण प्रसिद्धिसिद्धैरिति) व्यावहारिकैरित्यर्थः । व्यवहारे प्रमाणादीनां सत्वमप्रयोजकमित्यभिप्रायेणेष्टसिद्धिग्रन्थं विवृणोति । (यथेति) किंवादिप्रतिवादिभ्यां उभाभ्यां सत्वाभ्युपगमेन प्रवर्तितायां कथायामिदं-दूषणमुच्यते ? उतो भाभ्यामसत्वाभ्युपगमेन प्रवर्तितायां ? यद्वा - एकेन सत्वमितरेण चासत्वमुपगम्यप्रवर्तितायां ? अथवोभाभ्यामपि प्रमाणादि सत्ताभ्युपगमौ दासीन्येन व्यवहार नियमे - स मयं बध्वा प्रवर्तितायामिति मर्यादाविभाग मभिप्रेत्य क्वापि मर्यादायां नास्मान् प्रति दूषणो द्भावन संभव इत्याह । (तत्र वादिप्रतिवादिभ्यामित्यादिना) प्रतिबन्दिमुक्त्वापरिहारान्तरमा-

भ्युपगमे परस्येव स्वस्यापि प्रसंगः । एकेन सत्वमितरेणचासत्व म भ्युपगम्यप्रवर्तितायामिदं दूषणमुच्यते चेत्; तद्वदेव कथान्तरस्यापि प्रसक्तिरनिवार्या ; कथानियमस्यचोभयाभ्युपगम प्रकारानुरोधित्वात् । अन्यथा • कस्य स्वेच्छया त्वदुक्तेपि वाङ्मात्रेणापि दूषणप्रसंगेन जयपराजयव्यवस्थाभंगप्रसंगात् । यश्चैकस्तस्यां कथायां प्रमाणादिसत्त्वमिच्छति तस्यैवैषानियमभरयन्त्रणा । अथोभाभ्यामपि प्रमाणादिसत्त्वाभ्युपगमौदासीन्येन व्यवहारनियमे समयं बध्वा प्रारब्धायां कथायां दूषणमिदमुच्यते । तदा स्वाभ्युपगम-विरोधएव त्वयैवापादितःस्यात् । अथ दुर्वैतण्डिकेन कथां बध्वा-तस्यैव दूषणं न ब्रूमः ; अपितु शिष्यादीन् प्रति तस्य कथानधिकारं दर्शयाम इति चेन्न । शिष्यादीन् प्रत्यपि चार्वाकसौगतमायावादिनामयं दोषइति वक्तव्यम् - सच दोषो निग्रहस्थानात्मा, तस्य कथाप्रवेशाप्रवेशयोः न तद्वाधक्षमः । नच कथामन्तरेण निग्रहः । नापि द्वितीयः; सत्ताभ्युपगममन्तरेणापि प्रमाणादीनां व्यवहारहेतुत्वस्यमाध्यमिकादिषुप्रदर्शितत्वात् । अथव्यवहारहेतुत्वादेव प्रमाणादीनां सत्त्वं, सत्त्वाच्च तदभ्युपगमः; असतोऽभ्युपगमायोगादित्युच्यते तदपिन; अस्याप्यर्थस्यकयापि नियमस्थित्याप्रवर्तितां कथामंतरेणदुस्साधत्वात् । ततश्चसिद्धासत्ताभ्युपगमात्पूर्वं कथाप्रवृत्तिः। नचसा

---

६ (कथानियमस्यचेति) असत्त्वाभ्युपगन्तारं प्रतिवादित्वेनाभ्युपगम्यप्रयुक्तायां कथायामसत्त्वप्रयुक्त माश्रयासिद्ध्यादिदूषणं नोद्भावनार्हमितिभावः । अन्यथा – उभयाभ्युपगमप्रकारातिलंघनेन दोषोद्भावने । कस्य - कस्यचिदित्यर्थः । तस्यां कथायां सत्त्वाभ्युपगमवादिनं प्रत्यपि दोषोद्भावनं नस्यादित्यत्राह (यश्चैकइति) ननु व्यवहारहेतुत्वंवदतात्वयैव प्रमाणादीनां सत्त्वंसमर्थितं, हेतुत्वस्य नियतपूर्वसत्त्वरूपत्वात् तेन सत्त्वाभ्युपगमस्सिद्धः । असत्त्वस्यचोक्तौ सत्त्वतदभावाभ्युपगमयोर्व्याघात इति शंकते । (अथेति) ननु प्रमाणादीन्ये

पिनियमस्थिति रसत्ताभ्युपगमगर्भेतिवाच्यम् ; तत्त्वावधारणपरपराजयोप यिकोभयसम्भावितव्यवहारनियमसमयवन्धमात्रेणसमीहितसिद्धेः । नच समयवन्धेपि सत्ताभ्युपगमगन्धः; प्रमाणतर्काभ्यां व्यवहर्तव्यं परस्परं प्रतिज्ञाहान्याद्यन्यतमनिग्रहस्थानं प्रदर्शनीयं, तद्व्युत्पादने तद्वतोभंगो व्यवहर्तव्यः, अन्यथातद्व्युत्पादनासमर्थस्य, अ (न्य)भग्नस्तुजेतेतिव्यवह र्तव्यः, प्रामाणिकतयाप्रतीतः पक्षस्तत्त्वमितिव्यवहर्तव्य इत्येवमादिस्व रूपेनियमवन्धेपिसत्ताभ्युपगम प्रसंगाभावात् । नच समयवन्धेऽपिहेतुर्वाच्यः, सच कथाप्रवृत्तिमन्तरेण नवक्तुं शक्यइति, सत्ताभ्युपगमहेतुत्वाभिधान विषय प्रत्यवस्थानप्रतिवन्ध्यवतारः; तत्त्वनिर्णयविजयमूलत्वेन लोकसि द्धस्याविचारित रमणीयस्य व्यवहारनियमस्य हेतुमन्तरेण वादिभ्यां द्वा भ्यामपि स्वेच्छयैवग्रहणात् । नचैवं प्रमाणमूलत्वाभावेन विचार तद्विष य तत्फलविप्लवप्रसङ्गः; अनादिपारम्पर्यागतस्य लोकव्युत्पत्तिसंवादिनस्त स्य असंभवान्यथाभावाभावरूपस्वतश्शुद्धिसिद्धत्वात । नच प्रमाणादिस त्तापिस्वेच्छयैवांगीकार्या; व्यवहारनियममात्रेणैवान्वयव्यतिरेकवत्वानिरपेक्षे

वसमयेनिवध्यन्ते नतु सत्त्वमिति कुतइतिन शंकासंभवइत्याह (न चेत) यद्येवंशंक्येत तदा दोषमाह (सचेति) सहेतुश्चसत्त्वमि त्यर्थः । समयवन्धे प्रमाणाद्यन्वये सत्तानन्वयेच कोहेतुः, किमयम-यंवेति संशय्य अन्यतरनिर्धारणायावाभ्यां कथाप्रवर्तनीया, तथाचात्र-वकथायामधिकारेदुरुपह्नवइति कथान्तरेकथमनधिकारः, ततश्चसत्ता-भ्युपगमस्य कथाहेतुत्वसमर्थनाविषयकथायां प्रतिवादिनः प्रत्यवस्थानं यथांगीक्रियते तथान्यत्रापीति यावतिपन्दो तादृश्येवेद्यापि प्रतिवन्दीस्या दित्यर्थः । उपसंहरति (तत्त्वनिर्णयेति) ग्रहणादित्यनन्तरं नसम यवन्धहेतुर्वाच्यइत्यध्याहारः । तस्य-व्यवहारनियमस्य (असंभवेति । असंभवान्यथाभावाभावरूप स्वतश्शुद्ध्यासह सिद्धत्वादित्यर्थः । स्वे च्छयैवपूर्वैर्नियमांगीकारेवयमपि स्वेच्छयासत्ताभ्युपगमस्य हेतुत्वमंगो-कुर्मइत्यत्राह (नचेति) (व्यवहारनियममात्रेणेति) अनादिव्यव

ण कथाप्रवृत्ति तत्फलोपपत्तौ तादृशेतरनिरर्थकसत्ताभ्युपगमायोगात् । नापि तृतीयः; लोकव्यवहारइतिप्रामाणिकव्यवहारविवक्षायां तस्य विचारप्रवृत्तिमन्तरेण दुर्निरूपतया तदर्थमेव पूर्वव न्नियमस्य गवेषणात्, पामरादिव्यवहारविवक्षायां निर्मूलव्यवहारशरण्यस्य ते शरीरात्मत्वादयोपि स्वाकिर्तव्यास्स्युः; पश्चात्तनबाधात्तत् परित्यागश्चे त्प्रमाणादिसत्तापि सामान्यतो विशेषतश्चा स्मदुक्ताभि र्युक्तिभि र्बाध्यमाना परित्याज्या । अथ बाधाभावात्तत्परिग्रहः; तथापि न लोकव्यवहारस्य तत्पारिग्राहकता, बाधाभावविचारेचपुनर्नियमान्वेषणावतारः । नापि चतुर्थः; प्रमाणादि सत्तामभ्युपगच्छता त्वयेव तत्सत्वासत्वानुसरणोदासीनेन मयापि तथाविधस्यैव व्यवहारनियमस्यावलंबनात् तस्यच मां प्रति फलातिप्रसंजकत्वे त्वां प्रत्यपि तुल्य प्रसंगस्स्यात् । यथाचाभ्यवहारादिव्यापारेष्वपिसत्तामनिछतांमाध्यमिकादीनां तत्फलनियमः, तथात्रापि ॥

हारसिद्धनियममात्रेणेत्यर्थः । अन्वयव्यतिरेकौ साधनबाधनाभ्यां, नैरपेक्ष्यं सत्ताप्रतियोगिकं, तादृशेतरः – अन्वयव्यतिरेकवद्भिन्नः (पूर्वमिति) ततश्चतद्विचारेनसत्ताप्रवेशइतिभावः । पामरव्यवहारएवगृह्यते, नच शरीरात्मप्रतिबन्दी, शास्त्रश्रवणानन्तरम् तद्बाधादित्याशंकते (पश्चात्तनेति) (सामान्यतइति) प्रपंचोमिथ्या दृश्यत्वादित्यादिविवक्षितम् (विशेषतइति) खण्डनोक्तप्रमाणादिखण्डनं विवक्षितं । उद्धाराभिप्रायेणशंकते (अथेति) तथापीति) प्रतिज्ञाभंगइतिभावः । दोषान्तरमाह (बाधाभावेति) तद्विचारेच न सत्ताप्रवेशावकाश इति भावः (प्रमाणादीति) सत्त्वाभ्युपगमवादिनोपि न हेतोस्सत्वमात्रेणार्थनिर्णयः, किन्तु साधुहेतुनैव, ततश्च सत्त्वानभ्युपगमेपि नातिप्रसंगः, एवमप्यतिप्रसंगापादने सत्त्वाभ्युपगमवादेपि तथा स्यादित्यर्थः । परिहारान्तरमाह (यथाचेति) * सत्त्वोपगमसाहित्य तद्धेतुत्वाबलात्तथा । अनादिव्यवहाराच्च फलस्यातिप्रसंगतः । सत्त्वानुपगमेनैव कथायामधिकारिता । प्रातिभासिकतौल्यस्य मानादौ पूर्व-

ननु व्यवहारनियमसमयबन्धएव सत्ताभ्युपगमोनुप्रविष्टः, व्यवहारोपिहि क्रिया, साच निष्पादनात्मिका, तच्चासत स्सद्रूपताप्रापणं, प्रमाणादिभि र्व्यवहर्तव्यमित्यत्र प्रमाणादेः करणत्वं नियमांतर्गतं, तच्च कारणत्वविशेषः, कारणत्वंतु नियतपूर्वकालसत्वं, दूषणसत्वे भंगः, साधनांगभूतव्याप्त्यादिसत्वेच तद्विषय स्तत्वमितिच नियम्यते, अतो व्यवहारनियमसमयबन्धादावेव व्यवहारक्रिया तत्कारणदूषणसाधनांगादे स्सत्वं कण्ठोक्तमिति कथं सत्तामनभ्युपगम्य कथारंभइति; मैवं; एभिरपि सत्तानभ्युपगमबाधकैः कथायां प्रवृत्तायामेव सत्ताभ्युपगमस्य प्रसाधनीयत्वात्, ततश्च पूर्वोक्तबाधाया दुस्तरत्वात् ।

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां कथानधिकारवादो नवमः ॥

साधनात । विस्तरोयमभिप्रेतो विस्तरादिति बुध्यताम् ॥ * ॥ ननु-कथाप्रवर्तकसमवायोहि कथाधिकारः, प्रवर्तिकाच मानादिसाधकत्वबुद्धिः, साभ्रमः प्रमावेति न निरूपणमर्हति, तथासत्यन्यतरसाधकाना माभासत्वनियमेनान्यतरवादिन स्साधकत्वभ्रमस्यापि नियततया कथायाएवोच्छेदात, सत्त्वानभ्युपगमाभासत्व निबन्धनभ्रमयोरविशेषादिति चेन्न; निजमतिरीतिसिद्ध मसाधकत्व मविगणय्य कथामधिकुर्वन्तश्छिन्ननासाइव न प्रेक्षणीया इति मनीषया शिष्यान् प्रत्युपदेशादिति . —

इति श्रीवाधूलकुलतिलक श्रीनिवासाचार्य पादसेवासमधिगत परावरतत्व याथात्म्येन तदेकदेव तेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्यायां चण्डमारुताख्यायां कथानधिकार वादभंगोनाम नवमः स्कन्धः ॥

श्रीः ।

श्रीमते रामानुजाय नमः ।

श्रीमते निगमान्तमहादेशिकाय नमः ।

अथ दशमस्कन्धः ।

विचित्रं यत् स्वेन स्फुरति विषयाधाराभिदुरं
तदेव ब्रह्मैकं त्रिगुण मपि साक्षा त्कृतमिति ।
वदन्तो वैयात्या द्धहुविहति वात्याहत धियो
विधूयन्ते हन्त श्रुतिशत शिरश्शूल वचसः ॥

य एव मन्त्रवादः , यद्यपि प्रमाणानि सर्वाण्यपि सविशेषमर्थ मभिमिविशंते ; तथापि स्वप्रकाशाध्यक्ष सिद्ध निर्विशेष संवित्सद्भावे नवि मन्तव्यं, अन्यथा धार्ष्ट्यात् सर्वापन्हवस्यापि दुर्निवारत्वात् । किंच संवित्स्वप्रकाशत्वं ताव त्वय्यन्तविदां सर्वेषा मविगीतं , तत्र प्रकाशात्मतामात्रेण स्वतस्सिद्धायां संविदि न जडस्वरूपधर्मानुप्रवेशावकाशः । प्र-

---

सर्वेषां प्रत्यक्षादिप्रमाणानां सविशेषविषयत्वा न्निर्विशेषवस्तुनि न किञ्चि त्प्रमाण मिति वदतः प्रत्याह पूर्वपक्षे (यद्यपीति) (अन्यथेति) स्वप्रकाशसिद्धेपि विमतौ प्रत्यक्षादिप्रमाणसिद्धे प्यनाश्वासात् सर्वापह्नवः स्यादित्यर्थः (अविगीतमिति) परन्तु निर्विशेष विषयं सविशेषविषयं वेत्येव विवाद इति भावः। ततः किमित्याशंक्य किं जडरूपधर्मविषयतया सविशेषविषयत्वं , उतजडत्वविषयतयेति , विकल्प मभिप्रेत्याद्ये दोषमाह (तत्रेति) स्वाभिन्न प्रकाशात्मकत्वेनैव संवि त्स्वात्मानं प्रकाशयति, न जडमपि प्रकाशयति , तस्य मिथ्यात्वेन दोषाधीनस्य स्वरूप निबन्धन प्रकाशविषयत्वायोगादित्यर्थः । द्वितीये दोषमाह (प्रकाशात्मकाइति) प्रकाशात्मका धर्मा इत्युच्यं

काशात्मकास्तु नतत्त्वतो विवेक्तुं शक्यन्ते, अन्यथा तेषां परप्रका-श्यतया प्रकाशात्मत्वासिद्धेः। नच स्वरूपमात्रस्वप्रकाशे अन्यतो धर्मसिद्धिरितिवाच्यं;अनुपलभ्यमानसाधनात् तद्बाधनस्यलघुत्वात्, निर्विशेषत्वानुभवे न तन्निरासव्याघातात्, सविशेषानुभवानां तदपेक्षया दुर्बलत्वात् तेहि तद्विषयतयैव लब्धसत्ताकाः प्राथमिकेन सर्वसाक्षिणा निरपेक्षेण दुष्टकारणशंकादवीयसा स्वानुभवेन सह न स्पर्धितुमर्हन्ति। तादृशस्वप्रकाशस्यतु भ्रान्तित्वोक्तौ संविदसिद्ध्या सर्वासिद्ध्यापातात्।

ते तेषां संविद्भेद एव स्यादित्यर्थः (अन्यथेति) संविदपेक्षया भेद इत्यर्थः। ननु स्वरूपमात्र प्रकाशकतया सिद्धे स्वरूपप्रकाशे विशेषस्यापि विषयत्वं प्रकाशत्वेन हेतुना घटप्रकाशवत् सविशेष विषयत्व साधनात् सिद्ध्यतीत्यत्राह (नचेति) प्रकाशे – प्रकाशतये त्यर्थः। तत्प्रतीति विषयत्वेनानुपलभ्यमानस्य तत्प्रतीतिविषयत्वसाधनादपि तत्प्रतीतिविषयत्वाभावांगीकार एवोचितः, प्रतीते रधिक विषयकत्वकल्पने गौरवा दित्यर्थः। प्रकाशत्वहेतुश्च प्रतिकूलतर्क पराहतइति भावः। नन्वेव मपि स्वप्रकाशो न निर्विशेषसाधने प्रभवति, प्रकाशमानत्वादिना निर्विशेषत्वाभावस्यैव साधनात इत्यत्राह (निर्विशेषत्वेति) (व्याघातादिति) बाधादित्यर्थः। ननु संविदि आश्रयविषयकृता विशेषाः प्रत्यक्षमेवानुभूयन्ते इत्यत्राह (सविशेषेति) हेतुद्वयेन दौर्बल्य मुपपादयति (तेहीति)तेह्यनुभवात्मकत्वा ज्जडतया मिथ्याभूता एवेति साक्ष्यधीन सत्ताकाः, अतः प्राथमिकेनोपजीव्येन न स्पर्धितु मर्हन्ति। तद्विषयतयैव लब्धसत्ताकत्वोपपादनायाह (सर्वसाक्षिणेति) किञ्चानादित्वा त्साक्षिणो न दुष्टकरणजन्यता, विषयप्रकाशांशे दोषापेक्षायामपि न स्वरूपाभिन्न निर्विशेषप्रकाशांशेपि तदपेक्षा, जन्यप्रत्यक्षन्तु तदपेक्षमेव, अतस्सविशेषानुभवः स्वप्रकाशेन बाध्य इत्यर्थः। संविद्विषयताहि संविदभेदेनाध्यासः, तेन न पूर्वोक्त जडधर्मानतुप्रवेशोक्ति विरोध इति भावः। ननु स्वप्रकाशो भ्रान्तिरित्यत्राह (तादृशेति) बाधकमुक्त्वा साधकाभावादपि

नच बाधकाभावेन भ्रान्तित्वं, नचाननुभवेनैव बाध इति वाच्यं, नचात्र योग्यानुपलंभः; करणाद्ययोग्यत्वेन विशेषणासिद्धेः; स्वयोग्यत्वेऽपि स्वेनानुपलंभायोगेन विशेष्यासिद्धेः । नच नरविषाणादि सद्भावोऽपि एवं साधयितुं शक्यइति वाच्यम् ; तस्य स्वसिद्ध्या समर्थने तस्यैवानुभूतित्वात् , अन्यतस्तु तदसिद्धेः , साधनेच बाधात् । यद्यपि जागरस्वप्नयो र्विचित्र बाह्योपलम्भ कलुषितधियोर्न तद्विविक्तावभासः ; तथापि सुषुप्तिमदमूर्छासमाधिमुक्त्याद्यवस्थासु तस्यैव साम्राज्यं । नच सुषुप्त्यादिषु तत्प्रकाशस्य प्रतिबन्धेन प्रतिसन्धान प्रसंग इति वाच्यं; इष्टप्रसंगरूपत्वात् । एतावन्तं कालं न किंचि दहमज्ञासिषं, सुख मह मस्वाप्स मिति तादात्विक ज्ञान सुखसाक्षितया तत्प्रतिसन्धानात् । तदेवमात्मसाक्षिक निर्विशेषानुभवस्या रोपितोपराग विनिवारणमुखेन संवादकतया वानुग्राहक मनुमानागमादिक मप्याद्रियामहे नवेति ॥

तत्रोच्यते । किमसौ निर्विशेषा संवित् स्वप्रकाशसिद्धेति स्वयं - सैव भूत्वा प्रतिपादयति, अथ ततोऽन्यएव तटस्थस्ता मुपलभ्य ।

न भ्रान्तित्वमित्यत्राह (नचेति) यदि स्वप्रकाशेनैव निर्विशेषस्वरूपं सिद्ध मित्युच्यते, नत्वनुभवान्तरेण, तर्हि अननुभवादेव तादृशस्वरूपं बाधितमित्यत्राह (नचेति) उपपादयति (नचात्रेति) चोद्यार्थः । नह्यनुपलम्भमात्रेण बाधः, किन्तु योग्यानुपलब्ध्या, तत्र किं करण तज्जन्यज्ञानयोग्यता विवक्षिता, उत स्वयोग्यता, आद्ये दोषमाह (करणेति) द्वितीये दोषमाह (स्वयोग्यत्वेऽपीति) आभास समान योगक्षेमता माशंक्य निराकरोति (नचनरविषाणेति) पादवत्त्वादिकं नरे विषाणसाधक मस्तीत्यत्राह (साधनेचेति) ननु लोकसिद्ध संविद एवहि त्वया निर्विशेषविषयत्व मुच्यते , साच संवित्सविशेषविषयैव दृश्यत इत्याह (यद्यपीति) तद्विविक्तावभासः- वाक्यार्थविधुरावभासः ।

न प्रथमः; तस्यास्स्वयाथात्म्यप्रतिपादनादि संरम्भवैमुख्यात् । अन्यथा तस्याएव विषयादिवैशिष्ट्यस्यावर्जनीयत्वेन स्वनिर्विशेषोक्ते रळीकवादत्व प्रसंगात् । विषयादिविशेषाणा मारोपितत्वा न्नाळीकवाद इति चेन्न; तदनुल्लेखे तन्निषेधोक्त्ययोगात् । तदुल्लेखेतु विशिष्टप्रकाशावश्यम्भावात न स्वेन निर्विशेषप्रकाशः । नापि द्वितीयः; सनु तामुपलंभमानः ततोन्ययावा तथैव वा स्यात् , पूर्वत्रावेद्यत्व विरोधः, अनुव्यवसाय वेद्यत्व पक्षपातात । उत्तरत्रापि सर्वलोकसम्मतां संविदमेव तथोपलभते ततोऽन्यांवा । आद्ये भ्रान्तित्वापातः, साहि विषयाश्रय स्वगतविशेषै र्विशेषितैव सर्वै स्संदृश्यते । नच - तत्तन्मिथ्यात्वेपि संविद स्तत्प्रकाशरूपत्वापन्हवः । नच योगादिप्रभावात विशुद्धप्रकाशो जात इति वाच्यम् , योगस्यैव भ्रान्तित्वापातात् । नच शुक्तिकारजतप्रकाश मप्यालम्बनमात्ररहित मितिवदन् योगीश्वरोपि न भ्राम्यति । द्वितीयेपि किमसौ महाभागः स्वस्माएव स्वसुखादिवत सिद्ध्यन्तीं तां परस्मा उपदिशति, उत प्रतिवादिनोपि तथा सिद्धां । नाद्यः; अविस्रम्भात् , पुळकोद्गमादिवत लिंगाभावाच्च । नेतरः; स्वप्रत्ययसिद्धस्य परोपदेश

(अन्यथेति) तस्या स्तादृशसंरम्भे प्रतिपाद्यभूतविशेषेण प्रतिपादकेन शब्देन प्रतिपादन सम्प्रदान प्रतिवादिनाच विषयतया वैशिष्ट्यं वाच्यं, अन्यथा प्रतिपादना संभवात्, ततश्च निर्विशेषोक्ति रळीकवाद एवेत्यर्थः । (स्यादिति)उपालंभमानस्स्यादित्यर्थः (पूर्वत्रेति) स्वभिन्नप्रकाश्यत्वस्यैव वेद्यत्वरूपत्वादिति भावः (उपलभतइति)निर्विशेषविषयतयेति शेषः । ननु योगाद्वा दैवप्रसादाद्वा प्रसिद्ध संविदएव निर्विशेषविषय वगोचरा प्रतीति र्ज्ञायतइति तत्संवादान्नास्यास्संविदो भ्रान्तित्वप्रसंग इत्याशंक्याह (नचेति) (योगस्येति) योगज्ञानस्येत्यर्थः । तदुक्ता ववित्रम्भपि पुळकोद्गमनादिना हर्षादिवत् केनचिोल्लिंगेन तस्य तादृशोऽनुभवोऽनुमीयता मित्यत्राह (पुळकेति) किञ्च किमयमुपदेशस्स्वानुभवं

नैरपेक्ष्यात् । नहि सुखादिसद्भावमात्रं परस्मा उपदिश्यते । न च सहृदयः कश्चि त्तथाविधानुभव मपन्होतु मीहते, नापि योग्या नुपलम्भ निराकृत सद्भाव मभ्युपगन्तुम् ।

ननु न कस्मैचि त्सासिध्यति, अतः स्वस्मै परस्मै वेति को वि कल्पावकाश इति चेत : सा तर्हि न सिध्येदेव, सिध्यन्तीवा क स्मैचिदेव स्यात । सिद्धिमात्र मियमितीति चेत ; कस्य कं प्रतीति व क्तव्यं । न कस्यचि त्कंचित्प्रतीतिचेत , न तर्हि सा सिद्धिशब्दा र्थतया व्युत्पत्तुं शक्या । स्वस्याएव स्वात्मानं प्रतीति चेत, इदन्तु दावदहनविवश जरदजगर परिभ्रमणम्, कथमसौवराकः स्वस्या एव स्वात्मानं प्रति सिद्धरूपां तां ततोऽन्य स्तथैवोपलभते । तन्मयाभूत-

---

निह्नुवानं प्रति, उत स्वस्मिन् तादृशानुभवाभाव मुपलम्भमानं प्रति ? नाद्य इत्याह (नहीति) द्वितीय आह (नापीति) उभयत्रापीहमानो वा न त्वदुपदेशेश्रद्धां कुरुत इति भावः (अतः स्वस्माइति) स्वस्मा एव स्वसुखादिवत् सिद्ध्यन्तीं परस्मै उपदिशति, उत प्रतिवादिनोऽ पि सिद्धा नित्युक्तविकल्पानवकाश इत्यर्थः . (नसिद्ध्येदिति) स्व रूपमेव न स्यादित्यर्थः । व्यवहारानुरपत्त्या सावश्यमंगीकार्यैवेत्यत्राह (सिद्ध्यन्तीवेति) नहि सर्वोऽपि पदार्थः कस्मैचिदेव, उत्पन्न विनष्ट घटे तदभावदिति शंकते (सिद्धिमात्रमिति) सिद्धेः कर्मसापेक्षत्वं आ श्रयसापेक्षत्वंच नियत मित्यर्थः । उभयमप्यसिद्ध मिति शंकते (नक स्यचिदिति) (नतर्हीति) आश्रय कर्म सापेक्षत्वेनैव सर्वत्र सिद्धे रु पलम्भादितिभावः . (स्वस्याइति) कर्मणिषष्ठी । (इदमिति) तादृ शोह्यजगरः पुरतो दहन मुद्वीक्ष्य ततो निवृत्तः पश्चा ज्जिगमिषु स्तत्रा पि तमेव दृष्ट्वा केनचि दवकाशेन गन्तु मशक्तः पुन स्तमेव देश ग त्वा दहने निपतति , तथा पूर्वदोष एव पतिष्यतीत्यर्थः । तदेवोपपाद

त्था त्तथोपलभत इति चेन्न, प्रागेव दूषणात् । ततो लोकसिद्धा संविद्विषयाश्रयादिविशिष्टैव स्वतः प्रकाशते, तदुत्तीर्णातु न स्वतो नापि परत इति तस्याः शशविषाणतुल्यतैव ।

ननु लोकोत्तीर्णसंवित्स्वरूपं स्वप्रकाशमिति भवद्भि रपीष्यते, तत्कथ मस्मदुक्ते विरागः । तर्हि समबुद्धिरसि, वयं हि प्रत्यक्षाद्यगोचरं ब्रह्म स्वरूपं, तस्य स्वप्रकाशत्वादि धर्मवर्गंच श्रुतिबलात्स्वीकुर्मः, भवतस्तु प्रमाणपोतं परित्यज्य स्वप्रकाशालाबु परिग्रहेणा पारसागरं निस्तर्तु मिच्छतो नेदानीं प्रभूता श्रुतिः पुरस्कार्या, तत्पुरस्कारेपि सा सविशेषमेव प्रतिपादयतीति वक्ष्यामः । अतो न साम्यमिति ।

यत्पुनरुक्तं, प्रकाशात्मन स्स्वस्यैव स्वतस्सिद्धत्वात्, जडात्मनां केषांचिदपि धर्माणां तदन्तर्भावानुपपत्तिरिति, तदसिद्धस्यासिद्धेन साधनं, कस्यचित्पुरुषस्य कंचिद्धर्मविशेषं प्रति प्रकाशविशेषरूपतयैव सर्वेषामनुभवानां स्वतस्सिद्धेः । अतः स्वाविषयत्वसाश्रयत्व धर्माभावे तुल्यन्यायतया स्वतस्सिद्धिरपि नस्यादेव ।

यति (प्रागेवेति) स्वयाथात्म्य प्रतिपादनादि संरंभ वैमुख्यादि त्युक्तत्वादित्यर्थः । कथमित्यस्य प्रश्नार्थमभिप्रेत्याह (तर्हीति) (समबुद्धिरिति)नक्वचित्पक्षपाती भवसि, तत्वबुभुत्सुरसीति यावत् (अपारसागरमिति)–संशयो विवादोवा विवक्षितः । किं स्वरूपप्रकाशमात्रेण जडविषयत्वाभावस्साध्यते, उत स्वरूपप्रकाशन इतरविषयाभावस्यापि विषयीकरणात् ; नाद्यः; स्वरूपप्रकाशेऽपीतरप्रकाशाविरोधात् । नह्येकमेव प्रकाश्यमिति नियमः , व्यभिचारात् क्वापि तददर्शनाच्चेत्यभिप्रेत्य द्वितीयं दूषयति (तदसिद्धस्येति) तदेवोपपादयति (कस्यचिदिति) घट महं जानामीति किंचि त्पुरुषाश्रयतया घटत्वाद्याश्रयविषयकतया अपरोक्षत्वादि विशेषरूपेणच स्वतस्सिद्धे रित्यर्थः (अतइति) एवं स्वरूपातिरिक्तस्यापि प्रकाशमानत्वेस्थिते सविषयत्वादीनां प्रकाशापह्नवे ,

यत्पुनः प्रकाशात्मकास्तु न ततो विवेक्तुं शक्यन्त इति; तद प्यसत्, साजात्यमात्रेण तादात्म्येतिप्रसंगात्, ज्ञानरूपो ज्ञानाश्रयश्चात्मा स्माभिरिष्यते, तद्वद्धर्मिभूतज्ञानमपि यदि ज्ञानस्वरूप धर्मान्तराश्रयतया उपलब्धं तदा तदप्यंगीकुर्मः, अनुपलम्भात्तु- तदनभ्युपगमः, नच विविच्यमानतामात्रेण स्वप्रकाशात्मता भंगः, सर्वासामपि संविदां स्वयं प्रकाशानामपि संविदन्तरकर्मत्वस्य समर्थयिष्यमाणत्वात् ।

यत्तु स्वरूपमात्रस्वप्रकाशेप्यन्यतो धर्मसिद्धि रित्यनुपलभ्यमान साधना त्तत्साधनस्य लघुत्वमुक्तं, तदपि चार्वाकसौहार्दे, अनुमानाद्युच्छेदप्रसंगात् । उपलभ्यन्तेच धर्मा इत्युक्तं ।

यदप्युक्तं निर्विशेषस्वानुभवेन तन्निरसनव्याघातः, सविशेषानुभवानान्तु तदपेक्षया दुर्बलत्वमिति; तत्तदा सुन्दरं, यदि द्वयोरपि स्वरूप मुपलभ्य बलाबलचिन्ता वर्तेत, इहतु निर्विशेषस्वानुभव एव नोपलभ्यते ।

यच्च निर्विशेषानुभवैक विषयतया सविशेषानुभवानां सत्तालाभादिकमुक्तं, तदपि प्रस्तुतप्रतीपं, प्रकाशात्मता मात्रतया स्वतस्सि

स्वरूपस्यापि तदपह्नव स्सुशक इत्यर्थः । प्रकाशात्मकस्य विशेषस्य किं संविद्भेदानुभवा त्तत्तादात्म्यं, उतसाजात्यानुभवात् ? नाद्यः; असिद्धेः । ज्ञानात्मक ज्ञातुर्भेदेनैव संविदनुभवात इत्यभिप्रेत्य द्वितीये दोषमाह (साजात्यमात्रेणेति) सर्वेषामपि घटानां एकत्वापत्ते रित्यर्थः । तर्हि ज्ञानस्य ज्ञानाश्रयत्व प्रसंग इत्याशंक्य इष्टापत्त्या परिहरति (ज्ञानरूपइति) यदि ज्ञानस्य ज्ञानाश्रयत्व मिष्यते तर्हि धर्मभूतज्ञानस्यापि ज्ञानाश्रयत्व प्रसंगइत्यत्राह (तद्वदिति) अन्यथा तेषामपि परप्रकाश्यतया प्रकाशात्मकत्वासिद्धेरित्युक्तं दूषयति (नचेति) यच्चनुपलभ्यमानस्य कल्पना मात्रमेव गुरु, तत्रा दोषमाह (तदपीति) यदि ज्ञानस्याधिकविषयत्वकल्पनायां गौरवं, तदा दोषमाह (उपलभ्यन्तइति) (तदपि प्रस्तुतेति)

द्धायां संविदि कथं विषयाश्रयादि विशेषित सविशेषानुभवान्तर प्रकाशः । करणाद्ययोग्यत्वात् न योग्यानुपलम्भ इत्येत दनुभूते रनुभूत्यन्तरविषयत्वस्य वक्ष्यमाणत्वात् निरस्तम् ।

यच्च स्वयोग्यत्वेपि स्वेनानुपलम्भायोगेन योग्यानुपलब्धे र्विशेष्यासिद्धिरिति, तत्र कः स्वेनानुपलम्भं ब्रवीति, सविशेषतयात् संविदुपलम्भं ब्रूमः, नतु निर्विशेषतयेति, स्वेन निर्विशेषतयोपलंभस्य योग्यानुपलम्भं वदामः, तथाहि — किं जागरदशायामेव निर्विशेषं स्वतः प्रकाशतइति मन्यसे, उत स्वापाद्यवस्थायां, यद्वा सर्वावस्थानुपलब्धमपि युक्तिबलात् निर्विशेषतया निष्कृष्यत इति, अथोपलम्भयुक्त्यन्यथात्वेपि शब्देन तथा निर्दिश्यत इति । न प्रथमः, विषयाश्रयस्वगतविशेषै र्विशिष्टतयैव तदानीं स्वतएव तद्गोचरानुभवान्तरेणवा संवित्स्वरूपस्य प्रकाशमानत्वात् । तदेतदाहुः - " इदमहमदर्शमिति केनाचिद्विशेषेण विशिष्टविषयत्वा त्सर्वेषा मनुभवाना " मित्यादिना । नापिद्वितीयः , तत्रापिह्यनुभवो ऽस्तिचेत् स विशेषएव , नचेत् कस्य निर्विशेषतया प्रकाशः । " स्वापमदमूर्छासुच सविशेष एवानुभव इति स्वावसरे निपुणतर मुपपादयिष्याम " इति भाष्यं । अयमभिप्रायः, सुषुप्त्यादिदशाया मिदमर्थप्रकाशनं तावत् नास्तीति सर्वसम्मतं , अहमर्थप्रकाशस्तु त्वया नेष्यते , इष्यमाणत्वेपि न तस्य निर्विशेषतया स्फुरणं, प्रत्यक्त्वा नुकूलत्वादिरूपेण -

---

विषयताच नाभेदाध्यासः विशेषमिथ्यात्वस्यैतः प्रागसिद्धे रिति भावः । (सविशेषतयेति) कर्त्रादि विशिष्टतयेत्यर्थः) (उपलम्भ युक्त्यन्य थात्वेऽपीति) उपलम्भयुक्त्यो स्सविशेषविषयत्वेपीत्यर्थः । (विषयाश्रयेति) स्वगतविशेषाः - ज्ञानत्वापरोक्षादयः । ननु भवद्भि र्ज्ञानस्य नित्यत्वाङ्गीकारात् स्वापादिषु विषयादिभाना नभ्युपगमात् विषय [illegible]

स्फुरणात्, अन्यथा तत्प्रकाशएव नास्तीति । अथ पुनर्जानामीति प्रतीयमानोर्थ स्तदानीं विषयाश्रयशून्यः प्रकाशतइति मन्यसे, तद्पि न; तस्य तन्निरूपणीयस्वभावतया तद्विरहेण प्रकाशायोगात् । नहि छेद्यादिविधुर श्छिनत्ति परशुः । वयन्तु - यद्यपि नित्यां संविदं श्रुतिबलादभ्युपगच्छामः, तथापि तस्या न निर्विशेषायाः प्रकाशमिच्छामः, निराश्रयायावा स्थितिं । अत स्सुषुप्तावपि सा साश्रयैव, संकोचादिधर्मवतीच एकदेशिमतेनात्म विषयतया सविषयाच । तत्तश्च सुखमहमस्वाप्स मिति परामर्शोप्युपपन्नः । तवतु न तथा, अनुपलब्धेः । नहि सुप्तएव तथा परामर्श मर्हति, विषयाश्रयरहितेयं संविद्विवर्तत इति परामर्शे प्रतिसंबन्धितया विषयाश्रय प्रतीत्यवश्यम्भावेन सुषुप्ति व्याघातात् ।

नापि प्रबुद्ध स्तथा प्रतिसन्धत्ते, नहि सुप्तोत्थित एतावन्तं कालं विषयाश्रयरहितज्ञप्तिरूपेणा ह मवस्थित इति परामृशति, अपितु सुप्तोहं नाज्ञासिषमिति ज्ञप्तिनिषेधेनैव । अहंकारविगमात् विषयानुभवाभावाच्च तत्प्रतिसन्धानमितिचेत्, हन्त भवानेव निर्विशेषं हन्ति, त-

---

संवित् तदा प्रकाशत इति वाच्य मित्यत्राह (वयंत्विति) (तत्तश्चेति) सविशेषाया स्संविद स्सुषुप्ता वनुभवादेव सुप्तोत्थितस्य सुखित्वविशिष्टतया अहमर्थाश्रयतयाच स्मृतिरुपपन्नाहीति परामर्शशब्दौ ज्ञानपरौ । किंच यदि तथा नुभवः स्यात् , तदा सुप्तोत्थित स्तथा परामृशेत् , न तथा परामृशतीत्याह (नापीति) प्रत्युत ज्ञानाभावमेव परामृशतीत्याह (अपित्विति)(अहङ्कारेति) अहङ्कारस्य सुप्तौ प्रलीनत्वात ज्ञप्तिरूपेणाह मवस्थित इति न सुप्तोत्थितस्य परामर्शसंभवः । किंच स्वरूपप्रकाशे सत्यपि विषयानुभवाभावा न्नसुप्तोत्थितस्य परामर्श संभव इत्यर्थः (हन्तेति)सुप्तोत्थित परामर्शाभावोपपादनेन स्वापदशायां तादृशानुभवे मानाभावस्यैवोपन्यासात् न तदा तादृशानुभ-

दप्रतिसन्धानस्यैवोपपादनात् । किंचान्याभावस्य अन्यानुल्लेखस्यच-दृष्टमात्रस्मृतिप्रतिबन्धकत्वा योगात्, अन्यथा अतिप्रसंगात् । नचा नुभूतस्य स्मरणनियमो नास्तीति वाच्यम् । प्रतिदिवसं चिरका-लमन्यवैमुख्येन प्रत्यक्षेणैव प्रकाशमानस्यार्थस्य निखिलसंस्कारतिर स्कारक मरणवेदनादि प्रबलतरप्रतिबन्धकाभावेपि सावधानेना पि नियमेनास्मरणस्या नुभवाभावपर्यवसानात् ।

यत्त्वेतावन्तं कालं न किंचिदहमज्ञासिषमिति अज्ञानसाक्षित्वे नानुभूतिः प्रकाशत इत्युक्तं, तद्विपरीतफलं, नहि ज्ञानप्रतिषेधएव ज्ञानप्रकाशे प्रमाणं भवितु मर्हति । ज्ञानाभावातिरिक्तंत्वज्ञानं नि-रसिष्यते ।

किंचायं परामर्शोऽहमर्थानुवृत्तिं ज्ञाननिवृत्तिंच परामृश न्नहमर्थनि वृत्तिं ज्ञानानुवृत्तिंच वदत स्ते अत्यन्तप्रतिकूल एव । एवं सुखम-हमस्वाप्समिति परामर्शोप्यहमर्थस्यैव सुखतया प्रकाशं प्रदर्शये न्नपुन-स्सुखसाक्षितया संवित्प्रकाशम् ।

एवं मदमूर्छाद्यवस्थासुच भाव्यं, ततो न स्वापाद्यवस्थास्वपि निर्विशे षप्रकाशसिद्धिरिति ।

नापि तृतीयः युक्त्यापि निरालम्बनतया निष्कर्षस्याशक्यत्वात्,

वसिद्धि रित्यर्थः । (किञ्चेति) अहमर्थाभावे माभूत सुप्तोत्थितस्य तत्प्रति सन्धानमपि, तदानीं प्रकाशमान संवित्प्रतिसन्धानन्तु स्यादेव,नह्यन्याभावो ऽन्यानुल्लेखश्च स्पष्टं प्रतिपन्नसंविन्मात्रस्मृतेः प्रतिबन्धक इत्यर्थः (अन्यथेति) कस्यचिदभावात् कस्यचिदनुल्लेखाच्च प्रतीतांशस्याप्यस्मृतौ स्मृतिमा त्रोच्छेद प्रसंगइत्यर्थः । अनुभूतस्य स्मरणनियमाभावा न्नानुभूतावपि संवि त्स्मर्यत इत्यत्राह (नचानुभूतस्येति) किं युक्त्या निरालम्बनत-या निष्कृष्यते, उत मिथ्यालम्बनतया? आद्य आह (युक्त्येति) द्वि-

आलम्बनमिथ्यात्वस्य निर्धर्मकत्वस्यच निराकरिष्यमाणत्वात् ।

किञ्च संविन्निर्विशेषा एवंत्वादितिहि निष्कर्षप्रकारः, तत्र हेतुसाध्यरूपधर्मान्वये कथंनिर्विशेषता, तदनन्वयेतु साध्यसमत्वसाध्याभावौ, तन्मिथ्यात्वेऽप्यन्ततस्तथैव; तयोः संवित्स्वरूपैक्ये पक्षहेतुविभागाभावः, सिद्धसाधनताचेत्यादयो दोषा द्रष्टव्या इति । तदेतदभिप्रेत्याह - "स विशेषोऽप्यनुभूयमानोऽनुभवः केनचि द्युक्त्याभासेन निर्विशेष इति निष्कृष्यमाण स्सत्तातिरेकिभिः स्वासाधारणैः स्वभावविशेषै निर्विशेष इति निष्कृष्टव्य" इत्यादिकं ।

नापि चतुर्थः , निर्गुणवादस्या खण्डवाक्यार्थस्यच वि

तीय आह (आलम्बनेति) (तदनन्वयइति) हेत्वनन्वये साध्यसमता, साध्यानन्वये साध्याभाव इत्यर्थः । नहि साधनस्य तुच्छता, किंतु मिथ्यात्वमेव, मिथ्यात्वेऽपि व्यावहारिकसत्व मस्त्येवेत्यत्राह (मिथ्यात्वेऽपीति) हेतोर्मिथ्यात्वे पारमार्थिकतया भिहित निर्विशेषत्व समान सत्ताकत्वाभावात् न तस्य साधकत्वं, साधनयोग्यस्तु- पारमार्थिको हेतुस्साध्यवदसिद्ध एव, साध्यमिथ्यात्वे सिद्धान्तसिद्धपारमार्थिक निर्विशेषत्वा सिद्धि रित्यर्थः । हेतुसाध्ययो स्संविदभेदात् पारमार्थिकत्व माशंक्याह (तयोरिति) (पक्षहेतुविभागाभाव इति) स्वरूपासिद्धिरिति भावः (सिद्धसाधनतेति) पक्षस्य सिद्धत्वादिति भावः । असिद्धावाश्रयासिद्धि रादिशब्दार्थः ।

इति श्रीवाधूलकुलतिलक श्रीनिवासाचार्य पादसेवासमधिगत परावरतत्वयाथात्म्येन तदेकदेवतेन तच्चरणपरिचरण परायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्यायां चण्डमारुताख्यायां निर्विशेष स्वप्रकाशत्वभंगो नाम

दशमः स्कन्धः ॥

रन्तरेण निराकरिष्यमाणत्वात् । सामान्यतोऽपि पश्यामः, शब्दः किं पदरूपेण स्थित्वा निर्विशेषं बोधयति वाक्यरूपेणवा? नाद्यः, अन्विताभिधानवादेतु केवलपदस्यावाचकत्वात् । यथोक्तं- "पदजातं श्रुतं सर्वं स्मारितानन्वितार्थकं । न्यायसंवादितव्यक्ति पश्चाद्वाक्यार्थबोधकम् " इति । अभिहितान्वयवादेऽपि प्रत्येकं-पदानां प्रमाणत्वाभावात्त, यथाहुः — "पदमभ्यधिकाभावात् स्मारका न विशिष्यते " इति । प्रत्येकपदशक्तिचिन्तायामपि प्रकृतिप्रत्ययरूपेण स्थितस्य पदस्य क्वचि त्प्रकृत्यर्थविशिष्टः क्वचित्प्रत्यार्थविशिष्टः प्रतिपाद्य इति कथं निर्विशेषबोधकता । स्वार्थिकप्रत्ययविशिष्टेपि पदे पुनः प्रकृत्यर्थविशेषस्य प्रत्ययान्तरेण विशिष्टविषयत्वमेष्टव्यं । अव्ययान्यपि विशिष्ट मर्थमेव द्योतयन्ति अभिद्धतिवा । निर्विशेषमिति पदेन किं बोध्यतइति चेत्त? किं केवलेन, उत वाक्यस्थेन, पूर्वत्र वस्तुतो न किंचित, अव्युत्पन्न भ्रान्तोक्त्योरर्थविशेषानपेक्षणात् । प्रतीतिमात्रमपि जायमानं मनसा किंचिदुल्लिख्य तन्निर्विशेषमिति परामृशेत्, तत्रापि वाक्यच्छायया वैशिष्ट्यमेवोल्लिख्येत । वाक्यस्थेनतु तेन पदान्तरोपस्थापित विशेषाविरोधेन तद्विवक्षितविशेष निषेधएव क्रियते, यथा - नरपतिरद्वितीयः, नगरी निर्विशेषेत्यादिषु । संवित्समस्तविशेषशून्येति भवत्कल्पितवाक्यन्तु भ्रान्तिमात्रजनकमिति न ततोर्थनिष्कर्षः । नापि द्वितीयः, तत्तत्पदोपस्थापितानेक पदार्थविशेषसंसर्गस्य संसृष्टस्य वा बोधेन निर्विशेषप्रसंगाभावात् । तदेतदखिलमभिसन्धायाह-- " शब्दस्यतु विशेषेण सविशेषएव वस्तुन्यभिधानसामर्थ्य " मित्यादि । अतः प्रतीत्यभावात् निष्कर्षलिंगशब्दाद्ययोगाच्च न निर्विशेषस्य प्रकाशत्व सिद्धिरिति ॥

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य श्रीवेदान्ताचार्यस्य कृतिषु शतदूषण्यां निर्विशेष स्वप्रकाशभंगवादोदशमः ॥

श्रीः ।

श्रीमतेरामानुजायनमः ।

श्रीमते निगमान्तमहादेशिकायनमः

अथ एकादशस्कन्धः ।

सं प्रज्ञातस्थितिमधिगते निर्विकल्पे समाधौ-
शान्तावद्यं स्तिमितबहुळानन्दसन्दोहमन्तः ।
यत्तद्ब्रह्मस्फुरति यमिनांपूर्णषाड्गुण्यरूपं-
सामेनित्यंहृदि हयमुखी देवता सन्निधत्ताम् ॥

यदेतदाहुः अस्तितावन्निर्विकल्पकं नामप्रत्यक्षं, प्रथमाक्षसन्निपातस मनन्तरं अविशिष्टविषयापरोक्षावभासस्य दुरपह्नवत्वात् । अभ्युपेतंचै- तत्सर्वैर्वादिभिः । ननु शाब्दास्तत्रापि शब्दानुवेधमिच्छन्ति, यथाहुः—"न सोऽस्ति प्रत्ययोलोकेयश्शब्दानुगमादृते । अनुविद्धमिवज्ञानं सर्वं शब्देन गृह्यते" इति । सत्यं तैरपि समाधिदशायां तस्यैव शब्दस्य निरस्तसम स्तकल्पनाजालस्य उपलम्भः स्वीकृतः । किंच शब्दानुविद्धत्वं नसर्व- त्रज्ञाने दर्शयितुं शक्यं, बालादिविज्ञानेषु तदसंभवात्, अन्यथाचैषां व्यु त्पत्तिमन्तरेण तत्तद्वाचकपरिज्ञान प्रसंगात् । बालादि विज्ञानान्यपि सू क्ष्मशब्दानुविद्ध विषयाणीतिचेत्? तथाविधस्यशब्दस्यपरैरनभ्युपगमात् । अभ्युपगच्छतामपि तदनुवेधस्य दुस्साधत्वात् । पदज्ञानमेव तावन्नप्रत्यक्षं किं पुनस्तदनुविद्धस्तस्यविषयः । नच सूक्ष्मशब्दानुविद्धत्व व्याप्तं-

---

तत्र हेतुमाह (अनुविद्धमिति) सर्वमपि ज्ञानं शब्दगोचरत्वे नैव अनुभूयतइत्यर्थः (कल्पनाजालस्येति) (बाळादीति) सूक्ष्मत्वं- उच्चारणायोग्यत्वं । (तथाविधस्येति) वर्ण पद वाक्य व्यंग्यस्फोटा- तिरिक्तस्या नभ्युपगमादित्यर्थः । प्रत्यक्षादिविकल्प मभिप्रेत्य प्रत्यक्षं ताव दूषयति (पदज्ञानमेवेति) ततश्च बालादिज्ञानस्य इतरान् प्र त्यप्रत्यक्षत्वात् किंचिद्विशिष्टरूपेण सुतरां प्रत्यक्षत्वेन शब्दानुविद्धवि षयतया नप्रत्यक्षमित्यर्थः । अनुमानं दूषयति (नचेति) अनुपलं-

किंपुनस्त[दनुविद्ध]स्य विषयः । नच सूक्ष्मशब्दानुविद्धत्वव्याप्तं किंचिल्लिंगमस्ति । अथ व्युत्पन्नपुरुषबोध दृष्टान्तेन बालादिज्ञानेष्वपि प्रत्ययत्वादिहेतुभिः शब्दानुविद्धविषयत्वं साध्येत , तदप्यशक्यं , पूर्वोक्तप्रसंगा[पाता]त् । अस्तु स्थूलशब्दानुवेधस्य बाधः, तत्सहकृतात्पक्षधर्मताबला त्सूक्ष्मशब्दानुवेध स्सिध्यतीतिचेन्न । वाचकतया नुवेधविवक्षायां सूक्ष्माभिमत शब्दस्या वाचकत्वादेव तदनुवेधासम्भवात् , नहि व्युत्पत्तिपदवीदवीयसस्तस्य वाचकत्व मुत्प्रेक्षणीयं । अव्युत्पन्नोऽपि शब्दः स्ववाचकइतितु परिभाषामात्रं, शब्दवाचकतायामपि शब्दस्य व्युत्पत्तिसापेक्षत्वात् । स्ववाचकत्वसिद्धावपिच न वस्तुन स्तदनुवेधः, तस्य तद्वाचकत्वेना व्युत्पत्तेः । अस्तु रूपादिव दवाचकत्वेनैवा नुवेधं इतिचेत् ? न-अतन्निष्ठत्वा दारोपासंभवाच्च । सौगतैरपि शब्दाध्यासो व्युत्पत्ति[कल्पित]कलुषित बुद्धा वे[वाद्रियते]वोदाह्रियते, नतु निर्विकल्पके । अत श्चक्षुरादिभि रर्थेषु स्वरूपेणोपलब्धेषु व्युत्पत्तिसमय सहा नुभूतार्थ संदर्शनादुद्बुद्ध संस्कारवशा द्वाचकत्वगतौसत्यां वस्तुन स्संज्ञानविकल्प इति न प्रथमाक्षसन्निपातजेषु ज्ञानेष्वव्युत्पन्न बाल मूक तिर्यगादि बुद्धिषु च

भादितिभावः । (पूर्वोक्तेति) व्युत्पत्ति मन्तरेण तत्तद्वाचकपरिज्ञानप्रसंगादित्यर्थः । बाधउक्तः, . प्रसंगहेतुः कः, शब्दानुवेधः किंवाचकतया उत रूपादिवत्स्वरूपेण? आद्यआह (वाचकतयेति) शब्दत्वाद्वाचकत्वं कल्प्यतइत्याशंक्याह (नहीति) व्यवहारादेव व्युत्पत्तेर्ग्राह्यत्वादित्यर्थः ।व्युत्पत्ति मन्तरेणापि शब्दानां स्ववाचकत्व मस्त्येवेत्याशंक्यपरिहरति (अव्युत्पन्नइति) शब्दानां व्युत्पत्तिमन्तरेण स्ववाचकत्व मभ्युपगम्य अर्थस्य तदनुवेधासंभवमाह (स्ववाचकत्वेति) अर्थे व्युत्पत्तिमन्तरेण वाचकत्वं नसंभवति अतिप्रसंगादितिभावः । द्वितीयंशंकते (अस्त्विति) (आरोपेति) अस्यैव प्राथमिकज्ञानत्वे पूर्व मधिष्ठानज्ञानाभावात् बाधकज्ञानसत्त्वाच्च नारोपतासम्भवतीत्यर्थः । सौगतै श्शब्दानुवेधो ऽङ्गीकृतइत्यत्राह (सौगतैरपीति) संज्ञानविक-

शब्दानुवेधसंभवः । माभूच्छब्दानुवेध स्तत्र, तथापि, समानेन्द्रियग्राह्य जाति गुणादि विशिष्टमेव सर्वं द्रव्यं प्रथमाक्ष सन्निपातादप्युपलभ्यते इतिचेत् ? तदपिन; अकारण कार्योत्पत्ति प्रसंगात् , विशिष्टज्ञानस्य सर्वस्य स्वरूपज्ञानपूर्वकत्व दर्शनात, प्राथमिक स्वरूपज्ञानाभावे विशिष्टज्ञानस्यानुत्पत्ति प्रसंगात् । विगीता बुद्धिःस्वरूपज्ञानपूर्विका, विशिष्टबुद्धित्वात् , संप्रतिपन्नवादित्यनुमानाव् । अस्तु स्वरूपज्ञानं, तदेव स्वरूपं जातिगुणादि सर्वात्मकमपि निर्विकल्पे नतथा विविच्यते, विकल्पेतु जातिगुणाद्यात्मना तदेव विकल्प्यते इतिचेत् , तन्न ; जातिगुणादीनां परस्पर माश्रयाच्च भेदसिद्धेः । अभेदोऽपि तद्वत्सिद्ध्यतीतिचेन्न ; साधकाभावात् । प्रथमपिण्डग्रहण मस्तीतिचेत् ? तत्र प्रथमपिण्ड ग्रहणशब्देन किं पिण्डस्य प्रथमं ग्रहणं विवक्षितं? उता नुपलब्धचरे ष्वेकजातीयेषु कस्यचि त्प्रथमस्य पिण्डस्य ग्रहणमिति? न प्रथमः ; प्रथमाक्ष सन्निपात समनन्तरं जात्यभिन्न वस्तूपलम्भे तस्यैव विकल्पत्वापातात् । अनुवृत्तत्वाद्याकाराग्रहणा दविकल्पत्वमितिचेत् ; न तथासति जात्यादि

ल्पः — संज्ञानुविद्धप्रत्ययः । (स्वरूपेति) विशेष्यस्वरूपज्ञान पूर्वकत्वादित्यर्थः । (सम्प्रतिपन्नवदिति) द्वितीयादिविकल्पवदित्यर्थः । प्राथमिकज्ञानस्य जात्याद्यविषयत्वमसहमानः प्रकारान्तरेण निर्विकल्पक मुपपादयन् कौमारिल श्शङ्कते (अस्त्विति) जात्यादे स्स्वरूपेभिन्नत्वात् स्वरूपविषयकमपि प्राथमिकज्ञानं जात्यादिविषयमेव प्राथमिकज्ञानेतु नविविच्यते, द्वितीयादिज्ञानेतु विविच्यते, येन न विविच्यतेतन्निर्विकल्पकं, इतरत् सविकल्पकं, ननु — जात्याद्यगोचरं स्वरूपगोचरं निर्विकल्पकं , जात्यादिगोचरंसविकल्पक , मितिविभागइत्यर्थः । किं प्राथम्यं ग्रहणविशेषणं , उतपिण्डविशेषणमिति विकल्पयति (तत्रेति) पिण्डस्य प्राथम्यं सजातीयेषु प्रथमगृहीतत्वं (तथासतीति) जात्यादे स्स्वासाधारणरूपेण ग्रहणे तदभिन्नत्वेन

स्वरूपस्या ग्रहणे तदभिन्नवस्तूपलम्भासिद्धेः । जात्यादीन्यपि स दात्मना तदैव गृह्यन्तइतिचेन्न ; तथासति सन्मात्रं गृहीतं नतु जात्यादिरित्येवपर्यवसानात् । तथाच तदेवास्माकं निर्विशेषमिति । असद्व्यावृत्तिलक्षणो विशेष स्तत्रापि गृहीतस्यादितिचेन्न ; तस्य तत्स्वरूपानतिरेकात्, अतिरेकेवा तद्ग्राहिण स्सविकल्पकत्वप्रसंगात् । नापिद्वितीयः ; तत्रापि प्रथमाक्षसंनिपातजन्यज्ञानस्य उक्तन्यायेन त दभेदग्रहणासिद्धेः । तत्समनन्तरभाविनस्तु विकल्पस्य जातिग्रहणे सत्यपि प्रकारप्रकारिभावेन भेदस्यैवग्रहणात् । तदानीं तत्सजातीय वस्त्वन्तरग्रहणाभावात् , जाते र्वस्त्वन्तरानुगतत्वलक्षण आश्रया द्भेदोनगृह्यते, जातिगुणादिविशिष्टेऽपि वस्तुन्येको गौ रित्याद्येकशब्दा नुविद्धप्रत्यया दैक्यनुपलब्धमितिचेन्न; वसनाभरणादिविशिष्टे प्येकोय मिति प्रत्ययात् । तत्र पुरुषान्तरव्यवच्छेदार्थ मेकशब्दः, नतु विशेषण-

---

ग्रहो नसंभवतीतीत्यर्थः । ननु जात्यादिभिन्नत्वप्रकारेण ग्रहणेहि जात्यादे रसाधारणरूपेण ग्रहणापेक्षा , सति गृह्यमाणे जात्यादिकमपि सद- भिन्नं सदात्मनागृह्यते , नच तत्रजात्यादे रसाधारणरूपेण ग्रहणा पेक्षेति शङ्कते (जात्यादीन्यपीति) (तथासतीति) स्वरूपापेक्षदा जाते रभेदे क्रियमाणमिति पृष्टे सत्स्वरूपविषयकं ज्ञानं सदभिन्नत्वा, ज्जात्यादिकमपि सद्रूपेण गृह्णातीत्युक्तं, ततश्च अन्योन्याश्रयः, अभेदे सि- द्धे सज्ज्ञानस्य सद्रूपेण तदभिन्नजातिविषयत्वसिद्धिः, सद्रूपेणच त- द्ग्रहेसिद्धे अभेदसिद्धिरिति, तथाच सन्मात्रमेव गृहीतम् नतु जात्यादि कमित्येव पर्यवसानात् निर्विशेषविषयं निर्विकल्पकं सिद्ध मित्यर्थः । न- न्वेवमपि ननिर्विशेषनिर्विकल्पकसिद्धिः, असद्व्यावृत्तेः ग्रहणादिति , शङ्कते (असद्व्यावृत्तीति) भेदग्रहणासम्भवम् वदन् जातिव्यक्त्यभे- दे प्रमाणञ्च शङ्कते (तदानीमिति) (एकेति) एकइतिशब्दानुविद्ध- प्रत्ययादित्यर्थः । (वसनेति) तत्राप्यभेदप्रसङ्गइतिभावः । (तत्रे- ति) विशेष्यपुरुषमात्रएकशब्दानुवेधइत्यर्थः । मानान्तरंशङ्कते

विशेष्यैक्यार्थ मितिचेत, अत्रापि गवान्तरादिव्यवच्छेदार्थं इत्येवास्तु । नन्वभेदरहितेषु विशेषणेषु मत्वर्थीयसापेक्षं सामानाधिकरण्यं दृष्टम् , जातिगुणादिषु मत्वर्थीयनिरपेक्ष सामानाधिकरण्या दभेदोऽप्यभ्युपग-न्तव्यइतिचेन्न; अभेदप्रसंगरहितेष्वपि शरीरात्मादिषु देवो हं मनु-ष्योह मात्मादेवो जातः कर्मभि रित्यादिमत्वर्थीयनिरपेक्षसामानाधिकर-ण्यदर्शनात् । लक्षणयातत्रसामानाधिकरण्यमितिचेन्न; तत्रापि कैश्चि त्तथाभ्युपगमात् । अपृथक्सिद्धत्वा दपर्यवसानादिवृत्त्यावा तत्रसामाना-धिकरण्यमितिचेन्न; शरीरेपि तथा सुवचत्वात् तत्रापि तथासुवचत्वात् , अपृथक्सिद्धत्वस्य मत्वर्थीयनैरपेक्ष्यप्रयोजकत्वादिति । अस्तुतर्हि अपृ-थक्सिद्धत्वादेव जातिगुणादे राश्रयतादात्म्यमितिचेन्न; भेदगर्भेण सम्बन्धे ना भेदसाधने व्याघातात् । नायमभेदो भेदाभावात्मा; नापिभेदविरुद्धोधर्मः येनव्याघातस्स्यात् अपित्वन्यादृशइतिचेन्न ; तथाविधस्य कस्यचिद भेदस्या प्रसिद्धत्वात् , भेदाविरुद्धस्य कस्यचित स्वभावान्तरस्य सा धने स्माक मनिष्टाभावाच्च । एतेन सहोपलम्भनियमा दभेद इत्यपि

(नन्वभेदेति) देवोहमिति व्यवहारस्य भ्रान्तिमूलत्व माशंक्य विवे-किनां प्रयोग मुदाहरति (आत्मेति) (लक्षणयेति) देहवाचिनादेहा दिपदेन तद्विशिष्टात्मलक्षणयेत्यर्थः । (तत्रापीति) जातिवाचिपदेऽपि मीमांसकैकदेशिभि र्लक्षणाभ्युपगमादितिभावः । (अपृथक्सिद्धत्वा-दिति) लक्षणामन्तरेण मत्वर्थीयनिरपेक्षसामानाधिकरण्य मभेदप्रयोजकं तदेवमप्यस्तीतिभावः । (शरीरेऽपीति) अपृथक्सिद्धयादिना सामाना दिकरण्यस्य शरीरेऽपि सुवचत्वा त्तत्राप्यभेदप्रसङ्गाद पृथक्सिद्धिः रपर्यवसानं वा कुत्रापि मत्वर्थीयनिरपेक्षसामानाधिकरण्यप्रयोजकंनेति-भावः । "सुवचत्वादिति" पञ्चम्यन्त मुत्तरपञ्चम्यन्तहेतुः । मा नान्तरशङ्कते (अस्त्विति) भिन्नेष्वपृथक्सिद्धेरदर्शनादितिभावः । अ त्रव्यतिरेक्यनुमानं विवक्षितं । (अनिष्टेति) प्राथमिकस्य स्वरूपवि षयकस्य ज्ञानस्य जात्याद्यविषयतया स्मदभिमतनिर्विकल्पकाविरोधादि

निरस्तं ; सहोपलम्भस्य तन्नियमस्यच तादात्म्यवैरित्वात् । तदेवं भिन्नेष्व भेदसाधकासिद्धौ भेदाभेदयोः प्रतीतिबला दविरोधइ-ति धाष्टर्यमात्रेणोच्यते; अतो जातिगुणाद्यात्मकस्य एकस्यासम्भवा-देव तद्विषयं निर्विकल्प माशांबरसगोत्राणा माशामात्रपरिकल्पितं ।

अस्तुतर्हि परस्पर मत्यन्तभिन्नानां द्रव्यजातिगुणादीना मगृहीतविशेष णविशेष्यभावानां स्वरूपमात्रगृहणं निर्विकल्पकं, ततएवच तत्समनन्त-रभाविविकल्पोत्पत्तिरपि निर्व्यूढाभवति, नह्यगृहीतविशेषणा विशिष्टबुद्धि रुपपद्यते। नच जात्यादीनां विशेषणानां तत्तदिन्द्रियेण ग्रहणयोग्यानां तत्तदिन्द्रियसम्प्रयोगादि सामग्र्यां सत्या मग्रहणमुपपद्यते ; अतो विशेषण स्वरूपग्रहणरहितं निर्विकल्पकं नास्तीति , तदप्यसारं, यदि विशे षणविशेष्ययो स्स्वरूपग्रहणं; कस्तर्हिविकल्पाद्भेदः । समवायाग्रहणमि तिचेन्न ; अपृथक्सिद्धेषु जात्यादिषु वेदान्तविद्भि स्स्वरूपातिरिक्त-समवायानभ्युपगमात् , तथाच वैशेषिकानिराकरणाधिकरणे सूत्रम् - " समवायाभ्युपगमाच्च साम्यादनवस्थितेः " इति । अस्तुवा सम वायाख्यः सम्बन्धः, स किं तदा न गृह्यते? अयोग्यत्वादिति चे-

---

तिभावः । (सहोपलम्भस्येति) सहभावस्य भेदगर्भत्वात्तन्नियमस्य-च भेदनियमसाधकत्वादित्यर्थः । (आशाम्बरेति) भेदाभेदवादित-या दिगम्बरसगोत्राणामित्यर्थः । नैयायिकःस्वमतसिद्धं निर्विकल्पक माशङ्कते (अस्त्विति) एवमपि न जात्याद्यविषयानिर्विकल्पकसिद्धिरि तिभावः । सविकल्पकव्यावृत्त्यर्थं (अगृहीतविशेषणविशेष्यभावानामि)त्यु क्तम् । (ततएवेति) निर्विकल्पकस्य जात्यादिविषयत्वादेवेत्यर्थः । (नहीति) अत्र निष्ठया भूतत्वस्य विवक्षितत्वात् पूर्वं विशेषणज्ञाना भावे विशिष्टबुद्धिर्नस्यादित्यर्थः । अत्रविशिष्टबुद्धित्वेन हेतुना विशि ष्टवैशिष्ट्यज्ञानव द्विशेषणज्ञानसाध्यत्वं विवक्षितं । एवं कार्यवशात्पू र्वं विशेषणज्ञानं प्रसाध्य इदानीं सामग्रीवशाच्च तत्साधयति (नचेति) सत्यांसामग्र्याम् कार्यविलम्बो नुपपन्नइतिभावः । (सकिमिति) कु

न्न; नित्यं तद्ग्रहणप्रसंगात् । एवमपि कैश्चिदिष्यतइति चेन्न; त थापि विकल्पाविशेषप्रसंगः। नहि तदा विकल्पेऽपि समवायग्रह णं सम्भवति। तथापि विशेषणविशेष्यभावो गृह्यत इतिचेन्न, तर्हि ततएव ततःपूर्वं विशिष्टप्रत्ययोत्पत्ति र्वक्तव्या, जातेहि विशिष्टप्रत्य ये निष्कर्षकबुद्ध्या विशेषण मिदं विशेष्य मिदमिति विविच्यते, तत श्च प्रथममेव विशिष्टप्रत्यये क्वानिर्विकल्पकम् । माभूत् स्वरूपायो ग्यत्वं "सहकारिवैकल्यात्तु निर्विकल्पके समवायाग्रहण" मिति न्यायाचार्याइतिचेत्? किं तत्सहकारि, अवच्छेदकग्रहण मितिचेन्न, अवच्छेदकयो राश्रयाश्रयिणो स्वरूपस्य निर्विकल्पेऽपि ग्रहणात्। अवच्छेदकग्रहणस्य सम्बन्धग्रहणकारणत्वात् पूर्व मवच्छेदकग्रहण- मपेक्षितमिति चेन्न, तस्य कारणत्वे प्रमाणाभावात्, सम्बन्धग्रहणद शायांच येन रूपेणावस्थाय तदवच्छेदक मवच्छिन्द्यात तद्यदि रूपं युगपद्ग्रहणेपि सम्भवति, किं तस्य पूर्वग्रहणेन, व्यर्थविशेष

तेनगृह्यतइत्यर्थः । (एवमपीति) समवायाग्रहणं कैश्चिदिष्यते तदे व वयमप्यङ्गीकुर्मइतिभावः। (तथापीति) विशेषणविशेष्यभावग्रहणादे व सविकल्पकस्य निर्विकल्पकाद्विशेषइत्यर्थः (तर्हीति) विशेषणविशेष्य भावोहि विशिष्टप्रतीतिनिबन्धनः, अतः प्रथमतो विशिष्टप्रतीतौ जातायां विशेषणमिदं विशेष्यमिदमिति ज्ञानान्तरेण गृह्यतइत्यर्थः । सहकारिपदेन किं प्रयोजकत्वं विवक्षितं उतकारणत्वमिति विकल्प मभिप्रेत्याद्येदोष माह (अवच्छेदकयोरिति) द्वितीयं शङ्कते (अवच्छेदकग्रहणस्येति) प्रति- योगिज्ञानाभावे संबन्धज्ञानंनदृश्यतइत्यत्राह । (संबन्धेति) येनरूपेण- दण्डत्वादिना ज्ञायमानत्वरूपेण, तद्यदिरूपम्-ज्ञायमानत्वरूपम् विशे- षणस्य युगपद्ग्रहणेपि सम्भवति किं तस्य पूर्वग्रहणेनेत्यर्थः । सम्बन्धिनो ज्ञानविषयत्वमपेक्षितं नतु पूर्वं ज्ञानविषयत्वं पूर्वत्वविशेष णस्य व्यर्थत्वादित्यर्थः। सत्यपि पूर्वग्रहणे तात्कालिकग्रहणं पूर्वग्रहणं चापेक्षितमिति न शक्यं वक्तुं गौरवात्, तत्तश्चान्यतरस्यापेक्षणीयत्वे

णत्वात् । सत्यपि पूर्वगृहणे तादात्विकावच्छेदक स्वरूपोल्लेखएवहि अवच्छेद्योल्लेखापेक्षितः, पूर्वगृहणेसत्यपि तादात्विकावच्छेदकोल्लेखा भावे तदवच्छिन्नसम्बन्धोल्लेखासंभवात् । अस्तु सम्बन्धस्यापि स्वरूपग्रहणं, तथापि तस्यावच्छिन्नत्वं न गृह्यतइतिचेन्न, अवच्छेदकयो राश्रयाश्रयिणो रवच्छेद्यस्यच सम्बन्धस्य स्वरूपग्रहणे कथ मवच्छिन्नत्वाग्रहः, अवच्छेदक स्वरूपग्रहणातिरिक्तस्य तदवच्छिन्नत्व ग्रहणापेक्षितस्या सम्भवा दनभ्युप गमाच्च । एतेन समवायस्य निर्विकल्पकैकविषयत्वं वदन्तो भूषणमतानुसारिणोपि प्रत्युक्ताः । अतो यदि विशेषणग्रहणं तदा नकथंचिदपि, निर्विकल्पकत्वासिद्धिः । विशेषणरहितस्वरूपग्रहणेतु तदेवास्माकं निर्विशेषग्रहण मिति । भवतु निर्विकल्पके निर्विशेषग्रहणं, तथापि विशेषाएव स्वलक्षणापरनामानः स्वय मकिंचिन्निष्ठाः कैश्चिदनाश्रिताश्च तत्रगृह्यन्ते नाद्वितीयमितिचेन्न; प्रमाणाभावात् नीलपीतादिप्रतिनियत विचित्रविकल्पोत्पत्ति रेव प्रतिनियतकारणमन्तरेणा नुपपद्यमाना निर्विकल्पकेपि स्वानुरूपविशेषोल्लेखं व्यवस्थापयतीतिचेन्न; एकस्मिन्नद्वितीये सर्वेषु निर्विकल्पेषु गृह्यमाणे तत्तद्विचित्रवासनादिरूपभ्रमसामग्रीसामर्थ्यादेव प्रतिनियतविकल्पोपपत्तेः । कि मेकस्या

सति पूर्वग्रहणेपि तादात्विकावच्छेदकग्रहणाभावे विशिष्टज्ञानासिद्धेः यत्र पूर्वग्रहणमस्ति तत्राप्यव्यभिचारात् तादात्विकग्रहणमेव - प्रयोजकं नतु पूर्वग्रहणमित्याह (सत्यपीति) (अस्त्विति) निर्विकल्पकइति शेषः (अवच्छेदकेति) स्वरूपशब्देन अवच्छेद्यस्वरूपं गृह्यते, अवच्छेदकावच्छेद्यस्वरूपग्रहणंच समानकालीनतया पेक्षितं नतु पूर्ववर्तितयेति भावः । गुरु शिष्यमुपालब्धुमुपक्रमते (तथापीति)(नाद्वितीयमिति) गृह्यतइतिशेषः । (स्वानुरूपेति) तत्तत्स्वरूपविशेषोल्लेखमित्यर्थः । उक्तमेवोपपादयति (किमेकस्यामिति) ननु स

मेव रज्जौ गृह्यमाणायां विचित्रा स्सर्पभूदळनाम्बुधारादिविकल्पाः क्रमशो नसन्दृश्यन्ते ; युगपदपिवा? किं मेकस्मिन् गगने गन्धर्व नगरप्राकारतोरणादिविकल्पाः प्रकल्प्यन्ते ; विकल्पानांच भ्रान्ति-रूपत्वं भवद्भिरपीष्यते । विशेषाणामेवाभावे कथंविचित्रवासना दिसंभवइतिचेन्न; विशेषाणां वासनाहेतुत्वाभावात्, तत्तद्विषय विज्ञप्ति बीजान्येव वासनामंकुरयन्ति ; अन्यथा शुक्तिरजतादिविषयमिथ्यात्वेन तदनुभवजन्यवासनाभावात् तदनुस्मरण तन्मूलचेलांचलग्रन्थि वि घटनादयो नसम्भवेयुः । नन्वापणादिषु सत्यरजतगृहणा द्रजत-वासना, ततश्च तदेवरजतं वासनावशादेव देशान्तरकालान्तरयो र-सदपि प्रतीयते, तत्प्रतीतिमूलश्च पुन स्संस्कारस्मृत्यादिप्रवाहइति युज्यते; यस्यतु क्वचिदपि विशेषा नसन्ति तस्य कथं विशेष वासना निर्वाह्या? उच्यते - मिथ्यार्थज्ञानस्यापि ताव द्वासनाजनकत्वं भवद्भिरपीष्यतएव, ततश्च पूर्वपूर्वभ्रमविशेषजनित संस्कारविशेषादेव सर्वविकल्पोपपत्तौ किं क्वचि द्विचित्रेणा र्थेन विकल्प वैचित्र्याय प्रत्यक्षतया तदनुमेयतयावा कल्पितेन । अस्यचार्थस्य वैशद्याय समा नसमयाचारा योगाचाराद्य उपास्यन्तां । तत्रतु भवन्तएव तेषां बाह्याभेदापह्नवन्यायेन आन्तराभेदापह्नवं परानिष्टमुद्घाटयन्तु,

---

र्थादिभ्रमाणां वासनावशात्सम्भवेपि प्रकृते तदसंभवइत्यत्राह (विकल्पाना मिति) ननु भ्रान्तिज्ञानवैचित्र्यार्थं विचित्रवासनासिद्ध्यै विषयविशिष्टज्ञा-नस्य जनकता वाच्या, विचित्रविषयाभावेच विचित्रवासना नस्यादिति शंकते (विशेषाणामिति) विज्ञप्तिबीजानि-विज्ञप्तयएवबीजानि (अन्यथेति) विशेषाणां वासनाहेतुत्व इत्यर्थः । ननु तत्तद्विषयविज्ञप्ते र्वासनाहेतुत्वेपि-भ्रमरूपविज्ञप्तेरपि वासनाजन्यत्वा त्तन्मूलज्ञानापेक्षायां क्वचित्प्रमाया मेव पर्यवसानं वाच्यम्, अन्यथा - अनवस्थानात, क्वचिदपि विशे-षानंगीकारे कथमेतदिति शंकते (नन्वापणादिष्विति) (उच्यत इ-त्यादि) आपणस्थरजतानुभवोऽपि भ्रमएव, नच तन्मूलसंस्कारज

अतो विचित्रविकल्पोदयस्य अन्यथासिद्धे निर्विकल्पकेऽपि विचित्र विशेषग्रहणकल्पना नयुक्ता, तत्कल्पनेऽपिवा लाघवाय विचित्राद्वै तं विश्वविषयमास्थीयतां । नचैकस्या नेकस्वभावताव्याघातः, रूपरसगन्धस्पर्शस्वभावाः पार्थिवाः परमाणवः, रूपरसस्पर्शस्वभावा आप्याः, रूपस्पर्शस्वभावास्तैजसा इति भवद्भि रेकैकस्यानेकस्वभाव कल्पनात् । अतएव नैकस्य विरुद्धस्वभावत्वेत्यपि दत्तोत्तरं, लोक दृष्ट्या परराद्धान्तिभिश्च रूपत्वरसत्वादे रविरुद्धस्वभावतया स्वी कारात्, भवद्भिस्तु शान्त्या सिद्धाश्रमीभवद्व्याळनकुलादेरिव नीलध वळादेरपि वैरस्यस्य शमयितुं शक्यत्वात् । तस्मादस्मदभिमत मद्वै तमेव शुद्धं चित्रंवा निर्विकल्पकपदमिति शत्रुमित्रविभागोदासीनैश्च सौगतैरपि संग्रहणीयं, ततः प्रमाणज्येष्ठस्य प्रत्यक्षस्य प्रथममेव नि र्विशेषोल्लेखित्वात् विकल्पोल्लीढविशेषाणां भ्रान्त्या निर्वाहात् नशक्यं 'निर्विशेषवस्तुनिदं प्रमाणमिति नशक्यते वक्तु' मिति ।

अत्रोत्तरमाह - निर्विकल्पकमपि सविशेषविषयमेवेति । अयमभि प्रायः, तत्र यत्तावच्छाब्दकौमारिलादिमतदूषणं तदस्माकमपि सम्मतमेव । तत्र यदुक्तं विशिष्टग्रहणस्य स्वरूपग्रहणं कारणमिति ; तन्न सार्वत्रिकं, भिन्नसामग्रीवेद्येषु सविशेषणविशेष्येष्वेव तथादर्शनात्, एकसामग्रीवेद्येषुतु समानकालीनविशेष्यग्रहणेनैव विशिष्टग्रहणसिद्धेः। उक्तंच त्वयापि तत्कालीनविशेषणग्रहणमेव विशिष्टोल्लेखोपयोगीति। तद्वद्विशेष्यस्वरूपस्य पूर्वगृहीतस्यापि तादात्विकोल्लेखाभावे विशिष्टग्र हणासिद्धेः, सतितस्मिं स्तत्सिद्धेः, पूर्वग्रहणस्यानपेक्षितत्वात् ।

नकासंभवः; जन्मान्तरीयरजतानुभवस्यैव तन्मूलत्वात्; नचानवस्था; प्रवाहानादित्वेनादोषत्वादिति भावः । (भिन्नसामग्रीति) अन्वयव्य- तिरेकौ भिन्नसामग्रीवेद्य विशेषणविशेष्यगोचर विशिष्टबुद्धिविषयावेव, नतु सामान्यतो विशिष्टबुद्धिमात्रविषयौ, अतो न प्रत्यक्षं स्वरूपग्रहणस्य

अतएव विशिष्टग्रहणत्वात्त स्वरूपग्रहणपूर्वकत्वानुमानं प्रत्युक्तं । यच्चोक्तं विशेषणग्रहणेसति नकथंचिदपि निर्विकल्पकसिद्धिरिति; तदप्यसत् ; निर्विशेषग्रहणरूपनिर्विकल्पके शशविषाणायमाणे यदि विशेषणग्रहणे निर्विकल्पकंनाम नकिंचित्स्यात् ; नस्यादेव; नह्यप्रामाणिकमवश्यमंगीकुर्मः । योगशास्त्रेषु निर्विकल्पकसमाध्युपदेशा न्नतस्याप्रामाणिकत्वमितिचेन्न; तत्रापि निर्विशेषग्रहणस्य अनुपदेशात् , आगमानांच सविशेषपरत्वस्य स्थापयिष्यमाणत्वात्, समाधिलक्षणानुप्रविष्टस्य अर्थमात्रावभासत्वस्य "स्वरूपशून्य" मिवेत्यस्य निर्विशेषग्रहणपरत्वाभावात् ; ध्यानमेवहि यथावस्थितध्येयार्थवैशद्यातिशयात् तन्निगीर्णस्वरूप मिव भवतीति

विशिष्टबुद्धिकारणत्वे प्रमाणमित्यर्थः । (अतएवेति) भिन्नसामग्रीवेद्यविशेषणविशेष्यगोचर बुद्धिष्वेव स्वरूपग्रहणपूर्वकत्व दर्शनादित्यर्थः । भिन्नसामग्रीवेद्य विशेषणविशेष्यगोचरत्व मुपाधिरित्युक्तं भवति । ननु – रूपघटशब्दाभ्यां विशेषणविशेष्ययोः पृथग्बोधनात् साधन–व्यापकत्वं,– विशेष्येसंयोगः विशेषणे संयुक्ताश्रितत्वमिति प्रत्यक्षेऽपि सामग्रीभेदइति साधनव्यापकत्वमिति चेत् , न; भिन्नसामग्रीपदेन लौकिकालौकिक सन्निकर्षभेदस्य विवक्षितत्वात् । ततश्च स्वजनकेन्द्रिय - निरूपित तदानीन्तनालौकिक सन्निकर्षवद्विशेषण गोचरविशिष्टबुद्धित्व मुपाधिरित्युक्तं भवति । अयञ्च प्रत्यक्षत्वावच्छिन्न साध्यव्यापको बोध्यः । ननु विशेषग्रहणे सति कथंचिदपि निर्विकल्पकासंभवात् स्वरूपग्रहणमेव निर्विकल्पकंवक्तव्य मित्युक्त मित्यत्राह (यच्चोक्तमिति) निर्विशेष निर्विकल्पकं तावद्दूषितमेव, नचतत्स्वीकर्तुंशक्यं, विशेषग्रहणात्मकमपि निर्विकल्पकं यदिनसम्भवति माभूत् किन्नश्छिन्नमित्यर्थः । ननु – निर्विकल्पकंताव न्नाप्रामाणिकं, योगशास्त्रसिद्धत्वात , विशेषणग्रहणेच तन्नसंभवतीति स्वरूपग्रहणमेव तदेष्टव्यमितिशंकते (योगेति) ननु – वेदान्ताना मखण्डार्थत्वान्न निर्विशेष निर्विकल्पकस्या प्रामाणिकतेत्यत्राह (आगमानामिति)

तत्रोपदिश्यते; प्रह्लादवामदेवादि समाधिषु चानन्तविशेषणविशिष्टब्रह्मा-नुभवएव श्रूयते; अतो नशास्त्रा न्निर्विशेषविषयनिर्विकल्पकसिद्धिरिति । अतःप्रामाणिके कस्मिंश्चिन्निर्विकल्पके यथोपलम्भ मंगीक्रियमाणे सं स्कारानपेक्षप्रथमाक्षसन्निपातमात्रसंभवं प्रत्यक्षं निर्विकल्पकं, तत स्तत्सं-स्कारसहकृतेन्द्रियजन्यं तदेकविषयं तज्जातीयपिण्डान्तरविषयंवा प्रत्यक्षं सविकल्पकं, तच्च येनाकारेण पूर्वापरानुवृत्तेन स्वविषयंविशिनष्टि तदाका रविशिष्टस्य पूर्वमपि ग्रहणावश्यम्भावात् प्रथमाक्षसंयोगजस्यापि वि-शिष्टविषयत्वमेव युक्तं, तदाह-"सविकल्पके स्वस्मि न्ननुभूतपदार्थविशि-ष्टप्रतिसन्धानहेतुत्वा" दिति । निर्विकल्पकन्तच्चविशिष्टविषयमितिस्व वचनविरुद्धमितिचेन्न; प्रमाणवला च्छब्दवृत्तिसंकोचे ऽवश्यम्भाविनि प-रामर्शदशाविषयीक्रियमाणविशेषणनिवृत्तिमात्रेण निर्विकल्पकवाचोयुक्तेरु-पपत्तेः । तदाह-"निर्विकल्पकन्नाम केनचिद्विशेषेण वियुक्तस्या र्थान्त रस्य ग्रहणं नसर्वविशेषरहितस्ये"ति ।

यदुक्तं प्रथमाक्षसन्निपातसमनन्तर मविशिष्टविषयापरोक्षावभासो दुरपह्नव

(अतइति) निर्विशेष निर्विकल्पकस्या प्रामाणिकत्वात्, प्रामाणिकं नि र्विकल्पक मुपलंभसिद्धेष्वेव किंचिदंगीकर्तव्यं, ततश्च संस्कारनिरपेक्षस्य न्यूनविषयत्वात्तदेव निर्विकल्पकमित्यर्थः । यत्संस्कारासहकृतेन्द्रियजन्यं निर्विकल्पकमिष्यते तत्सर्व मविशिष्टविषयमेवास्त्वित्यत्राह(तच्चेति)सविक ल्पकंहि पूर्वानुभूते इदानी मनुभूयमानेचानुवृत्ततया प्रतीयमानधर्मेण स्वयंविशिनष्टि 'अयमपिगौरिति' सएवायमितिवा, अतःपूर्वमपि गोत्व-विशिष्टानुभव आवश्यकइत्यर्थः । (निर्विकल्पकमिति) विकल्पशब्दस्य वि शेषणवाचित्वादित्यर्थः । परामर्शदशा संस्कारजन्य प्रतिसन्धानदशा विषयीक्रियमाण विशेषणमनुवृत्तिः, 'भाष्येकेनचिद्विशेषेणे' त्यनुवृत्तिर्विव-क्षिता, भाष्ये तथाभूतस्य निर्विशेषवस्तुनो यद्ग्रहणं निर्विकल्पकं त-स्यादर्शनादित्यर्थः । कथमदर्शनं, तादृशनिर्विकल्पकस्य स्वप्रकाशसि

इति; तत्राह "तथाभूतस्य कदाचिदपि ग्रहणादर्शना:" दिति। अयमभिप्रायः-नतावन्निर्विशेषवस्तुग्रहणं इदमितिवयन्तदुत्तरकाले व्यक्तं परामृशामः, नच तदानीमेव। यद्यपि निर्विशेषवस्तुग्रहणमपि स्वप्रकाशत्वात् स्वतस्सिद्धमितिवक्तुंशक्यं; तथापि तथाविधा स्वतस्सिद्धिरपि तथाभूततद्गोचरपरामर्शमन्तरेण दुरुपपादेत्युक्तं, अन्यथा शशविषाणग्रहणमपि स्वप्रकाश. सिद्धमिति धृष्टोक्तेरनिस्तारात्, तथाच नकिंचित्प्रतिक्षेप्यंस्यात्, सर्वस्यापि तथातथासिद्धेःसुवचत्वादिति। माभूत् तथाभूतस्य ग्रहणम्, उपपत्यातुकल्प्यतइति यदाहुः-तत्राह-"अनुपपत्ते"श्चेति-उपपत्त्यभावादित्यर्थः। व्याख्यातमिदं प्रागेव। अदर्शनं विवृणोति - "केनचिद्विशेषणेन इदमित्थमितिहिसर्वाप्रतीतिरुपजायत"इति। उपपत्त्यभावंविवृणोति "त्रिकोणसास्नादिसंस्थानाविशेषेणविना कस्यचिदपि पदार्थस्य ग्रहणायोगा"दिति। यद्वा "तथाभूतस्य कदाचिदपि ग्रहणादर्शना दनुपपत्तेश्चे" ति योग्यानुपलब्धिबाधमुपपत्तिबाधंचाह; तदुभयविवरणं — केनचिदित्यादिग्रन्थ द्वयम्। यद्वा पूर्वग्रन्थद्वयम् - साधकाभावपरं; उत्तरंतु - तद्द्वयंबाध-

---

कत्वादित्यत्राह (अयमभिप्रायइति) (व्याख्यातमिति) विशिष्टबुद्धित्वं सोपाधिकमित्युक्तमित्यर्थः। (उपपत्त्यभावमिति) प्रथमाक्षसन्निपातसमनन्तरविशिष्टज्ञानं विशेष्यज्ञानपूर्वकं - विशिष्टबुद्धित्वात्, सम्प्रतिपन्नवदिति पराभिमतमनुमानं, प्रथमाक्षसन्निपात समनन्तरभाविज्ञानं विशेषणविषयं, बुद्धित्वात्, सम्प्रतिपन्नवदिति अनेन प्रतिरोधादाभाइति 'त्रिकोणे' त्यादि भाष्याभिप्रायइतिभावः। (उपपत्तिबाधमिति) इदमेवानुमान मैन्द्रियकत्वाविशेषा दित्यादितर्कसाचिव्या दधिकबलमितिभावः। (उत्तरंत्विति) चक्षुरुन्मीलन समनन्तरमेव सास्नादिविशिष्ट मद्राक्षमिति प्रत्यक्षबाधः "केनचि" दितिभाष्ये ऽभिमतः, उक्तरीत्या नुमानबाध "त्रिकोणे" त्यादिभाष्ये ऽभिमतइतिभावः। ननु "अत" इत्यादिभाष्यं लक्षणपरमिव प्रतीयते, तच्चानुपपन्नं, उत्तरत्र "प्रथमप्रतीते" त्यादिभाष्येण लक्षणस्य कथनात्

कपरामितिविभागः । उक्तप्रकारनिर्विकल्पकसविकल्पकविभाग मुदाहरणमुखेन विशेषेणदर्शयति - " अतो निर्विकल्पक मेकजातीयद्रव्येषु प्रथमपिण्डग्रहणं द्वितीयादिपिण्डग्रहणं सविकल्पकमित्युच्यत " इति । निर्विकल्पकसविकल्पकोदाहरणविशेषभूतयोः प्रथमद्वितीयपिण्डग्रहणयोः केनचिद्विशेषेण वियुक्ति मवियुक्तिं पदर्शयति-- "तत्र प्रथमपिण्डग्रहणे गोत्वादे रनुवृत्ताकारता नप्रतीयते , द्वितीयादिपिण्डग्रहणे प्वेवानुवृत्तिप्रतीति''रिति । ननु - यदि कस्यचिदग्रहणा न्निर्विकल्पकत्वं, तर्हि द्वितीयादिपिण्डग्रहणमपि यत्किंचिद्वस्त्वन्तराग्रहणा न्निर्विकल्पक मेवस्यात् , ततश्च सविकल्पकनिर्विकल्पकयो र्व्युत्पत्त्यनुसारेण विभाजकं लक्षणंवाच्यमिति; तत्राह " प्रथमप्रतीत्यनुसंहितवस्तुसंस्थानरूप

नचोभयमपिलक्षणमितिवाच्यं; विरोधात् , अनेनहि लक्षणेना नुवृत्तत्वाग्राहिणोऽपि द्वितीयग्रहणस्य सविकल्पकत्वं स्यात् तेनतु नस्यादित्यत्राह (उक्तप्रकारेति) ' एकजातीयेष्विति ' –सविकल्पकोदाहरणेपि संबध्यते । प्रथमपिण्डग्रहणमात्रस्य निर्विकल्पकोदाहरणत्वे जन्माद्यग्रहणमेव निर्विकल्पकं स्यादिति ' एकजातीयद्रव्येष्वि ' त्युक्तं । जन्मनि द्वितीयत्ववारणार्थं मनुवृत्तिप्रतीतिस्फोरणार्थंच सविकल्पकोदाहरणे'एक–जातीयपदं' । ननु प्रदर्शितोदाहरणे सविकल्पकनिर्विकल्पकपदप्रयोगनिमित्त प्रदर्शनपरे भाष्ये प्रथमपिण्डग्रहणमात्रं निर्विकल्पकोदाहरणं द्वितीयादिपिण्डग्रहणमात्रं सविकल्पकोदाहरणमिति.. प्रतीयते , तदनुपपन्नं , निर्विकल्पकलक्षणस्य संस्काराजन्य द्वितीयपिण्डग्रहण साधारण्यादित्यत्राह (निर्विकल्पकेति) उदाहरणविशेषपरंभाष्यं , नतूदाहरणपरिच्छेदपरमितिभावः । ननु " निर्विकल्पकंनाम " त्यादिभाष्ये कस्यचि दग्रहणं निर्विकल्पकपदप्रयोगनिमित्तमित्युक्तं , ततश्च द्वितीयादिपिण्डग्रहणमपि निर्विकल्पकंस्यादिति शंकते (नन्विति) (व्युत्पत्त्यनुसारेणेति) निर्विकल्पकसविकल्पकपदयो रसंकीर्णार्थत्वेनैव लोके व्युत्पन्न त्वादितिभावः । " निर्विकल्पकंनाम " त्यादिभाष्यं योगार्थप्रद

गोत्वादे रनुवृत्तिधर्मविशिष्टत्वं द्वितीयादिपिण्डग्रहणावसेय मिति द्वितीयादिग्रहणस्य सविकल्पकत्वं, सास्नादिवस्तुसंस्थानरूपगोत्वादे रनु वृत्ति र्नप्रथमपिण्डग्रहणे गृह्यत इति प्रथमपिण्डग्रहणस्य निर्विकल्प-कत्वं, नपुन स्संस्थानरूपजात्यादेरगृहणा " दिति । अयमभिप्रायः - संस्कारसहकृतेन्द्रियजन्यतया सप्रत्यवमर्शी ज्ञानं सविकल्पकं, संस्कारनि रपेक्षकेवलेन्द्रियजन्यज्ञानं निर्विकल्पकं , तदेतद्दृश्यते प्रथमपिण्डगृहण दशाया मिद मित्येव गृहणा द्वितीयादिपिण्डगृहणेषु तज्जातीयतया सोय मिति परामर्शादिति । ननु - यदि प्रथमपिण्डगृहणे जातिगृह णंस्यात् तदैवंविभागस्स्यात् तत्रैवतु किं प्रमाणं ? नह्यनुवृत्ताकारजा तिग्रहण मेकपिण्डग्रहणे संभवतीत्यत्राह—" संस्थानरूपजात्यादे रप्यै न्द्रियकत्वाविशेषात् संस्थानेनविना संस्थानिनः प्रतीत्यनुपपत्तेश्च प्रथम पिण्डग्रहणेपि ससंस्थानमेवत्रस्त्वित्थमिति गृह्यत " इति । एतेन वैशे-षिकाद्युक्तं निर्विकल्पकमपि निराचकार । ननूक्तेन लक्षणप्रकारेण विभागे प्रथमपिण्डगृहणेपि सविकल्पकत्वं सम्भवति, यथा प्रथम-पिण्डस्यैव द्वितीयपिण्डगृहणे सोयं गौरिति, द्वितीयादिपिण्डगृहणेष्वपि-निर्विकल्पकत्वंस्यात् , यथाविस्मृतप्रथमपिण्डस्य परामर्शाभावात् द्वि-तीयादि पिण्डेष्वप्ययं गौ रिति, अतो लक्षणोदाहरणयो रसामञ्जस्य-मिवभाति, अनुवृत्तस्वरूपाया जाते र्ग्रहण मेकपिण्डमात्रग्रहणे न संभ

र्शनपरं ' इदंतुलक्षणपरं , तथाच निर्विकल्पकशब्दो योगरूढइत्यभिप्रा यः । प्रत्यभिज्ञाया मव्याप्ति माशंक्याह (अयमभिप्रायइति)

इति श्री वाधूलकुलतिलक श्रीनिवासाचार्य पादसेवासमधिगत परावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिता यां शतदूषणीव्याख्यायां चण्डमारुताख्यायां निर्विशेषविषयनि र्विकल्पभंगो नामैकादशस्कन्धः ।

वर्तीति चोद्यंचापरिहृतं; तत्राह - "ततोद्वितीयादिपिण्डगृहणेपुगोत्वादे रनुवृत्ति धर्मविशिष्टता संस्थानवत् संस्थानित्वच्च सर्वदैवगृह्यतइति तेपु सविकल्पकत्वमेवे"ति । अयमाशयः, निर्विकल्पकसविकल्पकविभाग स्तावदुक्तप्रकारमन्तरेण नोपपद्यतइतिदर्शितं, उदाहरणमपि सम्भवल्लक्षणव्यक्तिविषयम् , अतः प्रथमद्वितीयाद्यनादरएव, येपुतु प्रथमस्यैव पिण्डस्य द्वितीयादिगृहणेषु प्रतिसन्धानसम्भवः तेषु सविकल्पकत्वमेवास्तु, येषु द्वितीयादिपिण्डगृहणेषुच प्रथमस्यैव पिण्डस्य द्वितीयादिगृहणेषुच प्रमुषितसंस्कारस्य प्रतिसन्धानासंभवः तत्रापि निर्विकल्पकत्वमेव, येषुपुन द्वितीयादिपिण्डगृहणेषु गोत्वादे रनुवृत्तिधर्मविशिष्टता संस्थानिवत् संस्थानवच्च सर्वदैव गृह्यते, तेषु साविकल्पकत्वमेवेति, तद्वितीयविकल्पोदाहारणं, योग्यतया संस्थानस्य प्रथममेव स्वरूपग्रहणं आश्रयभेदग्रहरूपसहकारिविशेषस्य अभावादनुवृत्तिरूप धर्माग्रहणं, द्वितीयादि पिण्डेषु गृह्यमाणेषु तथाविध सहकारिसद्भावात् संस्थानस्वरूपस्येव तदनुवृत्तेरपि ग्रहणमिति नसंकटं किंचिदिति । निगमयति - "अतः प्रत्यक्षस्य नकदाचिदपि निर्विशेषविषयत्व" मिति । "अत" इति साधकाभावात् बाधकसद्भावा त्प्रामाणिकस्य निर्विकल्पकसविकल्पकविभागस्य लोकशास्त्राविरोधेन निर्वाहाच्चेत्यर्थः । "कदाचिदपी" ति सविकल्पकदशाया मिव निर्विकल्पकदशायामपीत्यर्थः॥

इति श्री कवितार्किक सिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां निर्विशेषविषय निर्विकल्पकभंगवाद-

एकादशः ।

श्रीः ।

श्रीमतेरामानुजायनमः ।

श्रीमते निगमान्तमहादेशिकायनमः

अथ द्वादशस्कन्धः ।

यस्य सत्त्वेन विश्वस्य सत्ता सदसदात्मनः ।
प्रत्यक्षाद्यपरिच्छेद्यं तत्सदेकमुपास्महे ॥

यत्तु- प्रत्यक्षादिविरुद्धं शास्त्रार्थ मुपपाद्य पुनस्सानुशयैरुक्तं -- प्रत्यक्षादिविरोधे सत्येवहि शास्त्रस्य बलीयस्त्वं वक्तव्यं, विरोधमेव नपश्यामः, प्रत्युतैकरस्यं, प्रत्यक्षस्यापि शास्त्रस्येव निर्विशेषसन्मात्रग्राहित्वात् । ननु- यदि सन्मात्रं प्रत्यक्षेण गृह्यते तदा घटोऽस्ति पटोस्ती त्यादि नानाकार वस्तुविषयोपलम्भ व्यवहारयो र्विरोधः, नहि सन्सदित्येव प्रतीतिव्यवहाराविति चेन्मैवं; यथेदं रजत मित्यादिरूपेषु शुक्तिरजतादिभ्रमेष्विदमंशस्याबाधितस्य सर्वत्र प्रत्यक्षेणग्रहणं रजताद्यंशस्य त्वारोपितस्यैव भ्रान्त्यैवेति विविच्यते, तद्वदत्रापि सर्वत्र सन्मात्रप्रकाशव्यवहारयोः प्रत्यक्षोपज्ञत्वं, घटपटादिभेदाविषययोस्तु तयो र्भ्रमोपज्ञत्वमिति विविच्मः, तथाहि- घटोस्तीत्यादा वस्तित्वं तद्भेदश्चप्रकाशते व्यवह्रियतेच, तत्र विधिव्यवच्छेदयो र्भावाभावात्मनो रैक्यायोगात् , भेदस्तात्र द-

---

(यस्येति) चिदचिदात्मकस्य प्रपञ्चस्य यदधीनं सत्त्वं तद्रूपमितिभावः । तत्रहेतुः (प्रत्यक्षेति) अनेन वादार्थस्संगृहीतः (सानुशयैरिति) शास्त्रं शब्दविज्ञाना दसन्निकृष्टेविज्ञानं "असन्निकृष्टवाच्याचद्वयमत्राजिहासितं । ताद्रूप्येणपरिच्छित्तिस्तद्विपर्ययतोपिवे" तिन्याये न प्रत्यक्षबाधितेऽर्थे शास्त्रस्या प्रवृत्तिं मन्वानैरित्यर्थः । उपलम्भासिद्धिशंकापरिहाराय - व्यवहारग्रहणं । (शुक्तिरजतादिभ्रमेष्विति) शुक्तिरजत व्यवहारप्रयोजकज्ञानेष्वित्यर्थः । (इदमिति) ज्ञानस्य प्र-

ङ्गीकार्यः, ततश्च स्वरूपभेदयोः सद्घटयोः किं द्वयोरपि ग्राहकं प्रत्यक्षं ? उतान्यतरग्राहीतिविचारणीयं; पूर्वत्रापि किं युगपद्ग्राहकं उत क्रमेणेति? नप्रथमः, स्वरूपग्रहणस्य निरपेक्षतया झटित्युत्पत्तेः, भेदग्रहणस्य स्वाश्रयप्रतियोगिग्रहणसापेक्षस्य जघन्यत्वाच्च यौगपद्यासम्भवात्। नद्वितीयः, क्षणिकस्य ज्ञानस्य निरपेक्षं स्वरूप मवलम्ब्यास्तमितस्य भेदग्रहणाय क्षणान्तरस्थिते रशक्यत्वात् । अन्यतरग्राहित्वपक्षेपि न भेदमात्रग्राहित्वं, निराश्रयभेदग्रहासम्भवात । ततः परिशेषा त्स्वरूपमात्रग्राहिप्रत्यक्षमितिसिद्ध्यति । एवं प्रत्यक्षस्य भेदग्राहित्वासम्भवे तन्मूलानां प्रमाणान्तराणामपि न वस्तुतो भेदसमर्थनसामर्थ्यमितिकुतस्तत्सिद्धिः । सिद्ध्यन्नपिच भेदः इतरव्यवच्छेदरूपतया स्वयमभावात्मतया षष्ठप्रमाणवेद्यइत्यतोऽपि न तस्य प्रत्यक्षग्राह्यता। एवं प्रत्यक्षे प्रथमाक्षसन्निपातक्षणभाविनि स्वरूपमात्र मवलम्ब्य विलीने प्यविद्या

मात्वव्यवस्थापनेन भ्रमस्येदंरजतमितिरूपत्वासिद्धेः । यद्वा लोके भ्रमत्वेन व्यवह्रियमाणेष्वित्यर्थः । प्रकाशः - व्यवहारयोग्यता । तयोः - प्रकाशव्यवहारयोः । (अन्यतरेति) अन्यतरमात्रग्राहीत्यर्थः । (क्षणिकस्येति) अक्षणिकत्वेऽपि विषयसम्बन्धस्या गन्तुकत्वायोगाच्चेति भावः । प्रथमविकल्पे द्वितीयकोटिं दूषयति (अन्यतरेति) ननु - प्रत्यक्षस्य सन्मात्रविषयत्वेऽप्यनुमानादिना शास्त्रस्य विरोधस्स्यादित्यत्राह (एवमिति) भेदे प्रामाण्याभावात् नतद्विरोधोदोषइतिभावः । पक्षव्याप्त्यादिग्रहणाभावे ऽनुमानस्या प्रवृत्तेः तद्ग्रहस्यच प्रत्यक्षमूलत्वे वाच्ये तस्य सन्मात्रविषयसमर्थनेन प्रत्यक्षस्य तद्विषयत्वाभावे सिद्धे प्रत्यक्षस्थलीयव्यवहाराय कल्पतभ्रममूलत्वमेव अनुमानादे र्वाच्यमिति नतेषां भेदे प्रामाण्यं, अतो नतद्विरोधोदोषइत्यर्थः । भेदस्यप्रत्यक्षविषयत्वाभावे हेत्वन्तरमाह (सिद्ध्यन्नपीति) ननुसन्निकर्षजन्यत्वाद्भेदज्ञानमपि प्रत्यक्षमेवेत्यत्राह (एवमिति) सन्निकृष्टसदारोपितत्वात् प्र

दशा तदनन्तरभाविनिर्विकल्पेऽपि सन्निकर्षात् प्रत्यक्षाभिमानमात्रं जायते, नतु साक्षा त्प्रत्यक्षता, इति भ्रान्तिमूलएव भेदव्यवहारइति ।

अत्रब्रमः— ॥ * ॥ भेदापह्नवलोभेन भेदं विधिनिषेधयोः ।

स्वयं समर्थयन् मूर्खः स्ववाग्वज्रेण खण्डितः ॥ * ॥

यदुक्तं-स्वरूपभेदयोर्युगपत्क्रमेणवा ग्रहणमिति, तत्र योग्येषु भेदेषुयुगपदेवेतिब्रमः । तदाह- "एकक्षणवर्तित्वेऽपि प्रत्यक्षज्ञानस्य तस्मिन्नेव क्षणेवस्तुभेदरूपतत्संस्थानगोत्वादे गृहीतत्वात् क्षणान्तरग्राह्यं नकिंचिदिहतिष्ठति" इति । स्वरूपवज्जातिगुणादेरपि तत्तदिन्द्रिययोग्यत्वाविशेषात् एकसामग्रीवेद्यत्वं निर्विकल्पकनिरूपणे प्रदर्शितं । नच जात्याद्यतिरिक्तं भेद मिच्छामः । त्वमपिहि घटोऽस्तीत्यादिषु घटत्वादिकमेवात्र भेदत्वेनोदाहरसि, घटत्वादेश्च स्वरूपेण गृह्यमाणस्य न प्रतियोगिज्ञानापेक्षा, आश्रयप्रकाशापेक्षायामपि सहोपलम्भादेव नैराकांक्ष्यं समर्थितं । प्रतियोगिनिरपेक्षस्य कथं भेदत्वमितिचेत् ? यदि तस्य भेदत्वंनास्तीतिमन्यसे, त

त्यक्षत्वभ्रमइत्यर्थः । (भेदेति) विधिनिषेधयोर्भेदाभावे निषेधात्मकतया भेदस्य प्रत्यक्षविषयत्वाभावसमर्थनायोगात् तदर्थं विधिनिषेधयो र्भेदसाधनं स्ववाग्व्याहतमित्यर्थः । (तदाहेति) स्वरूपग्रहणदशायामेव कथं गोत्वादेर्ग्रहः; गोत्वादे स्स्वरूपाद्भिन्नत्वात् , तथात्वे ऽतिप्रसंगादि त्याशंक्य एकसामग्रीत्वा द्युगपद्ग्रह इत्याह (स्वरूपवदिति) नन्वेवमपि भेदेकिमायात मित्यत्राह (नचजातीति) नहि त्वदनिच्छामात्रेण तत्सिद्धिरित्यत्राह(त्वमपीति)प्रतियोगिज्ञानसापेक्षस्य कथं सहोपलम्भइत्यत्राह(घटत्वादेरिति) प्रतियोगिज्ञानापेक्षाहि स्वकालीन तया पूर्वकालीनतयावा, स्वरूपेण ग्रहणदशायां नोभयथापीत्यर्थः । ननु - स्वरूपतो ग्रहणे प्याश्रयप्रकाशापेक्षास्त्येवेत्यत्राह (आश्रयेति) स्वकालेतदपेक्षाया आवश्यकत्वा त्रहेतुत्वेनापि तदपेक्षा, गौरवादित्युक्तमित्यर्थः । (प्रतियोगीति) प्रतियोगिज्ञाननिरपेक्षस्येत्यर्थः । किं कथं शब्दः क्षेपार्थः, अथप्रश्नार्थइत्यभिमेत्याद्यमाह (यदीति) तदएव - भेदत्वाभावादेव ।

र्हि ततएव आश्रयस्येव तद्गतघटत्वादेरपि ग्रहणे न कश्चिद्दोषः । तदापि नसन्मात्रग्राहकत्वसिद्धिः,सौहार्देनतुवदामः, जात्यादीनामेव स्वरूपेण गृह्यमाणानां न प्रतियोग्यपेक्षा, तेषामेवतु भेदत्वाख्येन स्वधर्मेण गृह्यमाणानां कदाचि त्प्रतियोग्यपेक्षेति सर्वेषां स्वप्रतीतिसाक्षिक मेतत् । भेदत्वज्ञानन्तरमेव भेदनिरूपणे शिक्षयिष्यामः । बाधाभावेच सेत्स्यति शुक्तिकारजतादिवत् । बाध्याबाध्यांशनिष्ठा. वार्तापि निरस्ता ।

यच्चोक्तं प्रत्यक्षस्य भेदग्राहित्वाभावात्तन्मूलाना मन्येषा मपिप्रमाणानां न भेदसमर्थनसामर्थ्यमिति; तत्र किं तेषां कस्यचिदप्यग्राहकत्वं विवक्षितं; उताभेदग्राहित्वं,यद्वा भेदग्राहित्वेपि तत्र प्रामाण्यंनास्तीति । नाद्यद्वीतियौ, प्रतीतिबाधापसिद्धांतादिदोषप्रसंगात् । नतृतीयः, भेदबाधकानां निरसिष्यमाणत्वात् ।

प्रतियोगिसापेक्षत्वशंकाया अप्यभावादित्यर्थः । (फलितमाह) (तदापीति) भेदत्वपक्षइव भेदत्वाभावपक्षेपीत्यर्थः । प्रश्नार्थत्वमाह (सौहार्देनत्विति) (सर्वेषामिति) भेदस्य भेदत्वेन ज्ञाने प्रतियोग्यपेक्षा, आकारान्तरेणतु ज्ञाने नतथेत्येतावन्मात्रे संप्रतिपत्तिरुच्यते, अतिरिक्ताभाववादिभिरपि प्रमेयत्वादिरूपेण ज्ञाने प्रतियोगिज्ञानापेक्षानेष्यतइत्यर्थः । उपसंहरति (बाधाभावेचेति) उक्तप्रकारेण बाधाभावे सिद्धेसति बाध्याबाध्यांश विवेकःक्रियत इतिकथापिनिरस्तेत्यर्थः । (तन्मूलानामिति) तदनन्तरभाविनामित्यर्थः । (उताभेदेति) अभेदमात्रग्राहित्वमित्यर्थः । आदिशब्देन - व्यवहारानुपपत्तिग्रहणम् । किंभेदस्य बाधितत्वा दनुमानादीनां तत्रप्रामाण्याभावः ? उत प्रत्यक्षविषये सन्मात्रएव तत्त्वावेदकत्वात्, स्वविषयभूतेपि भेदे तत्त्वावेदकत्वाभावात् ? यद्वासन्मात्रविषयप्रत्यक्षसहचरितभ्रान्तिमूलत्वाद्वा ? आद्येदोषमाह (भेदबाधकानामिति) द्वितीयंशंकते (यदिचेति) किंच स्वातन्त्र्येण तत्वावेदकत्वंहि प्रामाण्यं, तच्चस्वासाधारणविषयभेदएव वाच्यं; सन्मात्रे प्रत्यक्षचर्विते स्वातन्त्र्याभावात्, भेदेपि तत्त्वावेदकत्वाभावंवदता त्वया

यदिचप्रत्यक्षचर्वितचर्वणेन तदर्थेऽप्रामाण्यमनुमानादेः,तदातींद्रियस्यक स्यचिदपि कुतश्चित्सिद्धिर्नस्यात् । यदिच स्वविषयभेदे अनुमानादीनांप्रामा ण्यंनांगीकृतं;कुत्र तर्हि तेषां तत्स्यात् । नकुत्रचिदितिचेत्, तर्हि प्रत्यक्षैकप्र माणत्वादिचार्वाकः प्रत्यक्षाप्राप्तविषय प्रमाणान्तरप्रदर्शनेन किं त्वयाप्रतिक्षि प्यते । धर्माधर्मपरतत्वादिगोचर वेदप्रामाण्य प्रत्याशयेतिचेत् ? चार्वाकवदेव वस्तुत स्तत्र तत्प्रामाण्यमनिच्छतस्ते किमनयास्वैराचारसुखोपरोधिन्या दुरा-शया । प्रत्यक्षस्य भेदग्राहित्वाभावे लिंगलिङ्ग्यादिभेदोविकल्पसिद्धइति तन्मू लाना मनुमानादीना मप्रामाण्यमितिचेत्, तर्ह्यनुमानादिकं प्रमाणमेव नभव-तीति चार्वाकवद्ब्रूहि, नपुनर्भेदे नप्रमाणमिति । किंच—प्रत्यक्षमूलस्यापि

उक्तरूपं प्रामाण्यं नांगीकृतमिति, कुत्रापि तेषा मुक्तरूपं प्रामाण्यंन स्यादित्यर्थः । (प्रत्यक्षेति) स्वातन्त्र्येण तत्त्वावेदकत्वप्रदर्शनेन किम-र्थं प्रतिक्षिप्यते, स्वविषये तत्त्वावेदकत्वलक्षण प्रामाण्याभावादित्यर्थः । ननु – तत्त्वावेदकत्वप्रामाण्यसिद्ध्यर्थं नप्रतिक्षिप्यते , किंतु धर्माधर्मा दौ स्वातन्त्र्येण शुक्तिरजतादि भ्रम व्यावृत्त विद्यमानार्थ वि षयत्वरूप प्रामाण्यस्य स्वीकारात , तत्सिध्यर्थ मेवे त्याशंकते (धर्मे ति) (चार्वाकवदिति) यद्यपि व्यावहारिकं प्रामाण्यं त्वयेष्यत इति वैषम्यं, तथापि न तदंगीकारेण प्रयोजनं किंचिदस्ति, प्रामाण्यस्य मिथ्या त्वात् , नच मिथ्यात्वस्य व्यावहारिकत्वा त्तद्घटकेनापि व्यावहारिकेण भवितव्यमिति वाच्यम् । भ्रमे शुक्तिरजत विषयत्वस्य व्यावहारि-कत्वेऽपि तद्घटकस्य शुक्तिरजतस्य व्यावहारिकत्वा दर्शनात् । तस्मात् ॥ * ॥ बौद्धागमेन तुल्या स्वाम्नानता त्वन्मते श्रुतेः । अर्थाभावे प्यतो नाशा प्रामाण्ये युज्यते तव ॥ * ॥ अतः स्वैरसंचार विरोधेन स्वपरपीडैव तत्फलमिति । तृतीयं शंकते (प्रत्यक्षस्येति) भेदग्राहित्वा भावे लि-ङ्गेसतीत्यर्थः । (नपुनरिति) ननु – भेदएव प्रसक्तत्वा त्तत्रनिषेधः सामान्यनिषेधएवच तात्पर्यमितिचेत् , तर्हि चार्वाकनिरासानुपपत्तिः, व्या वहारिक प्रामाण्यांगिकारा त्तन्निरासश्चदूषितः ॥ प्रत्यक्षस्य भेदावगा-हित्वा भावाच्च तन्मूलानामपि तत्र प्रामाण्य मित्यत्रैव दोषान्तरमाह (किंचेति) त्वदेकदेशिना प्रत्यक्षविरुद्धार्थे शास्त्रस्य प्रामाण्यांगीकारा

शास्त्रस्य प्रत्यक्षविरुद्धार्थेपि प्रामाण्यं सम्भवतीति मन्यमानस्य तत्रानुमानादेरपि तथात्वे कोविरोधः । यच्चाभावरूपस्य भेदस्या भावप्रमाणवेद्यत्वा न्न प्रत्यक्षवेद्यत्वं सम्भवतीति; तदभावाख्यं प्रमाणांतरं प्रमेयान्तरंचा नभ्युपगच्छतां गोष्ठीषु नावतिष्ठते । भवतुवा षष्ठं प्रमाणं, तथापि तत्रैव भेदग्राहकतयाभ्युपगते क्रमयौगपद्यविकल्पानुपपत्ति स्तदवस्था । प्रत्यक्षेणा धिकरणग्रहणे संस्कारोन्मेषाच्च प्रतियोगिस्मरणेसति क्षणिकेनाप्यभावजन्यज्ञानेन भेदग्रहण मुपपद्यत इतिचेत; हन्त तर्हि पूर्वप्रत्यक्षेणाधिकरणग्रहणे तथैव प्रतियोगिस्मरणेच सति क्षणिकेनापि प्रत्यक्षान्तरेण भेदग्रहणे कानुपपत्तिः । पूर्वोत्तरप्रत्यक्षयोः परस्परवार्तानभिज्ञतया वैशिष्ट्यन्नसिद्ध्येदितिचेत्, हंत किं प्रत्यक्षस्या भावप्रमाणस्यच परस्परवार्ताभिज्ञता शिक्षिताभवता ? येन तत्र वैशिष्ट्यं बोद्धव्यमितिमन्यसे । प्रथमोदितप्रत्यक्षसंस्कारा द्विशिष्टज्ञानोदय स्तत्रेतिचेत, किं प्रत्यक्षांतरे तथा निर्वाहो राजशासनवा-

---

दनुमानादे स्तथात्वे कोविरोधः, इह तथा विरोधो ऽपि नास्ति, किन्तु तद्गोचराविषयत्वमात्र मित्यर्थः । (तत्रेति) स्वैकदेशिना ऽभेदोपचारः, असत्प्रत्यक्षशास्त्रयो र्विरोधवादित्वात । यद्वा विरुद्धपदं विषयपरं, प्रत्यक्षस्य सन्मात्रविषयत्वे ऽपि यथान्वयव्यतिरेकाभ्यां तन्मूलस्य शास्त्रस्य प्रपंचमिथ्यात्वे ऽपि प्रामाण्यमिष्यते, तथानुमानादेरन्वयव्यतिरेकाभ्यां प्रत्यक्षमूलस्यापि भेदेप्रामाण्य मिष्यतामित्यर्थः । एवं यदि प्रत्यक्षान्वयव्यतिरेकानुविधायित्वस्य तद्गोचराविषयत्वे प्रयोजकत्वं मन्येत तदा दोष उक्तइति ध्येयम् । (क्रमयौगपद्येति) प्रतियोग्यधिकरणेन विना अभावग्रहणस्या सम्भवादिति भावः । (परस्पर वार्तानभिज्ञतयेति) अधिकरणग्राहिप्रत्यक्षस्य उत्तरप्रत्यक्षविषय भेदविषयत्वाभावात भेदग्राहि प्रत्यक्षस्य पूर्वप्रत्यक्ष विषयीभूताधिकरण विषयत्वाभावात्, भेदाधिकरणयो र्वैशिष्ट्यं नकेनापि प्रमाणेन सिध्येदित्यर्थः । (प्रथमोदितेति) प्रथमोत्पन्न प्रत्यक्षसंस्कार

रितः । अतएव प्रत्यक्षाभासेन विकल्पेन भेदग्रहण मित्येतदपि दत्तो त्तरं । एवं प्रत्यक्षस्य भेदग्राहित्वासम्भवे तुल्यन्यायतया षष्ठप्रमाणस्य प्रत्यक्षाभासस्यच भेदग्राहित्वासम्भवं सिद्धं कृत्वा " अपिचे " त्यादिना प्रतीतिविरोधादिक मुदाजहार भाष्यकारः, तद्व्याकुर्मः; यदिसन्मात्रं प्रत्यक्षग्राह्यं नभेदः तदा तुल्यन्यायतया षष्ठप्रमाणप्रत्यक्षाभासादेरपि भेदग्राहित्वासम्भवात् घटोऽस्ति पटो स्तीति विशिष्टविषयाप्रतीति र्विरुध्येत, अश्वार्थिनश्च महिषदर्शने निवृत्तिर्नस्यात , भेद ग्रहणासम्भवस्य त्वयोक्तत्वात् ; सदितिग्रहणस्य चाश्वादिसर्वसाधारणस्य निवर्तकत्वायोगात् । सर्वेषां प्रत्यक्षज्ञानानां सन्मात्रविषयत्वे तत्तत्प्रतिपत्तिविषयप्रतिनियतानां सर्वेषां शब्दानां स्मृतिप्रसंगः, ततश्च तत्प्रयोगोपि यथा विवक्षमेवेति सर्वेषां शब्दानां पर्यायत्वप्रसंगः । सर्वेषांच प्रत्यक्षज्ञानानां पूर्वपूर्वगृहीतमात्रग्राहितया स्मृतिवैलक्षण्यन्नस्यात्,

---

सहकारा त्तद्विशिष्टज्ञानं युगपदेवाभावप्रमाणेन भेदाधिकरण विषयकं जायतइत्यर्थः । संस्कारस्य सहकारित्ववर्णनं ज्ञानस्य क्षणिकत्वात्, प्रतियोगिस्मरणकाले विनष्टत्वाभिप्रायेणेति ध्येयम् । इदंच क्वाचित्काभिप्रायेण, प्रतियोगि स्मरणानन्तरमपि क्वचिदधिकरण ग्रहात् (दत्तोत्तरमिति) क्रमयौगपद्य विकल्पानुपपत्ते रेवेत्यर्थः । ननुभाष्ये सन्मात्रग्राहित्वे घटोऽस्ति पटोऽस्तीति विशिष्टविषया प्रतिपत्ति र्विरुध्यत इत्याद्युक्तं, तदयुक्तं-विशिष्टविषय विकल्पांगीकारेण प्रतीति विरोधाद्यभावादिति शंकायां भाष्यं व्याकुर्वन् दूषणान्तराण्याह' एवं प्रत्यक्षस्ये' त्यादि (सर्वेषामिति) वस्तुतः तत्तदर्थ नियतानामपि शब्दानां त्वदुक्तन्यायेन विशिष्टप्रतीते रसम्भवात्, सन्मात्रएव व्युत्पत्ते र्ग्राह्यतया सर्वेषां शब्दानां सर्वत्रस्मरणंस्यात । ततश्च तत्प्रयोगो प्यर्थविशेषप्रतीति नियतोनस्यात, किन्तु यथा विवक्षमेवेत्यर्थः । (सर्वेषांचेति) अनुमित्या द्यतिरिक्तत्वेसति गृहीतमात्र ग्राहित्वं स्मृतित्व प्रयोजकमितिभावः । प्रत्यक्ष पदमाहिम्नाचा नुमित्याद्यतिरिक्तत्वं ल-

नच- तदिष्यते; सर्वेन्द्रियजन्यज्ञानाना मेकविषयत्वे ऽभ्युपगते रूपश ब्दाद्यग्रहण निबन्धनान्धबधिरादिभेद स्तत्प्रतिनियत विषयबोध जन कत्वहेतुकेन्द्रियभेदक्लृप्तिश्च नस्यात् ।

यत्तु– शास्त्रस्य प्रत्यक्षविरोधपरिहाराय तयो रेकविषयत्वं सा- धितं; तदपि शास्त्रस्य प्रतिपन्नविषयानुवादकत्वापादकं । ब्रह्मणश्च प्र त्यक्षवेद्यत्वं शास्त्रयोन्यधिकरणार्थविरुद्धं, "नसन्दृशेतिष्ठतिरूपमस्य न चक्षुषापश्यति कश्चनैनं", "नचक्षुषागृह्यते नापिवाचा", "मनसातुविशु- द्धेन", "नमांसचक्षुरभिवीक्षतेतं","नमांसचक्षुषाद्रष्टुं ब्रह्मभूतः सशक्यत" इत्यादि श्रुतिस्मृतिविरुद्धंच । किंच- प्रत्यक्षजन्यक्षणिकज्ञानेन सन्मा त्रस्य ग्रहण मुपपादयता ब्रह्मणएव दृश्यत्वमुक्तंस्यात्, ततश्च तत्प्र युक्ततया त्वदभिमतानि जडत्व नाशित्व मिथ्यात्वादीनि दुर्निवाराणि । अतो जात्यादिलक्षण भेदविशिष्ट ब्रह्मव्यतिरिक्त घटादिसद्विशेषविष- यमेव अस्मदादिप्रत्यक्षं, योगिप्रत्यक्षमपि तत्तद्गुणादिविशिष्टब्रह्मविषय मित्युक्तं । अपिच–सच्छब्दार्थः स्वरूपं घटादिशब्दार्थस्तु भेद इ- तिकेनावधृतं त्वया, घटपटादिषु सदनुवृत्ते स्सतिघटादेश्चमिथोव्यावृत्ते रितिचेत् ; घटादे स्सदनुवृत्ते स्सत्त्वस्यचासतोघटाद्व्यावृत्ते विंपरीतं किंनस्यात् । असतोऽपि किं घटत्व मितिचेत् मैवं; नहि सन्घटादिरि ति युष्माभिरेववर्णनात् । यदाच घटोस्ति पटोस्तीति सदनुवृत्त्या

भ्यते । नच सिद्धान्ते धारावाहिकज्ञाने द्वितीयादिषु स्मृतित्वप्रसंगः, तत्तत्कालविषयत्वेन गृहीतमात्र ग्राहित्वाभावात् (इन्द्रियभेदेति) अने- नविषयभेदाभावे ऽपि करणभेदस्य सत्त्वा च्चक्षुराद्यभावनिबन्धनोऽन्ध त्वादिव्यपदेश इति निरस्तं । एवं सन्मात्रग्राहित्वे दूषणमभिधाय तत्फ ले शास्त्रप्रत्यक्षैकरस्ये दूषणमाह (यत्त्विति) (स्वरूपमिति) अधि करण स्वरूपमित्यर्थः । (केनावधृतमिति) सच्छब्दार्थ एवभेदः, घट-

संत स्वरूपत्व मिष्यते, तदा घटोनास्ति पटोनास्तीत्यसदनुवृत्त्या तस्यापि स्वरूपत्वं किन्नेष्यते । सतितद्व्यावृत्तेरितिचेत्; असति सतोपि, व्यावृत्ते स्तस्यापि तन्नेष्यताम् । अतो घटत्वादिवत्सत्वमसत्वञ्च तत्तद्वस्तूनां धर्मएव । स्वरूपन्तु घटादीनां घटत्वादेः सत्वादे श्चाश्रयतया परस्परासंकीर्णं प्रत्यक्षेण गृह्यते । अत स्सच्छब्दार्थः स्वरूपंचेद्घटशब्दार्थो पि स्वरूपमेव । घटत्वादे र्धर्मतया निष्कर्षे सत्त्वादेरपि तथेति नस्वरूपत्वं । अतो यत्स्वरूपं घटादीनां प्रत्यक्षग्राह्यं तत्परस्परं व्यावृत्तं सत्ता घटत्वाद्यनन्त विशेषविशिष्टंचेति न तस्य निर्विशेषैकस्वरूपता । अनुवर्त्तमानं चैकं सत्वं घटादिधर्मभूतमिति नतस्यापि सर्वधर्मिभूतब्रह्मता । यश्च प्रतिवस्तुनियतं प्रामाणिकत्वादिकमेव सत्व मिच्छति तस्य पुरतः सत्व मेक मित्यपि दुस्साधम् । अतः प्रत्यक्षस्य सर्वस्य नैकविषयत्वं, नतरां निर्विशेषविषयत्वं, नतमां ब्रह्मविषयत्वमिति सिद्धे प्रत्यक्षमूलानां प्रमाणान्तराणामपि प्रत्यक्षागोचरविशिष्टविषयत्वे न कश्चिद्दोषः, प्रत्युत-निर्विशेषविषयत्व एव प्रत्यक्षादिबाध इति सिद्धम् ।

इतिश्री कवितार्किक सिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां सन्मात्रग्राहिप्रत्यक्षभंगवादो द्वादशः ।

शब्दार्थः स्वरूपमित्यपि वक्तुं शक्यं, विनिगमकाभावादित्यर्थः । किं तर्हि तत्त्वमित्याकांक्षायामाह (अतोघटत्वादिवदिति)

इति श्री वाधूलकुलतिलक श्रीनिवासाचार्य पादसेवासमधिगत परावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरण परिचरण परायणेन तत्प्रसादलब्ध महाचार्या परनामधेयेन रामानुजदासेन विरचितायां शतदूषणी व्याख्यायां चण्डमारुताख्यायां सन्मात्रग्राहि प्रत्यक्षभङ्गो नाम द्वादशस्कन्धः ।

अथ त्रयोदशस्कन्धः ॥

श्रीमल्लक्ष्मण योगीन्द्र सिद्धान्तेष्वासनिर्गतः ।
भेदं विभित्सतां चित्तं भिन्तेतर्कात्मकश्शरः ॥

यदेतत् स्वमर्मघट्टनं - भेदस्स्वरूपं धर्मोवा ? नतावत् स्वरूपं, शुक्तिरजतादिभ्रमानुत्पत्ति प्रसंगात्, इद मित्यधिष्टानतयाहि शुक्तिस्वरूपमवगम्यते, अन्यथा निरधिष्ठानभ्रमप्रसंगात्, अवगते शुक्तिस्वरूपे तस्यैव रजताद्भिदत्वेन कथं शुक्तिरजतयोर्भेदाग्रहः, कथंतरांच तन्मूल श्शुक्तौ रजताध्यासः, कथंतमांच तदधीनाः कलधौताभिलाषिणः करतलप्रसारण ग्रहण चेलांचलनिबन्धन तद्रक्षणप्रभृतयः, कथंचा ध्यासाभावे नेदंरजत मितिबाधः । किंच नेदं रजत मिति व्यवहारहेतु र्भेदग्रहः पूर्व मस्तिवा नवा? अस्ति चे त्प्रथममेव तथा व्यवहारस्स्यात्; नचे द्भेदस्या ग्रहे स्वरूपस्या

(श्रीमल्लक्ष्मणेति) अनेनपद्येन भावान्तराभाव पक्षएव भेददूषणोद्धार स्संभवति, पक्षान्तरेतु परोक्ता नवस्थादिदोषा भवंत्येवेति सूच्यते । परस्मैपदात्मनेपदाभ्यां पूर्वपक्षसिद्धान्तन्यायफलयोः परगतत्वं कर्तृगामित्वंचप्रतीयेते, पूर्वपक्षन्यायफलस्य परगतत्वंच तेनैवन्यायेन जीवब्रह्माभेदखण्डनस्य सिद्धान्त्यभिमतस्यासिद्धेः । (यच्चैतदिति) एतदित्यनेन दिगित्येतदन्तं परामृश्यते । मर्मघट्टनं – मर्मवेधनं, स्वव्याघातक वचनमिति यावत् । व्याघातश्च-भेदाभावे तदुक्तविकल्पानुत्थानात्, स्वोक्तन्यायेनैव जीवब्रह्मा भेदखण्डन सिद्धेश्च (शुक्ति रजतेति) भेदे भासमाने अध्यस्ताभेद प्रतीत्यसंभवादितिभावः । [निवृत्तिः-अभावः । आदिशब्देन वक्ष्यमाण करतलप्रसारणादि गृह्यते ।] अस्तु स्वरूपग्रहः, तथापि कथं भ्रमासंभवइत्यत्राह (अवगतइति) (कथंचेति) अध्यासाभावे प्रतिपन्नोपाधौ निषेधरूपो बाधोनस्यादिति भावः (नचेदिति) भ्रमात्प्रा क्स्वरूप ग्रहाभावे तदानीमिदमिति व्यवहारो नस्यात्, अधिष्ठानसामान्यग्रहलक्षणकारणाभावेन भ्रमोपि न स्यादित्यर्थः ।

प्यग्रहा दिद मितिस्वरूपव्यवहार इदंरजत भित्यभ्यासश्च नस्यातां । यदिच घटस्वरूपमेव पटस्यभेदः , तदा घटोभेद इति पर्यायता प्रसज्येत; घटोभिन्नइतिव्यवहारे घटोघटविशिष्ट इत्युक्तंचस्यात् ; भिन्नशब्दस्य भेदविशिष्टवाचित्वात् , भेदस्यच घटस्वरूपत्वात् । यद्वा घटो भेद इत्येव व्यवहारस्स्यात् । यदिच घटाद्भेदः पटस्यस्वरूपं तदा कुड्ये पटस्वरूपत्वाभावात् कुड्यस्य घटाद्भेदाभावे घटकुड्यतादात्म्यं प्रसज्येत इति तेनैव क्रमेण सर्वस्य जगत स्तादात्म्ये स्वरूपभेदवादः सर्वाभेदएव पर्यवस्यतीति जितमायुष्मता । अथैतद्दोषपरिहाराय घट व्यतिरिक्तानां तत्तद्वस्तूनां तानितानि स्वरूपाणि प्रत्येकं घटाद्भेद इति मन्वीथाः , तदा घटव्यतिरिक्तेष्वखिलेषु वस्तुषु परस्परव्यावृत्तेषु घटाद्भिन्न इत्यनुवृत्तव्यवहारस्या नुवृत्तोपाध्यभावा न्निर्विषयव्यवहारायोगाच्च परस्परस्वरूपाण्येव परस्परानुवृत्तानीति पुनरपि तदेव सर्वतादात्म्यं प्रसज्येत । किंच घटादीनां स्वरूपाणि सप्रतियोगिकानि निष्प्रतियोगिकानिवा ? पूर्वत्र प्रतियोगि स्मृत्यभावे घटः पट इत्यादिव्यवहारोनस्यात् । उत्तरत्र सप्रतियोगिकभेदरूपत्वं व्याहन्येत ।

दूषणान्तरमाह (घटोभिन्नइति) घटस्वरूपस्यैव भेदत्वे भिन्न इति व्यवहारस्य घटविशिष्टविषयत्वं वा स्यात् , भिन्न इति व्यवहारोवा नस्यादिति भावः (यदित्वेति) यदि पटस्वरूपमेव घटाद्भेदः तदा कुड्यादेः पटान्यस्य सर्वस्य पटस्वरूपत्वाभात घटाभेद स्स्यात् एवं घटस्वरूपस्यैव पटभेदत्वात् कुड्यादीनां पटभेदोपि वक्तव्यः, घटपटयो रुभयोरपि तदितरतादात्म्यात परस्परतादात्म्यं वक्तव्यमिति सर्वतादात्म्यं प्रसज्येतेति भावः (घटव्यतिरिक्तेष्विति) सर्वव्यक्तीनां घटभेदत्वे घटभेदइत्यनुगत व्यवहार नियामकस्यानुगतस्य भेदत्वाख्यधर्मस्य असम्भवात स्वरूपेणैव तेषामनुवृत्तिर्वाच्येति सर्वतादात्म्यं प्रसज्येतेत्यर्थः । (नचेदिति) किं धर्मधर्मिणोरैक्याद्धर्मधर्मिभेदो नास्तीत्युच्यते, किंवान्यतरपरिशेषात्, तत्राद्ये स्वरू-

अथ धर्मोभेदः तदा धर्मधर्मिणो र्भेदोऽस्ति नवा ? नचे द्धर्मधर्मिणो रभेदाद्धर्मस्यैवाभावेन धर्मभेदाभावात् पुनरपि सर्वतादात्म्यंप्रसज्येत । यद्वा धर्मिण एवाभावात् कस्य भेदोवर्णनीयः । अथ धर्मधर्मिणो र्भेदोऽभ्युपगम्यते, तत्रापिभेदः स्वरूपं धर्मोवेति विकल्पे स्वरूप-पक्षस्य दूषितत्वात् धर्मपक्षएव परिशिष्यते, ततश्च तस्यापि धर्मभे दापेक्षयानवस्थास्यात्, एवंच स्वरूपधर्मयो रन्यतरकोटिवहिर्भावभावात् अन्योन्याभावपृथक्त्वविशेषाणामपि भेदत्व पलायितमिति । किंच ध र्मधर्मिणो राश्रयप्रतियोगिनोश्च भेदग्रह स्तदाकारग्रहण मन्तरेण स्व-रूपेण गृह्यमाणयो र्नसम्भवति, धर्मधर्मित्वादि तत्तदाकारग्रहश्च त-

---

पपक्षोक्तदोषः। द्वितीये धर्मिपरिशेषोवा धर्मपरिशेषोवेति विकल्पम-भिप्रेत्य दूषयति (धर्मधर्मिणोरिति) (अभेदादिति) भेदाभावादित्यर्थः। (धर्मभेदाभावादिति) धर्मभूतभेदस्याभावादित्यर्थः । द्वितीयंदूषयति (यद्वेति) (किंचधर्मधर्मिणोरिति) भेदतद्धर्मिणोरित्यर्थः। आश्रय प्रतियोगिनोः-भेदाश्रयप्रतियोगिनोः। धर्मत्वधर्मित्वरूपेणहि भेदतद्धर्मि-णोर्ग्रहणम्, धर्मत्वधर्मित्वग्रहश्च भेदग्रहेसत्येवेत्यन्योन्याश्रयः । एवं-धर्मितया प्रतियोगितयाच भेदधर्मिप्रतियोगिनो ग्रहण एव भेदग्रहणं भेदग्रहणे सत्येवच धर्मित्वप्रतियोगित्वग्रहणं, ऐक्यग्रहे तदसम्भवादि-त्यर्थः। किंच देशकालव्यवहितवद्भेदस्य स्वरूपतः प्रत्यक्षायोग्य-त्वात् न तत्प्रत्यक्षं संभवति, तथाहि - किं प्रत्यक्षं विधिव्यापारं उतव्यवच्छेदव्यापारं उतोभयव्यापारमिति। आद्ये वस्तुस्वरूपविधिमा त्रोपक्षया नान्यव्यावृत्तिरूप भेदमुद्भावयितु मुत्सहते प्रत्यक्षम्। नापि-द्वितीयः, विधिमन्तरेण व्यवच्छेदासिद्धेः । लब्धरूप एव लब्ध-रूपस्य निषेधात् । तृतीये किं विधिपूर्वको व्यवच्छेदः, उत व्य-वच्छेदपूर्वको विधिरिति, अथवा युगपदुभयमिति। आद्येऽनवच्छि-न्नवस्तुस्वरूपविधिना विरोधादनन्तरं व्यवच्छेदासम्भवः । द्वितीये विधिपूर्वकत्वाद्व्यवच्छेदस्य तदभावे सुतरामसम्भवः । नापि

यो र्भेदग्रहेसतीति परस्पराश्रयणं, वस्त्वन्तरसिद्धा वेकविधि रन्यव्यत्र च्छेदः व्यवच्छेदसिद्धौ वस्त्वन्तरसिद्धिरितिच । नच भेदग्रहण मन्त रेणापि स्वरूपेण गृह्यमाणयो र्धर्मित्वादिग्रहइतिवाच्यम् । भेदग्रहाभावेहि गृह्यमाणयोरेकत्वग्रहे पर्यवसानंस्यात् , अनेकत्वाग्रहेवा, उभयथापि ध र्मत्वधर्मित्वलक्षणवैलक्षण्यं कथंचिदपि नसम्भवति । कथंतर्हि सार्वलौकि को ऽयं भेदग्रहः ; अविद्यामाहात्म्यादितिभ्रमः । नचाविद्यामूलेपि भे दग्रहे - विचाराः प्रागुक्ताः प्रक्रमन्ते, अविचारितरमणीयतैकवेषत्वा त् । नचैतावता परमार्थत्वसिद्धिः, वस्तुतो विचारासहत्वात् । नच वाच्यम् प्रमाणप्रमेय तदुपकरण तदवान्तरभेदकथक सिद्धान्तसाध

तृतीयः, विधिनिमित्तत्वाद्व्यवच्छेदस्य , नहि हेतुहेतुमतो र्युगपत्स- मुद्भवः । तथाच विधिरेव व्यवच्छेद इति परिशिष्यते , तत्रापि यद्वस्तु विधीयते तदपेक्षयैव व्यवच्छेदो विधि रित्ययुक्तम्, प्रती- तिविरोधात् । शब्दार्थविरोधाच्च । अत एकविधि र्वस्त्वन्तरापेक्ष या व्यवच्छेद इति परिशिष्यते । एवंस्थिते दोषमाह (वस्त्वन्त रेति) एकविधिरेव अन्यव्यवच्छेदक इति वदता वक्तव्यम् - घट इत्याकारको विधिः पटादे र्व्यवच्छेदः न घटादे रितिकुतः , पटस्य तदन्यत्वादितिचेत् ? तर्हि पटस्यान्यत्वे सिद्धे घट इत्याकारस्य वि- धे स्तद्व्यवच्छेदतासिद्धिः, पटव्यवच्छेदतासिद्धौच घटा त्पटस्य व- स्त्वन्तरतासिद्धि रित्यन्योन्याश्रयतेत्यर्थः । इतिचेत्यनन्तरं परस्पराश्र यणमित्यनुषंगः (अविद्यामाहात्म्यादिति) प्रत्यक्ष मुक्तदोषै र्भेदविषय त्वासम्भवा त्सन्मात्रविषयं, अविद्यामाहात्म्यात् सकलदोषमवधीर्यापि भे दभ्रम उत्पद्यत इत्यर्थः । इन्द्रियान्वयव्यतिरेकौतु अधिष्ठानभूतस- न्मात्रग्रहोपक्षीणावितिभावः । (वस्तुतइति) आपाततो विचारसहत्वे न प्रतीतिमात्रमित्यर्थः । तदुपकरणं- तर्कादि । तदवान्तरभेदः-प्र- माण प्रमेयतदुपकरणावान्तरभेदः । भेदव्यवस्थेति द्वन्द्वः । इदमेव प्रमाणं प्रयोक्तव्यम्, इयमेव कथा प्रवर्तनीया एत एव निग्रहा उद्भावनीया

नदूषणादि भेदव्यवस्थाभंगात् स्ववचनविरोध स्वसाध्यभंगादिरिति, साध्यत्वाभिमत विश्वानुप्रविष्ट स्ववचनस्वसाध्यादिभंगेपि स्वाभिमता द्वैत सिद्धेरवर्जनीयत्वात् । किंचासिद्ध भेदेन केनचि द्भेदसाधन मशक्यं, अन्यथात्वनवस्थैवेत्येषा दिक् ।

इत्यादिसमयबन्धो व्यवस्था(स्ववचनेति) प्रमाणादिभेदवचनस्य भेदो नास्तीति वचनेन विरोधप्रसंगः। स्वसाध्यं–भावरूपाज्ञानादि। भेदसाधकत्वाभिमत प्रमाणस्य भेददूषका द्भेदःसिद्धो नवेति विकल्प्य द्वितीये दोषमाह (असिद्धभेदेनेति) आद्य आह (अन्यथेति) भेददूषका द्भिन्नतया सिद्धंहि भेदं साधयेत्, दूषकाद्भिन्नतयाच येन सिद्धिस्तत्राप्येवं विकल्पसम्भवादिति भावः। 'एषादिगि'त्यनेनेदमपि सूचितं, यदाहनवीनः – किमन्योन्याभावो भेदः, उतवैलक्षण्यं, अथवा – स्वरूपं। नाद्यः, तत्प्रतियोगिधर्मिज्ञानानामसम्भवात् । तत्र न तावद्घटः प्रतियोगी घटात्यन्ताभाव घटान्योन्याभावयो रभेदप्रसङ्गात्। सम्बन्धिनिरूप्य स्वभावानां समानकालीनानां संयोगादीनां सम्बन्धिभेदेनैव भेददर्शनात्। किञ्च भेदोह्यभेदविरोधी, तस्माद्भेदोऽभेदस्यैवाभावः स्यात्, न घटस्य। नच घटादेरेव अभेदः, घटाधिकरणे घटभेदाभावप्रसङ्गात । नापि तादात्म्यं प्रतियोगि, तद्घटस्वरूपंवा, घटत्वंवा अभेदोवा, अखण्डधर्मोवा। नाद्यः, परमते . घटेऽपि तद्भेदप्रसंगात् । भेदस्य प्रतियोगिसामानाधिकरण्यानुपपत्तेश्च। नद्वितीयः, तद्भिन्नस्य तादात्म्यत्वानुपपत्तेः । घटत्वस्य स्वाभावानधिकरणतया घटत्वे घटभेदानुपपत्तेश्च । अभावस्येव भावस्यापि विरुद्धत्वेन स्वाभावानधिकरणत्वात । नच विरुद्धयोरैकाधिकरण्यमेव विरुद्धं, नत्वाधाराधेयत्वमिति वाच्यम् । अभावे तदभावस्यापि क्लृप्तत्वात। किंच अभावाधिकरणत्वयोग्यभूतलस्य घटाधारतादशायां तदभावानाधारत्वं तदधिकरणत्वायोग्यघटाधारत्व प्रयुक्तमेव। एवं घटत्वमिह नास्ति अयंघटो नेति प्रतीत्योर्वैलक्षण्यानुपपत्तेश्च, भेदस्य घटप्रतियोगिकत्वानुपपत्तेश्च, अन्यप्रतियोगिकस्याभावस्य अन्यप्रतियोगिकत्वानुपपत्तेश्च ।

किंच यो यस्य यदभेदविरोधीसतस्य तस्माद्भेदः ; तथाच घटधर्मि. कपटाभेदविरोधीवटस्य पटाद्भेदः, सचाभेदो नवास्तव इति तर्कितो वाच्यः, तथाच यत्र यदभेदे तर्किते यस्यानुपपत्तिः प्रसज्यते, सतस्य तस्माद्भेदः, नच पटेधटत्वाभावः पटेघटतादात्म्यस्य तर्कितस्य विरोधी, वृक्षस्याम्रत्वाभावप्रसंगात् । नतृतीयः – अभेदतादात्म्ययो रन्योन्यज्ञानाधीनज्ञानतया न्योन्याश्रयात् । न-चतुर्थः – शाब्दघटज्ञानाद्भेदज्ञानाभावप्रसंगात्, तादात्म्यस्य श-ब्दादनुपस्थितेः, जात्यतिरिक्ताखण्ड तादात्म्याभ्युपगमेतेनैव सर्वव्यवहा-रोपपत्तौ जातिविलोपप्रसंगाच्च । तादृशाखण्ड तादात्म्यप्रतियोगिकाभा-वस्य घटाद्यप्रतियोगितया तद्भेदत्वानुपपत्तेश्च । नह्यन्याभावोऽन्य प्रतियोगिकः । एवं धर्म्यपि दुर्निरूपः, तथाहि–यत्र प्रतीयते भेदस्तदेवास्या-स्पदं यदि । अप्रतीतौ सुषुप्त्यादौ विश्वमेकं भवेत्तदा ॥ यदा कदाचिद्धिषणा तस्य स्थाननियामिका । इतिचेत् ? पुरुषेऽपि स्यात्त-द्भेदस्तत्प्रतीतितः ॥ यत्र प्रतीयते भेदस्तदेवास्यास्पदं मतम् । इति चेन्नूनमायातो दुष्टात्मान्योन्यसंश्रयः ॥ यत्र यस्यास्ति सत्ता तज्ज्ञानं तत्रभवे त्प्रमा । प्रमाधीनार्थसत्तायां नान्योन्याश्रयता कथं ॥ अपि-च यत्रास्ति तत्रास्तीत्युक्तंस्यात्, क्वास्तीति प्रश्ने किमुत्तरम्, तथाचा-त्माश्रयः । किंच घटेऽपि घटभेदज्ञानं प्रमैव स्यात्, अबाधात् । न-हि घटस्य तस्य वा स्वरूपं कश्चि द्बाधते । ननु तादात्म्यभेदज्ञानयो र्द्वयोरपि कथमबाधितत्वमितिचेत्, एवंसति बाधएवाप्रमा, अवि-निगमोवा । ननु पटे घटभेदसम्बन्धस्या बाधात्तत्रतद्धीः – प्रमा, घटेतु सम्बन्धस्य वाधादप्रमेतिचेन्न । पटेपि सम्ब-न्धान्तरा भावात् । पट स्वरूपमेव सबन्धो न घटस्वरूपं, अतोनाविगमइति चेत्, तर्हि कुड्यादौ घट भेदो न स्यात्, तत्रापि कुड्यादिस्वरूपमेव सबन्धोऽस्तीतिचेत् ; तर्हि भेदप्रमाया विषयवैशिष्ट्यस्याननुगतपटादिस्वरूपविषयत्वे घटेऽपि यथाज्ञानं तदबा-धितं, इदंस्वरूपं सम्बन्धइति नियामकाभावात । नच घटातिरिक्त स्वरूपमेव. तत्सम्बन्धः, किमतिरेकःस्वयं सम्बन्धबहिर्भूतः सम्बन्धः

त्मकस्वरूपमुपलक्षयति ; किंवा स्वयमपि सम्बन्धांतर्गत स्वसम्बन्धा त्मकस्वरूपविशेषणं भवति ; आद्ये घटस्वरूपमपि तद्भेदसम्बन्धः स्यात ।

नन्वतिरेकस्स्वसम्बन्धिनमेवोपलक्षयति ; नच घटस्तत्सम्बन्धीति चेन्न ; सम्बन्धस्यैवाद्यानिरूपणात । विशेषणत्वेच न स्वयमेव स्वसंसर्गः, घटेऽपि तत्प्रतीतेरबाधप्रसंगात । अन्यश्चे त्तस्यापि नियता धिकरणसंसर्गो नस्वयं, उक्तदोषात । नचप्रथमः नियाम्यस्य नियामकत्वा योगात् । अपरश्चेत् भेदानन्त्यं । तन्नच प्रथमस्य क स्यचित्संसर्गाभावे तदधीनसंसर्गाणा मन्येषां न संसर्ग इत्यसंसर्गाए व सर्वे स्युरिति तद्विशिष्टज्ञानं सर्वत्र भ्रान्तिस्तस्यापि वा प्रमास्यात् , सर्वेषां तुल्यत्वात ।

ननु नान्योन्याश्रयादिदोषः ; नहि भेदो भेदेनजन्यते , नवा ज्ञायते , नवा तदाश्रयत्वे धर्मिण स्तदपेक्षा, अनादिभेदाश्रयत्वस्यानपेक्षत्वात् ; नच भेदाश्रयत्वज्ञाने पूर्व भेदाश्रयत्वज्ञान मपेक्ष्यत इत्यन्योन्याश्रयादिरिति वाच्यम्, घटादे भेदाश्रयत्वज्ञानाभावेपि तन्निष्ठस्य भेदस्य प्रमितत्वात्, नहि भेदज्ञानेघटनिष्ठतदाश्रयत्वज्ञानं हेतुरितिचेन्न । भेदधर्मित्वस्यानिरूपणे इदमस्माद्भिन्नमिदं नेति व्यवस्थाया आकस्मिकत्वप्रसंगात् । भेदाश्रयानिरूपणप्रयुक्तभेदज्ञानप्रमात्वविप्रतिपत्तिर्हि भेदाश्रयनिरूपणेन निरसनीया, तदनिरासे इद मस्माद्भिन्नमिदंनेति व्यवस्थाया अयोगात् । तथाच भेदाश्रयस्य प्रतियोग्यतिरिक्तत्वनिश्चये सत्याश्रयानिरूपणाभावात् भेदज्ञानस्य प्रमात्वनिश्चयः, तन्निश्चयेच भेदाश्रयतया प्रतीतस्य प्रतियोग्यतिरिक्तत्वनिश्चयइति परस्पराश्रयप्रसंगात् भेदस्य प्रामाणिकत्वासिद्धेः ।

किंच यत्प्रतियोगितावच्छेदकात्यन्ताभाववत्त्वमप्यन्योन्याभववत्त्वे न प्रयोजकं तदानियामकाभावात् भेदाधिकरणस्य इदमित्यनुरूपणात तत्प्र मात्वाप्रमात्वयोर्व्यवस्थायांअयोगात सर्वं सर्वतोभिद्येतनभिद्यतेवा । अथ- तरप्रयोजकं तदा घटे भेदसत्तांविना अलभमानसत्ताकस्य प्रतियोगिता

वच्छेदकात्यन्ताभावस्य तत्र भेदसत्ताप्रयोजकत्वायोगात्, येन वि-ना यस्य सत्ता नास्ति तस्य तत्सत्ताप्रयोजकत्वेऽन्योन्याश्रयात, इ-त्यत्त्यन्योन्याश्रयस्याप्यनेनैवप्रकारेण दोषत्वात् । ननुमाभूद्भेद स्वाश्र यः, आत्मवदनाश्रितएव सत्यो ऽ स्त्वितिचेन्न; श्रुत्या तादृशभेदस्य-क्वाप्यसिद्धेः, प्रत्यक्षादिनातु साश्रयस्यैव तस्य प्रतीतेः ।

ननूक्तरीत्याऽऽश्रयानिरूपणादेव स्वातन्त्र्यासिद्धिः सत्तावदितिचेत्; त स्याश्रितत्ववत्स्वरूपस्याप्यपारमार्थिकत्वेऽपि प्रत्यक्षादितःप्रतीत्युपपत्तेः स्व तन्त्रभेदस्य जीवब्रह्मैक्याविरोधाच्च । भेदस्य स्वाश्रय एव स्वप्रतियोग्यभेद विरुद्धत्वात् । किंचाभेदविरोधिनएवभेदत्वात् भेदत्वमस्यपारिभाषिकमेव स्यात् ।

किंच भेदज्ञानमपि नसंभवति, किमेतौ परस्परं भिन्नावितिवा, इदमिदं नभवतीतिवा, अस्माद्भिन्नइतिवा ; सर्वथाप्यन्योन्याश्रयः, प्रथ-मे द्वितीयज्ञानस्य भेदज्ञानाधीनत्वात् दूरस्थवनस्पत्योरपि तद्धिज्ञान-प्रसंगात, अभेदग्रहस्य प्रतिबन्धकत्वे यत्संशयेतिन्यायात् भेदग्रह-स्यहेतुत्वात् , परस्परभावस्यापि भेदरूपत्वात् । नाद्वितीयः भेदेभेदत्व-ज्ञानंविना तद्विशिष्टज्ञानानुपपत्तेः । अतएव नतृतीयः, प्रतियोगित्वग्र हस्य भेदग्रहाधीनत्वात्, पञ्चम्याः प्रतियोगितार्थकत्वात् ।

अपिच घटे पटाभेदानुपलब्धे रनन्यथासिद्धत्वनिश्चयं विनानतदभाव रूपभेदधीः,तन्निश्चयश्च यदि घटःपटस्स्यात तद्वदेषोपलभ्येतेति तर्कावतारा त, तद्वदिति सादृश्यगर्भः तर्कश्च भेदज्ञानादित्यन्योन्याश्रयः । अनुपलब्धि मात्रजज्ञानस्य सत्तानिश्चयरूपत्वे करतलामलकादिज्ञान इव क्वचिदपि प्रामाण्यसंशयस्य भेदज्ञानेऽनुपपत्तेः, सत्तानिश्चयार्थं तर्क आवश्यक इ-तिदुस्तरोऽयमन्योन्याश्रयः ।

किंच तस्यैतस्माद्भेदसंशयव्यतिरेकनिश्चयदशायामस्य ततो भेदानिश्चयोनेति सार्वजनीनमिति तस्यैतद्भेदनिश्चयोऽ स्य ततो भेदनिश्चये कारणं यत्संशयेतिन्यात्, एवमितरत्रापि भेदनि श्चये सहेतुरित्यन्योन्याश्रयः । नच घटधर्मिकभेदः परमते तत्प्रतियो

गिकोभवति येन तस्य ग्राह्यतया तत्संशयादिरप्रतिबन्धकः स्यात् ; अयं सनभवतीति ज्ञानस्य विशेषणतया विशेष्यतया वा तद्गतभेद-विषयत्वायोगाच्च तस्येंद्रियासन्निकर्षात् । नच प्रतियोगिनि धर्मितावच्छेदकाभावनिश्चय एव तद्धेतुः, विनिगमकाभावात् । मूलेऽग्रत्वाभावनिश्चयेप्यग्रवृक्षे मूलवृक्षाभेदनिश्चयेन भेदभ्रमदशायां तस्मिन्-सत्यपि तद्दर्शनात् , धर्मितावच्छेदकीभूत घटत्वाद्यभावनिश्चयस्यापि घटादिभेदज्ञानाधीनत्वात् । पटत्वनिरूपणस्य घटभेदनिरूपणाधीनत्वात , प्रतियोगितावच्छेदकस्यैतद्वृत्तित्वनिश्चयदशायां प्रतियोगिनि धर्मितावच्छेदकाभावस्य अनिश्चयाच्च तत्राप्यन्योन्याश्रयात् ।

एवं भेदनिरूपकप्रतियोगिज्ञानस्यापि भेदज्ञानाधीनत्वादन्योन्याश्रयः । प्रतियोगित्वज्ञानंच विशेषणज्ञानतया कारणं, सन्निकर्षांतराभावाच्च तज्ज्ञानंकारणं, प्रतियोगिनोभेदाज्ञानदशायांच प्रतियोगित्वं नज्ञायतइति भेदज्ञानंतत्रकारणं । अपिच घटात्पटोभिन्न इत्यत्र मत्वर्थो भाति ; घटस्य भेदइत्यत्र षष्ठयर्थः । तदुभयज्ञानंच घटाद्भेदज्ञानाधीनं , तदज्ञानदशायां नियमेन तदप्रतीतेः । नचवस्तुसद्भेदसत्तैवापेक्षिता , तदभावे ऽपि ज्ञानदशायां सम्बन्धप्रतीतेः , तत्सत्वेपि तदज्ञानदशायां यमजयोस्तदप्रतीतेश्च । तदज्ञानातिरिक्तस्यच दोषस्याभावात् । एवं भेदंप्रति घटभिन्नः पट इत्यत्र घटो विशेषणत्वेनभाति , पटोविशेष्यतया भाति । इदंप्रतियोगिधर्मिणो विशेषणविशेष्यत्वज्ञानमपि भेदज्ञानाधीनं । अन्यथा एकत्र विरुद्धयो र्ज्ञानासम्भवात् । तथाच भेदज्ञानेपि भेदज्ञानान्तरमपेक्षणीयं , तत्रापि तद्ज्ञानान्तरमित्यनवस्था । एवंच क्लृप्तकारणाभावे ऽपिं कार्यं स्वप्नरथादिव न्मायिकमेव ।

किञ्चास्य प्रतियोगिनस्स्वयं नभेदः स्वावृत्तित्वात् , अभेदस्यचासंबन्धत्वात् , भेदो भिन्न इति प्रतीत्योरवैलक्षण्यापाताच्च , स्वस्यैव स्वंप्रति विशेषणविशेष्यत्वायोगाच्च । भेदान्तरंचाधिकरणभेदमात्रादनुपपन्नं , तथात्वेतथात्वेवा अबाधाविनिगमाभ्यां घटेऽपि सःस्यादित्येकत्रैकस्य भेदद्वयं स्यात् , एवं तृतीयोऽपि, अन्यथा द्वितीयस्य घटभेदायोगात् । प्रथमस्यच स्ववृत्तिवृत्तित्वानुपपत्तेः । अन्यथैतौ भे

दौ घटाद्भिन्नाविति प्रथमद्वितीयभेदयोः प्रतीत्ययोगात् । नहियुगप त्स्वविशेष्यं प्रति स्वयं विशेषणं भवति । अयमप्यबाधाविनिगमा भ्यां पृथगेव । ततश्चतुर्या दिरप्यखिलवृत्तिस्स्यादित्येकस्यानन्ताप्रा- माणिकभेदाः । एवं तेषामप्यन्योन्यं द्रष्टव्यम् ।

नापि वैलक्षण्यं भेदः, तद्धि विविधलक्षणकत्वंवा विरुद्धलक्षणयोगि त्वंवा । नाद्यः,एकस्याप्यात्मनः परमते बुद्ध्याद्यनेकलक्षणत्वात् । द्वितीये यदि परस्परात्यन्ताभावसमानाधिकरणत्वं विरोधः, तर्हि सुखादावपि समा नं । अथपरस्परात्यन्ताभावेनैव समानाधिकरणत्वं, सुखादिकंच परस्परेणा पि समानाधिकरणमितिचेन्न , तस्यापि धर्मिभेदाधीनत्वात् । अथ परस्पराश्रयभेदसमानाधिकरणत्वं, परस्पराश्रयात् । नापि स्वरूपं भेदः भेदस्य विशेषणविशेष्यस्यैवप्रतीतेः , एकत्रचतदयोगात् । अपिच अभेदविरोधी भेदस्तस्मिन्सति तदप्रतीतेः । नच घटादिस्वरू- पं भेदः पटादिमात्रात्मतद्भेदविरोधी, तदुभयसामानाधिकरण्यध- र्मधर्मिभावयोस्सत्त्वात् । नच पटस्य पटस्वरूपतोऽन्यः कश्चिद्भेदो ऽस्ति, सप्रतियोगिभेदस्य निष्प्रतियोगिस्वरूपत्वानुपपत्तेश्च । घटभे दयोर्धर्मधर्मिभावानुपपत्तेश्च । तस्माद्वास्तवभेदमते भेदप्रतीतिर्नि- विषयैव । सिद्धांतेतु कथंचित्सासविषया । तथाहि- इदमिदंनेतिप्रतीति स्तदुभयनिरूपिताभेदाभावं विषयीकरोति , पदद्वयसामानाधिकरण्यार्थाभेदस्यैव नञर्थप्रतियोगित्वानुभवात् । संभवतिच तदुभयाभेदः, अस्तिहि घटपटयोस्सदिदंसदिदमित्य नुवृत्तसत्स्वरूपाभासः । सच्च घटाद्यधिष्ठानं 'आत्मैवेदं सर्व' मि- तिश्रुतिप्रसिद्धात्मस्वरूपम् । नच सत्ता तद्विषयो नात्मेति वाच्यम् । 'सदेवसौम्ये' त्यादिश्रुतेरात्मस्वरूपातिरिक्तनिषेधात् । सर्वत्र अधिष्ठा नसदात्मानुगमादेवानुगतसद्बुद्ध्युपपत्तेः तदन्यसत्तायां मानाभा- वात् । तस्यैवानुगततया भावप्रत्ययान्तशब्दार्थत्वाच्च । तदेवच सन् घटइत्यादौ घटाद्यात्मकतया भासमानं घटादेः पारमार्थिकं स्वरू- पम् । स्वरूपमेवचाभेदः, परैरपि तथाभ्युपगमात् । अयंच स्वरूपा भेदो वास्तवः । एवंच घटपटादिनिरूपिता भेदात्यन्ताभावो ऽविद्यया

अत्रोच्यते - न तावद्भेदप्रतीत्यपह्नवश्शक्यः; स्ववचनविरोध वा धापसिद्धान्तादिप्रसंगात्, तथासतिहि युष्मदस्मत्प्रत्ययगोचरयो र्विष यविषयिणो स्तमः प्रकाशव द्विरुद्धस्वभावयो रितरेतरभावानुपपत्ति रित्यादिभाषणमपि व्याहन्येतेति । नच भेदप्रतीतिकारणापह्नवश्श क्यः, कार्यस्य कारणावश्यम्भावात् । अन्यथा लोकायतमतापाता-त् । नच भेदप्रतीतेरकार्यत्वं वक्तुं शक्यं, नित्यत्वतुच्छत्वयो स्त्व यैव त्यागात् । नच - दुर्निरूपं तत्कारणमिति वाच्यम्, एतत्कार

कल्पो धर्मिप्रतियोग्याश्रितो घटः पटो नभवतीति प्रतीयते , इमौ भिन्नावितिच । इमौ विभक्तावित्युभयाश्रितत्वे ऽपि अयमस्माद्विभक्त इतिवद यमस्माद्भिन्नइति प्रतीतिः । सचभेदस्साक्षिभास्यइति नतत्रप्रति योग्यादिज्ञानापेक्षा । नचैवं सर्वदा भेदप्रतिभासप्रसगः , साक्षिमात्रभा स्यस्याप्यालोकस्य स्वावच्छेदकालोकाकारवृत्त्यभिव्यक्तसाक्षिणा प्रति भासादिवत् भेदप्रतियोग्यभेदप्रतियोग्यभेदानरूपकघटपटाद्यसाधारण-स्वरूपोपस्थितावेव भेदस्य साक्षिभास्यतया कदाचित् प्रतिभासोपप-त्तेः । भेदप्रतियोग्यभेदप्रतियोग्यभेदनिरूपकत्वेनच घटादेः प्रतिभासो नभेदप्रतियोगित्वनचेति नघटादिप्रतियोगिकत्वानुभवविरोधो ऽपीति ।

धर्मधर्म्यादिविकल्पदूषणं पश्चादुद्धरिष्यन् प्रथमतः प्रतीत्या -भेदस्वरूपं साधयति "नतावदि"त्यादिना "एवञ्चे " त्यतः प्राक्तनेन ग्र न्थेन । तत्र भेदप्रतीतितो परस्पराश्रयस्य प्रागभिधानात् तदुद्धा-रेण विना प्रतीत्या भेदसाधनायोगात् तद्दूषणमुद्धर्तुं किमन्योन्याश्रय णोद्भावनेन प्रतीत्यपह्नवोऽभिप्रेतः, उतकारणापह्नवेन प्रतीतेर्मिथ्यात्वं यद्वानिर्वचनीय कारणत्वात्प्रतीते र्मिथ्यात्वं, किंवानिर्विषयत्वं, अथ वा बाध्यविषयत्वं, इति विकल्पमभिप्रेत्य प्रथम दूषयति (नतावदि ति) (स्ववचनेति) 'अविद्यामूले भेदग्रह' इति वचनविरोधः । प्रतीत्यभा ववचनमर्थाङ्गीकारे भाष्यव्याहतचेत्याह (तथासतीति) भेदप्रतीत्य पह्नवे सतीत्यर्थः । (नच भेदेति) मिथ्यात्वेऽपि कार्यत्वादेव कारणं

णत्वेनैव सुनिरूपत्वात्, अन्वयव्यतिरेकवशात् इन्द्रियादिविशेषप्रसिद्धेश्च । भवतापि चाविद्याकारणमिति विशेषतो निर्णीतं, अन्यथा परमार्थत्वप्रसंगात् । नचास्य निर्विषयत्वं सुवचम्, प्रतीत्यपह्नवपक्षोक्त दोषावश्यम्भावात्, स्वबाध्यभेदविषयप्रतीत्यभावेन परसिद्धान्तस्थिरीकरणाच्च । अतो बाध्यविषयत्व मवशिष्यते, तदपि दुर्वचं, बाधक प्रमाणस्य भेदग्राहित्वे भेदाभावग्राहित्वे यत्किंचिद्ग्राहित्वाभावेच्च भेदस्य स्थिरीकरणात् । भेदाभावोपि सिद्ध्यन् भेदाद्भिन्नएव सिद्ध्यति, अन्यथा तदसिद्धेः तत्सिद्धेर्वा भेदसिद्ध्यापातात् । एवंच सामान्यतः स्थापिते भेदे न पृथग्जल्पाना मुत्तरापेक्षा । याचात्र भेदतिरस्करिणी, सापि साध्वसाधुविवेक दिव्यचक्षुषि जने नजागर्ति । तथाहि—स्वरूपं धर्मोवेति विकल्पयन् किं सामान्यतः स्वरूपधर्मयोः भेदमंगीकृत्य विकल्पयत्यनंगीकृत्यवा ? न प्रथमः, विकल्पस्य निष्फलत्वात्, अन्यथा भ्युपगमबाधात् । न द्वितीयः, विकल्पस्यानुत्थानात् । न पुनः पर्यायेण विकल्पः । नच - निर्मु

वाच्यमिति भावः (स्वबाध्येति) भेदविषयप्रतीत्यभावेन तन्निरास इति भावः । भेदाभावग्राहित्वे कथंभेदस्थिरीकरणं, तथासत्यतिप्रसङ्गादित्यत्राह (भेदाभावोऽपीति) अन्यथा-भेदाद्भिन्नत्वेन सिद्ध्यभावे । तदसिद्धेः-भेदाभावासिद्धेः (तत्सिद्धेर्वेति) यदिभेदाद्भिन्नत्वेनासिद्धावपि भेदाभावसिद्धि स्तदा भेदात्मकतयैव सिद्धेरभेदसिद्ध्यैव भेदसिद्धिस्स्यादित्यर्थः । एवमप्युक्त दूषणानां कः प्रतिक्षेपइत्यत्राह – (एवञ्चेति) (सामान्यतइति) धमर्त्वधर्मित्वविशेषानादरेणेत्यर्थः । अभ्युपगम्यापेक्षामाह (याचेति (निष्फलत्वादिति) भेदाभावसिद्धिलक्षण फलासिद्धेरित्यर्थः । (अन्यथेति) भेदाभावसिद्धिरूप फलसिद्धावित्यर्थः । उपजीव्यबाधोप्यत्र अभिमतः । एकवस्तुविषयत्वमात्रेण - न पदद्वयस्य पर्यायता नीलमुत्पलमितिवादित्यत्राह (नचेति) भेदमात्रनिरासे प्रवृत्तिनिमित्तभेदस्यापि निरासाद्धर्मत्वधर्मित्वयो रप्युपाध्यो र्भे

क्तोपाधिभेदैकवस्तुगोचरयो श्शब्दयो रपर्यायता, प्रातीतिकभेदमूलोयं विकल्पः परमार्थविमर्शभेदमूलं तद्दूषणमिति चेन्न; विमर्शभेदस्यापि पारमार्थिकत्वानभ्युपगमात्, स्वमूलघातायोगाच्च । अ

दाभावादित्यर्थः (प्रातीतिकभेदेति) प्रतीतिविमर्शयो रुभयोरप्यपारमार्थ्याविशेषात् किं केन बाध्यत इति चोद्यपरिहाराय पारमार्थ्यविशेषणं (स्वमूलेति) विमर्शविशेषमूलंहि दूषणं, नत्वविमर्शमात्राधीनं, विशेषश्च भेदएव, अतो भेदनिरासःस्वमूलघातादनुपपन्नइत्यर्थः । यद्वा भेदविमर्शयो र्भेदाभावा द्दूष्यदूषणभावो नोपपद्यते, यदि भेदविमर्शयोरपि भेदः प्रातीतिकः, तर्हि तन्मूलदूष्यदूषणभावोपि प्रातीतिकएवेति भेदतात्त्विकत्वं निष्प्रत्यूहमेवेति चोद्यपरिहाराय पारमार्थ्यविशेषणं । विमर्शभेदः – विमर्शाद्भेदस्य भेदः, विमर्शस्य भेदाद्भेदइतिवा । यद्वा, विमर्शस्य प्राबल्ये परमार्थविषयत्वं हेतुरित्यभिप्रायेण पारमार्थ्यविशेषणम् । पारमार्थ्यंच विषयद्वारकं विवक्षितम् । भेदो विशेषः (विमर्शभेदस्यापीति) शुक्तिरजतादिभ्रमनिवृत्ति प्रसंगादिरूपाणां विषयाणां पारमार्थ्यं नाभ्युपगतमित्यर्थः (स्वमूलघातायोगादिति) धर्मधर्मिभेदप्रतीतिमुपजीव्य प्रवृत्तो विमर्शो न भेदप्रतीतिं बाधितुं क्षमत इत्यर्थः । यद्वा (प्रातीतिकेति) प्रतीति सिद्ध धर्मधर्मिभेदमवलम्ब्य प्रवर्ततइत्यर्थः, । पूर्वोक्तमभ्युपगमबाधं परिहर्तुमाह (पारमार्थिकेति) विमर्शविषयभूतो भेदो विमर्शभेदः, तन्मूलं तदवलम्बनं- तद्विषयं दूषणं प्रवर्ततइत्यर्थः, पारमार्थिक भेदोदूष्यइति यावत् । तथाचाभ्युपगतस्य प्रतीतिसिद्धभेदस्वरूपस्य अनिरासान्नाभ्युपगमबाध इतिभावः । प्रतीतिसिद्ध भेदस्वरूपादन्यस्यैव पारमार्थिक भेदस्य दूष्यत्वादभ्युपगम विरोधपरिहारः, किंवा प्रतीतिसिद्धभेदएव पारमार्थ्यमात्रनिरासादिति विकल्पमभिप्रेत्याद्यं दूषयति (विमर्शभेदस्यापीति) तथाच पारमार्थिकभेदस्य दूष्यत्वासम्भवात् निर्विषयं दूषणं स्यादित्यर्थः । द्वितीय आह (स्वमूलेति) पारमार्थ्यधर्ममात्रनिरासेहि भेदस्य मिथ्यात्वासिद्धेः पारमार्थ्यरूपेण भेदस्यैव-

तएव परमतसिद्धभेदोपजीवनेन विकल्पइति प्रत्युक्तं, अनंगीकृत
मूलघातकेन परमतेन तत्सिद्धेः अन्यथा परमतेनापि तदसिद्धे स्त
न्मूलविकल्पासम्भवात् । अतो यदि विकल्पयसि सिद्धो भेदः ।
यदि न तथापि सिद्धः, विकल्पोपक्रमत्वा त्तद्दूषणस्य । नचानु
पलब्धेः किं विकल्पेनापीति वाच्यम्, तथासति तस्यानिर्वचनीय
पक्षनिक्षेपासम्भवात, संविदनुपलम्भवाचो युक्ते श्चैवं सुलभत्वात्।
किंच अभेदःस्वरूपं धर्मोवा? स्वरूपंचेत् भेदभ्रमः क्वाचिदपि न-
स्यात, भेदविरोधिन्यभेदे दृष्टे तदारोपासम्भवात्, अभिन्नो घट
इत्यादेः पर्यायतादि प्रसंगश्च प्राग्वत् । अथतु धर्मः, तर्हि सि

निरासो वाच्यः, अयमेव तस्य बाधो यदभावप्रमापणं, तथाचोपजी
व्यबाधो दुर्वार इत्यर्थः । अभ्युपगमबाधश्च सिद्धइति भावः । येन-
परमतेन भेदो निश्चीयते तत्किं स्वघातकासहिष्णु उतसहिष्णु, आ
द्यमाह (अनंगीकृतेति) यद्यनंगीकृतमूलघातकं तदा तेन विरोधा-
द्विकल्प्य दूषणाप्रवृत्तेः परमार्थतयैव भेद स्सिध्येदित्यर्थः । द्वितीय
य आह (अन्यथेति) ननु माभूद्भेदनिश्चयः, परोक्त्या प्रतीतिमात्रं -
विवक्षितमित्यत्राह (तन्मूलेति) निश्चयमूलोहि विकल्पः, न प्रतीति
मात्रादित्यर्थः । अनंगीकृतेत्यादेरेवं वार्थः, मूलभूतस्वघातकासहि-
ष्णुनाऽहिपरमतेन भेदस्य निश्चयो भवति, अन्यथा स्वघातकसहिष्णु
त्वेन ज्ञातादर्थावधारणानुपपत्तेरित्यर्थः । माभूद्भेदनिश्चयः परोक्तिप्रती
तित्वमात्राद्विकल्पः स्यादित्यत्राह (तन्मूलेति) पूर्ववदेवार्थः । ननु -
नवयंविकल्प्यदूषणं ब्रूमः, येन मूलघातः, किन्त्वनुपलब्धेरेव भेद-
स्य बाधं ब्रूम इत्यत्राह (नचानुपलब्धेति) (तदारोपासम्भवाद्दिति)
नच भेदग्रहेऽपि तस्य तिरोधानाद् भ्रम इति वाच्यम्, स्वरूपेभा
समाने तिरोधानासम्भवात् । अन्यथा स्वरूपभेदपक्षेपि लोकसिद्ध-
दोषेण स्वरूपभेदतिरोधानात् भ्रमोपपत्तिप्रसंगात् । (पर्यायतादी
ति) ब्रह्माभिन्नमित्युक्ते ब्रह्मब्रह्मवदित्युक्तं स्यात् । ब्रह्माभेदइति
व्यवहारस्यात् । अभेदेन प्रतीतावभेदधर्मप्रतियोगित्वज्ञान

द्धो भेदः, धर्मधर्मिभावस्य तद्व्याप्तत्वात् । यद्यभेदरूपेणापि धर्मेणा भेदः, सचेत् स्वरूपं सएव दोषः, धर्मश्चेदनवस्थेति त्वदुक्तमर्यादा प्रवर्तने का वार्ता । उपलम्भइति चेत्तुल्यम् ।

मित्यन्योन्याश्रयणमित्यादिकमादिशब्दार्थः । एतेन स्वरूपाभेदस्यैव प्रतियोगिघटिततया कल्पितभेदवत्त्वेन विशेषणविशेष्यभावाद्युपपत्तिरिति निरस्तम् । तथासति ब्रह्मब्रह्मवदित्युक्तंस्यात् , ब्रह्माभेदइतिव्यवहारःस्यादित्युक्तत्वात । ननु - ब्रह्मणएव अभेदरूपत्वेपि ब्रह्मत्वाभेदत्वयो र्भेदेन सम्बन्धितावच्छेदक भेदादभिन्नं ब्रह्मेति सम्बन्धव्यवहारः, न तु ब्रह्मब्रह्मवदिति तत्र सम्बन्धितावच्छेदक भेदाभावादिति चेत्तर्हि, संबन्धितावच्छेदकभेदएव सम्बन्धप्रयोजको ऽस्तु , किं कल्पिताभेदेन , तथाच प्रकृते ऽपि घटभेदयो स्सम्बन्धितावच्छेदक भेदादेव भिन्नइति सम्बन्धव्यवहार स्सिद्धः । किंच स्वरूपभेदवद्भेदस्यापि कल्पितभेदादेव भिन्नइति विशिष्टव्यवहारः किन्नस्यात्, त्वन्मते घटोनास्तीति वन्नचायमते घटाभावेन घटइत्तिवत् धर्मधर्मिभावस्येति । ननुएवं तर्हि स्वरूपस्यैव भेदत्वपक्षे धर्मधर्मिभावानधीनोभिन्न इतिव्यवहारः कथमितिचेन्न , तस्य तादधीन्यासिद्धेः, व्यवहारश्च भेदाप्रयोज्यसम्बन्धविषयः (सएवेति) भेदभ्रमानुपपत्ति दोषइत्यर्थः । एवकारो धर्मपक्षे वक्ष्यमाणदोषस्य तत्र व्यवच्छेदकतयाऽवधारणार्थो नभूतप्रत्यभिज्ञानार्थः , अन्यथाहि धर्मपक्षेपि धर्मभेदपक्षोक्तानवस्थातिदेशार्थं धर्मश्चेदपि सएवेत्यवक्ष्यत । अवधारणस्यच प्रयोजनं धर्मपक्षे तद्दूषणं दूषणांतरं चास्तीतिसूचनमिति,(त्वदुक्तेति)इत्यनेन अभेदःस्वरूपं धर्मोवेत्यारभ्योक्तोऽर्थः परामृश्यते । परेणहि भेदःस्वरूपं धर्मोवेति विकल्पयता - प्रकारान्तरं नास्त्येव, तत्रापि यद्येकत्र स्वरूपं सर्वत्रापि स्वरूपमेव , क्वचिद्धर्मत्वेतु सर्वत्रापि धर्मएवेति , मर्यादाविवक्षिता, अभेदेपि तादृशमर्यादा कल्पनेन दूषणोक्तौ किमुत्तर मित्यर्थः (उपलम्भ इतिचे दिति) शुक्त्यादि स्वरूपग्रहेपि भेदभ्रमदर्शनात् तत्राभेदोधर्मः , शौक्ल्या-

न काचिदिति-चेत् किमर्थस्तर्हि भेदापह्नवः । अनन्यार्थएवेति चेन्न; अप्रविष्टमाध्यमिकपक्षेण त्वयातथानभ्युपगमात् । नभेदापह्नवसाध्यमद्वैतं अपितुस्वतस्सिद्धमितिचेन्न ; अद्वैतमित्येव तत्सिद्धे रन्यथा स्वरूपमात्रत्य भेदाभेदविकल्पसहस्य तत्त्वायोगात् । तस्माद्भेदस्वरूप मपह्नुवानै रभेद स्वरूप मप्यपन्हुतं स्यात् ।

दिस्वरूप ग्रहे शौक्ल्यादौ तद्भेदभ्रमादर्शना त्तत्स्वरूपं भेदइति यथोपलम्भं स्वीकारेनदोष इतिचेदित्यर्थः । (नकाचिदिति) नास्माभि रभेददूषण परिहारः कार्यइत्यर्थः । तथाच तद्दूषणे इष्टापत्ति रितिभावः । (किमर्थ इति) जीवब्रह्माभेदसमर्थनार्थमेवहि भेदापह्नवः, अतोनेष्टापत्तिरितिभावः । (अनन्यार्थइति) भेददूषणमभेदसमर्थनार्थं नभवति अपितु भेदासिद्ध्यै, तस्माद्भेदापह्नव इष्टापत्तिरेवेति भावः । (अप्रविष्टेति) माध्यमिकवत् सर्वशून्यत्वानंगीकारादंगीकृतस्य ब्रह्ममात्रस्य स्वात्मकजीवाभेदाभ्युपगमादभेदनिरासो नेष्टइति भावः । ननु नवयं भेदापह्नवेनाभेदं साधयामः येनभेदवत्तैरेवतर्कैरभेदस्यापि निरासस्स्यात् किंतु तर्कैर्भेदनिरासमात्रं कुर्मः, नच तत्राभेदेऽपि भेदपक्षोक्तदोषप्रसंगः, दृढतमप्रमाणसिद्धेऽर्थे तर्काणामप्रवृत्तेः, इत्यभिप्रायेण शङ्कते (नभेदेति) द्वैताभावत्वेन सिद्धिर्ह्यद्वैतसिद्धिः, स्वप्रकाशश्च नतादृशइतिनाद्वैतस्य स्वतस्सिद्धिरित्यभिप्रायेण परिहरति (अद्वैतमिति) स्वरूपेण सिद्धिरद्वैतसिद्धिः कुतो नेत्याशङ्कायामाह (अन्यथेति) यदि अद्वैतमित्याकारता नस्यात् तदा स्वरूपात्मकप्रकाशमात्रस्य भिन्नमभिन्नंवेति संशयसहस्य अद्वैतसिद्धित्वायोगा दद्वैतमित्याकारेण सिद्धिरेव अद्वैतसिद्धिरित्यर्थः। उपसंहरति "तस्मादि"त्यारभ्य"माध्यमिकतापातादि"त्यन्तेन । तस्मात् - दृढप्रमाणसिद्धत्वाभावात । भेदवद् भेदस्यापि तैरेव तर्कैर्निरासप्रसंगात् , इष्टापत्तेश्च माध्यमिकमतापातेन कर्तुमशक्यत्वात, भेदनिरासो शक्य इत्यर्थः । ननु माभूद्भेदवदभेदोपि, नचैतावता माध्यमिक

नचास्त्विति वाच्यम् , माध्यमिकमतापातात् । नचानुभयाकारत्वसिद्धिः , उभयाकारत्ववद्व्याघातात् । नचवयमेकस्यैवैकस्माद्भेद मभेदंच स्वीकुर्मः , येनास्मन्मते तत्प्रसंगः ; नचाभेदमपि सर्वत्र परित्यजामः येन प्रकारेण भवत इवसर्वाभावः स्यात् ; अतः सर्वं वस्तुजातं स्वव्यतिरिक्तात्सर्वस्माद्भिन्नं स्वस्माच्चाभिन्नमिति सांसिद्धिकीयं तत्त्वव्यवस्था । अथ यावत्सम्भवंच विकल्पितं देवानांप्रियेण,धर्मान्तराणां(धर्म्यन्तराणां)स्वाश्रयस्य चस्वरूपधर्म बहिर्भावाद्व्यावर्तकत्वेन भेदत्वस्य वक्ष्यमाणत्वाच्च उभयंवेत्यपि विकल्पः किं नविकल्पितः, सएवहि न स्समयः । यथासम्भवं स्वरूपधर्मयो र्भेदत्वस्यानुप्रवेशोपलम्भात् , व्यावृत्तव्यवहारहेतुर्हि भेदः ; सच व्यवहारः क्वचित्स्वरूपतः क्वचिद्धर्मतश्च दृश्यते ।

त्वापातः, भिन्नाभिन्नविलक्षण वस्तुस्वरूपमात्रसिद्धेः, शून्यवादिमते कस्यापि सिद्धेरनभिमतत्वादित्यत्राह (नचेति) अन्यतराभावस्या न्यतरसत्त्वव्याप्तत्वा दुभयाभावे उभयसत्त्वप्रसंगः , तथाचानुभयात्मकत्वं व्याहतमित्यर्थः (उभयाकारत्ववदिति) उभयाकारत्वोक्तिराकारयोः परस्परविरहरूपत्वा द्व्याहतार्था, तथा उभयशून्यत्वोक्तिरपि ततएव हेतोर्व्याहतार्थेत्यर्थः । ननु भेदवादिना त्वया अभेदोप्यंगीक्रियते नवा; आद्ये व्याघातः , द्वितीये सएव माध्यमिकमतापात इत्यत्राह (नच वयमित्यादिना) तर्हि कस्माद्भेदः कस्मादभेद इत्याकक्षाया माह (अतइति) अन्यदपि कोट्यन्तरमाह (उभयंवेति) क्वचिद्धर्मः क्वचिद्धर्मीति कल्पः कुतोनोक्तइत्यर्थः (सएवेति) धर्मएवभेदः स्वरूपमेव भेद इति पक्षद्वयं व्यवच्छिद्यते । अनंगीकार हेतुं दर्शयति! (यथासम्भवमिति) कथमनुप्रवेश इत्यत्राह (व्यावृत्तेति) ततः – किमित्यत्राह (सचेति) शौक्ल्यादिग्रहे सति तद्धर्मिणो धर्म्यन्तरात्तस्य च कार्ष्ण्यादिभ्यो व्यावृत्तिव्यवहारदर्शनात् सएवधर्मिणोधर्म्यन्तरात्स्वस्या

शुक्तिरजतभ्रमादेः शुक्तित्वादिधर्मभेदाप्रतीति निबन्धनत्व स्या न्वयव्यतिरेक सिद्धत्वान्न भ्रमाद्यनुपपत्तिः । नहि शु-क्त्यादीनां स्वरूपमेव रजतादिभ्योभेदः । घटोभिन्नइति व्यवहारगत चोद्यान्यपि घटशब्दप्रवृत्तिनिमित्तविलक्षणसार्वत्रिक प्रयोगयोग्यभिन्न शब्दप्रवृत्तिनिमित्तयोगात् परिहृतानि । तच्चनिमित्तं घटत्वादिभेदा-नामेव व्यावृत्तव्यवहारहेतुत्वं भ्रान्तिप्रतिपक्षोपलम्भत्व मित्यादिरूपेण ग्राह्यं, अतएव व्यावृत्त्यनुवृत्त्यादि प्रयुक्तव्यवहारसाधनतादात्म्यप्रसं-गो ऽपि प्रत्युक्तः स्वरूपशब्दवत् ।

न्यस्माच्चभेदः लाघवा दिति भावः । एवंसति स्वरूप भेदपक्षे रजत-भ्रमा नुपपत्ति दोषं प्रागुक्तं परिहरति (शुक्तीति) ननु स्वरूप स्यैव भेदत्वा द्धर्माप्रतीतावपि तस्य गृहीतत्वात् कथं नभ्रमाद्यनुपप-त्तिरित्यत्राह (नहीति) शुक्तित्वादिकमेव रजतादिभ्यो भेद इति भा वः । ननु घटत्वादे र्भेदत्वे घटो भिन्न इति पर्यायताप्रसंगः, घट इति व्यवहारवद्भिन्नइति व्यवहारो ऽपि प्रतियोगिनिरपेक्षः स्यात्, अन्यतर पदवैयर्थ्यंच स्यादित्यत्राह (घटोभिन्नइति) (व्यावृत्तेति) तदविषय कव्यवहारप्रयोजकत्वं तत्तोभिन्नत्वं, तदविषयकत्वंच तद्विषयत्वाभावः (भ्रान्तीति) बहुव्रीहिरयं । यदिच घटाद्भेदः पटस्य स्वरूपमित्यादि ना यत्पूर्वपक्षिणोक्तं तत्रपटादिस्वरूपाणि प्रत्येकं घटाद्भेदइत्यंगीकृ-त्य तेषां परस्परव्यावृत्तत्वे ऽनुगतव्यवहारस्य निर्विषयत्वेन बाधापातः अनुवृत्तत्वेसर्वतादात्म्यप्रसंग इत्युक्त दोषमुद्धरति (अतएवेति) सार्वत्रिकप्रयोगशब्दप्रवृत्तिनिमित्तयोगा द्भिन्नेष्वप्यनुगतभेदव्यवहारा पत्तेरित्यर्थः । (अनुवृत्त्यादीति) घटभिन्नवस्तुस्वरूपाणां पर-स्परानुवृत्तिर्विवक्षिता, तावन्मात्रेणच तेषांपरस्परतादात्म्यासिद्धावपिघ टतादात्म्यासिद्धेर्न सर्वतादात्म्यप्रसंगः,अतः पटभेदव्यवहारविषयाणांपटभि न्नवस्तुस्वरूपाणांपरस्परानुवृत्तिरादिशब्देनविवक्षिता, तथाचकुड्यादीनां घटपटोभयतादात्म्या त्सर्वतादात्म्यप्रसंग इतिभावः.। (स्वरूपशब्दवदिति) यथा स्वरूपशब्दविषयाणां परस्परानुवृत्त्यभावे ऽपि नस्वरूपशब्दस्य नि-

घटस्वरूपं पटस्वरूप मितिभेदो ल्लेखेनैवहि स्वरूपश–ब्दः सर्वत्रप्रयुज्यते । ततएवतत्रापि स्वरूपमात्रतादात्म्य मितिचेन्न ; स्वधीवचनादिविरोधात् । भेदः स्वरूपमित्यनेनाभेदस्व-रूपसिद्धिरिति कस्त्वदन्योमन्येत । सप्रतियोगिकत्वाप्रतियोगिकत्वविक-ल्पोऽपि भिन्नइति व्यवहारमात्रस्य प्रतियोगिनिरूपिताकारे व्युत्पन्न-त्वात् प्रतियोगिसाकांक्षतेतिनिरस्तः । स्वरूपधर्मभेदसमर्थनाच्च धर्म धर्मिणो र्भेदोऽनवस्थापरिहारश्चसिद्धः ॥*॥ अयमत्रसंग्रहः-यस्मिन् यद्द-

---

र्विषयत्वं तथेत्यर्थः (दृष्टान्तमुपपादयति) (घटस्वरूपमिति) भेदो-ल्लेखवता न्नस्वरूपशब्दानुवृत्तिरिति भावः (ततएवेति) अनुगतव्यव-हारस्य निर्विषयत्वप्रसंगादेवेत्यर्थः (स्वधीति) समभिव्याहृतपदार्थवि शेष्यांशःस्वरूपशब्दार्थइतिनानुगतव्यवहारस्य निर्विषयतापातइतिभावः । दोषान्तरमाह(भेदेति) घटस्वरूपमिति व्यवहारात् तेनापि सर्वतादात्म्यंप्रस ज्येत नच तद्युक्तम् भेदस्वरूपस्यैवासिद्धिप्रसंगादित्यर्थः । (यस्मिन्यद्दर्श-नइति) अत्र अध्यासस्तादात्म्याध्यासो विवक्षितः, अन्यथा शुक्तित्व-ज्ञानेपि शुक्तौरजतसंसर्गाध्याससम्भवादव्याप्तेः । घटात्यन्ताभाव-वत्तयाऽवगते घटाध्यासासम्भवेन घटस्यापि तादृशघटात्यन्ताभावव त्तया घटाद्भेदप्रसंगादतिव्याप्तेश्च । अध्यासपदं च शुक्त्यादौ शु-क्तित्वादिभेददर्शना न्निवर्त्यस्याभेदज्ञानस्य वस्तुतोऽध्यासस्वरूपत्वा-द्वस्तुकीर्तनपरम् । प्रवृत्तिनिमित्तशरीरान्तर्गतन्तुतादात्म्यज्ञानत्वमात्रम्, नतु तदध्यासत्वम् । तद्भिन्नतदैक्यज्ञानत्वरूपं हितादात्म्याध्यासत्वं । तथा-च भेदघटितत्वेन भेदपदप्रवृत्तिनिमित्तज्ञाने न्योन्याश्रयप्रसंगात् । नन्वे कस्मिन् घटे क्रमेण श्यामरक्तरूपोत्पत्तौ श्यामिकादर्शनस्य रक्तद्र-व्यतादात्म्याध्यासविरोधित्वा द्रक्तभेदत्वापत्तिः । तथाच घटस्यैव घट-भेदप्रसंगः, नचात्रेष्टापत्तिः, कालभेदेनाविरोधादिति वाच्यम् । “परमात्मात्मनोर्योगः परमार्थ इतीष्यते । मिथ्यैतदन्यद्द्रव्यं हि नै-तितद्द्रव्यतां यतः ॥” इति वचनविरोधादितिचेन्न ; तस्मिंस्तत्स्व-

र्शने येषामध्यासोनोपपद्यते । तस्यभेदः सतेभ्यस्तथा त्तदुक्तिस्तु विव क्षया ॥ इति। एवंतर्हि धर्मभेदपक्षएवांगीकृतः स्यात्,नपुनः स्वरूपस्यभेद त्वसिद्धिः; तस्यभ्रमसहत्वात् इतिचेत् ; सत्यं ; तथापि धर्मविशेषाणां धर्म्यन्तरमनपेक्ष्यैव स्वस्मिन्नन्यतादात्म्याध्यास विरोधित्वा त्तेषां स्वरूपमेव स्वेषांस्वधर्मिपर्यन्तेभ्य इतरेभ्यो भेदइत्येष्टव्यं ,

---

रूपभेदस्य तत्रनिषेधात् । ननु विशिष्टभेदस्यापि निषेधः , यथा प्रमाणं विशिष्टभेदस्य विशेषणाभावदशायाम् तस्मिन्नेव सत्त्वात् । यद्वा तादात्म्यं तद्व्यक्तित्वरजतत्वादिकं नतु श्यामरूपादि , अतो नश्यामतासंसर्गाध्यासविरोधित्वेऽपि भेदत्वं पीततादेः । ननु यदिघट त्वादिकं भेदः तर्हि तस्मिन् गृहीते घट इति व्यवहारवद्भिन्नइति व्यवहारोऽपिस्यादित्यत्राह (तदुक्तिस्त्विति) भिन्नशब्दस्यप्रतियोगिनिरू- पिताकारे व्युत्पन्नत्वा त्तदाकारविवक्षायां तथाव्यवहार इत्यर्थः । (सत्यमिति) अवधारणांशोऽनंगीकृतः (धर्मविशेषाणामिति) -दण्डा- दि पृथक्सिद्धधर्मव्यावृत्तिः । स्वस्मिन्नन्यतादात्म्याध्यासविरोधि- त्वमितियत् तत्सर्वेषां धर्मविशेषाणामिति विवक्षितम् । ननु स्वस्मि न्नन्य तादात्म्याध्यासविरोधित्वं न भेदत्वं, घटत्वादिधर्मस्य स्वस्मि न् घटतादात्म्याध्यासविरोधिनो घटाद्भेदत्वप्रसंगात् । नचेष्टापत्तिः ,त- स्मिन्नेव तद्भेदस्य विरुद्धत्वादिति शंकानिराकरणार्थं "स्वेषां स्व- धर्मिपर्यन्तेभ्य"इति विशिष्योपादानं । अयंभावः – भेदप्रतियोगिनो न भेदाधिकरणत्वं विरुद्धं, परन्त्वनुयोगित्वमेव, घटत्वात्मक घट- प्रतियोगिकभेदस्यचनघटोऽनुयोगी किन्तु घटत्वं । ननुं घटत्वात्मकं- पटभेदं प्रत्यनुयोगीच घटो भवत्येवेतिचेत्सत्यं, परस्परनिरूपितभे- दप्रतियोगितानुयोगितयोरेवैकत्र विरोधः । घटनिष्ठप्रतियोगिताच घट त्वनिष्ठानुयोगितानिरूपिता , अनुयोगितातु घटनिष्ठ प्रतियो- गितानिरूपितेति न विरोधः । ननु भेदएवानुयोगी, नतु तद्वा- न् , अतः कथमनुयोगी घट इतिचेन्न , भेदोहि यथा स प्र-

तच्च स्वरूपमाश्रयापेक्षया धर्मोभेदइत्यपिव्यपदिश्यते, स्वपरनिर्वाह कसमाधिश्च संवेदनादिषु त्वयापि स्वीकृतः।

तियोगिकः तथा सानुयोगिकोपि, अस्मादस्य भेदइत्येव व्यवहारात्। तत्रास्मादिति सप्रतियोगिकत्वं, अस्येत्यनुयोगिसम्बन्धश्च सिद्धः। नचास्य भेद इति भेदाश्रयत्वमेव प्रतीयत इतिवाच्यं, प्रतियोगिनो वाश्रयाश्रयिभाव विलक्षणस्यैव सम्बन्धस्य तत्र वाच्यत्वात्। अन्यथा अनृतादिव्यावृत्ते ब्रह्मस्वरूपत्वेपि ब्रह्मणोऽनृतादिविलक्षणत्वं नस्यात्। यश्च सम्बन्धोस्य भेद इति व्यवह्रियते, स एव अनुयोगितेत्युच्यते। यद्वा सर्वत्र भेदएवा नुयोग्यस्तु, तथापि नदोषः, स्वप्रतियोगिकत्वेन सम्बध्यमानभेदसत्त्वं स्वस्यविरुद्धं, घटत्वात्मकश्च भेदः पटप्रतियोगिकत्ववेषावच्छिन्नो घटेनसम्बध्यते, नतु घटप्रतियोगिकभेदत्ववेषेण, तेनतु रूपेण स्वात्मना सम्बध्यते, तथाच घटप्रतियोगिक भेदत्वस्य पट सम्बन्धिता वच्छेदकत्वान्नविरोधः। अतिरिक्ताभावमतेपि घटनिष्ठस्य पटान्योन्याभावस्य घटाद्भेदः स्वरूपमेवेति घटस्य स्वस्माद्भेद प्रसंगे यथोक्तएव परिहारो वाच्यः। अत्रच 'तेषां स्वरूपमेव स्वेषां स्वधर्मिपर्यन्तेभ्य इतरेभ्यो भेद' इति वदतां वेदांताचार्याणां 'धर्मभूतजात्यादौ भिन्न इति-प्रयोग औपचारिक' इत्याचार्यग्रंथो भिन्नइति शब्दस्यभेदाश्रयत्वरूपसम्बन्धे मुख्यताभ्युपगमेन प्रौढ़वाद इत्यभिप्रायः। ननु यदि घटस्व मेव भेदः, तर्हि तज्ज्ञानमात्रात् स्वरूपव्यवहारवद्भेद इत्यपि व्यवहारस्स्यादित्याशङ्कां निराकरोति (तच्चेति) (धर्मइति) –दृष्टांतार्थम्। यथा घटइति स्वरूपेण व्यवह्रियमाणं घटत्वं घटेनसह आश्रयाश्रयिभावविवक्षायां धर्म इति व्यपदिश्यते, तथा तत्प्रतियोगिकत्वस्य विवक्षायां घटाद्भेदइति व्यपदिश्यत इत्यर्थः। एवं परनिर्वाहकस्य स्वनिर्वाहकत्वं नास्माकमेव मतं, किन्तु परेषामपीत्याह (स्वपरेति) पूर्वं विकल्पन्यूनतादोषोद्भावनसमये स्वाश्रयस्य स्वरूपधर्मबहिर्भावादिति

धर्मिस्वरूपस्य नकदाचिद्भेदत्वसिद्धिरितिचेन्न : अगृहीतभेदेषु केषु चिद्धर्मेष्वाश्रयभेदात् भेदव्यवहारदर्शनात्, सौरभादिषु हि धर्मत्व मवगम्यकस्येदमिति सन्दिहाना स्तदाश्रय विशेषदर्शनादिभि स्त त्तन्निष्ठतामध्यवस्यन्त स्तदन्यनिष्ठादन्यतांमन्यन्ते । अतो ऽस्ति धर्मिणो ऽपि क्वचिद्भेदत्वं। सोपिधर्मी स्वधर्ममितरगतधर्माद्भिन्दा नो धर्मान्तरेणभिन्नइति ननिर्भेदेनाभिद्यतइतिशंका, येनभेदासिद्धि रनवस्थादिकंवा प्रसज्येत । यस्यचधर्मस्य धर्मीभेद: सो ऽपि कदाचित्तस्यैव धर्मिणोभेदस्स्यात्, यदाह्याकारादिसादृश्यमात्रेण तस्यैव धर्मिणोधर्म्यन्तराद्व्यवच्छेदासिद्धि: - यथाविलीनेघृते तैलसन्देहदशायां गन्धविशेषेणतद्व्यावृत्ति:, अतो ऽत्र नान्योन्याश्रयशंकापि,

---

धर्मिणो ऽपि भेदत्वमुक्तं, तदुपपादयितुं शंकते (धर्मिस्वरूपस्येति) (अगृहीतभेदेष्विति) स्वरूपतो धर्मतोवेतिशेष:(सौरभादिष्विति) सौरभविशेषे गृहीते तदाश्रयेचानवधृते तैलघृतगन्धयो वैषम्यमगृहीतवतोपटुकरणस्य भवति संशय:, किमीयो ऽयं गन्ध:, किंतैलगत एवायंगंध:, उत ततो ऽन्य इति । तत्र घृतरूपाश्रयविशेषे निश्चिते सति तैलादिगन्धोनेति भेदव्यवहारात्, तत्संशयनिवृत्तेश्च आश्रय एव भेद इत्यर्थ: । ननुधर्म्यपि किंभिन्नएव धर्मं भिनत्ति उतनिर्भेदएव ; द्वितीये तादृशेन नभिन्नत्वसिद्धि: । आद्येपि धर्मस्यैव धर्मिभेदकत्वस्य वाच्यत्वात्, तस्यच धर्म्यधीनभेदत्वे ऽन्योन्याश्रयप्रसंगात्, निर्भेदस्यैव धर्मस्य धर्मिभेदकत्वं वाच्यम्, तच्च नसम्भवतीत्युक्तं । किंच निर्भेदस्यैव भेदकत्वे भिन्नयोर्यदेकं तस्यापि भेदस्तत्रापि यदेकं तस्यापि तथे त्यनवस्था स्यात्, तथाच - एकस्याप्यसिद्धे श्शून्यतापत्तिश्चे त्यत्राह (सोपिधर्मीति) धर्मान्तरेणेत्यन्योन्याश्रय: परिहृत:, यस्य धर्मस्य धर्मिभेदत्वं ततो ऽन्यस्य धर्मिभेदकत्वा न्नान्योन्याश्रय इत्यभिप्राय: (येनेति) निर्भेदेन भेद्यत्ववचनेनेत्यर्थ: । ननुविलीनघृतादौ तैलादि तादात्म्य सन्देहस्य सौरभविशेषोपलम्भादेव निवृत्ति:, अतएवधर्मिणोभेदक: सएवचे द्धर्मिणा भेद्यते व्यक्तएव अन्योन्याश्रय इत्यत्राह (यस्यचेति) (कदाचिदिति)

अपेक्षानियमाभावात्; गन्धजातिभेदस्य धर्मिभेदाप्रतीतावपि प्रत्यक्षेण पटुकरणानां प्रतीते रस्फुटरूपधर्मद्वयभेदाभेदचिन्तायाश्च तद्भेदकस्याश्रयादिभेदस्य प्रत्यक्षावसिततदाकारान्तरयोगित्वेनैवसिद्धिः । एवं विषय धर्मादिषु विषयादिभ्योऽपि भेद उदाहर्तव्यः । यच्चोक्तं - धर्मधर्मित्वादिग्रहो भेदग्रहात्ततश्च सइत्यन्योन्याश्रयइति , तदपिन ; तयोर्भेदानभ्युपगमात् , धर्मधर्मित्वादिरेवहि भेदइष्यते । तथात्माश्रयापातइतिचेन्न ; तस्यैव तत्रहेतुत्वानभ्युपगमात्, प्रत्यक्षादिसामग्रीविशदेवहि तद्ग्रहः । समर्थितएव सच जात्यादिरूपभेदः प्रत्यक्षादियोग्यइति । यच्च - वस्त्वन्तर सिद्धौ एकविधिरन्यव्यवच्छेदः व्यवच्छेदसिद्धौवस्त्वन्तरासिद्धिरिति ; तदपिन, वस्तुनोर्द्वयोरपि प्रतिनियतधर्मविशिष्टतया प्रत्यक्षादिभि र्ग्रहणात्तात्तएव व्यवच्छेदग्रहरूपत्वात् । यच्चोक्तमविद्यावशाद्भेदग्रहः तत्रचाविचारितरमणीयतैकवेषत्वात् वस्तुतोविचारासहत्वात् नकश्चिद्दोषइति ;

यदास्वयं धर्मिणाभेद्यते तदानधर्मिणस्स्वयं भेदक इति तात्पर्यम् । ननु तादृशधर्मस्य नियमतो धर्म्येवभेदक इति कदाचिदपि कथं तस्य धर्मिभेदकत्व मन्योन्याश्रयादित्यत्राह (अपेक्षेति) परस्परापेक्षानियमाभावादित्यर्थः । तत्र धर्मस्य धर्म्यपेक्षानियमाभावमुपपादयति (गन्धजातीति) धर्मिणोधर्म्यपेक्षानियमाभावमुपपादयति (अस्फुटेति) प्रागुक्तं धर्म्यन्तराणां भेदत्वमुदाहरति .(एवमिति) विषयि-ज्ञानं,तद्धर्मः विषयित्वं;आदिशब्देन विषयोगृह्यते। घटज्ञानस्य घटाविषयक ज्ञानापेक्षया घटोभेदः, घटविषयित्वस्यापि पटविषयित्वापेक्षया सएवभेदः, तज्ज्ञानविषयस्य तदविषयापेक्षया तज्ज्ञानंभेदइति क्रमेण उदाहर्तव्यमित्यर्थः। (तयोरिति) धर्मधर्मित्वादेर्भेदस्यचेत्यर्थः (तथेति) तथासतीत्यर्थः । धर्मत्वधर्मित्वादे र्भेदत्वमभ्युपेत्यैतदुक्तं । वस्तुतोजात्यादेरे वभेदत्वात्तस्य-च वस्तुना सहैवग्रहणात् नान्योन्याश्रय शंकापीत्याह (सचेति) (वस्तुनो र्द्वयोरिति) विधिरेव व्यवच्छेदः ; सच न तस्यैव, व्याघातात् ; किन्त्वन्यस्यैव, अन्यत्वञ्च तत्तत्प्रतिनियतो धर्मः, तत्तादात्म्यज्ञान-

तत्रांकिंप्रत्यक्षस्यैव शिरसि भारो ऽयं निक्षिप्यते; तत्प्रामाण्यसिद्ध्यर्थमिति चेत्, तदपिवा किमर्थं नपरित्यज्यते । लोकविरोधादितिचेत्, तुल्यं विकल्पे ऽपि । तत्सिद्धे स्वरूपमात्रे बाधकाभावादितिचेन्न; भेदे ऽपि बाधकाभावस्य उक्तत्वात् । अस्तु तर्हि प्रत्यक्षमप्यप्रमाण मितिचेत्, हन्ततर्हि तत्सिद्धस्वरूपमात्रस्यापि मिथ्यात्वाज्जितं माध्यमिकैः । केनाप्यसिद्धं तत्स्वतस्सिद्धमितिचेत्, तथाभावे तस्य किं त्वया प्रमाणमुपन्यसनीयम् । नांकिंचिदिति चेत्, साधुसिद्धान्तस्समर्थितः

विरोधि धर्म स्तदपेक्षयान्यत्वमिति यावत्; तद्यथा –घटादन्यत्वं पटत्वं तच्च प्रत्यक्षेणैव गृह्यत इति नान्योन्याश्रय इत्यर्थः (तत्र किमिति) अन्योन्याश्रयादि दोषवर्जन लक्षणो भारः किमर्थं प्रत्यक्षस्य शिरस्यारोप्यते न पुनर्भेदविकल्पस्यापीत्यर्थः । प्रमाणस्यैव विचारत्वं, नान्यस्य; तथाच प्रत्यक्षस्य प्रामाण्यसिद्धये अन्योन्याश्रयादि दोषवर्जनापेक्षेति शंकते (तत्प्रामाण्येति) लोकेहि सन् घटइत्यादौ बुद्ध्यैक्यं प्रतीति स्वरसिद्धं, तत्रान्योन्याश्रयादि दोषसहं प्रत्यक्षाद्भिन्नं भेदभ्रमरूपमेकं ज्ञानं, अपरन्तु प्रत्यक्षप्रमात्मकं सन्मात्रविषयं दोषासहमिति कुतो ज्ञानद्वयं कल्प्यते; लाघवादेकमेव प्रत्यक्षकरणैर्भ्रमरूपं ज्ञानमुत्पन्नमस्त्वित्याशयेन परिहरति (तदपिवेति) (तत्सिद्धइति) बाधात् असदिति प्रत्यक्षन्तावत् प्रमाणं भेदविषयत्वेच तस्यान्योन्यान्याश्रयादि दोषग्रासान्नप्रामाण्यं स्यादित्यतो ज्ञानभेदः कल्प्यतइत्यभिप्रायः । (बाधकाभावादिति) नपरित्यज्यत इत्यनुषंगः (उक्तत्वादिति) अतो बाध्यविषयत्वमवशिष्यत इत्यारभ्येत्यर्थः (अस्तुतर्हीति) प्रामाण्याप्रामाण्य लक्षणवैषम्यहेत्वभावात् एकमेव सत्स्वरूप भेदोभयविषयकं प्रत्यक्षं अप्रमाणश्चेत्यर्थः (केनापीति) ऐन्द्रियकप्रत्यक्षेणेत्यर्थः । तथाभावे – तस्य स्वतस्सिद्धत्वे, किं प्रमाणमित्यर्थः ।

अथप्रत्यक्षादिकमेव , किमप्रमाणमपि प्रमाणतया उपन्यस्तं कार्यकरं, तथाचसति परपक्षप्रतिक्षेपः कस्यापिनसिध्येत् । परैः प्रमाणतया भ्युपगमात्तदुपन्यासइतिचेन्नतावतानिर्णायकत्वं , तत्त्वन्यत्र स्थित्यसिद्धेः । किंच स्वयंप्रकाशप्रत्यक्षेणापि सकलेतरव्यावृत्तमेव प्रत्यग्वस्त्ववभासत इत्यतोपिभेदः प्रत्यक्षएष्टव्यः, अन्यथा जडता दात्म्यप्रसंगात्, आकारभेदानभ्युपगमेन सामान्यस्फुरणायोगात्, तावत श्चभ्रमसहत्वेनभेदत्वासिद्धेश्चेति ।

इति श्री कवितार्किक सिंहस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां भेददूषणनिस्तार स्त्रयोदशः ।

(अथेति) प्रमाणतयोपन्यसनीयमिति शेषः। परिहरति (किमिति) प्रमाण तयोपन्यासमात्रा न्न कार्यकरत्वं , येनोक्तदोषः स्यात् किन्तु परैः प्रमाणतया भ्युपगतं कार्यकरमिति शङ्कते (परैरि- ति) (किञ्चेति) अत्र सकलेतरव्यावृत्त मित्यनेन व्यावृत्तिवैशिष्ट्यं विवक्षितम् । स्वरूपातिरिक्त भेदविशिष्टमिति यावत् (अन्यथेति) स्व रूपस्य भेदाविषयत्वात् , प्रमाणान्तरस्य त्वदुक्तरीत्या असम्भवात्, जडाद्भेदे मानाभावात् , जडतादात्म्यप्रसंगइत्यर्थः । किञ्च स्वरूपा- तिरिक्तजडभेदस्या स्फुरणे सामान्याकारेण वा प्रत्यग्वस्तुनः स्फुर- णं वक्तव्यं, स्वरूपमात्रेणवा, तत्र नाद्यइत्याह (आकारभेदेपीति) द्वि तीयेपि किं स्वरूपं जडभेदः, उतन तत्राद्ये दोषमाह (तावतइति) प्रत्यग्वस्तुस्वरूपमात्रस्येत्यर्थः । द्वितीये जडतादात्म्यप्रसंग उक्तएव। अतः परिशेषादतिरिक्तभेदः प्रत्यक्षएष्टव्यइतितात्पर्यम् ।

यदुक्तं अन्योन्याभावस्य घटप्रतियोगिकत्वे घटात्यन्ताभावात् भेदो न स्यादित्यादि, तन्नकिमेकजातीयानां समानकालीनानां सम्बन्धि- निरूप्य स्वभावानां सम्बन्धिभेदादेव भेदइति विवक्षितम् , किं वा समानकालीनानां सम्बन्धिनिरूप्य स्वभावानां सम्बन्धिभेदो वैजात्य

प्रयोजकइति, यद्वा तादृशानां सम्बन्धिभेदादेव भेद इति। नाद्यः, एकघटगोचर नानापुरुषज्ञानानां भेददर्शनात्, एकस्य पुरुषस्य चरणादिनानावयवावच्छेदेन भूतले नानासंयोगदर्शनात्। एकावच्छेदेन विद्यमानानां भेदो न स्यादित्यापादनं विवक्षितमिति चेत; तर्हि-भिन्नावच्छेदेन विद्यमानानां भेदः कुतइष्यते। ऐक्यासम्भवादितिचेत्तर्हि भिन्नाधिकरणे विद्यमानयोरत्यन्ताभावान्योन्याभावयो रैक्यं सुतरां न सम्भवतीति तयोरपि भेद इष्यताम्। नहि घटाधिकरणे विद्यमानस्यान्योन्याभावस्य घटात्यन्ताभावेनैक्यसम्भवः। यद्यधिकरणभेदेन वृत्त्यभावएवापद्येत, तर्हि सम्बन्धिभेदाभावे भिन्नावच्छेदेन-वृत्त्यभावः कथं न स्यात्। भिन्नावच्छेदेन वृत्तेरुपलम्भादिति चेत, इहापि भिन्नाधिकरणे वृत्ते रुपलम्भादिति तुल्यम्। किञ्चैवमत्यन्ताभावान्योन्याभावयो रैकजात्याभावएव सिद्ध्येत्, कामं सिद्ध्यतु न काचित्क्षतिः। न द्वितीयः, एककालीन योर्भिन्नाधिकरणयो रेकघटगोचरयो र्ज्ञानेच्छयो र्ज्ञानद्वेषयोश्च दर्शनात्। किञ्चैव मत्यन्ताभावान्योन्याभवयो र्वैजात्याभावएव स्यात्, तदंगीकारे कोविरोधः, अधिकरणभेदव्यतिरेकेण वैजात्यादर्शनात्। सम्बन्धिभेदाभावे वैजात्येनविना अधिकरणभेदएव न सम्भवतीतिचेन्न देवदत्तयज्ञदत्तयोरेकघटगोचरज्ञानदर्शनात्। यदि स्वगोचरप्रतीति वैचित्र्यात् प्रतिवन्ध्यप्रतीतिवैचित्र्याच्च वैजात्यं सिध्येत्, तदा प्रतीतिसिद्धत्वादेव-न तदपह्नवश्शक्यः। एवं कल्पद्वयनिरासादेव कल्पान्तरमपि निरस्तं वेदितव्यं। प्रतियोगिभेदाभावे अभावभेदोनसम्भवतीतिचेन्न,त्वयाव्यधिकरणधर्मावच्छिन्नाभावांगीकारेण एकप्रतियोगिक समानाधिकरण व्यधिकरणधर्मावच्छिन्ना भावद्वयांगीकारात्। ननु समानाधिकरण धर्मावच्छिन्न घटाभावो घटमात्रप्रतियोगिकः, पटत्वावच्छिन्नघटाभावस्तु कुड्यादिप्रतियोगिकोपीति चेत्; किंप्रतियोगिनानात्वस्या भावनानात्वप्रयोजकत्व मिष्यते; उतन, आद्ये व्यधिकरणधर्मावच्छिन्नाभावस्यापि-प्रतियोगिनोभिन्नत्वात् एकप्रतियोगिक समानाधिकरणव्यधिकरण धर्मावच्छिन्नाभावद्वयसिद्धिः। द्वितीये प्रतियोगिभेदाभावे प्यभावभेदे न-

क्षतिः । ननु योभावो यदभावापेक्षया भिद्यते सतत्प्रतियोग्यन्य प्रतियोगिको दृष्टः, यथा घटाभावात् भिद्यमानः पटाभावः, व्यधिकरण धर्मावच्छिन्नाभावश्च सर्वप्रतियोगिक एकएव इति चेत्; तर्हि ज्ञानेऽपि तत्प्रतियोग्यन्यप्रतियोगिकत्वएव भेददर्शनाद्देशकालभेदेऽपि भेदो न स्यात् । तत्र यदि देशकालभेदे ऐक्यासम्भवात् तत्प्रतियोग्यन्यप्रतियोगिकत्वाभावे ऽपि भेदः , उक्तप्रयोजकं चातन्त्रमितीष्यते ; तर्हि प्रकृतेऽपि अधिकरणभेदेनैक्यासम्भव स्योपपादितत्वात् भेदः उक्तश्चातन्त्रमिति पश्य । ननु नात्रातन्त्रत्वं ज्ञानइव भिन्नाधिकरणत्वैकप्रतियोगिकत्व निश्चयाभावात्, अस्मदुक्तरीत्या अभेदप्रतियोगिकत्वस्यैव सम्भवात् , इतिचेन्न; तदसम्भवस्य वक्ष्यमाणत्वात् , खसम्बन्धिकपदार्थान्तरे प्रयोजकत्वाभाव निश्चयेनात्राप्यप्रयोजकत्व निश्चयाच्च , यत्र क्वचन सहचारदर्शनमात्रेण प्रयोजकत्वकल्पनेतिप्रसंगात् । किञ्च एतद्घटत्वरूपसमानाधिकरण धर्मावच्छिन्नाभावस्य एतद्घटान्यत्वरूपव्यधिकरण धर्मा वच्छिन्नाभावस्यच एतद्घटमात्रप्रतियोगिकत्वेनोक्तप्रयोजकस्य तत्रापि व्यभिचारः, अधिष्ठाने-प्रातिभासिकस्याभावो धिष्ठाना तिरिक्तस्सत्यः ततोन्यत्र प्रातिभासिकइतिमते तत्रापि व्यभिचारः । यद्युक्तव्यभिचारपरिहाराय विशेषणांतरदानेन प्रयोज्यसंकोचः क्रियत , तर्हि अप्रयोजकत्वमेव आविष्कृतं स्यात् । यदुक्तमभेदस्यैव भेदोभावस्स्यात् , नघटस्येति; तत्र किंघटभेदस्य घटान्योन्याभावत्वं , उत घटात्यन्ताभावत्वं , नाद्यः ; इष्टत्वात् । नद्वितीयः , हेत्वभावात् । प्रतियोगिविरोधित्वाभावे अभावत्वमेव हीयेतेतिचेत् ? प्रतियोगिविरोधिनोवाभावत्वं कुतः , प्रतियोगिविरोधादेवेति चेत् ? इहापि प्रतियोग्यविरोधादेवाभावत्वं । प्रतियोगिविरोधिनो भावत्वेनोपलम्भादिति चेत् ; प्रतियोग्यविरोधिनोप्यभावत्वेनोपलम्भादिति तुल्यम् । अतएव प्रतियोगिसमानाधिकरणस्याप्यव्याप्यवृत्ते रत्यन्ताभावत्वसिद्धिः , त्वन्मते व्यधिकरण धर्माव च्छिन्नाभावस्य सिद्धिश्च । नच तत्र प्रतियोगितावच्छेदकावाच्छिन्न प्रतियोगिविरोधो स्त्येवेति वाच्यम् ; तादृश प्रतियोगिनोप्रसिद्धेः । ननु

व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकेनैव विरोधः, विरोधश्च प्रतियोगितावच्छेदकस्य प्रतियोगिन्यवृत्तिरेवेति चेत्? य द्येवं प्रतियोगितावच्छेदक विरोधात् घटाभावत्वं, कथं तर्हि तादृशविरोधवतो ऽन्योन्याभावस्य घटप्रतियोगिकत्वा सम्भवः। प्रत्युता भावान्तरे क्लृप्तसामानाधिकरण्याभाव लक्षणविरोधस्य परित्यागात्, व्यधिकरधर्मावच्छिन्ना भावस्यैवासम्भवः । अन्योन्याभावस्यतु प्रतियोगितावच्छेदकेन सह सामानाधिकरण्याभाव लक्षणएवविरोधः । अभावान्तरे प्रसिद्धं प्रतियोगिविरोधित्वं, विरोधस्या सामानाधिकरण्यलक्षणत्व श्चोभयंव्यधिकरणधर्मावच्छिन्नाभावे त्यक्तम्, अन्योन्याभावेतु प्रतियोगिविरोधित्वमात्रं त्यक्तम् । प्रतियोगितावच्छेदक विरोधित्वंतु व्यधिकरणधर्मावच्छिन्नाभावे त्वदंगीकृतमेवान्योन्याभावेस्वीकृतम् । त्वदंगीकृतः प्रतियोग्यवृत्तित्वलक्षणविरोध स्त्वन्योन्याभावेपि । नन्वभावसमानाधिकरणे प्रतियोगितावच्छेदकस्यावृत्तिरेवविरोधः, सचसमानाधिकरणव्यधिकरणधर्मावच्छिन्न प्रतियोगिताकाभावमात्र साधारण इति चेन्न;प्रातिभासिकाभावे तदसिद्धेः, अभावसमानाधिकरणे अभावसमानसत्ताक प्रतियोगितावच्छेदकस्य अभावो विवक्षितइति चेन्न; प्रातिभासिके घटाभावे व्यावहारिकघटत्वस्यैव प्रतियोगितावच्छेदकतयाऽ भावसमानसत्ताक प्रतियोगितावच्छेदकस्या प्रसिद्धतया विरोधस्य दुर्वचत्वात्। अभेदेन विरोधात भेदस्तत्प्रतियोगी त्येतच्चासंगतम्, तथासति गोत्वाश्वत्वयोः परस्परप्रतियोगित्वापत्तेः। तथानुभवाभावा त्तयोः परस्परप्रतियोगित्वाभावेच तत एव भेदो नाभेद प्रतियोगिकः, घटप्रतियोगिकत्वेनैव भानात । भेदाभावइत्यपि प्रतीयंत इति चेन्न ; घटभेदातिरिक्त घटभेदात्यन्ताभावस्यैव तत्प्रतीतिविषयत्वात्। भेदस्यैव तत्प्रतीतिविषयत्वेपि घटभेदः घटाभेदाभावइति प्रतीतिभ्यां घटं प्रति भेदत्वस्य घटाभेदं प्रत्यत्यन्ताभावत्वस्यच सिद्धेः । किञ्च अभेदाभावस्स्यादिति यदुक्तं ; तत्र किं अन्योन्याभावापादनं – न्विवक्षितम्, उतात्यन्ताभावापादनं । नाद्यः प्रतियोगिविरोधिनोऽन्यो

न्याभावस्य क्वाप्यदर्शनात् । द्वितीये इष्टापादनवादिनं प्रति किमुत्तरम् । नह्यभेदात्यन्ताभावत्वं घटान्योन्याभावत्व विरोधि । एतेन-तादात्म्यप्रतियोगीति पक्षोऽपि निर्व्यूढः, एकएवाभावस्तादात्म्य घट प्रतियोगिकः; तादात्म्यस्यायमत्यन्ताभावः घटस्य त्वयमन्योन्याभावः । सम्भवतिहि देवदत्तो यज्ञदत्तस्य पुत्रो विष्णुमित्रस्य पितेति । तच्च तादात्म्यं घटत्वमेवास्तु, तादात्म्यंहि तदात्मनो धर्मः, अतस्तादात्म्यं धर्मिणो भिन्नमेव वाच्यमिति तद्भिन्नस्य तादात्म्यत्वानुपपत्तेरिति वचनं व्याहतार्थं । स्वाभावानधिकरणत्व निबन्धनदोषश्च स्वाभावाधिकरणत्वादेव निरस्तः, तथाहि- किमिदं विरुद्धत्वं विवक्षितम्, किं वैय्यधिकरण्यं, किंवा वध्यघातकभावः अथवा तदात्मत्वाभावः, यद्वा उभयोरन्यतरस्यान्यतरानधिकरणत्वं, तदभावात्मकत्वंवा ; नाद्यः, व्यधिकरणयोर्जातिव्यक्त्यो राश्रयाश्रयिभाव दर्शनात । न द्वितीयः, असिद्धेः । न तृतीयः, आश्रयाश्रयिभावस्यैव तादधीन्यात । न तुरीयः, घटाभावस्य घटानधिकरणत्वात् घटस्य घटाभावानधिकरणत्वं साध्यते, उत घटस्य घटाभावानधिकरणत्वादेव; नाद्यः, जातेर्व्यक्त्यनधिकरणत्वेपि व्यक्ते र्जात्यधिकरणत्वदर्शनात । नद्वितीयः, आत्माश्रयात् । नपंचमः, अभावे प्रतियोग्यनधिकरणताया भावान्यत्व निबन्धनत्वात् । नच भावाभावसाधारण मभावत्वमेव प्रतियोग्यधिकरणत्वे प्रयोजकं ! क्वचित्सहचरदर्शनमात्रेण प्रतीतिबाधमवधीर्य प्रयोजकत्वकल्पनेतिप्रसंगात । दृश्यतेहि घटे घटो नास्तीति प्रतीतिः । किंच भावाभावसाधारणमभावत्वं किमनधिकरणत्वमात्रे प्रयोजकं उत-प्रतियोग्यनधिकरणतायां । नाद्यः, घटादे रूपाद्यनधिकरणत्व प्रसंगात् । न द्वितीयः, तथासत्यभावस्य प्रतियोग्यतिरिक्ताधिकरणत्व प्रसङ्गात् । नन्वभावत्वमनधिकरणताप्रयोजकं भावाभावसाधारणमभावत्वंतु प्रतियोग्यनधिकरणताप्रयोजकमिति चेन्न; अवश्यकल्प्येनानधिकरणताप्रयोजकेनैव अभावे प्रतियोग्यनधिकरणत्वस्यापि सिद्धौ प्रयोजकान्तरस्य गौरवेणाकल्पनीयत्वात् । यच्च किञ्चाभावाधिकरणत्वयोग्येत्यादि-तन्न तद्योग्यताया स्तदभावाविरोधित्वात् । नहि दण्डोघटजननयोग्यो

ऽपि सर्वदा घटं जनयति । किंचैवमत्यन्ताभावस्य नित्यतया घटस न्निधानदशायामपि घटात्यन्ताभावस्य तत्र सत्त्वेन तद्दशायां घटाभावा नधिकरणत्वासम्भवात्, तत्प्रतीतेश्च घटाभावानधिकरणत्वं घटोपाधि कं, यथास्फटिके रक्तिमा जपोपाधिकइति कल्प्यते; अथवा रुमाग तकाष्ठे लवणसम्बन्धाल्लवणान्वयवद्घटाभावनिधिकरण घटसम्बन्धाद्भू तले साक्षादेव घटाभावानधिकरणत्वं भवतीति, कल्प्यते । नाद्यः एवमपि घटाभावस्य घटदशायां तत्रसत्त्वे तद्दशायां घटाभावप्रतीति प्रसंगात । यदि स्फटिकशुक्लताया इवोपाधिसंसर्गादप्रतीतिः कल्प्य- ते, तथापि घटदशायां घटाभावाधिकरणत्वप्रतीति भ्रमोनस्यात् । तस्मा दभावस्योत्पत्तिविनाशांगीकारेणाभावसम्बन्धस्य कादाचित्कत्वां गीकारेणवा घटदशायां घटभावानधिकरणत्वप्रतीते निर्वाहः कार्यः, नतूपाधिसंसर्गेण । अतएव नद्वितीयः; घटसंसर्गात् घटाभावानधिकर णत्वे सत्यपि घटाभावस्यापि विद्यमानतया घटदशायां घटाभावप्रती तिप्रसंगादेव । किंच घटाभावे विद्यमाने तदनधिकरणत्वं ब्रह्मणापि न तत्र सम्पादयितुं शक्यं । किंच एवंसति तृणादौदाह्यत्वानधिकरणे वह्निसम्बन्धाद्दाह्यत्वदर्शनात्, तत्र हेतुतया वह्नेरपि दाह्यत्वप्रसंगः, यद्विच वह्ने रदाह्यत्वे ऽपि तत्संसर्गाद्दाहः तदा घटस्य तदभावा- नधिकरणत्वानधिकरणत्वे ऽपि घटसम्पर्काद्भूतले तत्सिद्धिरस्तु । किं- च घटाभावाधिकरणे भूतले घटाधिकरणतायां किंनिबन्धनमभिमत- मायुष्मता? घटसामग्र्यां सत्यां तत्सन्निधानादेव घटाभावस्तत्र नतिष्ठ- तीति यदि; तर्हि घटसन्निधाने घटाभावो यतो नतिष्ठति अतए- व तदधिकरणत्वमिति पश्य । प्रतीत्यवैलक्षण्यंच नप्रसज्यते, प्रतियो गिवैलक्षण्यात् । अन्यथा देवदत्त पुत्रत्वयज्ञदत्तपितृत्वबुध्यो रेकविष्णु- मित्रविषययो रवैलक्षण्यप्रसंगात्, नचैकस्योभयप्रतियोगिकत्वानुपप- त्तिः; लाघवेन एकस्योभयप्रतियोगिकत्वे क्लृप्ते क्वचिद्दर्शनमात्रस्य अ- किंचित्करत्वात् । यच्च किंच योयस्येत्यादि तन्न; घटत्वात्यन्ताभावस्य घटभेदविरोधित्वेन घटभेदत्वात्वदुक्तभेदप्रयोजकानिबन्धस्तु व्यर्थएव ।

अभेदः प्रतियोगीतिपक्षोऽपि निर्व्यूढः, घटत्वस्यैवाभेदत्वात् तत्रच नान्योन्याश्रयशंकावकाशः। एवं प्रतियोगिनिरूपितो धर्म्यपि सुनिरूपः अभावः कुत्रवर्ततइति प्रश्ने कुत्रचिदित्युत्तरस्य सुवचत्वाव, भावेऽपिहि तथैव वाच्यम्। अतोऽधिकरणतावच्छेदकनियमस्य अभावे अदर्शनादभावे तन्निबन्धोनिर्निबन्धनएव। यत्र प्रतीयते तत्रेत्युक्तावपि न विरोधः, ईश्वरस्य यत्रप्रतीयते तत्रेत्युक्तेः। यत्र प्रतीयतइत्युक्तावपि नविरोधः, ईश्वरस्य यत्र तदभावप्रत्ययोनास्ति तत्र तदितिविवक्षितत्वात्। मास्तुवाधिकरणनिरूपणं नहानिः। किमधिकरणमिति पृष्टे तत्रोत्तरं वक्तव्यमितिचेत्; किमयं लौकिकानां प्रश्नः उतवादिनः, नाद्यः, विवक्षादिना तत्तज्जनैः कुत्र घटोस्तीति पृष्टे कुलालगृह इत्यादि रूपेण तै स्तैरेव पुरुषै रुत्तरदानेन तत्रास्मद्वक्तव्याभावात्। अभावेपि तत्तत्पुरुष प्रश्नस्यतैस्तैरेव पुरुषैरुत्तरदानेनास्माभिर्वक्तव्याभावाव। न द्वितीयः घटः कुत्रास्ति किं यत्परमाणुकोयं घट इत्यादि प्रश्नस्योत्तरानुक्तावपि तत्सिद्धिवत् अभाव सिद्ध्युपपत्तेः। किञ्चैव मत्यन्ताभावाधिकरणस्यापि दुर्निरूपतया तस्याप्यसिद्ध्यापत्तेः। भेदबुद्धेरभेदात्यन्ताभाव विषयत्वकल्पनञ्चानुपपन्नं। अतएव भेदवद्घट तदत्यन्ताभावादीनामपि अधिकरणस्य दुर्निरूपतया दूषणमिष्टमेव, कृत्स्नस्यापि मित्थ्यात्वादिति निरस्तम्; भेदप्रतीतेरन्योन्याभाव विषयत्वमधिकरणानिरूपणेन परित्यज्याभेदात्यन्ताभाव विषयत्वकल्पनानुपपत्तेः। यच्चोक्तं घटेऽपि घट भेदज्ञानं प्रमैव स्यादिति तन्न; तत्र तत्सम्बन्धस्य बाधितत्वात्। नच स्वरूपस्यैव सम्बन्धत्वात सर्वेषां स्वरूपाविशेषात् इदं स्वरूपं सम्बन्ध इदं स्वरूपं न सम्बन्धइति नियामकाभावः; सम्बन्धान्तराङ्गीकारेऽपि अत्रायं सम्बन्धो नात्रेति नियामकाभावात्। नायं स्वरूसम्बन्धपक्षएव दोषः, इदं घटस्वरूपं इदं पटस्वरूपं ब्रह्मस्वरूपमि-

त्यन्नापि नियामकाभावात् तत्स्वरूपाणा मप्यसिद्धिप्रसङ्गात्। प्रतीतिश्च सर्वत्र समाना। यच्चोक्तं भेदधर्मित्वस्यानिरूपणे इदमस्माद्भिन्न मिदंनेति व्यवस्थाया आकस्मिकत्वप्रसङ्गइति तन्न; निरूपणं यदि ज्ञानं, सिद्धमेव तत। यद्यवच्छेदकोक्ति स्तदा त्यन्ताभावस्य घटादेर प्यसिद्धिप्रसंगः, तत्राप्यवच्छेदकानुक्तेः। अतएव तेषामपि मिथ्यात्व मितिचेत्, तर्हि सत्यस्य वस्तुनो ऽनुगतधर्मिनियम्यत्वं कुत्र दृष्टमा युष्मता। प्रतीतिरपि सुनिरूपणा,एतौ परस्परं भिन्नौ इदमिदंनभवति अय मस्माद्भिन्नइत्यादीनां तत्प्रतीतित्वात्। यदुक्तमाद्ये द्वित्वज्ञानं भेदज्ञानाधीन मितितन्न, द्वित्वभेदयोरेकज्ञानविषयतया तज्ज्ञानयोः परस्परकार्यकारणभा वासिद्धेः। नचदूरस्थवनस्पत्योर्द्वित्वज्ञानप्रसंगः, दूरस्थत्वादेव भेदज्ञानाभा ववत्, द्वित्वज्ञानाभावस्या प्युपपत्तेः। यच्च परस्पराभावस्यापि भेदरूप त्वादिति तन्न, घटप्रतियोगिकभेदवान् पटः पटप्रतियोगिकभेदवान् घटः इतिहितस्यार्थः। तत्र भेदज्ञानस्य भेदज्ञानाधीनत्वाभावात। यदुक्तं द्वितीयेभेदभेदत्वज्ञानं विनातद्विशिष्टज्ञानानुपपत्तिरिति तन्न किं भेदभेदत्वज्ञानयो र्भेदःविशिष्टज्ञानत्वमभिप्रेतं उततयोर्भेदविशिष्टज्ञान विषयत्वं; नाद्यः, असिद्धेः। द्वितीय स्त्विष्टएव, तत्र दोषाभा वात। प्रतियोगित्वज्ञानंच नभेदज्ञानाधीनम् अतोनतत्प्रयुक्तदोषः। अतस्तृतीयोप्युपपन्नः। यच्चभेदज्ञानस्य तर्करूपज्ञानाधीनतया दूषणमुक्तं तत्तर्कस्याभाव ग्रहहेतुत्वाभावादेवनिरस्तं, सत्तानिश्चयार्थं तर्कापेक्षायां घटज्ञानादावपि तर्कसापेक्षत्वप्रसंगः किंच अनवधारणात्मकज्ञानस्य प्रागुत्पत्तौ पश्चात्तर्कावतारेसत्यवधारणात्मकज्ञानस्य उत्पत्तौको- विरोधः। यच्चतस्यैतस्माद्भेदसंशये व्यतिरेकानिश्चयेच सति एतस्य तस्माद्भेदनिश्चयोनेति सार्वजनीनमतस्तस्यैतस्माद्भेदनिश्चय एतस्य तस्मा द्भेदनिश्चयेहेतुर्वाच्यः, तथाचान्योन्याश्रयः इति; तन्न तत्रसंशयस्या प्रतिबन्धकत्वात। व्यतिरेकनिश्चयोऽपि न तत्र प्रतिबन्धकः अयंत-

स्माद्भिन्नोनेति ज्ञानानन्तरं समानसंवित्संवेद्यतया अनुमानेनवा सए तस्माद्भिन्नोनेति प्रतीतौ सत्यां सैवग्राह्यव्यतिरेकनिश्चयत्वात् तस्यै-तस्माद्भेदग्रहं प्रतिबध्नाति । स सम्बन्धिकपदार्थेषु सर्वत्रायमेव निर्वाहः । अतएव देवदत्तस्य पुत्रो यज्ञदत्तइति ज्ञाने सति देवदत्तो यज्ञदत्तापि तेति ज्ञानम् । अन्यथा भूतले घटात्यन्ताभावनिश्चयो घटे भूतलवृ-त्तित्वाभाव व्यतिरेकनिश्चय प्रतिबध्य इति तत्राप्यन्योन्याश्रया दत्य न्ताभावस्यापि साक्षिवेद्यत्वापत्तिः । नचेष्टापत्तिः, षष्ठप्रमाणविलोपाप-त्तेः । नच संशय पदोपादाना त्तत्संशयस्यचाप्रतिबन्धकत्वा दत्य-न्ताभाव निश्चये न सहेतुरिति वाच्यम्, अन्योन्याभावेपि तथा सं-भवात । किंच एतत्प्रतियोगिकभेदव्यतिरेकस्य एतन्निष्ठभेदप्रतियो-गित्वाभावव्याप्ति ग्रहात सएव प्रतिबन्धकः । किंचास्माकं पटस्य - घटाद्भेदः पटत्वं पटभेदश्च घटे घटत्वं, नच पटे पटत्वव्यतिरेकनि-श्चयः घटे घटत्वनिश्चयविरोधी । घटभेदव्यतिरेकत्व प्रकारनिश्चयः पटभेद त्वप्रकारकनिश्चय विरोधीतिचेत्, तन्न, सर्वघटभिन्नं नवेति संशयदशायां अयंपटोनेति निश्चयदर्शनात । यश्च प्रतियोगित्वज्ञानाधीनोन्योन्याश्र-य उक्तः, सोऽपि नास्त्येव, प्रतियोगित्वस्य पूर्वंगृहीतस्योपनय सम्भ वात् । सम्भवतिहि प्रतियोगिसन्निकर्षदशायां तदव्यवहितदेशे तद-भावग्रहणस्थले प्रतियोगिताप्रत्यक्षं, पूर्वजन्मगृहीत प्रतियोगितायाः स्त न्यपानेष्टसाधनतावत उपनयेऽपि न विरोधः । किंच प्रतियोगि-त्वस्य संसर्गविधयैव भानेन विशेषणतया भानाभावात् न पूर्वज्ञा नापेक्षा । नच प्रतियोगिद्वयसन्निकर्षाभावात् सम्बन्धप्रत्यक्षासम्भवः, अभावस्य सन्निकृष्टभूतलाश्रयत्वात्, प्रतियोगिनश्चोपनयात् सन्निक-र्षसिद्धेः । भिन्नइत्यत्र मत्वर्थसम्बन्धप्रतीतावपि न तस्य भेदज्ञानसा ध्यता, अन्वयव्यतिरेकासिद्धेः । यद्यन्वयव्यतिरेकौ स्यातां तत्कार णत्वं त्वयाप्येष्टव्यमेव । साक्षिणा युगपदेव भेदसम्बन्धयो र्भानांगी-कारे जन्यज्ञानेनैव तथातथा भानमङ्गीक्रियताम् । यापि घटभि-न्नः पट इत्यत्रानन्तरस्थोक्ता, सापि नास्त्येव, विरुद्धधर्मज्ञानस्य भेद

ज्ञानसाध्यत्वे स्थूलोहं चन्द्रः प्रादेशपरिमाण इत्यादीना मनुदयप्रसं गात् । यच्च भेदज्ञानस्य विरुद्धधर्मज्ञानहेतुत्वे हेतूपन्यासः, विरुद्धयो रेकत्र ज्ञानासम्भवादिति; सचात्यन्तासंगतः, घटः पटाद्भिन्नइत्यत्र - घटपटयोरुभयोरेव विशेषणविशेष्यभावज्ञानात् । विरुद्धयोरेकतया ज्ञा- यमानयो र्ज्ञानासम्भवादिति विवक्षायामपि असंगतिरेव, घटपटयोरेकत याज्ञानासिद्धेः । क्लृप्तकारणाभावेपीत्या द्युपसंहारश्चासंगतः, यदि भे दे भेदज्ञानेवा किंचित्कारणस्क्लृप्तिः, तर्हि तस्याभावेपि कार्येसति त- स्यैव मायिकतास्यात्, नतु भेदमात्रस्य तज्ज्ञानस्य वा । भेदे भेदव्यवहा रस्यच स्वरूपमेव विषयः; नच स्वेन सम्बन्धासम्भवः, तथासति - घटस्वरूपमित्यादि व्यवहारासम्भवात । आश्रयाश्रयिभावो भिन्नइत्यत्र न विषयः, किन्त्वन्य एव सम्बन्धः, सचाभेदेऽपीति नविरोधः । भेदा- न्तरांगीकारेवा किं बाधकं, यावत्प्रतीतिवस्त्वंगीकारे बाधकाभावात । घटे पटाद्यनेकभिन्न प्रतियोगिकानन्ताभाववत एकप्रतियोगिकानेकभे दसत्त्वेपि विरोधाभावाच्च । प्रामाणिकस्यार्थस्य मिथ्यात्वकल्पनादपि हि तदनुसार्यर्थान्तरकल्पनमेव युक्तम् ! अन्यथा पीनत्वेन रात्रिभो जनं नकल्प्येत । एवमन्योन्याभावो भेदइत्यत्र न काचिदप्यनुपपत्तिः । वैलक्षण्यं वा भेदः, यत्र भेदप्रतीतिरबाधिता तद्गतो धर्मएव वैलक्ष ण्यं । निर्धर्मकेच कालसम्बन्धादिस्वरूपमेव वा भेदः । अभेदेपि वि- शेषणविशेष्यभावो घटस्य स्वरूपमित्यादाविव नानुपपन्नः । यदुक्तं - पटात्मकपटाभेदविरोधित्वा भावा द्घटस्य घटः पटभेदो न भवतीति; तत्र भेदस्याभेदविरोधित्वं कुत्र दृष्टमायुष्मता, येनैवं ब्रवीषि । विरो धस्य भवद्भिरेवांगीकारात् अभेदइत्यत्र नञाविरोधप्रतीतेश्च विरो धो वाच्य इति चेत ? तर्हि यथाप्रतीति विरोधांगीकार्यः ; यस्य - यस्माद्भेदः तस्य तस्माद्भेदो विरुद्धोदृश्यते, पटस्वरूपं पटस्य पटा दभेदः, घटस्तु यद्यपि पटाद्भेदः ; अथापि घटस्यैव भेदः, नतु पट- स्य, अतः पटस्य घटाविरोधित्वेपि न दोषः । यस्य यस्मादभेदस्तस्य तस्माद्भेदो विरुद्धइत्युक्ते रसम्भवएव, यस्य यस्मादभेदस्तस्य तस्मा द्भेदस्याप्रसिद्धे विरोधाश्रयानिरूपणादिति चेन्न; तस्य तस्मादभेदे त

स्माद्भेदस्य तत्प्रतियोगिकत्वाभावस्यैव विरोधरूपतया विवक्षितत्वात् । अतः पटाद्भेदरूपे घटे पटप्रतियोगिकत्वाभाव लक्षणविरोधोऽस्त्येवेति न दोषः । ननु कथं पटप्रतियोगिकत्वाभावः, पटाद्भेदइति प्रतियोगित्वस्यैवाभिधानादिति चेत् ? अस्यैतस्माद्भेदइत्यत्र यष्षष्ठ्यर्थः सप्रतियोगितेति विवक्षितत्वात् । नच सप्रतियोगिभेदस्य निष्प्रतियोगिस्वरूपत्वानुपपत्तिः; सप्रतियोगिपुत्रस्य निष्प्रतियोगि देवदत्तत्वानुपपत्तिप्रसंगात् । नच धर्मधर्मिभावानुपपत्तिदोषः; धर्मधर्मिभावस्यैवासिद्धेः । भिन्न इति धर्मधर्मिभावः प्रतीयते । किन्तु ततोऽन्यएव कश्चित्सम्बन्धविशेषः । नचाभेदेसोप्यनुपपन्नइति वाच्यम् , घटस्य स्वरूपमित्यादौ सम्बन्ध दर्शनात् । सम्बन्धितावच्छेदकभेदस्यैव सम्बन्धप्रयोजकत्वात । यच्च–स्वमतोपपादनं तत्परमतस्यैव साधकं; तथाहि- अधिष्ठानसत्तैव अभेदइति यदुक्तं; तेन घटाद्भिन्नतया घटत्वं तत्तादात्म्यरूपं न सम्भवतीत्येतद्दूषणमुद्धृतम् । अभेदात्यन्ताभावस्यैव घटपटोभयनिरूपित भेदत्वांगीकारेण घटत्वात्यन्ताभावस्य घटान्योन्याभावत्व सम्भव स्समर्थितः । भेदोविभागव दुभयनिष्ठ इति यदुक्तं, अस्तुवा तत्सर्वोभेदएकएवास्तु किनश्छिन्नं भेदस्यैवोपपादनात् , घटः पटोनेत्यत्र घटः पट इत्यंशस्य घटपटोभयोपस्थापनपरत्वेन घटइत्यंशस्य निषेधाधिकरणानुपस्थापकत्वात् । किंच घटत्वात्यन्ताभाव एवघटान्योन्याभाव इतिव्यावहारिक मर्यादामनंगीकृत्यदुरध्वगमनं बुद्धिविध्वंसादेव । एवंच भेदोऽप्यभेदमेवसाधयतीत्यसंगतं । यच्चाधिष्ठानमेवघटादेः पारमार्थिकरूपमित्युक्तं, तन्न, किमत्रषष्ठीमुख्या उतामुख्या; मुख्यत्वे घटत्वादिकमपि स्वरूपंस्यात् इतितद्भावः कुतोभेदोनस्यात् । तदपरमार्थइति-चेत् अपरमार्थस्वरूपप्रतियोगिकएवभेदोस्तु, किंतवच्छिद्यते । किंचायं घटाद्भिन्न इत्युपदेशो नायं घटाद्भिन्नइति बुद्धिर्निवर्तते, अयंघटेन तुल्याधिष्ठानकइति बुद्धिर्ननिवर्तते, अतोनाधिष्ठानंभेदः । पदद्वयसामानाधिकरण्यार्थाभेदस्यैव नञर्थप्रतियोगित्वमनुभूयतइति यदुक्तं तन्न; तथासति-निषेधाधिकरणाप्रतीतिप्रसंगात् । घटः पटोनेत्यत्र घटः पट इत्यंशस्य घट पटाभेदोपस्थापन परत्वेन घटइत्यंश निषेधाधिकरणोपस्था -

पकत्वाभावात् । किंच इह घटोनेत्यत्रापीहघटइति घटभूतल-संसर्गं प्रतिपाद्यतन्निषेधः क्रियतइतिस्यात्, तथाच वायौरूपंनास्तीत्यादावप्रसिद्धसंसर्गनिषेधःस्यात, निराधिकरणनिषेधश्च, अनुवृत्तसदात्मस्वरूपमेव अभेदइत्यप्यसंगतं, घटस्सन् पटस्सन्नित्यभेदज्ञानाविरोधिनो घटपटौ भिन्नाविति ज्ञानस्यतदभावगोचरत्वानुपपत्तेः । नन्वियमनुवृत्तसत्तैवाभेदइति लौकिकानां ज्ञानाभावात् अभेदाभाव प्रतीतिरुपपद्यते, यथात्वन्मते घटकलशयोः घटत्वमभेद इतिज्ञानाभावात् घटत्वरूपाभेदज्ञानेपि घटकलशौ भिन्नाविति भ्रमइतिचेन्न ; त्वादृशामप्यनुवृत्तसत्तैव अभेदइति ज्ञानवतां घटपटयोर्भेदज्ञानदर्शनात्, घटत्वमेव घटकलशाभेद इति ज्ञानवतांतु घटत्वज्ञानेसति घटकलशभेदज्ञानं नभवत्येव । अपरमार्थस्य घटादेरात्मसत्तैव स्वरूपमित्यप्यसंगतं, तस्य ततो भिन्नत्वात । किंच दूरस्थ वनस्पत्योरभेदव्यवहारस्य कोविषयः, आत्मसत्तैवचेत् ? तयोरभेदज्ञानं प्रमा, साचदूरत्वदोषजन्या, समीपं गतस्य भेदज्ञानंभ्रमः, सचदोषनिवृत्तौजायतइतिपरिहास्यम् दूरस्थवनस्पत्योरभेदव्यवहारस्य मिथ्याभूत वनस्पतिस्वरूपमेवाभेदोविषयश्चेत् ? सर्वत्रसएवाभेदोऽस्तु । एतत्सर्वमभिप्रेत्यानुगृहीतं "यथासम्भवं स्वरूपधर्मयोर्भेदस्यानु प्रवेशोपलम्भात् " इति ॥

इति श्री वाधूलकुलतिलक श्रीनिवासाचार्य पादसेवासमधिगत परावरतत्त्वयाथात्म्येन तदेकदेवतेन तच्चरण परिचरण परायणेन तत्प्रसादलब्ध महाचार्या परनामधेयेन रामानुजदासेन विरचितायां शतदूषणी व्याख्यायां चण्डमारुताख्यायां भेददूषणनिस्तारो नाम त्रयोदशस्कन्धः ।

श्रीः ।

श्रीमतेरामानुजायनमः ।

श्रीमते निगमान्तमहादेशिकायनमः ।

॥ अथ चतुर्दशो वादः ॥

यदात्मानो वेदा यदनुगुणवर्णाकृतिजुषः
प्रमाणं यत्रैते नियतमपरिच्छेद्य विभवे ।
यएषामाहर्ता दनुजमथनो वाजिवदन
स्समेदेवश्श्रीमान्विदळयतु सम्मोहमखिलम् ॥
वेदप्रामाण्यवाङ्मात्र कंचुकच्छनमर्मणाम् ।
बुद्धसिद्धांतसुहृदां सन्तः पश्यंतु बाध्यताम् ॥

अतींद्रियेऽहि धर्मादौ वेदाः प्रमाणमिति साधितं प्रथमकाण्डे । तदुपजीवनेन सिद्धेंऽपि प्रामाण्यं शारीरके । अतस्तथाऽता ह्यागमस्तत्वानुष्ठानयो रप्रमाणमिति सर्वमीमांसकसम्मतं । तदेतत्संविन्मात्रव्य

(यदात्मानइति) यदधीनस्वरूपस्थितिप्रवृत्तिका इत्यर्थः । वर्णाः- अक्षराणि । आकृतिः-आनुपूर्वी । यदनुगुणेत्यादिना पदवाक्यस्वारस्यं विवक्षितं । फलितमाह (प्रमाणमिति) अनेन निर्विशेष पदवाक्यस्वारस्यं प्रामाण्यंच नास्तीतिगम्यते । आहर्ता-मधुकैटभहृतानां आहर्ता । मर्म -वेदबाह्यता । नहि प्रपंचमिथ्यात्वमते भेद प्रतिपादकवेदपूर्वभागस्य प्रामाण्यमभ्युपगम्यते, किं त्वद्वैतपरवेदान्तभागस्यैवेत्यत्राह (तदुपजीवनेनेति) अपौरुषयत्वादिसिद्ध वेदप्रामाण्योपजीवनेनेत्यर्थः । सामान्येन प्रामाण्येसिद्धेहि वेदान्तास्सिद्धे प्रमाणमुतकार्ये इति विचारसम्भवः, एवं च अपौरुषेयत्वादिभिः प्रामाण्यसिद्धेः पूर्वभागेऽप्यविशेषात्तस्यापि प्रामाण्यमंगीकार्यमितिभावः (अत इति) वेदविरोधादितिभावः । (तदेतदिति) मीमांसक सम्प्रतिपन्नं प्रामाण्याप्रामाण्यव्यवस्थापनं (संविन्मात्रेति) मिथ्याविषयत्वेन वेदाप्रामाण्य प्रसंगात्, अन्यथाबुद्धाग

तिरिक्त मिथ्यात्ववादे नसंगच्छते। तदुक्तमभियुक्तैः, ॥*॥ "प्रमाणत्वाप्रमाणत्वे पुण्यपापादितत्फलं । विध्यर्थवादमन्त्रार्थ नामधेयादिकल्पना ॥ सर्वेषु लक्षणेष्वेव स्वप्रमाणगणोस्थितिः । वचनव्यक्तिभेदेन पूर्वसिद्धान्तपक्षता ॥ कर्मभ्यः फलसम्बन्धः पारलौक्यैहलौकिकः । स र्वमित्याद्ययुक्तं स्या दर्थशून्यासुवुद्धिषु ॥*॥" इति। तदिह किंनाम वैषम्य माश्रित्य वेदाः प्रमाणं वुद्धाद्युपदेशानप्रमाणमिति निष्कृष्यते । किं-शब्दस्वरूपसत्यत्वासत्यत्वाभ्युपगमेन, उतपरमार्थभूत प्रामाण्याप्रामा

मस्यापि प्रामाण्यप्रसंगादितिभावः। व्यतिरिक्तशब्देन स्वतन्त्रवस्त्वन्तरप्रतीतिःस्यात्, तथाच स्वगतभेदमिथ्यात्वस्याप्रतीते स्सगुणवाक्यस्य प्रामाण्यं सम्भाव्येत, मात्रपदेनतु स्वगतभेदमिथ्यात्वसिद्धे स्सगुणवाक्यस्याप्यप्रामाण्यं फलितम् (प्रमाणत्वेति) प्रमाणत्वं प्रथमाध्यायार्थः, अप्रमाणत्वं विरोधाधिकरणार्थः स्तृतीयपादार्थोपलक्षणं। प्रामाण्यप्रतियोगितयोपस्थितत्वात् पादान्तरार्थापेक्षया प्रागेतदुक्तम् । वेदप्राण्यसमर्थनसिद्धमर्थमाह(पुण्येति)आदिपदेन मोक्षसाधनपरिग्रहः। "विधी"ति प्रथमपादार्थः। "अर्थवादमन्त्रे"ति द्वितीयपादार्थः। "नामधेयादीति" चतुर्थपादार्थः। आदिपदेन नामधेया पवादपरिग्रहः (सर्वेष्विति)द्वितीयाध्यायादिष्वित्यर्थः। सर्वेष्वेव लक्षणेषु परिनिष्पन्नं तत्तदधिकारिणस्तत्तत्परिकरविशिष्टतत्तत्कर्मभ्यस्तत्तत्फलसिद्धिरूपमर्थमाह (कर्मभ्यइति) इत्यादिसर्वमित्यन्वयः। आदिपदेन लौकिकार्थपरिग्रहः। तत् – तस्मात्, अर्थस्यमिथ्यात्वाविशेषात् । इह –प्रमाणा प्रमाणविप्रतिपत्ति विषययोर्वेदबाह्यागमयोः। किं वैषम्यमाश्रित्यवेदाः प्रमाणं परागमोनप्रमाणमिति स्वयमध्यवसीयते परं प्रतिचसाध्यते ; नकेनापि स्वयमध्यवसितुं परं प्रतिसाधयितुंचशक्यत इत्यर्थः । किमित्यादि व्यवहारविसंवादा त्प्राचीन विकल्पास्सर्वेऽभ्युपगमभेदपराः, क्वचिदुक्तिरुपलक्षणार्था। अभ्युपगमभेदेनिरस्ते अध्यवसायसाधनयोरुभयोरपि निरासस्सिध्यतीति तन्निरासः। भेदश्च–एकवाद्यभ्युपगमे इतरवादिनासत्यवादिशिरसामसत्यत्वादिशिरसांचयोऽयमाश्रयोऽभ्युपेतः तद्विपरीताश्च

प्याश्रयत्वेन, उतप्रमातृसत्यत्वासत्यत्वाभ्युपगमभेदेन, यद्वा सत्यभूतप्रमिति हेतुत्वाहेतुत्वाभ्यां, किंवा नित्यत्वानित्यत्वाभ्यां, अथानादित्वसादित्वाभ्यां, उतदोषतदभावाभ्यां, अथ व्यवहाराविसंवादसंवादाभ्यां, अथवा महाजनपरिग्रहबहिष्काराभ्यां, आहोस्वित् वेदत्वावेदत्वमात्रेण, अथाविद्याविशेष जनिताभिमानानभिमानमात्रेण, अथवेक्षुक्षीरादिवत्स्वात्ममात्र साक्षिकेणा निर्देश्यस्वरूपभेदेनेति । नाद्यः—असिद्धेः, नहियोगाचारादिभिः बुद्धप्रणीतोऽक्षरराशिस्सत्यइत्यभ्युपगम्यते , नापि भवता वेदरूपः । न वयं वेदस्य शशशृंगादिवदसत्यत्व मभ्युपगच्छामइतिचेत ? किं तर्हि सत्यत्वमभ्युपेतं । तदपि नेतिचेत् ? तर्हि कोविशेषः । व्यावहारिकापरपर्यायकाल्पनिक सत्यत्वाभ्युपगमइति चेन्न तैरपिसंवृति सत्यत्वाभ्युपगमात् । अयमेव तावद्विशेषइति चेन्न ; पर्यायमात्रस्य वैषम्यानाधायकत्वात् । अन्ततो वञ्चनार्थत्वस्या प्युभयोरविशेषात् । यथाहुः " तुल्यार्थत्वेपिचैतेषां मिथ्यासंवृतिशब्दयोः । वंचनार्थउप

तागोचरत्वं, तथासतिहिपरानिरस नमुपपद्यते, नतूभाभ्यां तुल्यरूपतयांगीकारइतिभावः । क्वचिदेवाभ्युपगमभेदविवक्षाया मसाधारणहेत्वभावात्, दूषणग्रन्थानुसाराच्च अभ्युपगमपरत्वमेषां विकल्पानामवगम्यते, अभ्युपगमभेदस्य विद्यमानत्वात् । सत्यत्वादिवैषम्यमाश्रित्य किंन्निष्कृष्यतइतियोजना (सत्यभूतप्रमितीति) प्रमितिशब्दोज्ञानपरः । बुद्धप्रणीतः वेदरूप इत्यत्र अवधारणं द्रष्टव्यं (तैरपीत्यादि) उभाभ्यामप्युभयत्रैकरूपस्य सत्यत्वस्यांगीकारान्न तन्निराकरणसंभवइतिभावः । परेणसर्वेषां तुच्छत्वमेवाभ्युपगम्याप्रामाणिकजनवंचनार्थं सांवृतिकमित्युच्यत इत्यत्राह (अन्ततइति) निरूप्यनिर्णयइतिभावः (तुल्यार्थत्वइति) यथापरेण तुच्छत्वमेवाभ्युपगम्याप्रामाणिकजनवंचनार्थं सांवृतिकसत्यमित्युच्यते तथावैदिकजनवंचनार्थं एषां सांवृतिकशब्दं परित्यज्यतस्यैवार्थस्य मिथ्याशब्देनोपन्यासः, यथालालेत्युक्तेजुगुप्साजायेतेति वक्तास

न्यासो लालावक्रासवादिवत् ॥ नास्तिक्यपरिहारार्थं संवृतिः कल्पिते तिच " इति । नच युष्माभिः संवृति सत्यत्वस्यावाच्यत्वं संकेतितं । उक्तंच - गूढपाषण्डिगोष्ठीगरिष्ठैः, तदेतत्संवृतिरिति गीयतइति । अस्तु वा तदभ्युपगमेन वैषम्यं, भवतातु निपुणधिया द्वयोरपि व्यावहारिकसत्यत्वमविशिष्टमेष्टव्यम् , व्यवहारानुबन्धित्वमात्रस्य तुल्यत्वात् । अतो भवता परित्यक्तपक्षपातेन न तद्बहिष्कारः कार्यः । यदि चाभ्युपगमसिद्धेन सत्यत्वेन प्रामाण्यसिद्धिः; तर्हि वैभाषिकाद्यागमानां तदभ्युपेतेन तेन तत्सिद्धिरनिवार्या । एतेन द्वितीय तृतीय चतुर्थानिरस्ताः । विशेषतोऽपिक्रमः--द्वितीयेतावत्प्रामाण्य लक्षणवैषम्यसिद्धिः प्रामाण्याश्रयत्वेनेति वदता साध्यमेवसाधनत्वेनोपन्यस्तं । ननु विशेषणविशिष्टाकारेण साधनत्वं, स्वरूपतस्तु साध्यत्व मितिचेन्न; विशेष्यासिद्धौ विशिष्टस्याप्यसिद्धेः । भवन्मतेविशेषणमप्यसिद्धमेव, वेदप्रामाण्यस्यापि ब्रह्मव्यतिरिक्तस्य पारमार्थ्यानभ्युपगमात् ; तदभिमानमात्रस्य चोभयोरविशेषात् । तृतीयेऽपि सत्यप्रमातृत्वेनकस्ताव

वशब्दोपन्यासः । (नास्तिक्येति) (संवृत्तिः कल्पितेतिचेति) नास्तिक्यपरिहारार्थमित्यन्वयः । संवृति रस्माभिरंगीकृतेति बाह्यानामुक्तिरपि वंचनार्थमित्यर्थः । वंचयितु मुद्युक्तैरपि युष्माभि स्सर्वैस्संभूया स्माभिस्संवृतिसत्यं संवृतिसत्यशब्देन न व्यवहर्तव्यं किन्तु मिथ्याशब्देनैव व्यवहर्तव्य मित्यसंकेतितत्वात् जाड्यमेव प्रकटीकृतं । असंकेतितत्वादेव त्वदीयैरभेदाभिधानादित्यत्राह(नचयुष्माभिरिति) (गूढेत्यादि)खण्डनकारोविवक्षितः, तत् बहिष्कारः । बाह्यतदागमयोर्दूषणान्तरमाह(यदिचेति)पारमार्थिकत्वातिरेकेण किंचित्सत्त्वमसिद्धमेव त्वदभ्युपगममात्रेण तत्सिद्धौवैभाषिकादिभिः स्वागमे पारमार्थिक सत्यत्वस्यैवांगीकारात्तेन तत्प्रामाण्यसिद्धिरनिवार्येत्यर्थः (एतेनेति) असिद्धेरित्यारभ्यैता - वत्पर्यन्तं उक्तेनेत्यर्थः । व्यावहारिकसत्यत्वमभ्युपगतमेवेत्यत्राह (तदभिमानेति) त्वदभिमानमात्रेण तत्सिद्धौपरागमेपि तेन सांवृति

दिष्यते भवता? किं संविन्मात्रमुत तदेवोपहित मुतोपाधिभेदएव। आद्ये व्याहत्यपसिद्धान्तौ। अनन्तरे प्रमातृत्वस्यसत्यतानभ्युपगमान्नेष्टसिद्धिः। तत्रस्वरूपमात्रस्य सत्यता योगाचारैरप्यङ्गीक्रियते। उपाधिमात्रपक्षेतु उपाधिस्वरूपस्य तत्प्रमातृत्वस्याप्यसत्यत्वमेवेति। नापिचतुर्थः, विकल्पासहत्वात्; तत्र किं प्रमितेस्स्वरूपतः सत्यत्वं विवक्षितमुतविषयतः। न पूर्वः, शास्त्रजन्यायाः प्रमितेर्भवता स्वरूपसत्यत्वानभ्युपगमात्। तेननु तदभ्युपगमेन तदागमस्यैव प्रामाण्यापातः। तुल्यैस्तुतदपिनेष्यतइति तएवभवतोऽत्रान्तरंगसंबन्धिनः। नाप्युत्तरः, विषयतः सत्यत्वस्यचिद्व्यतिरिक्तांशे भवतायोगाचारेणाप्यनभ्युपगमात्। चिदंशस्यविषयत्वेभ्युपगम्यमानेपि सत्यत्वमुभयसम्मतं; तत्र क्षणिकत्वनित्यत्वादिभेदस्तु दुरुपपा

कसत्यप्रामाण्याभ्युपगमात्. तस्यापि प्रामाण्यप्रसंगइत्यर्थः। सांवृतिकत्वव्यावहारिकत्वयो रभेदस्समर्थितएवेति भावः (व्याहतीति) निर्विशेषपरमात्रपदप्रमातृत्वोक्त्योः। (प्रमातृत्वस्येति) तदुपाधेरित्यर्थः। तत्र-विशिष्टे। स्वरूपं- विशेष्यस्वरूपं। अपिशब्देन त्वयापीति गम्यते। तदागमप्रमातर्यपि विशिष्टे विशेष्यभूतचैतन्यस्य सत्यताया युवाभ्यामंगीकारात् तदागमस्यापि प्रामाण्यप्रसंगइत्यर्थः। अध्यवसायसाधनयो रुभयोरप्यसम्भवद्योतनाय वादिद्वयग्रहणं (उपाधिमात्रेति) अत्र विकल्पोभिप्रेतः, तेन- योगचारेण। त्वदुक्तप्रयोजकस्य तेनाभ्युपगमात्तन्मतानुसारेण तदागमस्य प्रामाण्यं स्यादित्यर्थः। वेदेतु तस्य प्रयोजकस्य त्वयानभ्युपगमात्तस्य प्रामाण्यं त्वन्मते नस्यादित्येवकारार्थः (तुल्यैरिति) माध्यमिकैरनंगीकारात् उभयत्रापि तुल्यवदेव युवयोरप्रामाण्य सिद्धेरिति भावः (चिद्व्यतिरिक्तेति) अत्र स्वातन्त्र्यं विवक्षितं, 'तत्र क्षणिकत्वे' त्याद्युत्तरग्रन्थानुसारात् (चिदंशस्येति) विषयतस्सत्यत्वोक्तेरिति शेषः। यद्वा चिदंशस्य विषयत्वं त्वन्मते नास्त्येव, अभ्युपगम्यमानेपीत्यर्थः। नित्यस्य चैतन्यस्य क्षणिकत्वोक्तेरतदागमस्य विषयतोऽसत्यत्वं चिदंशेपीत्यत्राह (तत्रेति) कल्पितनित्यत्वादि विषयत्वे

दः, निर्धूतसमस्त धर्मविप्लवाहि संविद्भवद्भिस्तैश्च परिगृह्यते । नापिपंचमः, आविद्यकस्य वेदस्य भवतापि नित्यत्वानभ्युपगमात् ; अभ्युपगमेवा नित्य संसारादिप्रसंगात् ; क्षणिकत्वनित्यत्वादि कल्पनाभेदस्या प्यप्रयोजकत्वा त् । नापिषष्टः, अविद्याकल्पितत्वाभ्युपगमेनानादित्वासिद्धेः; अनादित्वे नैवेयं कल्पनेतिचेन्न, बाह्यैरपि सर्वज्ञसन्तानान्तरित धर्मदेशनासन्ता नस्य अनादित्वाभ्युपगमात् ; क्षणभंगतदभावादिकंतु वाक्यार्थयाथार्थ्यं प्रत्यकिंचित्करमेव । नापि सप्तमः, तत्पक्षेण तदागमस्य दोषमूलत्वाभा वात् ; भवत्पक्षेणतूभयोरपि दोषमूलत्वा विशेषात ; वक्तृदोषो- वेदे नाभ्युपेत इतिचेत् , किं दुष्टेन्द्रियादिषुसोऽभ्युपेतः? येनतदप्रा माण्यं सिध्येत् । अतो येनकेनापि दोषेणाप्रामाण्यं स्यादित्यनुसन्धत्स्व । अविद्याख्यदोषमूलत्वमपि वेदस्य नेष्टमितिचेदागतोऽसिपन्थानं, अतएव कल्पितत्वादेरपि प्रतिक्षेपात् । अकल्पितत्वेऽपि प्रतीतिबाधाभ्यांमिथ्यात्व मितिचेन्न, ब्रह्मणोऽप्यकल्पितस्य त्वदभिमतयुक्त्याभासैर्बाध प्रसंगात् ;

वा द्वयोरप्यप्रामाण्यं स्यादिति भावः (नित्य संसारादीति) सत्यत्वग्रहः । ननु काल्पनिकक्षणिकत्व नित्यत्वाभ्यां विशेषइत्यत्राह (क्षणिकत्वे- ति) काल्पनिकस्यासत्यत्वादप्रयोजकत्वं (अनादित्वेनैवेति) कल्पनाप्रवा हरूपेणानादिरित्यर्थः । धर्मदेशना–धर्मोपदेशः । तत्र प्रवाहानादित्व मस्त्वेवेतिचेन्न; त्वन्मते वेदेऽपि तस्यासत्त्वात । क्षणभंगविशिष्टं प्रवाहाना दित्वं बौद्धानां, अस्माकं तदभावविशिष्टमिति वैषम्यमाशंक्याह (क्ष- णभंगेति) अर्थयाथार्थ्यप्रयोजकताभिमानेनानादित्वादि कल्पपरिग्रहः, तत्र तदप्रयोजकविशेषण प्रक्षेपोऽनुचितइति भावः । परागमस्य दोष- मूलत्वं वेदस्य तदभावश्च किं तन्मतेनोच्यते उतत्वन्मतेन, इति वि कल्पमभिप्रेत्य दूषयति (तत्पक्षेणेति) (अतइति) नन्वसदर्थजनक- त्वेनाविद्यादोषः नत्वप्रामाण्यापादकतयेति चेत् ; एवमपि प्रमाणस्य मिथ्यात्वे तद्विषययाथात्म्येऽनाश्वासात् । नह्यारोपितधूमेन वह्निसि- द्धिः । पन्थानं–स्वपत्वमार्गं । (त्वदभिमतेति)दृश्यत्वदृग्दृश्यसंबन्धनिरासबा

अनिर्वचनीय कुसृतेश्च निरसिष्यमाणत्वात् । नाप्यष्टमः, कारणदोषा विशेषेविसंवा ग्रानुदयस्या किंचित्करत्वात् ; दोषज्ञानेनैव बाधसिद्धेः; तथा चाहुः– " दुष्टकारणबोधेतु सिद्धेऽपि विषयान्तरे । अर्थात्तुल्यार्थतांप्राप्य बाधोगोदोहनादिवत् ॥" इति । किंच बाह्यागमेषु नविसंवादस्त्वयासुवचः, अदृष्टस्यातीन्द्रियत्वेन तत्र तदयोगात् ; दृष्टार्थेषु विषहरणाद्युपदेशेषु तत्राप्यविसंवाददर्शनात् ; तत्त्वविषयेतु प्रत्यक्षादिविसंवादस्य तद्विरोध गम निकाकुसृतेश्चोभयतुल्यत्वात् ; वेदाधीनस्य संविन्नित्यत्वादिरूपविसंवादस्य वेदप्रामाण्यसिद्धिसमनन्तराभिधेयत्वात् ; अन्यथा विपरिवर्तप्रसंगात् । एतेन

थाविवक्षिताः । ब्रह्मणोदृश्यत्वमन्यत्रसमर्थितमेव । दृग्दृश्ययोस्संबन्धासिद्धौ दृगधीनासिद्धिर्ब्रह्ममिथ्यात्वं जडप्रपंचवदेवस्यात्, सर्वशून्यवादेन ब्रह्मणोऽपि बाधोदृश्यते । शून्यवादस्याप्रमाणत्वात् कथंतेनबाधइतिचेत् ? तदप्रामाण्यं कथमवधृतं त्वया, प्रमाणविरोधादितिचेत् ? हन्ततर्हिततएव प्रपंचामिथ्यात्वमपि नसिध्येत् । अस्तिहि प्रत्यक्षादिभिः पूर्वभागेन उत्तरभागेऽपि सविशेषवाक्यैः प्रपंचनिषेधकस्यविरोधः । अतो वेदान्ताः प्रपंचस्यापि निषेधकानस्युः । प्रतीतिबाधाभ्या मनिर्वाच्यत्वरूप मिथ्यात्वसिद्धिरपि नेति वक्ष्यतइत्याह (अनिर्वचनीयेति) (दोषज्ञानेनेति)बाधः-अर्थाभाववुद्धिः । (दुष्टकारणेति) विसंवादेन साक्षादर्थाभावएव परिच्छिद्यते, कारणदोषस्तु यद्यपि नसाक्षादर्थाभावं परिच्छिनत्ति, इदं ज्ञान मप्रमाणं दुष्टकारणजन्यत्वादिति साक्षादप्रामाण्यस्यैवबोधनेन भिन्नविषयत्वात् ; अथाप्यप्रामाण्यस्यार्थाभावाधीनतया तत्परिच्छेदेविषयाभावस्याप्यर्थात्परिच्छेदात् , विसंवादेनतुल्यकार्यत्वादर्थाभावपरिच्छित्तौ नविसंवादमपेक्षते ; यथा प्रणयनार्थतया चमसवदविहितमपिगोदोहनं प्रणयनाश्रितत्वेन प्रणयनस्य स्वेनावश्यंकर्तव्यत्वात् , अर्थाच्चमसेनतुल्यकार्यत्वात् प्रणयनसिद्धौच चमसंनापेक्षतइत्यर्थः । बाधः-अनपेक्षत्वं (त्वयेति) प्रत्यक्षादिविसंवादो ऽस्माभिस्सुवचः (संविन्नित्यत्वादीति) तद्गोचरज्ञानं विवक्षितम्(एतेनेति) कारणदोषाविशेषमहाजन

नवमोऽपि दत्तोत्तरः; बहुजनविवक्षायां समानत्वात्; निपुणजन विवक्षायां सर्वेषामप्यज्ञानभ्रमादि कलुषितत्वाभ्युपगमेन त्वत्पक्षे तदसिद्धेः; हेतुदर्शनरहित पुरुषपरिग्रहविवक्षायामपि परमार्थतः कारणदोषे निर्णीते दोषानभिज्ञैः भ्रान्तैरेव परिग्रहइत्यायातं, ततश्च नविशेषः । नापि दशमः, संज्ञावैषम्यमात्रस्या किंचित्करत्वात्; तद्व्यवहारभेदरूपस्य तु किंचित्करस्य प्रस्तुतानुपयोगात् । नाप्येकादशः, तथाविधाभिमानस्य पुरुषभेदेनोभयत्रापि सुलभत्वात्; नतत्र वयं प्रामाण्यमभिमन्यामहइतिचेत्तेवा किं वेदे; अतो यस्य कस्यचिदभिमानसिद्धं प्रामाण्यमिति त्वयैव स्थापनीये त्वमेव कथं तत्प्रामाण्यं नाभिमन्यसे । द्वादशस्तु परिशिष्यते; तत्र स्वात्मशब्देन किं सर्वेषां प्रमातॄणां स्वात्मा विवक्षितः, उतभवदन्तरात्मा । नाद्यः, इक्षुक्षीरादिरसभेदवत् "ज्योतिष्टोमेन स्वर्गकामो यजेत" 'चैत्यं वन्देत स्वर्गकाम' इत्यनयोः प्रामाण्याप्रामाण्य लक्षणभेदस्यान्यैरनुपलम्भात्; नेतरः, भवत्स्वात्मानमपिहि वयमितरात्मसमानतयैवोन्नयामः; रत्नतत्वपरीक्षकवदहमतिशयित प्रज्ञइति चेत्, सौगतेनाप्येवमुक्तेकिमुत्तरं; मध्यस्थदृष्टिरिति चेन्न तदसिद्धेः; अस्तु वेदप्रामाण्यमप्यविचारितरमणीयं किं न श्छिन्नमिति चेत्?

परिग्रहस्या किंचित्करत्वादित्यर्थः । दोषान्तरमाह (बहुजनेति) (सर्वेषामिति)वेदतदर्थयागस्वर्गसाध्यसाधनभावादिज्ञानस्य त्वयाभ्रमत्वाभ्युपगमादित्यर्थः (हेतुदर्शनेति) दृष्टलाभादिरूपहेतुदर्शनवद्भिः परिगृहीतोबौद्धागमः, वेदस्तुतद्रहितैः परिगृहीतइति वैषम्यमित्यर्थः । (परमार्थतइति) दोषमूलस्यापि परिग्रहो दोषज्ञानेसति दृष्टहेतुदर्शनात, हेतुदर्शनाभावेतु दोषाज्ञानेन प्रामाण्यभ्रमात, तत्र प्रथमस्याभावाच्चरमः परिशिष्यते, ततश्चेहतुदर्शनवत्पुरुषपरिग्रहात अविशेषइत्यर्थः (संज्ञेति) अन्यथा परिवर्तप्रसंगादिति भावः । (अस्त्विति) नः- अनिर्वचनीयत्ववादिनामिति हृदयं, अविचारितरमणीयत्वस्य मिथ्यात्वसाधक-

प्रथमं तावद्वैपम्योपपादनाभिमानः, ततो वैदिकत्वविडंबनं, पश्चात्त त्वानुष्ठान व्यवस्थाभंगः, ततश्च स्वर्गापवर्गगमनसरणेः । एवंच सौगतसौहार्दभयपलायितेन द्वैवर्गिकमत महादुर्गमेवानुप्रविष्टमिति । अत्रच प्रामाण्यादेरप्रयोजका एव केचित्कल्पा मन्दमतिसम्मोहशमनाय- उपन्यस्य निरस्ताः । एतदभिप्रायेण यादवप्रकाशैरुक्तम् —

" वेदोऽनृतो बुद्धकृतागमोनृतः प्रामाण्यमेतस्यच तस्यचानृतम् ।
वोद्धानृतो बुद्धिफले तथानृते यूयंचबौद्धाश्च समानसंविदः " ॥ इति ।

किंच प्रत्यक्षतोऽनुमानतश्च भवद्भिर्निर्विशेपं प्रसाध्यते, त तश्चप्राप्तार्थतयापि शास्त्राप्रामाण्यं, द्वित्रावयवानुमानवाक्यपाठमात्रेण ब्रह्म- विचारनिष्पत्तौ कःखलुजडः श्रुतिनिकरशिखरपरिशीलन प्रयासादि- कमारभेत । नब्रूमस्तर्ह्यनुमानादिकमस्मत्सिद्धान्तसाधनतयेतिचेत् ? किमि दं श्रुतिप्रामाण्यभंगभीरुतया, उतानुमानादेस्तत्रप्रामाण्यायोगात् । नाद्यः, भवद्भिरनुक्तेपि तत्सद्भावमात्रेण श्रुतिप्रामाण्यभंगस्य दुर्वारत्वात् ; संप्लवो दयस्यच शास्त्रयोन्यधिकरणानिरस्तत्वात् । न द्वितीयः, ज्ञानोदयादेवा

स्यात् व्यावहारिकप्रामाण्यं नहीयतइतिभावः । (प्रथममिति) एव मविचारित रमणीयत्वे सतितादृशं प्रामाण्यं बुद्धागमेऽपि स्यात् , त न्नैववास्यात , ततश्च प्रमाणाप्रमाण विभागादिकमनुपपन्नमित्यर्थः (अ भिमानइत्ति)'च्छिन्न'इति विपरिणामेनानुषंगः । (सरणेरिति) भंगइत्यनुषं गः (सौगतेति) उक्तरीत्यावेदवत्सुगतागमस्यापि प्रामाण्याभ्युपगम- प्रसंगभीत्यावेदप्रामाण्यस्यपरित्यागे चार्वाकमतानुप्रवेशस्स्यादित्यर्थः । अविसंवादादिकल्पानां प्रामाण्याप्रामाण्यप्रयोजकत्वा च्छंकितुं योग्य- त्वेऽपि स्वरूपसत्यत्वादिकल्पा स्तदप्रयोजकाः कथं शंकिताइत्यत्राह (अत्रचेति) ज्ञानजनकत्वाभावा दप्यप्रामाण्यमित्याह (द्वित्रेति) अध्ययनविधिवलादध्ययनमात्र सम्भवेपि अर्थज्ञानार्थं तदर्थविचारादि- प्रयासो नभवतीत्यभिप्रायेण प्रयासादिकमित्युक्तं (भवद्भिरिति)

नुत्पत्तिलक्षणस्याप्रामाण्यस्यासिद्धेः; एककोटिनियततयाच संशयरूपस्याप्यभावात् ; निपुणतर प्रयोगेच प्रयोगदोषाणामभावात् । विपर्ययलक्षणं तु विषयापहारमन्तरेण न सिध्यतीति । तथा चसति तुल्यविषयतया तत एव शास्त्रमप्यप्रमाणमिति घट्टकुट्यां प्रभातं । एवंच सति अद्वैतवाक्यानां नतत्त्वावेदकत्वं द्वैतवाक्यानामेव तत्त्वावेदकत्वमित्यभिमतविपर्यासश्च । अंततः शास्त्राप्रामाण्यमप्यस्माकमिष्टमेवेति चेन्न पूर्वन्यायेन दत्तोत्तरत्वात् । असन्दिग्धाविपर्यस्तबोधोदयस्य दुरपह्नवत्वात् । बोध्यमिथ्यात्वेच वैदिकव्यपदेशकंचुकं मुंचतस्ते बाह्यसमयसुरंगा प्रवेशमन्तरेणकथासमरसीम्निसंशयापत्तेः । तदेतदखिलमभिसन्धाय भाष्येसन्मात्रग्राहिप्रत्यक्षप्रतिक्षेपाय गृहीतमात्रग्राहित्वेन सन्मात्राभिमतब्रह्मस्वरूपपरवेदान्तवाक्यानामप्रामाण्य प्रसंग उदाहृतः । स्थलान्तरेष्वपि प्रकीर्णं शेषमवधातव्यमिति ।

इति शतदूषण्यां वेदप्रामाण्यपरिग्रहानुपपत्ति वादः चतुर्दशः ॥ १४ ॥

स्वार्थानुमानादपि तत्सिद्धेरित्यर्थः (निपुणतरेति) सन्निर्विशेषं सत्त्वाद्व्यतिरेके घटवदिति प्रयोगो विवक्षितः । नचाप्रयोजकत्वं त्वयावक्तुं शक्यं, दृग्दृश्यसम्बन्धानुपपत्त्यादि तर्काभावे बाधकतर्कसद्भावेच-सविशेषश्रुतिषु जाग्रतीषु निर्विशेषश्रुत्यापि निर्विशेषासिद्धिप्रसंगात् । (अन्ततइति) परिहारान्तरस्यापि कथनात्पौनरुक्त्यं । अविपर्यस्तत्वमासिद्धमित्याह (बोधेति) मिथ्यात्वं विषयतो ग्राह्यं (स्थलान्तरेष्विति) शास्त्रप्राबल्यनिरूपणभाष्ये–"अबाधितस्यापि दोषमूलस्यापारमार्थ्यनिश्चयात् " इति । अत्रेदमनुसन्धेयम् । किन्तत्प्रामाण्यं यद्वेदे प्रसाध्यते बाह्यागमेषु निषिध्यतेच । नतावदबाधितार्थकत्वरूपं तत्त्वावेदकत्वं, वेदे पूर्वभागे तदभावात्। ननु यस्य यादृशं रूपं तदावेदकत्वमेव तत्वावेदकत्वं, ब्रह्मणश्च कल्पितं द्वैतरूपं अद्वैतरूपंचास्ति; तदुभयं सविशेषनिर्विशेषवाक्यैः प्रतिपाद्यते, यागादेश्च स्वर्गसाधनत्वं रूपमिति पूर्वभागे तदावेदकत

था प्रामाण्यं, क्षणिकत्वादित्वतद्रूपमेव बाह्यागमेनावेद्यतइति न तस्य - प्रामाण्यमितिचेन्न; वेदस्याप्रमाणतया सर्वसम्प्रतिपन्न शुक्तिरजतवाक्य तुल्यत्वप्रसंगात । नच शुक्तिरजतवाक्यमपि प्रमाणमेव ? तद्वाक्यस्या प्रमाणतया सर्वसम्प्रतिपत्तेः । प्रमाणविरुद्धार्थकल्पना साहसम- धिरूढेनापि त्वया तदप्रामाण्यरक्षार्थं सत्तात्रैविध्यं कल्प्यंते , तद्भंगमंगीकुर्वतापि तदप्रामाण्यरक्षार्थं भूयसींवैय्याकुलयनुभूय - ते, तदर्थमेव यथार्थख्यातिवादिभिरख्यातिसंवलनमिष्यते । परोक्षेप्यनिर्व चनीयोत्पत्तिपक्षे बाह्यागमेपि प्रामाण्यप्रसंगश्च । तदनंगीकारेपि किं - यस्य यद्रूपं वस्तुतस्तद्रूतस्य तस्य रूपस्य प्रतिपादकत्वं विवक्षितं, किंवा तस्य तस्मिन् प्रतिपादनं, आद्ये चैत्यवन्दनादि वाक्यस्यापि- वस्तुतो यागादिगतस्वर्गसाधनतादि बोधकत्वात् प्रामाण्यप्रसंगः ; द्वितीये अद्वैतवाक्यानां प्रामाण्यं नस्यात् , तस्य तस्मिन् बोधनमित्य स्य तत्प्रकारक तद्विशेष्यकत्व पर्यवसानात । एतेन तद्वति तत्प्रकारक त्वमपि निरस्तम् , अद्वैतवाक्ये तदसिद्धेः । ननु अबाधितार्थकत्वमेकं प्रामाण्यं, तदद्वैतवाक्ये; तद्वति तत्प्रकारकत्वमपरं, तद्वैतवाक्यइतिचेत् ? किं वेदप्रामाण्येसिद्धे तदुपजीवनेन प्रामाण्यभेदः कल्प्यते, उतासि- द्धे, आद्ये किन्तत्प्रामाण्यं अबाधितार्थकत्वं तद्वति तत्प्रकारकत्वंवा? आद्ये भेदवाक्यसाधारण्येन तत्कल्पनात्तद्वति तत्प्रकारकत्व प्रामाण्यकल्प- नानुपपत्तिः । द्वितीये अद्वैतवाक्यसाधारण्या दबाधितार्थकत्व प्रामाण्यक ल्पनानुपपत्तिः । नापि व्यधिकरणप्रकारकत्वाभावः, तस्य वेदे सिद्धौ त- द्व्यतिरिक्त प्रामाण्यकल्पने प्रयोजनाभावात् । किंचाबाधितार्थकत्वं प- रित्यज्य शुक्तिरजतवाक्यसाधारणं व्यधिकरणप्रकारकत्वं ; कथमिव पूर्वं वेदे प्रामाण्यतया कल्प्येत । एतेन प्रातिभासिकार्थकान्यत्व विशे षित मिदमेव प्रामाण्यमिति निरस्तं, एतस्य प्रामाण्यत्वे प्रामाण्यभेद कल्पने मानाभावात् । किंच प्रातिभासिकान्येति विशेषणंच व्यर्थं । व्यधिकरणप्रकारकत्वाभावे सत्यपि बाधितार्थकत्वेन शुक्तिरजतज्ञान- स्याप्रामाण्या त्तद्वारणात्सार्थकमिति चेत् ; तथासति व्यधिकरणप्रका रकत्वाभावे बाधितार्थकत्वा दप्रामाण्ये ऽबाधितार्थकत्वमेव प्रामाण्यम् ।

ननु प्रमाणपदमुख्यार्थजनकत्वं प्राग्वेदे साध्यते, अनन्तरंच द्वैताद्वैतश्रुत्यनुसारा द्द्विधाप्रमाशब्दार्थनिर्णयः क्रियते इति चेत्; नहीयं वैधीकल्पना, येन कल्पनाक्रमनियमस्सिध्येत; किन्तु न्यायाधीना, ततश्च अनिर्वचनीयसिद्धौ तद्बुद्धिव्यावृत्तमबाधितार्थकत्वं तद्व्याप्यधर्मोवा कश्चित्प्रमापदप्रवृत्तिनिमित्तमिति कल्प्येत, तदसिद्धौ तद्वति तत्प्रकारकत्वं तद्व्याप्यधर्मोवा कल्प्येत। किंचैवं वेदाधीने प्रमापदार्थावधारणे लौकिकानां प्रमापदव्युत्पत्त्यभावप्रसंगः। अपिच अपौरुषेयत्व स्वतः प्रामाण्याभ्यां हि वेदप्रामाण्यसिद्धिः, तत्रापौरुषेयत्वं भ्रमप्रमादविप्रलिप्साकरणापाटव मूलत्वसम्भावना निरसनमुखेन प्रामाण्यं साधयति, तत्र भ्रमप्रमादादीना मयाथार्थ्यहेतुत्वनिर्णयपूर्वकं अपौरुषेयत्वेन निर्णीयमानं प्रामाण्यं याथार्थ्यमेव स्यात्, ननु प्रमापदमुख्यार्थजनकत्वमात्रं; प्रामाण्यस्य स्वतस्त्वंच तद्योग्यतत्स्वरूपविशेषनिर्धारण पूर्वकमेवनिर्णीयेतेतिन प्रमापदार्थनिर्णयो वेदापेक्षः। अपिच तथा कल्पनायामपि कल्प्यमानं तच्छुक्तिरजतवाक्यव्यावृत्तमेव कल्प्येत, तथाच कथं तद्विरोधात् तत्साधारणं तद्वति तत्प्रकारकत्वं प्रामाण्यमिति कल्प्यते। एतेन स्वरूपार्थगोचरत्वं प्रामाण्यमिति निरस्तं, शुक्तिरजतवाक्यसाधारण्यात।

नच-प्रातिभासिकान्यत्वविशेषणं युक्तं, स्वरूपार्थकत्वे सत्यपि तत्र बाधात्। प्रामाण्याभावे भेदवाक्यानां कथं प्रामाण्यसिद्धिः? ब्रह्मप्रमान्येना बाध्यविषयत्वात प्रामाण्यमितिचेन्न; शुक्तिरजतवाक्यस्य घटज्ञानाबाध्यविषयकत्वात् प्रामाण्यप्रसंगात्। शुक्तिरूपाधिष्ठानतत्त्वज्ञानेन बाध्यत एव रजतं, ततएवा प्रामाण्यमिति, अन्येन बाधो न तन्त्रमिति चेत्; तर्हि द्वैतवाक्यस्यापि तदर्थाधिष्ठान ब्रह्मज्ञानेन बाधोऽस्तीति कथं नाप्रामाण्यम्। किंच किं बाधोनिवृत्तिः, उतसाध्याभाव प्रमा। आद्येबाह्यागमस्यापि प्रामाण्यप्रसंगः, तदर्थस्य विशेषणविशेष्यसंसर्गात्मकत्वस्य ब्रह्मज्ञानेनैव निवृत्तेः। नद्वितीयः, ब्रह्मप्रमान्येन प्रपञ्चोमिथ्येति ज्ञानेन प्रतीयमानाभाव प्रतियोगिविषयत्वात द्वैतवाक्यानाम प्रामाण्यापत्तेः। ननु वेदप्रामाण्यसमर्थनदशायामेव द्विविधं प्रामाण्यं द्वैताद्वैतवाक्यपर्यालोचनया कल्प्यत इति चेन्न;

एकस्यैव प्रामाण्यस्य लोकसिद्धतया तस्यैव वेदेकल्पनीयत्वात । अ-
न्यदपि किञ्चित् यदिप्रामाण्यमिति त्वयाव्यपदिश्यते कामंघटोऽपि
तथाव्यपदिश्यतां, न संकेतं वयंवारयामः ! नद्वितीयः; कल्पकाभावात,
भेदविधिनिषेधाभ्यांहि तत्कल्पनं, प्रामाण्यस्यैवासिद्धौ कथं वेदमूला-
कल्पना । ननु युक्तिभिः प्रपञ्चमिथ्यात्वे सिद्धेव्यवहारानुरोधात् त
द्वति तत्प्रकारकत्वं प्रामाण्यमिति कल्प्यते, निरधिष्ठान भ्रमायोगेन
अधिष्ठानेसिद्धे तस्याप्यधिष्ठानान्तरकल्पनांया मनवस्थाप्रसंगेन तस्याबा
ध्यत्वे तत्प्रतिपादकस्या बाध्यार्थकत्वेचासिद्धे तस्य तदेव प्रामाण्यमि-
तिकल्प्यतइतिचेन्न; मिथ्यार्थस्योपपत्ति सापेक्षत्वाभावस्य युष्माभिरेवा-
भिधानात्, अनधिष्ठानानवस्थयोरदोषत्वात । अन्योन्याध्यासेऽपि नक्ष
तिः । श्रुतेरपि प्राप्तार्थतया अनुवादकत्वप्रसङ्गश्च । नचज्ञानानन्दात्मकत्वं
न्यायेनासिद्धं श्रुत्याबोध्यत इति वाच्यम् ; मिथ्यावस्तुनोदृश्यधीनसिद्धि
तया अधिष्ठानातिरिक्त दृश्यङ्गीकारेऽधिष्ठानस्यापि दृश्यत्वान्मिथ्यात्वप्रस-
ङ्गेन तस्यैव दृशित्वसिद्धेस्स्वप्रकाशत्वस्यापि तत एव सिद्धेः; ज्ञाना
तिरेकेण ज्ञातुर्निरासात् तस्यैवात्मतया निरुपाधिप्रेमास्पदत्वेन आ
नन्दरूपताया अपि सिद्धेः । अधिष्ठानान्निवर्तकाभावाच्च त्रिविधपरिच्छे
दाभावसिद्धेश्च । अथैवं कल्प्येत, तद्वति तत्प्रकारकत्वं प्रामाण्यं, त-
दभावति तत्प्रकारकत्वमप्रामाण्यं, शुक्तिरजतवाक्यन्तु प्रमाणमेव, अद्वैत-
वाक्यन्तु न प्रमाणं नाप्यप्रमाणं, किन्तूभयविलक्षणं, तत्रप्रमाणव्यपदेशोऽ
प्रामाण्याभावमात्रेणगौणः, बाह्यागमस्तु अतद्वतितत्प्रकारकएव, अत-
स्सिद्धः प्रमाणाप्रमाणनिष्कर्ष इति; एवंहि शुक्तिरजतवाक्यं
प्रमाणं, वेदान्तवाक्य मप्रमाणमिति साधुसमर्थितः प्रमा-
णाप्रमाणविभागः । अपिच बाह्यागमः प्रमाजनकान्यत्वा-
द्वा भ्रमजनकत्वाद्वा अप्रमाणमिति वाच्यम्, अन्यथा तत्राप्रमाणव्य
पदेशस्य पारिभाषिकत्व प्रसंगात, एवंच सति आद्ये अद्वैतवाक्या-
नां बाह्यागमवत अप्रामाण्यमनिवार्यम् । द्वितीये त्वन्मते प्रपञ्चज्ञा
नस्य भ्रमरूपत्वात् भेदवाक्यादीनामप्रामाण्यं । ततश्च तद्वति तत्प्र-
कारकत्वं न प्रामाण्यं तदभाववति तत्प्रकारकत्वमपि नाप्रामाण्यं ।

ननुभ्रमजनकत्वादेव बाह्यागमोऽप्रमाणमित्युच्यते, भ्रमश्च तदभाववति तत्प्रकारकः, प्रपञ्चज्ञानं शुक्तिरजतज्ञानश्च न भ्रमः, तत्र तद्व्यपदेशो बाधसाम्यादौपचारिकः । नचैवंसति प्रामाण्यस्य स्वतस्त्वभंगप्रसंगः, ज्ञानमात्रसामग्रीप्रयोज्यत्वंहि स्वतस्त्वं, अद्वैतवाक्यस्यापि ज्ञानसामग्रीत्वात् तज्जन्यज्ञाने प्रामाण्याभावाच्चेति वाच्यम्; सविशेषगोचर ज्ञानसामग्रीग्राह्यत्वस्यैव स्वतस्त्वरूपत्वात । युक्तंचैतत , तत्रैव प्रामाण्याप्रामाण्ययोः प्रसंगात् । मात्रपदश्चन कार्त्स्न्यपरं, अपितु प्रयोजकान्तरव्यवच्छेदकं, एवंच प्रामाण्यस्य स्वाश्रयज्ञानसामग्र्यतिरिक्त प्रयोजकानपेक्षणान्न स्वतस्त्वविरोधः । किञ्च कार्यतानवच्छेदकत्वमेव प्रामाण्यस्यस्वतस्त्वं, अप्रामाण्यस्यपरतस्त्वञ्च कार्यतावच्छेदकोटिप्रवेशः, तद्यथा शाब्दभ्रमत्वस्य योग्यभ्रमजन्यतावच्छेदकत्वे । अद्वैतवाक्यस्य प्रमाजनकत्वाभावेपि न प्रामाण्यस्य कार्यतावच्छेदकत्वप्रसंगः । नच प्रपंचज्ञानस्य शुक्तिरजतज्ञानस्यच भ्रमत्वाभावे दोषजन्यत्वाभावप्रसंगः, बाधितार्थकत्वादेव तदुपपत्तेः । नचैवं सति दोषस्याप्रामाण्यप्रयोजकत्वं न स्यात्; दोषे सत्यप्यप्रामाण्यादर्शनादिति वाच्यम् ; अविद्यारूपदोषस्या प्रामाण्यप्रयोजकत्वाभावात् , परसम्प्रतिपन्नयोग्यताभ्रमादीनामेव तथात्वात् : अविद्याया दोषत्वं चार्थाभासोत्पादकत्वात् इति ।

मैवं - प्रपंचज्ञानस्य भ्रमत्वाभावे "भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः" इत्यादिविरोधात् , भ्रान्तिशब्दस्योपचरितार्थत्वे भेदवादिनां विजयशङ्खोध्मायेत । किंच बाह्यागमस्यापि प्रामाण्यमेव स्यात् , प्रातिभासिकविषयत्वात् । परोक्षे प्रातिभासिकं नास्त्येव, तत्रान्यथाख्यातेरेवांगीकारादिति चेन्न; अनिर्वचनीयासिद्धिप्रसङ्गात्, ख्यातिबाधाभ्यां हि तत्सिद्धिः, तयोः परोक्षे प्यविशेषे तत्र कथं ताभ्यां न तत्सिद्धिः । सन्निकर्षाभावेनापरोक्षेऽन्यथाख्याते रसम्भवादेव तत्रानिर्वचनीयसिद्धिरिति चेन्न ; तवापि शुक्तिरजतापरोक्ष्याभावप्रसंगात , साक्षिभावत्वस्यांगीकारात साक्षिणश्चानादित्वान्न सन्निकर्षापेक्षेति चेन्न; घटादिज्ञानइवचैतन्य स्फोरकाविद्यावृत्ते रिदमाकारान्तः करणवृत्तेर्वा सन्निकर्षापेक्षत्वात् । ननु तद्विषयणीवृत्ति स्तत्सन्निकर्षजन्या; इदमाकारवृत्ते रिदमर्थभूत शुक्तिसन्निकर्षएवापेक्षितः,

ननु रजतसन्निकर्षइति चेन्न; तत्प्रकाशकचैतन्य प्रतिफलनप्रयोजकत्वातिरिक्त विषयताया मानाभावात् । ननु घटं जानामीत्यनुभूयमाना विषयतातद्गतैवेति चेत् ; तर्हि शुक्तिरजतज्ञाने रजतं जानामीत्यनुभूयमाना विषयतापि वृत्तिगतैव स्यात् । किंचैवंसतिविषतयानुभूयमान वस्तुनएव व्यवहारहेतुत्वावगमात् वृत्तेरेव व्यवहारहेतुत्वे संविदो - निर्विषयत्वव्यवहारा हेतुत्वयोरापत्ते स्साजडैव स्यात् । किंच तस्या वृत्तिविषयत्वं तदेव दृश्यत्वमिति तस्या मित्थ्यात्वमनिवार्यं, तदविषयत्वे च मानाभावादसिद्धिः । अतस्सन्निकर्षाभावा दन्यथाख्यात्यसम्भवो दुर्वचः । ततश्च ख्यातिबाधाभ्या मत्रानिर्वचनीयसिद्धिः । तौचपरोक्षेपीति कथन्तत्रनानिर्वचनीयम् । किंचदेवदत्तस्येदमाकारवृत्तिदशायां यज्ञदत्तस्यापि तादृशवृत्त्युत्पत्तौ इदमवच्छिन्न-चैतन्यस्य देवदत्तयज्ञदत्त चैतन्याभ्यामभेदात् तच्चैतन्याभेदेनोत्पन्नं-रजतं देवदत्तस्यैव भासतइत्ययं नियमो नोपपद्यते, यज्ञदत्तस्यापि प्रसंगात् । अतो रजतवृत्तिरपि रजतविषयेत्यंगीकृत्य तत्प्रमातृसम्बन्धि तदर्थाविषयकवृत्ति प्रयुक्तविषयचैतन्याभेदस्यैव तदीयताप्रयोजकत्वात, दुष्टेन्द्रियतया देवदत्तस्यैव रजतविषयकवृत्त्युत्पत्तेः यज्ञदत्तस्याभावाच्च देवदस्यैव रजताभासो न यज्ञदत्तस्येतिवाच्यम् ; अतो - रजतविषयवृत्तेरावश्यकत्वात् सन्निकर्षापेक्षात्यत्पक्षेपि दुर्निवारा । यद्यपीयं कल्पना परैर्नकृता तदीयबहुग्रन्थाविरुद्धाच, तथापि सर्वतो गतिनिरोधे परेषा मियमेव गतिरिति सापि विरुद्धेति मन्तव्यमिति ॥

इति श्रीवाधूलकुलतिलक श्रीनिवासाचार्य पादसेवासमधिगत परावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिता यां शतदूषणीव्याख्यायां चण्डमारुताख्यायां वेदप्रामाण्यनिरासो नाम चतुर्दशस्कन्धः ।

श्रीः ।

श्रीमते रामानुजाय नमः ।

श्रीमते निगमान्तमहादेशिकाय नमः ।

अथ पंचदशस्कन्धः ।

अबाधादध्यक्ष प्रभृतिमितिवर्गेष्वत्रभृतं
शरीरं यस्येदं जगदखिलमन्तर्यमयितुः ।
समे तर्कैरेतैर्निज विभवलुण्टाक मथनैः
प्रसीदत्वासीदन्निगमशतसीमा हयमुखः ॥

(अबाधादिति) मितिवर्गेष्वबाधात जगदखिलं यस्य शरीरमवष्टमित्यन्वयः, मितिविषयाणामबाधित विषयत्वादित्यर्थः । प्रत्यक्षादीनामबाधितविषयतया प्रपंचस्य सत्यत्वादेवहि लोके सिद्धं नियाम्यत्वाद्यात्मकं शरीरत्वं कृत्स्नस्य श्रूयमाणमुपपद्यते, अन्यथा ब्रह्मव्यतिरिक्तस्य मिथ्यात्वे जीवब्रह्मभेदस्यापि मिथ्यात्वेन जीवस्य ब्रह्माभिन्नतया शरीरत्वासम्भवात "यस्यात्माशरीर" मित्येतद्व्याहन्येत । नच शिलापुत्रकस्य शरीरमितिव न्निर्वाहः, "यस्य पृथिवीशरीर" मित्यादिना वैरूप्यप्रसंगादिति भावः । नन्वाध्यासिकभेदान्नियमन मुपपद्यतइति चेत ? किमयं बिम्बप्रतिबिम्बभावनिबन्धनः, उतचन्द्रद्वित्वादिव दौपाधिकः, उत घटाकाशवदौपाधिकः । पक्षत्रयेऽपि नब्रह्मणो जीवान्तः प्रवेशासम्भवः; नहि बिम्बस्य प्रतिबिम्बेतुप्रवेशः क्वचिदुपलब्धः, चन्द्रस्य वा चन्द्रे- घटाकाशस्य वा घटाकाशान्तरे । तथा नियमनमप्यनुपपन्नं, स्वरूपात्मकस्य स्वाभाविकाभेदस्य नित्यं प्रकाशमानत्वात् । नन्वभेदे भासमानेपि न नियमनानुपपत्तिः, स्वप्रयत्नेन व्यापारोत्पादनरूपस्य नियमनस्य स्वस्मिन्नपि सम्भवात , इति चेन्न; यत्नस्य यत्नान्तराधीनत्वप्रसंगेन अनवस्थानात् आत्मनि यत्नातिरेकेण व्यापारान्तरासिद्धेः । किंच भेदाध्या

यदेतत्सन्मात्रग्राहि प्रत्यक्षदूषणान्तेभाष्यम् "सन्मात्रग्रहणः प्रमेय भावश्च, ततोजडत्व. नाशित्वादयस्तत्रैवोक्ताः "इति। अनेनपश्यतोहराणां दृश्यत्वानुमानस्यानैकान्तिकत्वमपि सूचितं। उत्तरत्रापि क्वचित्परमत- व्याप्तयाप्रसंगं प्रायुङ्क्त-"ब्रह्ममिथ्या ज्ञानविषयत्वात्", इति। सांख्याधिक रणेच व्याघातमसूचयत्- "दृश्यत्वबाध्यत्वाभ्युपगमात्सुतरामसंगतम्"

ऽपि नियन्तृनियाम्यत्वयो र्व्यवस्थाकुतः। कुतस्तर्हि चन्द्रभेदाध्यासे द- क्षिणोत्तरत्वव्यवस्था? न कथंचित्, अयं दक्षिणश्चन्द्रः अयमुत्तरश्चन्द्रइति- व्यवहारस्तु तदवधिकदक्षिणत्वस्य तदवधिकोत्तरत्वस्यच तत्रैव दो- षविशेषेणारोपात्। नहि प्रतीतिमात्रेण व्यवस्थासिध्यति। अनिर्वचनी योत्पत्तिपक्षेऽपि भेदस्य दक्षिणोत्तरत्वयोश्च एकत्रोत्पत्तौ कथं व्यवस्था। ननुभिन्नाधिकरणत्वं हि व्यवस्था, अनिर्वचनीयभेदोत्पत्तौ साकथंनस्या दितिचेत्तर्हि दक्षिणत्वशुक्लभास्वरत्वयो रपि व्यवस्थाप्रसंगः, अतस्त दधिकरणानधिकरणत्वं व्यवस्थेति त्वया वाच्यम्, अतो न दक्षि- णोत्तरव्यवस्था। तदधिकरणानधिकरणत्वस्य तत्राध्यासाद्व्यवस्थोपपद्य त इति चेन्न; उत्तरत्वे चन्द्रप्रतियोगिक दक्षिणत्वाधिकरणाधिकरण त्वे प्रातिभासिके विद्यमाने तदभावस्य तत्र प्रातिभासिकस्यासम्भ- वात्। किंचेश्वरस्य सर्वज्ञतया काल्पनिकत्वं भेदस्यजानतः कथं नि- यमनं; नहि काल्पनिकत्वेन ज्ञातं कार्यकरं, तथासति काल्पनिकतया- ज्ञातपीतभ्रमतः पीतार्थिनः शंखे प्रवृत्त्यापत्तेः। एतैः-वक्ष्यमाणैः। नन्वेत च्छ्रुत्यनुसारे अद्वैतश्रुतीनां भूयसीवैयर्थ्याकुलीस्यात् इत्याशंक्य तासामपि विशिष्टाद्वैतएव तात्पर्यमित्यभिप्रायेणाह (आसीददिति) आसीददित्यनेन- स्वारस्यं सूच्यते। शतपदेन कृत्स्नस्वारस्यं. पक्षान्तरे बह्व स्वारस्यंच व्यज्यते। सीमा-पर्यवसान भूमिः। "जडत्वनाशित्वा दय" इत्यादिशब्देन न मिथ्यात्वं गृह्यते। तत्र मिथ्यात्वापादनेन तदभावसम्प्रतिपत्तिद्योत- नात्। "अनैकान्त्यं सूचितम्" प्रसंगाभिप्रायत्वात प्रयोगस्येति भावः (सां ख्येति) "अपारमार्थिकत्वेतु दृश्यत्वं बाध्यत्वाभ्युपगमात् सुतरामसंगत"

इति । योगाचारोक्तसंवेदन हेतुनिरासेनचेदमपि निरस्तं भविष्यतीत्यमंस्त। तदिहवयं विस्तृणीमहे। विगीतं मिथ्या दृश्यत्वात्, यद्यदित्थं तत्तथा, यथाशुक्तिरजतमित्यादि । तत्र किमिदं मिथ्यात्वमभिप्रेतं? किंतुच्छत्वं, उतान्यथाख्यातिविषयत्वं, उतसदसद्विलक्षणत्वं, अथप्रतिपन्नोपाधौ निषेधप्रतियोगित्वरूपं बाध्यत्वं, अथवा स्वात्यन्ताभाव समानाधिकरणतया प्रतीयमानत्वं, यद्वा सत्यब्रह्मविलक्षणत्वम्, यद्वान्यदेव किंचिदिति । नाद्यः, प्रतीतिविरोधादपसिद्धान्ताच्च । अतएव न द्वितीयः, मिथ्यात्वाध्यासादिविषयतया सिद्धसाधनत्वाच्च: शुक्त्यादिरेवहि रजताद्यात्मनान्यथाख्याते विषयइत्यभ्युपगम्यते;

मिति भाष्यम्। अत्राचार्याः, यदविद्याविरोधि तदेव तत्साक्षीति वचनमसंगतमित्यर्थइति। तेन दृग्बाध्यत्वंहि मिथ्यात्वं, तद्दृगधीनसिद्धिकस्य नसंभवतीति हेतुसाध्ययोर्व्याघातस्सूचितः। चैतन्यं स्वरूपतः साधकमपरोक्षवृत्त्यवच्छिन्नं निवर्तकमित्यादि निरासस्तु निवर्तकानुपपत्तौ द्रष्टव्यः (योगाचारेति) जागरितप्रत्ययो निरालम्बनः संवेदनत्वात् स्वाप्नप्रत्ययवदिति बौद्धानुमानं "वैधर्म्याच्च न स्वप्नादिवत" इति सूत्रभाष्ये भगवता दूषितम्। मायिना प्रपंचो मिथ्या दृग्विषयत्वात् शुक्तिरतस्वाप्नाद्यर्थादिवदित्युक्तं, एवंच ज्ञानत्वेन मिथ्याविषयकत्वसाधनस्य ज्ञानविषयत्वेन मिथ्यात्वसाधनस्यचाविशेषात् ज्ञानत्वहेतुदूषणान्येव तद्विषयत्वहेतोरपि भवन्तीत्यर्थः (यद्वेति) सत्यं यद्ब्रह्म तद्विलक्षणमित्यर्थः । ब्रह्मविलक्षणत्वमेवात्रकोटिः । ब्रह्मणएव सत्यत्वात तद्वैलक्षण्ये साधिते मिथ्यात्वं पर्यवस्यतीत्याशयेन सत्यपदोपादानम्। (प्रतीतिविरोधादिति) असच्चेन्नप्रतीयेतेति तैरेवाभिधानादिति भावः। अतएव-अपसिद्धान्तादित्यर्थः। मिथ्यात्वादीत्यादिशब्दः क्षणिकत्वपरः। अध्यासादीत्यादिशब्दः शुक्तिरजतादिलौकिकाध्यासपरः, तत्रापि तद्देश तद्धर्मादेरपि विषयत्वात् । अत्रच मिथ्यात्वं घटसमानाधिकरणात्यन्ताभाव प्रतियोगित्वादिकं विवक्षितम्। मिथ्यात्वाध्यासस्य मिथ्यात्वमेव विषयः, प्रपंचस्तु कथमित्यपेक्षायामाह (शुक्त्यादिरिति) ननु-

अथारोपितत्वेन विषयत्वमिष्येत , तथापि सिद्धसाधनता , सर्वस्यापि वस्तुनो यत्र क्वचिद्येनकेनचिदारोप्यमाणत्वात् । न तृतीयः, परं प्रत्यप्रसिद्धविशेषणत्वात् ; अर्थापत्तिप्रसिद्धं तदिति चेन्न, तस्या स्वावसरे दूषयिष्यमाणत्वात् । न चतुर्थः, तद्धि बाध्यत्वं बाध्यमबाध्यं वा ; पूर्वत्र सिद्धसाधनत्वं, तस्य प्रपंचसत्यत्वाविरोधित्वात् ।

स्वाभाविकाधिकरणे ऽन्यथाख्यातिविषयत्वं विवक्षितमित्याशंकते (अथेति) (अर्थापत्तीति) ख्यातिबाधान्यथानुपपत्त्या शुक्तिरजतेप्रसिद्धमित्यर्थः । (तद्धि बाध्यत्वमित्यादि) मिथ्यात्वस्य मिथ्यात्वे मिथ्याभूतस्य शङ्खारोपितपीतिम्नः श्वैत्येनेव पारमार्थिकसत्यत्वेना विरोधात् अर्थान्तरमित्यर्थः, नतु यथाश्रुतसिद्धसाधनमेव विवक्षितं, असम्भवात् । न तावत्प्रतिपन्नाधिकरणे निषेधप्रतियोगित्वमात्रेऽयंदोषः, विकल्पवैयर्थ्यात ; अबाध्यत्वकोटौसिद्धसाधनसत्वेनाविकल्प्यापि सिद्धसाधनदानसम्भवात ; नच प्रतिपन्नाधिकरणे सर्वत्रेति विवक्षाया मयं दोषः, तादृशबाध्यत्वस्य प्रपञ्चेऽभावात बाध्यत्वकोटावपि सिद्धसाधनासम्भवात् ; नच बाध्यत्वकोटौ मिथ्यात्वाभावसिद्धेर्नायं दोषः, अधिकरणपदेनाधिष्ठान विवक्षायां प्रपंचस्य तन्मिथ्यात्वस्यच चैतन्यनिष्ठाभाव प्रतियोगित्वेपि प्रपंचे मिथ्यात्वाभावासिद्धयासिद्धसाधनाभावात ; आश्रयमात्रविवक्षायां मिथ्यात्वस्य प्रपंचनिष्ठाभाव प्रतियोगित्वेऽपि स्वाधिकरणांशेन प्रपंचस्य मिथ्यात्वस्यापि सिद्धेः, तादृशमिथ्यात्वाभावस्य स्वानिष्ठत्वात् । किंच मिथ्यात्वाभावसिद्धौहि सिद्धसाधनशंकापि, अत्रच वस्तुतो मिथ्यात्वस्य मिथ्यात्वेपि तेनरूपेण मिथ्यात्वस्या साध्यत्वात् सिद्धसाधनासम्भवात्; अतोर्थान्तरमेव । एतदभिप्रेत्यैवोक्तं "सत्यत्वाविरोधित्वा"दिति । ननु वियदादिसमान सत्ताक मिथ्यात्वं साध्यं, तथाच प्रपंचस्य तन्मिथ्यात्वस्यच पारमार्थ्यस्य विरुद्धत्वात् तस्य धर्मिसमसत्ताकत्वस्य धर्मधर्मिणोर्द्वयोरप्यपारमार्थ्यं विना असंभवान्नार्थान्तरमितिचेन्न; मिथ्यात्वस्य कल्पितत्वे तस्यापारमार्थ्यविरोधितया तदवश्यम्भावे सति धर्मिसमसत्वस्यैवासम्भवात् । अथस्यात्

घटे घटत्वविरोधिधर्मराहित्ये घटत्वस्याकल्पितत्वं न प्रयोजकंकल्पयितुं-युक्तं, तस्य विप्रतिपन्नत्वात्, किन्तूभयाभिमतं धर्मिसमसत्वमेव, एवंच प्रपंचमिथ्यात्वस्य धर्मिसमसत्वसाधनात् तद्विरोधिनः पारमार्थ्यस्य राहित्यं स्यादेवेति; तन्न, एवंसति घटत्ववति प्रातिभासिकस्य घटत्वाभावस्य विरहप्रसंगात्। ननु यावद्विरोधिधर्मराहित्ये नेदं प्रयोजकम्, किन्तु विरोधिधर्मस्य राहित्य मात्रे, तथाच व्यावहारिक घटत्वराहित्य प्रयोजकत्वान्नान्वयव्यभिचारइति चेत्तर्हि शुक्तौरजतस्य प्रातिभासिकेन रजताभावेन विरोधाद्व्यतिरेकव्यभिचारः। एतेन धर्मिसमसत्ताकत्वं तद्धर्मसमानसत्ताक विरोधिधर्मराहित्ये प्रयोजकमिति निरस्तम्। किंच तत्स्वरूपमेव तत्समानसत्ताकविरोधिधर्मराहित्ये प्रयोजकमिति कल्पना युक्ता, लाघवात्; तथाच पारमार्थिकत्वस्य कल्पितमिथ्यात्वसमानसत्ताकत्वाभावाद्विरोध्यभावेन तस्यावश्यकत्वाद्धर्मिसमसत्त्वासम्भवएव। यदिच प्रातिभासिकस्य घटाभावस्य भिन्नसत्ताकत्वात् घटेन विरोधएव नास्तीत्युच्येत, तर्हि पारमार्थिकेन सत्त्वेन मिथ्यात्वस्य समसत्ताकत्वाभावान्न विरोधइति तुल्यम्। ननु व्यावहारिकसमानत्वमादाय समानसत्ताकत्वसिद्ध्या न पूर्वोक्तधर्मिसमसत्त्वासम्भवइति चेन्न; पारमार्थिकसत्वे विद्यमाने व्यावहारिकसत्वस्यासम्भवात्। ननु मिथ्यात्वस्य कल्पितत्वादस्तुप्रपंचे तदभावः, तथापि तदभावमात्रं न पारमार्थ्यं, किन्तु मिथ्यात्वासमानाधिकरण मिथ्यात्वाभावः। प्रपंचेच मिथ्यात्वाभावो मिथ्यात्वसमानाधिकरणइति चेन्न, प्रपंचगतमिथ्यात्वाभावे मिथ्यात्वसामानाधिकरण्य तदभावयोस्सत्त्वात्, प्रपंचस्यमिथ्यात्वासमानाधिकरण तदभावस्यसत्त्वात्। ननु मिथ्यात्वाभावनिष्ठ मिथ्यात्वसामानाधिकरण्याभावावच्छेदकत्वेसति मिथ्यात्वाभाववत्त्वं पारमार्थिकत्वं, मिथ्यात्वस्य ब्रह्मावृत्तितया तदवच्छेदेन मिथ्यात्वसामानाधिकरण्याभावेन ब्रह्मणोमिथ्यात्व सामानाधिकरण्याभावावच्छेदकत्वात् तत्पारमार्थिकं; प्रपंचस्यतु मिथ्यात्ववत्तया मिथ्यात्वाभावस्य तदवच्छेदेन मिथ्यात्वसामानाधिकरण्यस्यैव सत्त्वेनसामानाधिकरण्याभावस्य तदवच्छेदेनासम्भवान्नासौ परमार्थइतिचन्न; मिथ्यात्व सामानाधिकरण्यस्य-

मिथ्यात्वेन तदभावस्य प्रपंचावच्छेदेनापिसत्त्वात् । ननुमिथ्यात्वाभावस्य प्रपंचावच्छेदेन यन्मिथ्यात्वसामानाधिकरण्यं तत्समसत्ताकस्तद्विरोधेन तदभावोब्रह्मावच्छेदेन वक्तव्यः, अन्यथाब्रह्मावच्छेदेनापितस्य मिथ्यात्वसामानाधिकरण्य प्रसंगात् , प्रतियोगितदभावयो र्विरोधिनोरन्यतराभावेऽन्यतरस्य सत्त्वनियमात् ; तथाच मिथ्यात्वसामानाधिकरण्य समसत्ताक मिथ्यात्व सामानाधिकरण्याभावावच्छेदकमिथ्यात्वाभावाधिकरणत्वं पारमार्थिकत्वं । प्रपंचावच्छेदेनापि यद्यपिमिथ्यात्वाभावस्य मिथ्यात्वसामानाधिकरण्याभाव स्तथापि नायं सामानाधिकरण्य समसत्ताक इति न प्रपंचः परमार्थः, ब्रह्मावच्छेदेन सामानाधिकरण्याभाव स्तथैवेति ब्रह्मपरमार्थं इति चेन्न; समसत्ताकभावाभावयोरन्यतराभावेऽन्यतरसत्त्वनियमस्य तवासिद्धेः, घटेघटतदभावयोर्द्वयोरप्यवृत्तेः । किंचमोक्षे अविद्याया असत्त्वेऽपि तत्समानसत्ताकाभावा प्रसिद्धेर्व्यभिचारः । नचव्यवहारदशाया मयंनियमः, अप्रजोजकत्वात । अविशेषित एव ह्ययं नियमः औपपत्तिकः, नियमविरोधि शंकाया एव अनुत्थानात् । भावाभावयोर्विरोधिनोरेकस्यासत्त्वे इतरसत्त्वनियमः कुतः ? उभयमपिमाभूदिति नाशंका, उभयाभावोऽप्यन्यतरप्रतियोगिकएवेति ननियमविरोधः; तस्माद्विशेषितनियमएवाप्रयोजकः । एवंचाविद्यानिवृत्ते ब्रह्मस्वरूपातिरेकपक्षे अविद्यायां स्तत्समसत्ताकाभावस्य चाविद्यानिवृत्तावनंगीकारादपिव्यभिचारः । किंच यद्येतत्पारमार्थिकत्वं तदाप्रपंचेमिथ्यात्वाभावस्य पारमार्थिकत्वंनस्यात् , मिथ्यात्वस्य मिथ्यात्वाभावाभावत्वेन मिथ्यात्वाभावस्य प्रपंचरूपस्वाधिकरणनिष्ठात्यन्ताभाव प्रतियोगित्वस्य सत्त्वात् मिथ्याभावगतस्य मिथ्यात्वाभावस्य मिथ्यात्वसामानाधिकरण्यात् । ननुमिथ्यात्वसामानाधिकरण्यान्यत्वं विवक्षितम् , अत्रचसामानाधिकरण्यात्यन्ताभावे सत्यपि नसामानाधिकरण्यान्योन्याभावः , नच तदत्यन्ताभावे तदवच्छिन्नान्योन्याभावनियमः; अप्रयोजकत्वादितिचेन्न ; प्रतियोगिताभिन्नसत्ताकत्वेनात्यन्ताभावस्यैव प्रतियोगितावच्छेदकभिन्नसत्ताकतयाऽ

न्योन्याभावस्य विरोधाभावेन तद्व्यावृत्तेरावश्यकत्वात् । किंच यथा शुक्त्यादौ शुक्तिरजततुल्यस्य मिथ्यात्वस्यारोपेपि तदधिकसत्ताकस्य तदभावस्य सत्त्वाद्व्यावहारिक सत्यत्वम् , तथाप्रपंचेऽपिव्यावहारिकमिथ्यात्वसत्त्वेऽपि तदधिकसत्ताक तदभावस्य सत्त्वात्पारमार्थिकत्वमविरुद्धं । ननुस्वसमसत्ताको मिथ्यात्वाभावः पारमार्थिकत्वं, ब्रह्मणिमिथ्यात्वाभावो ब्रह्मसमसत्ताकः, प्रपंचगतस्तुमिथ्यात्वाभावः परमार्थत्वात् धर्मिभिन्नसत्ताक इतिचेन्न ; पारमार्थिकसत्तामेवादाय-धर्मिसमानसत्ताकतावक्तव्या, ततश्च पारमार्थिकत्व घटकीभूतं पारमार्थिकत्वं किं स्वयमेव उतान्यत् । नाद्यः, आत्माश्रयात । नान्त्यः, अनवस्थितेः । एवं प्रपंचगतस्य मिथ्यात्वाभावस्य पारमार्थिकस्य धर्मिसमसत्ताकत्वाभावो धर्मिणः पारमार्थ्याभावात् , तत्तदभावश्च मिथ्यात्वाभावस्य धर्मिसमसत्ताकत्वाभावादिति प्रपंचे पारमार्थ्याभावज्ञाने आत्माश्रयः। एतेन धर्मिसमसत्ताकत्वं धर्मिसमानसत्ताक विरोधि धर्मराहित्ये प्रयोजकं, एवंच मिथ्यात्वाभावस्य पारमार्थिकस्य प्रपंचे सत्त्वेपि नतत्प्रपंच समसत्ताकं, तत्समसत्ताकेन मिथ्यात्वेन विरोधात् , अतः प्रपंचा पारमार्थ्यसिद्धिः; धर्मिसमसत्ताकस्य मिथ्यात्वाभावस्य पारमार्थिकत्वरूपत्वादिति निरस्तम् ;-घटत्वाघटत्वयोर्विरोधस्य लाघवेन परस्परसमानसत्ताकत्वनिबन्धनत्व कल्पनस्यैवोचितत्वात्प्रातिभासिकयोरपि विरोधस्यावश्यकत्वाच्च । वस्तुतस्तु विरोधेभावा भावात्मकत्व मेव प्रयोजकम् , तत्र तद्विरुद्धधर्मराहित्येच तत्र तद्विद्यमानत्वमेव प्रयोजकम्। नचैवं सति प्रपंचमिथ्यात्वस्य मिथ्यात्वेतदभावापादनं नस्यादिति वाच्यम् , प्रपंचेसति ब्रह्मणिप्रपंचाभावस्यायोगात् । किंच घटत्वादावघटत्वादि धर्मविरोधित्वे सत्त्वमात्रं प्रयोजकम् , नतु धर्मिसमसत्त्वमपि तत्र प्रवेश्यं, गौरवात ; तथाच मिथ्यात्वस्य मिथ्यात्वं ब्रह्मणिमिथ्यात्वाभावेन निर्वाह्यम् ; तत्र च मिथ्यात्वकल्पनाया असम्भवात् कल्पितमपि मिथ्यात्वं प्रपंचे नस्यात् । एवं प्रपंचाभावाधिकरणे ब्रह्मणि प्रपंचो नस्यात । धर्मिसमसत्ताकत्वस्य विरोधिधर्मराहित्ये-

प्रयोजकत्वेऽप्ययं दोषः समानः, अधिष्ठानातिरिक्तत्वे भावस्य तत्सम-सत्ताकत्वात् । अधिष्ठानात्मकत्वेऽपि अधिष्ठानातिरिक्ताभाव कार्यकारित्वात् । अन्यथा ब्रह्मणि प्रपंचः पारमार्थिक एव कुतो नस्यात् ; ब्रह्मणितादृशप्रपंचविरोधिधर्माभावात् । किंच शुक्तिरजतस्य सत्ता या एवाभावात् कुतस्समानसत्ताकत्वं । ननुतथापि प्रातिभासिक-सत्तास्तीतिचेन्न , बाधायोग्यत्वं हिसत्वं, तस्यचाभावे तद्विशेषासम्भवात । ननुबाधमात्रायोग्यत्वं नसामान्यम् , किंतु बाधनिरूपितायोग्यत्वमात्रन् ; एवंचबाधमात्रायोग्यत्वं पारमार्थिकसत्वं, ब्रह्मज्ञानेतरबाधायोग्यत्वं व्यावहारिकसत्त्वं, ब्रह्मस्वाधिष्ठानज्ञानेतरबाधायोग्यत्वं प्रातिभासिकसत्त्वमितिसम्भवत्येव सत्ताविशेषत्वमेतेषा मितिचेन्न; प्रपंचस्यब्रह्मवत्पारमार्थिकत्वेऽपि शुक्तिज्ञानाबाध्यत्वस्य प्रपंचे तत्र साध्यमिथ्यात्वेचा विशिष्टतयार्थान्तरत्वात् । ननूक्तवितयान्यतमसत्तया समानसत्ताक मिथ्यात्वं साध्य.मितिचेन्न ; प्रातिभासिकेऽपि रजतेमिथ्यात्वस्य सम्प्रतिबाधादर्शनेन रजतत्वव-द्व्यावहारिकत्वोपपत्तेः साध्यवैकल्यं । किंच प्रपंचस्यपारमार्थिकत्वेऽपि तस्यब्रह्मज्ञानेतराबाध्यत्वेन मिथ्यात्वसाम्योपपत्तेरर्थान्तरं । ननुसत्त्वेनहि साम्यंविवाक्षितं, ब्रह्मज्ञानेतराबाध्यत्वमात्रं नव्यावहारिकसत्त्वं, ब्रह्मण्यातिप्रसंगात ; किन्तु ब्रह्मज्ञानबाध्यत्वेसति तदितराबाध्यत्वं, तेनाकारेणसाम्यसिद्धौ नप्रपंच पारमार्थ्यसंभवइतिचेन्न; ब्रह्मज्ञानबाध्यत्वस्याप्रसिद्धत्वात् , बाध्यत्वमात्रविवक्षायामपि विशिष्टाप्रसिद्धेः, एतादृशसत्त्वपरिकल्पनस्य-प्रपंचमिथ्यात्वसिद्धेरुत्तरकालीनत्वाच्च, एवं साध्यनिर्देशासम्भवात् । ननु स्वाबाधकाबाध्यत्वं मिथ्यात्वं समानसत्ताकेत्यादिना विवक्षितमितिचेन्न, अनुदितबाधकस्थलेशुक्तिरजतयोर्द्वयोरपि ब्रह्मज्ञानबाध्यत्वेनशुक्त्यबाधकाबाध्यस्यापि रजतस्य शुक्तितुल्यं रजताभावं प्रत्यव्यावर्तकत्वात् , प्रपंचेऽप्युक्तसाध्यसिद्धावपि प्रपंचतुल्यमिथ्यात्वाभावाव्यावर्तक-त्वेनार्थान्तरत्वात् । किंचबाध्यत्वस्य ज्ञाननिवर्त्यत्वरूपत्वे स्वाबाधकाबाध्यत्वं स्वानिवर्तकज्ञानानिवर्त्यत्वं, इदंच प्रपंचे सतिसत्यत्वेपि मिथ्यात्वस्य ज्ञाना.निवर्त्यत्वा भावमात्रादुपपन्नं । तथापि मिथ्यात्वस्य प्रपं-

चेतत्तुल्यमिथ्यात्वाभाव विरोधित्वाभावादर्थान्तरं । यच्चभावप्रमाबाधः, तदास्वस्य यदभावप्रमापकं तेनप्रमीयमाणाभावकत्वं साध्यंस्यात्, तथाच दृष्टान्तस्साध्यविकलः; शुक्तिरजतभ्रमदशायान्नेदं रजतं मित्थ्यैव भाति अपितु वस्तुतोरजतमेवे त्यनुभवेन मित्थ्यात्वे बाध्यमानेऽपि रज तस्याबाधात् । यदपि परिहारान्तरमुक्तं; योयस्यस्वाभाविको धर्मस्सतत्र स्वाभावविरोधी, मित्थ्यात्वंचकल्पितमपि प्रपंचस्य स्वाभाविकमिति स्वा भावविरोध्येव. स्वाभाविकत्वन्तु तत्साक्षात्कारनिवृत्त्ययोग्यत्वमेवेति–तदपि घटत्वस्यप्रातिभासिका घटत्वाविरोधित्वात् प्रातिभासिकरूपस्य प्राति भासिकतदभाव विरोधित्वाच्च निरस्तम् । किंचैवं ब्रह्मसाक्षात्कारनिव र्त्यत्वात् स्वप्रकाशत्वं नस्वाभाविकमिति तद्ब्रह्मणि अस्वप्रकाशत्वाविरोधिन स्यात् ।नचस्वप्रकाशत्वविशिष्टस्यात्मन स्स्वप्रकाशत्वं स्वाभाविकं, स्वप्र- काशइति साक्षात्कारानिवर्त्यत्वादिति विशिष्टे तदस्वप्रकाशत्वविरोधीति वाच्यम्; तर्हि स्वप्रकाशत्वविशिष्ट अस्वप्रकाशत्वं माभूत्, स्व रूपेस्यादेव, स्वप्रकाशत्वस्यास्वप्रकाशत्वेन विशिष्टेस्वप्रकाशस्यावृ त्याविशिष्टेऽपि नस्वप्रकाशत्वं अस्वप्रकाशत्वविरोधिस्यात । इदमि ति साक्षात्कारनिवर्त्यं च रजतमिदमर्थस्य स्वाभाविकमिति तत्र तद भावोनस्यात् । नन्विदमर्थे रजतविरोधादेवनरजताभावः, इदं त्वेन तस्य रजतात्मकत्वयोग्यत्वातः; किंतु शुक्तित्वेन रजतात्म- त्वायोग्यत्वा द्रजतत्वं शुक्तेर्नस्वाभाविकमिति शुक्तावेवरजताभाव इ- ति चेन्न; इदमर्थस्यैव शुक्तितया रजतस्य स्वाभाविकस्य इदमर्थेऽपि- रजताभावविरोधित्वात् । ननु रजताभावस्य पारमार्थिकत्वात स्वाभाविकमपि रजतं नविरोधि, भिन्नसत्ताकत्वादितिचेत्; तर्हि समानसत्ताकत्वमेव विरोधप्रयोजकमितिस्वाभाविकत्वस्य तत्प्रयोज- कत्व कल्पनमयुक्तम् । किंच इदं शुक्त्योरभेदादिदं नरजतं किं न्वि यं शुक्तिरितिबाधकसाक्षात्कारस्य इद मर्थगोचरत्वस्य अविवादाच्च तन्निवर्त्यं रजतं नेदमर्थस्यापि स्वाभाविकं । यदपि परिहारान्तरम्, यत्र यस्य वैशिष्ट्यमबाधितं सएव तत्र स्वाभावविरोधी नतु पर- मार्थः, मित्थ्यात्व वैशिष्ट्यस्य नप्रपञ्चेसति तत्रबाधः, प्रपंचेन स- हब्रह्मण्येव बाधात; घटादौसद्बुद्धिस्तुलाघवेनाधिष्ठान सत्ताविष

उत्तरत्रकिं ब्रह्मस्वरूपमुत ततो भिन्नं । आद्ये सिद्धसाधनत्वं, ब्रह्मसम्बन्धस्या
स्माभि रिष्यमाणत्वात् ; बाध्यत्वधर्मयोगोहि प्रपंचस्य साध्यते, बाध्यत्वंच ब्र

यत्वात् न प्रपंचमिथ्यात्वबाधिकेति – तदपि घटत्व रजतयोर्घट-
शुक्त्योः प्रातिभासिकाघटत्व रजताभावाविरोध प्रदर्शनेन निरस्त
मिति । किंच बाधोयद्यभावः तत्प्रमावा, तदा कथं प्रपंचेमिथ्या-
त्वस्य मिथ्यात्वेन तदभावापादने मिथ्यात्ववैशिष्ट्यस्य बाधितत्वे–
न परिहारः, आत्माश्रयात् । अथ ज्ञानेन निवृत्तिर्बाधः, तदाब्रह्मणिस्व-
प्रकाशत्वस्य अस्वप्रकाशत्वविरोधिता नस्यात । यदपि परिहारा–
न्तरं – अविद्यातिरिक्तदोषाजन्यत्वं स्वविरोधिधर्मराहित्यप्रयोजकमिति;
तदपिघटत्वस्य प्रातिभासिकाघटत्वाविरोधित्वात , प्रातिभासिकस्या
पि प्रातिभासिकस्वाभावविरोधित्वाच्च निरस्तम् । किंच प्रपंच–
स्याविद्यातिरिक्त दोषाजन्यत्वात् ब्रह्मणि प्रपंचाभावोनस्यात ।
ननु ब्रह्मणि प्रपंचाभावोभिन्नसत्ताक इतिद्धिविरोधी प्रपंच इतिचेत ।
तर्हि समानसत्ताकत्वप्रयुक्त एव विरोधइति किमन्येन । कथंचिदस्मा-
भिः प्रपंचे आपाद्यमानस्य पारमार्थिकाभावस्य कल्पितं मिथ्या_
त्वं व्यावर्तकमुक्तविरोध प्रयोजकमुक्तविरोध प्रयोजककल्पनयापि
स्यात् । किंचा विद्यातिरिक्तदोषाजन्यत्वं घटादेरपि नास्ति, भेद-
संस्कारजन्यत्वात । ब्रह्मसाक्षात्कारप्रतिबन्धकतया विपरीतकार्यज-
नकतया च भेदवासनाया अपिदोषत्वाविशेषात् । संस्कारएव हि-
वासना ।ःप्रातिभासिकव्यावर्तने च न किंचित्प्रयोजनमुभयोरपि समानस-
त्ताकविरोधित्वात् , भिन्नसत्ताकाविरोधित्वाच्च । किंच शुक्तिरजतव-
त्तन्मिथ्यात्वमपि प्रातिभासिकं त्वयावाच्यम् , अन्यथा स्वसमान-
सत्ताकामिथ्यात्ववत्त्वे साध्ये तस्य दृष्टान्तत्वा सम्भवात् ; तत्र-
च मिथ्यात्वस्य रजतसत्यताव्यावर्तकत्वं नोक्तविधयासम्भवति, रजत
वन्मिथ्यात्वस्य प्रातिभासिकस्या विद्यातिरिक्तदोषजन्यत्वात् । बा-
ध्यत्वांगीकारेसत्यत्वं गतमेवेत्यत्राह (तस्येति) बाध्यबाध्यत्वस्येत्यर्थः । बा
ध्यत्वं साध्यते बाध्यत्वसम्बन्धोवेति विकल्पमभिप्रेत्यान्त्येदोषमाह (आद्यइ-
ति) आद्यआह (बाध्यत्वेति) ततश्चव्याहतिः, ब्रह्मणस्स्वमाहिमप्रतिष्ठ-

ह्मस्वरूपमित्यभिधत्से । द्वितीये तेनैव दृश्यत्वहेतोरनैकान्त्यं । तेनव हेतुना तत्सिद्ध्यसिद्ध्योर्ना नैकान्त्यमिति चेन्न ; तेनैव तत्सिद्धा वनैकान्त्यप्रसंगः, तदसिद्धौ हेतोरसाधकत्वमिति प्रसङ्गपर्यवसितत्वात । तेनैव तत्सिद्धौ तत्साधनस्य सतः कथमनैकान्त्यम् , नहि तत्साधकत्वे तदसाधकत्वप्रसंगइत्युन्मत्तोपि ब्रूयादिति चेन्न ; अभिप्रायानभिज्ञानात, नहि ततएव तत्सिद्धिमभ्युपगम्यानैकान्त्यं ब्रूमः अपित्वबाधिते बाध्यत्वे

स्यानन्याधारत्वादित्यर्थः । तदुक्तं सत्यमिथ्यात्वं ब्रह्मात्मकमिति कोटिनिराकरणे सर्वार्थसिद्धौ – 'ब्रह्मस्वरूपस्य सत्यस्य निराधारस्या सत्यवृत्तित्वव्याघाता'दिति । बाध्यत्व धर्मयोगः पक्षसाध्यत्वसम्बन्धात्मको विवक्षितः । साध्यतइति सिद्धिविषयत्व मात्रंविवक्षितं नतु साध्यतावच्छेदकावच्छिन्नत्वं (तेनैव हेतु नेति) तेनैव हेतुनामिथ्यात्वसिद्ध्यनन्तरज्ञातमनैकात्यं मिथ्यात्वसिद्धावप्रतिबन्धकत्वान्नदोषः, असिद्धिदशायां त्वनुपस्थितत्वादेवेत्यर्थः (तेनैवेति) अयंचानिष्टप्रसंगस्सिद्धेः प्रागेवास्तीतिसिद्धि प्रतिबन्धइतिभावः । शंकते (तेनैवतदिति) (नहीति) अनैकान्त्येनासाधकत्वं फलितमित्यभिप्रायः । आपाद्यापादकव्याघातेन प्रसंगानुपपत्ते र्नसिद्धेः प्रतिबन्धइत्याशयः (नहि तत एवेति) यद्येनेन साध्यंसिद्ध्येत्तदानैकान्तिकमिति नापादयामः, येनव्याघातः किंतु तेन हेतुनासाध्यासिद्धे स्तत्रसाध्याभाव हेत्वोश्च त्वयांगीकारात् त्वन्मतेनैक न्त्यप्रसंगइति ब्रूमइत्यर्थः । नन्वेवमपि नानुमिति प्रतिबन्धइतिचे त्प्रपंचेबाध्यत्वंवा तदभावोवावाच्यः, तृतीयप्रकारासम्भवात् । तथाच बाध्यत्वे तत्रैवव्यभिचारः । तदभावेतु प्रपंच एवेति सर्वथायं व्यभिचार्येवेति निश्चयस्य प्रागेवसत्त्वान्नानुमितिरित्याशयात् । ननु कथं सिद्ध्यसिद्धि व्याघातशंकोत्थानं, प्रपंचेमिथ्यात्वासिद्धावपि शुक्तिरजते तस्य सिद्धत्वेन तत्र व्यभिचारोद्भावनासम्भवात् ; कथंच तदंगीकारेण परिहारग्रन्थः ; इत्थं, मिथ्या

दृश्यत्वहेतुर्वर्ततइति भवता ऽभ्युपगतत्वेन तथाभ्युपगमेऽन्यतरा नैका न्त्यप्रसंग इति। तर्हि तत्र दृश्यत्व हेतु र्नवर्तत इत्यभ्युपगम्यानैकान्त्यं परिहरिष्याम इतिचेत्तदादृश्यत्वानुमानेन तत्साधनं न शक्यते, तज्जनित ज्ञानविषयत्वे तस्य दृश्यत्वावश्यम्भावात्, अतोऽनुमानमेव परित्यज्यानैकान्त्यं परिहर्तुमर्हसि। ननुबाधितस्या बाधितस्य च साधारणं बाध्यत्वमात्रं साध्यत इति चेन्न; तथापि सिद्धसाधनत्वस्य दुष्परिहरत्वात्; बाधितबाध्यत्वमभ्युपगच्छ तः साधारणाकारस्याभ्युपगमात; पक्षधर्मताबलादस्मदभिमतविशेषलाभ इति चेन्न, तस्या स्ताद्विरुद्धत्वात। अविरोधेऽपि पूर्वोक्तानैकान्त्यस्यास्थितत्वात्,

---

त्वेव्यभिचार इति सामान्ये नोद्भाविते प्रपंचगतमिथ्यात्वेव्यभिचार उद्भावितइति भ्रान्त्याचोदितं, तदभ्युपगमेन परिहार उक्तः। अभ्युपगम्यपरिहारस्य च प्रयोजनं दृष्टान्तेऽपि द्रव्यत्वेन व्यतिरेकिणामिथ्यात्वे साध्यमानेव्यभिचारोद्भावन प्रकारप्रदर्शनं (नन्विति)बाधितार्थस्या बाधितार्थस्य च साधारणं बाध्यत्वमात्रं साध्यम्, नतु बाधितासाधारणं अबाध्यबाध्यत्वं, एवंच प्रपंचेसामान्यरूपेण सिसाधयिषितस्याबाध्य बाध्यत्वरूपविशेषस्य प्रागसिद्धेः नसिद्धसाधनं; साध्येच बाधितबाध्यत्वरूपविशेषमादाय बाध्यत्वसामान्यस्य सत्त्वान्नानैकान्त्यमित्यर्थः। (तथापीति) त्वदभिमतविशेषासिद्धावपि बाधितबाध्यत्वमादाय-साध्यतावच्छेदका वच्छिन्नस्य सिद्धत्वा त्सिद्धसाधनमित्यर्थः। ननु पक्षधर्मताबलादबाधित बाध्यत्वरूप विशेषएव प्रपंचे सिद्ध्यति, अन्यथा जडस्य दृशिकल्पितत्वं स्वाभाविकमन्तरेणा परोक्षत्वानुपपत्तेः, नच सोपि विशेषः साध्यतावच्छेदकरूपेण न सिध्यति भिन्नविषयापि तत्समानाकारसिद्धिः प्रागेवास्तीत्युक्तमिति वाच्यम्; पक्षधर्मताबलादेवा बाधितबाध्यत्वत्वेनैव सिद्धेः, विशेषाकारसिद्धेश्च पूर्वमभावान्नसिद्धसाधनमिति शंकते (पक्षधर्मतेति) (तस्या इति) दृगधीनासिद्धिकस्य दृश्यत्वस्य दृगबाध्यत्वेन विरुद्धत्वादित्यर्थः (अविरोधइति) पक्षधर्म-

न पचमः प्रत्यक्षाद्यैः तद्विधायकै स्तदभावग्रहासम्भवात् । श्रुतीनामपि निषेधिकानामन्यत्र व्यवस्थापनात् । अतएव योग्या नुपलम्भ निराकृतसद्भावस्य तदभावस्यानुमानेन साधयितुमशक्यत्वात् ।

तावलादबाधित बाध्यत्वंहि प्रपंचे सिद्ध्यति, अत्राबाधितेति बाध्यत्वं विशेषयतस्तत्रापि बाध्यत्वे बाध्यत्वाभावसम्प्रतिपत्ते दृश्यत्वस्यापि स त्वात् अनैकान्त्यमित्यर्थः । ननु प्रपंचस्याबाधितबाध्यत्वमेव, तच्च बाध्यत्व वदिति न व्यभिचारः, नचाबाधितत्वविशेषणविरोधः. बाध्यत्वगतबाध्यत्व स्य बाधितत्वेन अबाधितत्वस्य परमार्थतस्सत्वादिति चेन्न; तस्मिन्नेव-तृतीयवाक्येव्यभिचारात । नच तस्यापि बाधितत्वं, प्रपंचबाध्यत्वस्य-असत्यत्वप्रसंगात । ननु चतुर्थबाध्यत्वस्यापि बाधितत्वं, एवं मुत्तरो त्तरस्यापीत्यनवस्था , अतः कुत्रापि नानैकान्त्यं, प्रथमादिपूर्वपूर्वायुग्म बाध्यत्वस्य तृतीयाद्युत्तरोत्तरा युग्मबाध्यत्वेन परमार्थतया स्थापितत्वा त सत्यमेव प्रपंचबाध्यत्वं, अतो न सिद्धसाधनमपीतिचेन्न, एवंसति द्वितीयचतुर्थादि युग्मबाध्यत्वादिपरंपरया प्रपंचस्यापि परमार्थ तया स्थापनप्रसंगात् । (प्रत्यक्षाद्यैरिति) स्वात्यन्ताभावसमानाधिकरणतया प्रतीयमानत्वंहि स्वात्यन्ताभावसामानाधिकरण्य प्रकारकप्रतीतिवि षयत्वं । साच प्रतीतिर्नसम्भवति प्रतियोगिग्राहिकया प्रतीत्या तत्रैव तद भावग्रहासम्भवादित्यर्थः । ननु प्रपंचविधायकनिषेधक श्रुतिभ्यां तादृशप्रतीतेस्सम्भवस्तत्राह (श्रुतीनामिति) (व्यवस्थापनादिति) विहित-व्यतिरिक्तविषयतया स्थापनादित्यर्थः । ननु स्वात्यन्ताभाव समानाधिकरणत्व प्रकारकप्रमितिविषयत्वं साध्यम् , तच्च स्वात्यन्ता भावसमानाधिकरण विशेष्यकस्वात्यन्ताभाव समानाधिकरणत्व प्रकारक प्रतीतिविषयत्वं , साच प्रतीतिरेतदनुमान जन्यानुमितिरेव, स्वात्यन्ताभावसमानाधिकरण विशेष्यकेत्यंशे स्वात्यन्ताभाव सामानाधिकरण्यस्य प्रकारतयाऽवगाहनादित्यत्राह (अतएवेति) प्रतियोगिसमानाधिकरणतया ऽभावप्रत्यक्षस्यासम्भव निरस्ततया प्रतियोगिसामानाधिकरण्यावच्छिन्ना भावानुपलम्भेन तादृशाभावस्य निरस्ततया तत्साध

कृत्स्नप्रत्यक्षोपरोधेच निर्मूलतया ऽनुमानप्रामाण्यस्यैवासम्भवात् । तदभ्युपगमेच स्वोक्तिविरोधात्, परसिद्धान्तस्थिरीकरणाच्च । अप्रमाणेन साधितस्यापि सत्यत्वे ऽस्मदुक्तिमात्रेणापि तद्दूषणस्य दुर्वारत्वात् । नापि षष्ठः ; सिद्धसाधनादेव । सर्वं ब्रह्मात्मकमिति भास्करादिभिरिव त्वयापीष्यत इति चेन्न : तदपृथक्सिद्धिमात्रेणाऽस्माभिस्तदुक्तेः । तथापि सत्य भूतब्रह्मव्यतिरेक साधनादसत्यत्वं फलतीति चेन्न;— स्वयमपि सत्यस्य सत्यान्तरव्यतिरेकमात्रेणा सत्यत्वप्रसंगाभावात, स्वयं घटस्य घटान्तरव्यतिरेकेऽपि नह्यघटत्वं । ब्रह्मैकमेव सत्यमिति सिद्धे तद्व्यतिरेकसाधनेनैवासत्यत्वं सिद्ध्यतीति चेन्न;- आत्माश्रयप्रसंगात्, अवधारणेन हि प्रपंचासत्यत्वं विवक्षितं, ततएवच तत्सिद्धिरिति । श्रुतिसिद्धब्रह्ममात्र सत्यत्वोपजीवने अनुमाननैरर्थक्य प्रसंगः, अन्ततः श्रुतेरेव पुरस्करणीयत्वात, तस्याश्च निरपेक्षत्वात् । विप्रतिपन्नं प्रत्यनुमानं सप्रयोजनमिति चेन्नः-श्रुतिप्रामाण्यम-

---

नस्यानेनानुमानेना सम्भवादित्यर्थः । (कृत्स्नेति) अनेनानुमानेना भावसाधने एतद्बाधिततयाकृत्स्नप्रत्यक्षस्याप्रामाण्या त्पक्षहेतुव्याप्त्यादीना मसिद्ध्यानुमानप्रामाण्यासम्भवाच्चेत्यर्थः । अनुमानाप्रामाण्यप्रसंगइष्टइत्यत्राह (. तदभ्युपगमइति) एतदनुमानप्रयोगविरोधादित्यर्थः (परेति) बाधकाभावात् सत्यत्वस्यैव सिद्धिप्रसंगइत्यर्थः । प्रामाण्यप्रयोजकव्याप्त्याद्याकारविरहिणापि लिंगेन साधितस्य सत्यता यादृच्छिकसंवादस्थले दृष्टा, तद्वदिहापि स्यादित्याशंक्य तथा सत्यस्मदुक्तिमात्रेण तदभावोऽपि सत्यं स्यादिति परिहरति (अप्रमाणेनेति) (ततएवेति) अनेनानुमानेन प्रपंचासत्यत्वसिद्धावेव प्रपंचासत्यत्वसिद्धिरित्यर्थः । ननु श्रुतिवदनुमानस्यापि प्रामाण्यान्नान्यतरेणा न्यतरानर्थक्यमित्यत आह (अन्ततइति) अनुमानात्पूर्वं नियमेन श्रुतेः प्रवृत्तेस्तयानुमाननैरर्थक्यं श्रुतेस्त्वनुमाननिरपेक्षत्वात् तेनात्र नतस्यानैरर्थक्यमिति । विप्रतिपन्नंप्रति-श्रुतिप्रामाण्यविप्रतिपन्नं प्रतीत्यर्थः । ननुब्रह्मैक

निच्छतस्तदुपजीवनासम्भवात् , इच्छतस्तयैव तत्सिद्धेः । श्रुतेश्च प्रत्यक्षाद्यविरोधिविषयत्वे सिद्धे साकथं प्रत्यक्षादिबाधकानुमानस्योपजीव्या । ननु सत्यमिति केनचित्सामान्यतो निश्चित्य तद्व्यतिरेकं स्साध्य तइति चेन्न;- प्रत्यक्षादिभिस्तन्निश्चये प्रपंचस्यैव सत्यतया तस्य तद्व्यतिरेकसाधनायोगात् । ततश्च शास्त्रनिश्चित सत्यव्यतिरेक साधनेपि तस्य सत्यान्तरत्वमात्रं सिध्येत् । सत्यत्वात्यन्ताभावः साध्य इति पक्षेप्येवमेव दोषोग्राह्यः । नापि सप्तमः, तत्किंलोकतः शुक्तिरजतादिषु विधातुमापणिकरजतादिषु निषेद्धुं च शक्यं किंचिदथाशक्यमिति; न प्रथमः, प्रत्यक्षादिभिर्बाधस्य दुर्निवारत्वात् । नद्वितीयः, तस्याप्रसिद्धत्वात् । तथाविधस्य कस्यचिदन्यस्य साधने तेनाप्युपहितस्य प्रपंचस्याक्षतत्वेना निष्टाभावात् । एवं प्रत्यक्षबाधे निरूपिते सत्यर्थापत्यभावयोः पृथक्प्रामाण्यमिच्छतां ताभ्यामपि बाधः सिद्धः । अबाध्यत्वलक्षणव्यवहारा विसंवादान्यथानुपपत्त्या सत्यत्वसिद्धिः । अभावोपि प्रपंचस्य बाध्यत्वाभावाख्यं सत्यत्वं प्रकाशयन् मिथ्यात्वानुमानं बाधत एव। नचात्र योग्यानुपलब्धि र्नास्तीति वाच्यं:- योग्यत्वस्योपपादितत्वात् । नहि लोकसिद्धमिथ्यात्वा दन्यत् किमप्ययोग्यं मिथ्यात्वमस्ति । नचानयोः श्रुतिबाधः;- तदान्यपर्यस्थापनात् ।

मेव सत्यमिति निश्चित्य नसत्यवैलक्षण्यं साध्यते, येन मिथ्यात्वश्रुति रुपजीव्येत, किन्तु सत्यमस्तीति निश्चित्येति शंकते (नन्विति) (प्रत्यक्षादिभिरिति) तेषां विशेषविषयत्वनियमादिति भावः। (एवमेवेति) प्रत्यक्षादिबाधो ग्राह्यः (प्रत्यक्षादिभि र्बाधस्येति)सत्यत्वग्राहिप्रत्यक्षादिनेत्यर्थः । तथाविधस्यं-उक्तविधिनिषेधाशक्यस्य । अन्यस्य- प्रपंचादन्यस्य । एवंच प्रपंचमपजिहीर्षतोऽधिकमपि साधितमिति भावः ।(प्रत्यक्षबाधे निरूपितेसतीति)तद्वदितिभावः (योग्यत्वस्येति)चरमविकल्पदूषणे शुक्तिरजतादिप्रसिद्धातिरिक्तस्यकस्यचिन्मिथ्यात्वरूपतानिषेधान्मिथ्यात्वस्ययोग्यत्वमुपपादित मिति भावः । तदेव स्मारयति (नहीति) ननूक्त-

ननु सत्यत्वे सिद्धेबाधः, तदेव न किञ्चि त्पश्यामः; किं सत्तासामान्यं, उतस्वरूपसत्वं, अथवा भावत्वं, यद्वा प्रामाणिकत्वमात्रं, अथवा किञ्चिदिति । नाद्यः, सामान्यमनिच्छतस्तदयोगात, इच्छतोपि समान्यादिषु मिथ्यात्वसाधनस्य निरुपद्रवत्वप्रसंगात् । न द्वितीयः, तत्रापि किं स्वरूपमेव सत्वं, उतस्वरूपस्य सत्वं ; पूर्वत्रमिथ्याभूतस्यापि स्वरूपंस्वरूपमेवेति नकिञ्चिद्व्यतिरिक्तं भवति। निस्स्वरूपंतदितिचेन्न; तेनैव रूपेण तत्स्वरूपनिर्णयात् , अन्यथा प्रातिस्विकवस्त्वंतरस्वरूपाभावे सर्वेषां निःस्वरूपत्वप्रसंगात् । उतरत्र तत्सत्वस्य सत्वान्तराभावे मिथ्यात्वं दुर्वारं, ततश्च विश्वमिथ्यात्वं । न तृतीयः, अभावस्य मिथ्यात्वप्रसंगात् । इष्टमिदमितिचेन्न; अविशेषाद्भावस्यापि तत्प्रसंगात् । भावान्तराभावत्वादेतुभावानामेवाभावत्वात् तत्प्रसंगः । न चतुर्थः, दृश्यत्वानुमानमनपोद्यतदसिद्धेः ।

स्वसत्त्वग्राहिप्रत्यक्षेण बाधो न सम्भवति प्रपञ्चे सत्यत्वस्यैवानिरूपणादिति शङ्कते (नन्विति) ब्रह्मणितु प्रामाणिकत्व रूपं सत्वं सम्भवतीति भावः (न किंचिदिति) मिथ्यावस्तुव्यावृत्तं किंचित्सत्यत्वं नोक्तं भवतीत्यर्थः (निःस्वरूपमिति) सत्यत्वानंगीकारेतुच्छत्वपर्यवसानादिति शंकितुर्भावः (तेनैवेति) असद्विलक्षणत्वस्याभ्युपगमात् मिथ्यात्वाश्रय स्वरूपेणैव सस्वरूपत्वमित्यर्थः (अन्यथेति) यत्किञ्चित्स्वरूपे सत्यपि यत्किञ्चित्स्वरूपाभावेन निस्स्वरूपत्वइत्यर्थः (वस्त्वन्तरस्वरूपाभावइति) सतीतिशेषः । प्रातिस्विकरूपाभावस्य सत्त्वादित्यर्थः (उत्तरत्रेति) सत्त्वान्तरांगीकारे त्वनवस्था, सत्वस्याद्याप्यनिरूपणा दात्माश्रयश्चेत्यपि द्रष्टव्यं (इष्टमिति) अभावत्वादेव तत्र मिथ्यात्वमिष्टमित्यर्थः (भावस्यापीति) प्रमाणसिद्धत्वाविशेषेप्यभावस्य मिथ्यात्वेभावस्यापि तत्प्रसंगइत्यर्थः । (भावान्तरेति) अभावत्वस्य मिथ्यात्वप्रयोजकत्वे इष्टे पर्यवसानादिति भावः । दृश्यत्वे मिथ्यात्वानुमान प्रवृत्तिसममेव प्रपंचग्राहिप्रतीतेः प्रामाण्यसन्देहात् प्रामाणिकत्वासिद्धेः

न पंचमः, तस्य सर्वत्र प्रमाणबाध्यत्वे शशविषाण वदसिद्धेः । योग्यत्वेऽनुपलम्भ बाधादिति ॥

तदेतदसारं;—प्रामाणिकत्वमेव हि सर्वत्र सत्त्वमभ्युपगच्छामः । तदुक्तं भाष्ये—" व्यवहारयोग्यतासत्त्व " मिति । नचैतद्बाधकानुमाने जीवति न सिद्ध्यतीति वाच्यम् ,कालात्ययापदेशस्य निर्मूलत्वप्रसंगात् । यथा वह्न्यनुष्णत्वानुमानं प्रतियोगिभूतोष्णत्वग्राहिणा बाध्यते, तथेहापि सत्यत्वव्यतिरेकानुमानं प्रतियोगिविशेष सत्यत्वग्राहिणा बाध्यते । नच तन्नगृह्यतइति वाच्यम् , तद्व्यतिरेकासिद्धिप्रसंगात् । ब्रह्मणि तद्ग्रहाद्व्यतिरेकसिद्धिरिति चेन्नः ब्रह्मण्यपि सत्वस्यत्वदुक्तयुक्तिभिः खण्डनात् । तत्राखण्डितत्वे तदेव विश्वस्यापि सत्व

न सत्त्वग्राहि प्रत्यक्षबाधइत्यर्थः (सर्वत्रेति) ब्रह्मणि ततोन्यत्रचेत्यर्थः (प्रामाणिकत्वमिति) एतेन जगत्सत्वानुपपत्तिरेव विपक्षे बाधिकेतिनवीनोक्तं निरस्तं ।

यदुक्तं प्रमात्वं यदि तद्वति तद्वैशिष्ट्यज्ञानं तदा शुक्तिरजतस्येव प्रपंचेपि न तादृशं सत्त्वं निवार्यं, मिथ्यात्वाविरोधित्वात् ; तन्न-लाघवेन प्रतियोगिमात्रस्य अभावविरोधित्वेन उक्तसत्त्वस्य मिथ्यात्वविरोधित्वात् , अतएव शुक्तिरजतस्याप्यनिर्वाच्यत्वायोगात् (कालात्ययेत्यादि) प्रपंचविषयं ज्ञानं स्वप्रकाशं स्वतः प्रमाणञ्च, अतो घटादिविषयकत्व प्रमात्वग्राहिणाप्रत्यक्षेण प्रमाणविषयत्वं घटादौ गृहीतमिति उष्णत्वप्रत्यक्षेणा नुष्णत्वानुमानस्येव मिथ्यात्वानुमानस्यापि बाधः । उष्णत्वग्राहि प्रत्यक्षस्येवास्यापि बलवत्तया नात्रानुमानमात्रेण प्रत्यक्षविषये प्रामाण्ये सन्देहइति भावः ।

ननु प्रपञ्चे सत्यत्वस्यैवाग्रहणात्कथं प्रत्यक्षबाधइति पूर्वोक्तभावानभिज्ञ शंकां निराकरोति (नचेति) (तद्व्यतिरेकेति) क्वचित्प्रसिद्धस्यैव निषेध्यत्वादित्यर्थः (त्वदुक्तेति) दृश्यत्वादीनां ब्रह्मण्यपि प्रवृत्तेरिति भावः (तत्रेति) दृश्यत्वादीनां ब्रह्मण्यबाधकत्वे प्रपंचेप्यबाधकत्वात्

मिति पश्य । स्वतस्सदेव ब्रह्मेतिचेत् ? किमहेतुकत्वं विवक्षितमुतस्वयं प्रकाशत्वं, यद्वा सत्वाभावेऽपि सदिति । पूर्वत्र ब्रह्मव्यतिरेकात्प्रपंचस्य कार्यत्वमेव साधितं स्यात् । ततश्चांशतस्सिद्धसाध्यता । द्वितीयेपि परप्रकाश्यत्वसाधना त्सएव दोषः । तृतीयेतु प्रपंचस्यापि तद्वत्सत्वे को विरोधः । एतेन सत्त्वस्य सत्त्वान्तराभावादसत्त्व प्रसंगोऽपि प्रत्युक्तः । अतस्सत्वमात्रप्रतिक्षेपे शून्यवादावतारः । क्वचित्तदभ्युपगमे-प्रामाणिकेषु सर्वेषु तत्सिद्धिरनिवार्येति । नचैवं मिथ्यात्वासत्वादौ तस्य सामान्यतोऽस्माभिरप्रतिक्षेपात् सत्यस्यैवहिरजतत्वादेः -

---

तत्र सत्यादिवाक्येनेव प्रपंचेपि प्रत्यक्षेण तदेव सत्त्वं सिद्ध्यतीति भावः (स्वतइति) ब्रह्मणो निर्विशेषत्वात् ज्ञानत्वानन्दत्वादिशून्यस्यापि ज्ञानानन्दादिस्वरूपत्ववत् सत्यत्वशून्यत्वेपि सत्यस्वरूपत्वं संभवति, अतो मदुक्तयुक्तिभि र्ब्रह्मण्यपि धर्मभूतसत्वखण्डने ऽपि न दोषः, प्रपंचेतु सधर्मके सत्त्वखण्डने सत्स्वरूपत्वमेव नस्यादित्यर्थः । शब्दार्थसम्भवमात्रेण विकल्पयति (किमिति) (तृतीयेत्विति) प्रत्यक्षादिना सदिति प्रतीतं वस्तुतस्सत्यत्वधर्मनिषेधेपि सत्स्वरूपमेव स्यादित्यर्थः । ननु यदि मिथ्यात्वं सत्त्वंच क्वचिदिष्यते, ततोऽन्यत्र सर्वत्रापिस्यात् ; अन्यत्र नचेच्छुक्तिरजतशशशृंगादावपि नस्यादित्याशंक्याह (नचैवमिति) मिथ्यात्वासत्वादिशब्दार्थमात्रं न प्रतिक्षिप्यते, किन्तु त्वदभिमतं; तच्च नक्वापि, मदभिमतेतु मिथ्यात्वासत्वे सर्वत्रापीत्यर्थः (सत्यस्यैवहीति)

ननु रजतत्वस्य सन्निकर्षाभावात्कथं तज्ज्ञानं, सन्निकर्षाभावे ऽपि प्रतीतावतिप्रसंगः; ज्ञानंच नसन्निकर्षः; तस्मान्नान्यथाख्यातिसम्भवः; अतो निर्वचनीयमेव रजतं स्वाभावाधिकरण उत्पद्यते , तदेव भ्रमविषयइत्येष्टव्यम् , अतो ऽनिर्वचनीयत्वमेव मिथ्यात्वमिति । उच्यते , यद्यन्यत्र क्लृप्तकारणं नास्ति, तर्हि यथाचक्षुषा घटाभावं पश्यामीत्यनुभवे सत्यपि त्वयापि क्लृप्तप्रत्यक्षकारणाभावादभावाख्यंप्रमाणान्तरमंगीक्रियते, इन्द्रियान्वयव्यतिरेकयोश्चाधिकरणग्रहे-

णोपक्षयः, पश्यामीतिप्रतीतिश्च तावन्मात्रादितिकल्प्यते; तथेहापिदोषाख्यं अन्यद्वा किंचित् कारणान्तरं कल्प्यतां। यदि रजतंपश्यामीत्यनुभवानुसारेण तज्ज्ञानस्य प्रत्यक्षान्तर्भाव इष्यते, तदा अभावोपलब्धौ प्रत्यक्षबहिर्भावाङ्गीकारस्तव विरुध्येत, घटाभावं पश्यामीत्यनुभवस्य तत्रापि सत्त्वात्। वस्तुत स्तु नात्र प्रत्यक्षसामग्रीविरहः, विशेष्य सन्निकर्षस्यैव विशेषणे प्रत्यक्ष हेतुत्वात्। नच विशेषणसन्निकर्षस्याकारणत्वे उष्णीषाच्छन्नकुण्डले-कुण्डलीति बुध्यापत्तिः; तत्रापि कुण्डलसंयोगमादाय संयोगीति प्रत्यक्षापत्तेः। नच संयोगप्रत्यक्षेप्रतियोगि प्रत्यक्षस्य तत्सन्निकर्षस्य वा हेतुत्वात् तदभावइति वाच्यम्; ममापि तुल्यत्वात्। कुण्डलीतिप्रत्यक्षस्य संसर्गविधया संयोगप्रत्यक्षत्वात्। अव्याप्यवृत्तिप्रत्यक्षे तद्विशेषणक तत्संसर्गक तद्विशेष्यकौदासीन्येन इन्द्रियसंयोगप्रदेशावच्छेदेन समवायस्य हेतुत्वाच्च। ननु त्वया प्रतियोगिप्रत्यक्षाभावेपि दण्ड्ययमासीदिति दण्डिप्रत्यभिज्ञारूप दण्डसंयोगप्रत्यक्षांगीकारा न्न तौल्यमिति चेन्न; संस्काराजन्य संयोगप्रत्यक्षे प्रतियोगिप्रत्यक्षस्येन्द्रिय संयुक्तदेशावच्छेदेन समवायस्यच हेतुत्वात्। ननु संयुक्तसमवायाभावात् कथं-द्रव्यगतजातिप्रत्यक्षमिति चेन्न; द्रव्यगतजातिविशेष्यक प्रत्यक्षएव-तस्य हेतुत्वात्। विशेष्यसन्निकर्षत्वेन विशिष्टप्रत्यक्षत्वेन सामान्यतः कार्य कारणभावेन यत्सामान्ययोरिति न्यायेन तद्विशेषयोरेव कार्यकारण-भावौचित्यात्। किंच गुणकर्मादिग्रहाव्यापकत्वात् संयुक्तसमवायंप्रति न द्रव्यजातिप्रत्यक्षत्वं कार्यतावच्छेदकं, शब्देसत्ताजाति प्रत्यक्षानुपपत्तेश्च। ततएव न द्रव्यसमवेत पत्यक्षत्वं, शब्दग्रहणानुपपत्तेश्च। अत-स्संयुक्तेतरसमवायमात्राविषय संयुक्तसमवेत प्रत्यक्षत्वं संयुक्तसमवायजन्यतावच्छेदकं, अतो नाप्रसंगातिप्रसंगौ; तथाच भ्रमस्थले रजतत्वस्य संयुक्तसमवेतत्वाभावात् न प्रत्यक्षासम्भवः। नचासन्निकृष्टरूपादिप्रत्यक्षापत्तिः, विशेष्यसन्निकर्षाभावात्। नचासन्निकृष्टरूपविशेषणकसन्निकृष्ट रूपनिष्ठरूपत्वविशेष्यकप्रत्यक्षापत्तिः, रूपेतरावृत्तित्वेसति सकलरूप-वृत्तित्वभाने तद्भानस्येष्टत्वात्। क्वचिद्विशेषणज्ञानाभावात् त-त्स्मरणेसति तद्विशिष्टज्ञानमिष्टमेव। नन्वतीतश्यामतादिविशिष्टप्रत्यक्षप्र-

संग इतिचेन्न ; लौकिकप्रत्यक्षस्य वर्तमानकालावच्छेदेनविषयग्राहकत्व नियमात, तस्यात्रबाधाद्दोषाभावाच्चाभावात्। लौकिकप्रत्यक्षेच वर्तमानका लावच्छेदेन विषयोल्लेखित्वं नियतम् । अतः प्रत्यक्षस्यायं स्वभावः। तथाच तत्सामग्रीविशेषसामग्रीं, न तया विना सामान्यसामग्र्या कार्यमितिनाती तश्यामताविशिष्टलौकिकप्रतीतिप्रसंगः । नचैवं वाच्यम् सामग्रीसन्नि धानप्रयुक्तोऽयं नियमोनस्वभावादिति;विशेषणसन्निकर्षहेतुत्वेऽपि श्यामता दशायामपी दानीमयंश्यामोनेति भ्रमेसतिश्यामतामात्रधीप्रसंगात् । समानप्रकारकंप्रत्येव प्रतिबन्धकत्वात् तत्कालावच्छेदेन श्यामताभा वं बोधयन्दोषोऽपि तद्विपरीतस्यतत्कालावच्छिन्न श्यामताध्यक्षस्यैव प्रतिबन्धकः । यथाच शाब्दत्वस्य शब्दजन्यतावच्छेदकत्वे ऽपि तज्ज्ञान- स्यान्वयविषयतानियमात् योग्यताज्ञानं शाब्दज्ञानकारणं, प्रतियोग्यर्थज्ञा नमात्रे तदपेक्षाबीजाभावात , तथावर्तमानकालावच्छेदार्थं तत्सामग्रीवि शेषतो लौकिप्रत्यक्षसामग्री । किंच संयुक्तसमवेतप्रत्यक्षत्वं कार्यताव- च्छेदकं नतु तत्कालीनसंयुक्तसमवेतप्रत्यक्षत्वं, गौरवात् ; अतइदानीं संयुक्तसमवायाभावात् नातीतश्यामताप्रत्यक्षं । नन्वेवं घटे रक्तता दशायां अतीतश्यामतारोपो नस्यादितिचेन्न; इष्टापत्तेः, श्यामान्तरस्यैव तत्रारोपात , अगृहीतश्यामान्तरस्यापि सामान्यप्रत्यासत्त्या श्यामान्तर ज्ञानसंभवात् । पूर्वकालीनरूपवानयमित्यारोपः कथमितिचेन्न ; तत्रापि रूपे तत्कालीनत्वस्यारोपात् अलौकिकमतीतश्यामतादिविशिष्टप्रत्यक्षं तत्सामग्र्यां सत्यामिष्टमेव । किंच द्रव्यसमवेतप्रत्यक्षे संयुक्तसमवा यस्य हेतुत्वे त्वन्मते रजतत्वस्यैव शुक्तित्वरूपत्वात् तदेव शुक्त्यैव रजतत्वात्मनाभि व्यज्यतां, दोषादिति नान्यथाख्यातिविरोधः । ननु सामान्यतोपि विषयसन्निकर्षत्वेनैव हेतुतास्तु, लाघवात्, नविशेष्यसन्नि कर्षत्वेन, गोरवादिति चेन्न , तत्सन्निकर्षस्य तत्प्रत्यक्षहेतुत्वे द- ण्डचयमासीदित्यादिप्रत्यभिज्ञा प्रत्यक्षोच्छेदप्रसंगात् । दण्डादिसन्नि- कर्षाभावात् । ननु तत्सन्निकर्षस्तदवच्छेदेन प्रत्यक्षकारणं, अतः प्र- त्यभिज्ञा देवदत्तेसन्निकर्षसत्त्वात तदवच्छेदेन प्रत्यक्षं, दण्डादौ स-

न्निकर्षाभावात् तदवच्छेदेन स्मृतिरितिचे त्तर्हि घटे सन्निकृष्टे-पटेचा सन्निकृष्टे तदुभयविषयकं घटांशेग्रहणात्मकं पटांशेस्मरणात्मक मेकं ज्ञानं स्यात् , अतस्त्वयापि तत्परिहारार्थं विशेष्यसन्निकर्षो ऽपि कारणमिति वाच्यम् , अतः कारणंतदेवेत्युचितं आवश्यकत्वात् । ननु त्वत्पक्षेपि विशेष्यसन्निकर्षस्य हेतुत्वात्सएवातिप्रसंग इतिचेन्न ; मयातद्विशेष्यकप्रत्यक्षे तत्सन्निकर्षःकारणमित्यङ्गीकारात । ननुममापि सं-स्कारोविशेषणांश एवहेतुरित्यंगीकारान्नातिप्रसंगइतिचेन्न, विशेष्यस्मृ त्यभावप्रसंगात् । ननु प्रत्यक्षसामग्रीं प्रतिविशेषणांश एव सहकारी संस्कारइतिचेत् ; किं सहकारित्वं दण्डस्येवचक्रं प्रति, किंवा घटपट-सन्निकर्षयो स्समूहालम्बनइव संस्कारप्रत्यक्षसामग्र्योस्समाहारमात्रं । नाद्यः, प्रत्यभिज्ञायां ज्ञानप्रत्यासत्तिस्वीकारप्रसंगात । विशेष्य सन्निकर्षस्य विशेषणांशे हेतुत्वस्वीकारप्रसंगाद्वा । ननु नप्रत्यक्षसाम ग्रीविशेषणांश हेतुः, किंत्विन्द्रियं, तथाच तज्जन्यमपि विशेषणांश ज्ञा-नं नतत्सन्निकर्षापेक्षं मनोजन्यानुमिति वदितिचेन्न; इन्द्रियत्वेनेन्द्रिय जन्यस्य ज्ञानस्य प्रत्यक्षत्वनियमात । नान्त्यः, सन्निकृष्टा सन्निकृष्टवि-शेष्यकप्रत्यक्ष स्मृत्यात्मक ज्ञानप्रसंगतादवस्थ्यात् । ननु प्रत्यक्षान्तर्गत विशेष्यांश भिन्नस्मृतित्वं कार्यतावच्छेदकं संस्कारं प्रति, अतोनाय मतिप्रसंगः; नचा सन्निकृष्टविशेष्यज्ञानांशे प्रत्यक्षत्वाभावात् तत्राप्युक्तकार्य तावच्छेदक सम्भवादति प्रसंग एवेतिवाच्यम् ,प्रत्यक्षत्वाधिकरणज्ञानान्त-र्गत विशेष्यांशत्वस्य प्रत्यक्षत्वानधिकरणेऽप्यंशेऽनपायात् , इति चेन्न; गौरवात , लाघवेन स्मृतित्वस्यैवकार्यतावच्छेदकत्वात् । ननु ममापि विषयसन्निकर्षस्य कारणत्वाल्लाघवं, तवतु विशेष्यसन्निकर्षस्य कार-णत्वात् गौरवमितिचेन्न; दण्डयासीदीत्यादौ दण्डादेरपि प्रत्यक्षत्वाश्र-यं तदेव ज्ञानं प्रतिविषयत्वेन तत्सन्निकर्षकल्पनाप्रसंगात् , अंशविवक्षा-यांतु यद्विषयकत्वावच्छेदेन प्रत्यक्षत्वं तत्सन्निकर्षत्वं पर्यवस्यति, इदंच वि शेष्यसन्निकर्षत्वापेक्षया गुरु तुल्यंवास्यादित्य स्मत्पक्षे गौरवं, सत्यपि गौरवेऽस्मिन् प्रत्यक्षान्तर्गतविशेष्यांशभिन्नस्मृतित्वरूपत्वदभिमतकार्यत-

वच्छेदकापेक्षया लाघवं विशेष्यसन्निकर्षस्यस्पष्टम् । किंचास्तितावद्देवदत्ते दण्डितयानुभूते यज्ञदत्ते ऽयमेव पूर्वं दण्ड्यासीदिति भ्रमः प्रत्यभिज्ञारूपः, एवं पूर्वमयं श्याम आसीदिति; तत्र नदण्डीत्यंशे स्मृतिः, तस्य पूर्वं दण्डितयाननुभवात् , अतो परोक्षभ्रमएव वाच्यः, तद्वचनानिर्वचनीयोत्पत्तिसम्भवः, अतीतत्वानुभवानुरोधेन इदानीं दण्डस्य तद्ध्वंसस्याप्युत्पत्ते र्वाच्यत्वात् तस्यच विरोधेन असम्भवात् ; अतो ज्ञानस्य प्रत्यासत्तित्वं विशेष्यसन्निकर्षमात्रस्य हेतुत्वंवा स्वीकृत्य अन्यथाख्यातिरेवस्वीकार्यैति तत्र क्लृप्तसामग्र्या सर्वत्रान्यथाख्यातिसिद्धिः ।

ननु दण्डतत्संसर्गयो स्स्मृतिः विशेष्यांशेऽत्वनुभवइति नप्रत्यक्षान्यथाख्यातिरिति चेत्; तथासति रजतादिभ्रमस्यापि रजतत्वाद्यंशे स्मृतिरूपत्वसंभवादन्यथाख्यातिः कारणबाधाभावात् सिद्ध्येत् । नचारोप्यांशे साक्षात्कारत्वानुभवविरोधः; स्मर्यमाणस्यापि रजतस्य साक्षात्क्रियमाणशुक्त्यभेदारोपात् , जातेस्तु साक्षात्क्रियमाणसंसर्गारोपात्तादृशानुभवोपपत्तेः । किंच शुक्तिरजतविपरीतसमूहालम्बने सन्निकर्षस्य विद्यमानत्वादन्यथाख्यातिर्दुर्वारा । नच यद्गततया गृह्यते तद्वृत्तिसंयुक्तसमवायोहेतुरितिवाच्यम् ; गौरवात् । नचैवं सत्येकघटे सन्निकृष्टे सति घटान्तरे घटत्वग्रहापत्तिः; घटान्तरसन्निकर्षइष्टापत्तेः, असन्निकर्षेच विशेष्यसन्निकर्षाभावेनैव तदभावात् । एतेन विशेषणसन्निकर्षस्याकारणत्वे पर्वते परामर्शानन्तरं वह्निविशिष्टप्रत्यक्षंस्यादितिनिरस्तं, प्रतियोगिप्रत्यक्षाभावात् , तत्संयोगावच्छेदेन सन्निकर्षाभावाच्च । किंच तवमते पर्वतो वह्निमानिति ग्रहणस्मरणात्मकं ज्ञानं कुतो न स्यात् , पर्वतस्य पूर्वं वह्निमत्वेन अननुभवादिति चेत् ? तथासति अदण्डिनि दण्ड्यासीदिति ग्रहणस्मरणात्मकं ज्ञानं नस्यात् । यदि तत्र दण्डिसदृशधर्मदर्शनमात्रात् तत्रानुभवाभावेपि तस्यैव दण्डितया स्मरणं, तर्हीहापि धूमवत्वेन सादृश्यदर्शनाद्वह्निविशिष्टत्वेन स्मरणापत्तिः । अननुभूत विषयस्मृति सामग्र्यपेक्षयानुमिति सामग्र्या बलवत्त्वादनुमितिरितिचेत् ? तर्ह्यनुमिति सामग्र्याः प्राबल्यात अनुमितिरित्यस्तु । ननु संशयोत्तरपुरुषप्रत्यक्षं न स्यात् ,यदिसमानेविषये प्रत्यक्षसामग्रीप्रबला-तर्हि पर्वते वह्न्यनुमितिं न स्यात् , प्रत्यक्षंच्चस्यात् ।

उपनीतप्रत्यक्षसामग्र्यपेक्षयानुमिति सामग्रीप्रबलाचेत, संशयोत्तर प्रत्यक्षभ्रमस्तर्हि नस्यात् । दोषाघटितोपनीत प्रत्यक्षसामग्रीतो नुमितिसा मग्रीबलवतीतिचेन्न - पर्वते वह्निभ्रमानुमित्यनुपपत्तेः, तत्र विशेषभ्रमरूपदोषस्य सत्त्वात् । प्रत्यक्षमात्रप्रयोजक दोषाघटितोपनीतप्रत्यक्षसामग्र्यपेक्षया नुमितिसामग्रीप्रबला, संशयोत्तर प्रत्यक्षभ्रमेच सादृश्यस्य तत्प्रक्षस्यच प्रत्यक्षासाधारणदोषस्यसत्त्वात्, पर्वते तदभावात्; भ्रमविशेषदर्शनस्यानुमिति साधारणत्वा त्सादृश्य तत्प्रत्यक्षयोः कथंचिदत्रापि सम्भवेपि तस्य वह्निभ्रमंप्रति दोषत्वे मानाभावादिति चेन्न; - सौरभ्यव्याप्यदर्शनाभावदशायां चन्दनत्वभ्रमात् सौरभ्यप्रत्यक्षभ्रमो जायत इत्यवच्छेदक भ्रमोदोषइति सिद्धम्, तथाच व्याप्यदर्शन दशाया मप्यनुमिति र्नस्यात, अवच्छेदकदर्शनरूप प्रत्यक्षमात्र-प्रयोजकदोषसत्त्वात्; नचेष्टापत्तिः, प्रमास्थलेऽ वच्छेदकदर्शनकालीनेनापि व्याप्यदर्शनेनानुमिते स्स्वीकर्तव्यत्वात्, त्वदुक्तप्राबल्यप्रयोजकस्यापि तत्रसत्त्वात् । स्वकल्पितप्रयोजकमात्रानुसारेण प्रमास्थलेऽनुमितिरेव भ्रमस्थले प्रत्यक्षमेवेति वैषम्यकल्पनस्यानुचितत्वात, अनुमिति भ्रमविष पर्वतेप्यवच्छेदकदर्शन सत्त्वात् ।

यदपि संशयानुत्तर प्रत्यक्षसामग्रीतः अनुमितिसामग्रीप्रबला, तेन संशयोत्तरपुरुषप्रत्यक्षोपपत्तिरिति; - तदपि न, सन्दिग्धवह्नौ पर्वते प्रत्यक्षापत्तेः । असन्दिग्धपुरुषत्वे सन्निकृष्टे पुरुषे व्याप्यदर्शना दनुमित्यापत्तेश्च । नन्व सन्निकृष्टद्रव्यविशिष्ट प्रत्यक्षसामग्रीतो ऽनुमितिसामग्रीबलवती, तेन पुरुषप्रत्यक्षं वह्निप्रत्यक्षाभावश्च-सिद्धः । नच घटे पच्यमानत्वेन श्यामविरक्तिमानुमाना नुपपत्तिः, अवर्तमानविशेषणकप्रत्यक्षसामग्रीतो बलवत्त्वादितिचेत्;-एवमपिकरभ्रमात पुरुषतादात्म्यारोपानुपपत्तेः । किंच सौरभ्यव्याप्यदर्शने ऽपि सौरभ्यानुमिति र्नस्यात, सौरभ्यस्य वर्तमानत्वात, अद्रव्यत्वाच्च । नचेष्टापत्तिः, यत्र प्रत्यक्षत्वं नानुभवसिद्धं तत्र प्रत्यक्षत्वस्य मानान्तरासंभवनिबन्धनतया मानान्तरासम्भवे तज्जन्यत्वस्यैव वाच्यत्वात् ।

अथ प्रत्यक्षजनकसन्निकर्षानाश्रयविशेषणकप्रत्यक्षप्रमासामग्रीतो-ऽनुमितिसामग्रीबलवतीति पुरुषप्रमाभ्रमयोरुपपत्तिः, सौरभ्याप्रत्यक्षतोपपत्तिश्च, चक्षुस्संयुक्तसमवायस्य गन्धाग्राहकत्वात्; एवं पर्वतेनवह्निप्रत्यक्षापत्तिरितिचेत् ? पर्वते वह्निभ्रमानुमित्यनुपपत्तेः । नचासन्निकृष्टद्रव्यविशिष्ट प्रत्यक्षंसामग्रीतोपि बलवत्त्वान्न दोषइति वाच्यम् ; -अचन्दने चन्दनत्वेन गृह्यमाणे सौरभ्यव्याप्यभ्रमात् सौरभ्यानुमित्यनुपपत्तेरितिचेत् ॥-

उच्यते; वर्तमानकालावच्छेदेन विशेषणावगाहिविशिष्टप्रत्यक्षसामग्रीतोऽनुमितिसामग्रीबलवती, अतो सन्निकृष्टस्य वह्नेर्वर्तमानकालावच्छेदेन प्रत्यक्षासम्भवात् पर्वते वह्न्यनुमितिसामग्री बलवती । ननुवर्तमानकालावच्छेदेनैव वह्नेः प्रत्यक्षं पर्वते स्यात् , प्रत्यक्षसामग्र्या स्सत्त्वात् , इतिचेन्न;-वर्तमानकालस्यायोग्यत्वेन तद्भासनासामर्थ्यात् । नच वर्तमानकालोपस्थितिमात्रं तत्कालावच्छेदेन विशेषणवैशिष्ट्यप्रत्यक्षे सहकारि; गृह्यमाणजम्बूफलादौ श्यामिकोपनये कालोपनयेऽपि तज्जन्यप्रत्यक्षेणवर्तमानत्वाग्रहात् । अतोयस्मिन् काले यत्र यत्सत्तापादनमात्रेण तद्विशेष्यकप्रत्यक्षापादनसम्भवः सकालःस्वावच्छेदेन तत्र तद्विशेषणावगाहने हेतुः, नचानुमितिकाल स्तादृशः । ननु चन्दनमिदानीं सुरभीति चन्दनत्वावच्छेदेन ज्ञाते चन्दनविशेषे तदा दृष्टे इदानीमिदं सुरभीत्य - स्त्युपनीतसौरभ्यप्रत्यक्षं, तथाच यदा तत्प्रत्यक्षसामग्रीकाले तद्व्याप्यचन्दनत्वादिपरामर्शोऽपि तत्र स्यात् , तदा तत्रानुमितिर्नस्यादितिचेन्न ; तादृशकालप्रयुक्तवर्तमानकालीन विशेषणावगाहिताकप्रत्यक्षान्यप्रत्यक्षसामग्रीतो बलवत्त्वस्यविवक्षितत्वात् । यद्वा-साक्षात्कारत्वसन्देहयोग्यप्रत्यक्षसामग्रीतोऽनुमितिसामग्री बलवती, उपनयाद्यपेक्षसाक्षात्कारश्च तत्सन्देहयोग्यः । असाक्षात्कारत्वभ्रमयोग्य प्रत्यक्षसामग्रीतइतिवा, अचाक्षुषत्वादिभ्रमयोग्यप्रत्यक्षसामग्रीतइतिवा, योग्यसन्निकृष्टग्रहप्रतिबन्धकदोषाघटितोपनीतप्रत्यक्षसामग्री तइतिवास्तु; -तथाप्यननुभूतविषयस्मृत्यपेक्षया ऽनुमितिसामग्रीप्राबल्यस्य वाच्यत्वात् । तत्रच नाननुभूतविशिष्टस्मृतित्वं प्रतिबध्यतावच्छेदकं, संशयानन्तरमपि विशेषदर्शनात् सोऽयं पुरुषइति भ्रमप्रत्यभिज्ञोच्छेदापत्तेः । दोषाघटित

त्वविशेषणेच भ्रमानुमित्युच्छेदापत्तेः । योग्यसन्निकृष्टग्रहप्रतिबन्धकत्वादिना दोषविशेषणेच कुतो गौरवं, तवतु विशेषणांशे सन्निकर्षस्य कारणत्वमधिकं कल्पनीयं । किंचत्वन्मते संशयानन्तरं पुरुषभ्रमस्थलेऽनुमितिरेव स्यात्, प्रत्यक्षसामग्र्याः प्रतिबन्धिकाया स्तत्राभावात्, तत श्च प्रत्यक्षसामग्रीसम्पत्त्यर्थं विशेषणसन्निकर्षस्य हेतुत्वंवा त्याज्यं ज्ञानप्रत्यासत्तिर्वा स्वीकार्या । नचानिर्वचनीयोत्पत्ति सामग्र्यपि प्रतिबन्धिकाकल्प्यतइति वाच्यम्, तथासति प्रतिबन्धकान्तरकल्पनागौरवात्। किंचार्थसामग्र्याः प्रतिबन्धकत्वे पर्वते वह्निभ्रमानुपपत्ति दोषस्तवापि तुल्यः, अर्थसामग्र्यास्सत्त्वेन पर्वते वह्निमदुत्पत्तिप्रसङ्गात्, स्थाणौपुरुषवत्। नच तत्रार्थजनकदोषो नास्तीतिवाच्यम्, तथासति तादृशदोषा घटित प्रत्यक्षसामग्र्यपेक्षयानुमिति सामग्र्याः प्राबल्यसम्भवेनपर्वते भ्रमप्रत्यक्षापादनायोगात् । किंचार्थसामग्र्याः प्रतिबन्धकत्वेऽनुमित्सया पुरुषभ्रमानुमितिर्नस्यात, तथाच तत्रापि सिषाधयिषा विरह सहकृतार्थसामग्र्याः प्रतिबन्धकत्वस्य वाच्यतया पुनरपि गौरवं । तत्रैव सिसाधयिषा सहकृतानुमिति सामग्र्या अर्थप्रतिबन्धकत्वं च कल्प्यमित्यपिगौरवं । अस्तुवाविशेषणसन्निकर्षः कारणं, अस्तुप्रमायामेव, नतु भ्रम इतिकल्प्यतां । ननु लाघवा जन्यप्रत्यक्षत्वं कार्यतावच्छेदकं, नतु प्रमात्वपर्यन्तं गौरवादितिचेन्न; भ्रमेव्यभिचारोपस्थित्या लोके सामान्येन कारणत्व ग्रहासम्भवात । नच भ्रमस्साक्षिरूपत्वान्न जन्यइतिवाच्यम्; लोकेप्रमाया इव भ्रमस्यापि उत्पत्तिप्रतीतेस्सामान्यकारणत्व ग्रहपरिपन्थिव्यभिचारोपस्थिते रावश्यकत्वात् । नच परीक्षकाणां साक्षिरूपभ्रमे उत्पत्तिप्रतीते रर्थोत्पत्त्युपाधिकत्व ग्रहाद्व्यभिचारज्ञानाभावात् सामान्येन कारणत्वग्रह इतिवाच्यम्, तथा सति चक्रकप्रसंगात्, जन्यप्रत्यक्षत्वावच्छेदेन कारणत्वे निर्णीते भ्रमस्थलेकारणवाधेनान्यथा ख्यात्यसम्भवेऽनिर्वचनीयोत्पत्तिसिद्धौ तद्भ्रमरूपसाक्षिणि उत्पत्तिप्रतीते रर्थोत्पत्त्युपाधिकत्वे सिद्धे जन्यप्रत्यक्षत्वाभावा द्व्यभिचारग्रहनिवृत्तौ तदवच्छेदेन कारणत्वग्रहइति । अस्तु

वाविशेषणसन्निकर्षः प्रत्यक्षमात्रकारणं, नचात्रतदनुपपत्तिः, ज्ञानस्यैव प्रत्यासत्तित्वात् । ननु ज्ञानस्य प्रत्यासत्तित्वे काशीस्थंपदार्थंवाक्याज्जानतस्तम्पदार्थं शब्दतोजानामीत्यनुभूतवतो ऽपरोक्षतोजानामीत्यनुभवप्रसंग इति चेत्तर्हि शुक्तिरजतादिस्थले ऽपरोक्षतो जानामीत्यनुभवादस्तु तत्र प्रत्यासत्तित्वम् । यत्र तथानुभवो नास्ति तत्रमाभूत्प्रत्यासत्तित्वं । त्वन्मते प्रत्यभिज्ञायां तत्तांश इव-काशीस्थपदार्थं जानामीत्यनुभवस्य विषयांशे स्मृतित्वोपपत्तेश्च ।

वस्तुतस्तु तत्सन्निकर्षजन्यतावच्छेदकं तद्विषयप्रत्यक्षत्वं ननु तदंशप्रत्यक्षत्वं गौरवात । तथाच दण्डयासीदित्यत्र दण्डांशेसन्निकर्षापेक्षायां ज्ञानप्रत्यासत्तिसिद्धिः । किंच कवीनामौत्प्रेक्षिकज्ञानसिद्ध्ये संशयाद्यर्थंच ज्ञानप्रत्यासत्ति स्स्वीकार्या, तदनुरोधा द्दोपविशेषासहकृत ज्ञानप्रत्यासत्ति जन्यप्रत्यक्षेषु वृक्षशिलादौ पृथिवीत्ववदभिव्यञ्जकाभावान्नोपलभ्यते इतिकल्प्यताम् ।

नच-संशयादेर्ज्ञानाभासत्वं, तवैव पुरुषाभासत्वत् । ज्ञानत्वेनानुभवात् । अतएवहि त्वयापि ज्ञानाभासत्वमुच्यते । नचज्ञानेक्लृप्तकारणाभावादज्ञानत्वं, कार्यानुसारेण कारणस्य कल्पनीयत्वात् । अन्यथा रजतभ्रमस्यापि प्रत्यक्षक्लृप्तकारणाभावेन प्रत्यक्षाभासत्वापत्तेः । चक्षुर्जन्यत्वाभावेन स्पर्शज्ञानस्य ज्ञानत्वापरोक्षत्वयोरभावप्रसंगाच्च । ज्ञानस्य प्रत्यासत्तित्वे पर्वते वह्न्यनुमित्यभाव प्रसंगस्तु अनुमितिसामग्रीप्राबल्यसमर्थनेन परिहृतः ।

नन ज्ञानस्य प्रत्यासत्तित्वेऽनुमानप्रमाणोच्छेदः, तत्र ज्ञानप्रत्यासत्तिसम्भवेन वह्निज्ञानस्य प्रत्यक्षरूपत्वसम्भवात् । नचानुमितित्वोपलंभात् प्रत्यक्षत्वाभावः; अनुमितेः प्रत्यक्षविशेषत्वसम्भवादिति चेन्न;- अनुमितौ प्रत्यक्षत्वाभावोपलम्भादेव नप्रत्यक्षान्तर्भावः । अयं दण्डयासीदित्यत्रापि दण्डज्ञानप्रत्यक्षत्वाभावस्यानुभवसिद्धत्वा त्तस्यप्रत्यक्षान्तर्भावो नस्यादिति चेन्न;- तत्रकारणान्तराभावात । नचोभनय एवकारणमस्त्विवातिवाच्यम्, भ्रमेरजतं साक्षात्करोमीति प्रत्यक्षत्वस्यानुभवसिद्धतया । एतत्कालीनतया घटं साक्षात्करोमिचन्दनेसौरभ्यं साक्षात्करोमीत्युपनीते प्रत्यक्षत्वस्या

नुभवसिद्धतयाच स्वविषयविशिष्टप्रत्यक्षत्वावच्छेदेन उपनयस्येन्द्रिय सहकारित्वकल्पनान्नतस्य प्रमाणान्तरत्वम् । क्वचित्प्रत्यक्षत्वाभाव-ग्रहस्तु चक्षुरादिसम्बन्धाग्रहेण तच्चक्षुस्सन्निकर्षजन्यत्वाभावविषयो भ्रमएव । व्याप्तिज्ञानस्यतु प्रत्यक्षसहकारित्वं नक्लृप्तमिति तस्य प्रमाणांतरत्व सम्भवान्नानुमितौ प्रत्यक्षत्वाभावग्रहस्य भ्रमत्वकल्पनमुचितं । यद्यपि संशयोत्तरप्रत्यक्षे विशेषदर्शनस्य हेतुत्वमस्ति ; तथापि अवच्छेदकज्ञानत्वे न संशयोत्तरप्रत्यक्षहेतुत्वं, व्याप्तिज्ञानाभावेपि अवच्छेदकज्ञानात्, संशयोत्तरप्रत्यक्षदर्शनात् । व्याप्यज्ञानस्थलेऽपि अवच्छेदकग्रहणस्यावश्यकत्वात् । व्याप्यत्वपरामर्शस्य हेतुत्वेपि संशयोत्तरप्रत्यक्षत्वावच्छेदेनैव तस्य-हेतुत्वात् । अनुमितेश्च संशयोत्तरत्वनियमाभावात् करणान्तरत्व कल्पनमावश्यकं, तस्यच सम्भवत्येव प्रमाणान्तरत्वं, विशेषदर्शनस्य कोट्यन्तरप्रतिबन्धकत्व पक्षे सहकारित्वाभावाच्च । अपिच प्रत्यक्षस्थले सिसाधयिषायां सत्यां प्रत्यक्षाभावस्सिसाधयिषा सहकृतानुमिति साम-ग्रया प्रतिबन्धत्वात् । तत्र प्रतिबध्यतावच्छेदकं प्रत्यक्षत्वमेव लाघवात् नचानुमिति भिन्नप्रत्यक्षत्वं गौरवात् । तथांच स्वकार्यस्य स्वेनैव प्रतिब-न्धायोगादनुमितेः प्रत्यक्षभेदसिद्धिः ।

ननु-अनुमित्सासहकृतानुमिति सामग्रीप्रतिबध्यशाब्द ज्ञानादिक-मपि न प्रत्यक्षमात्रं , ततश्च अनुमिति भिन्नज्ञानत्वं प्र-तिबध्यतावच्छेदकं अनुगतत्वात् , न प्रत्यक्षत्वं न्यूनवृत्तित्वात् , अतो नानुमितेः प्रत्यक्षत्वेपि तत्सामग्र्याः स्वकार्यप्रतिबन्धक-त्वापत्तिरिति चेन्न, प्रत्यक्षान्येन जानीयामितीच्छायां सत्यामपि शाब्दादि सामग्रीसत्वे तज्ज्ञानोत्पत्ते स्तादृशानुमित्सासहकृतानुमिति साम ग्रीप्रत्यक्षं प्रत्येव प्रतिबन्धिका तत्रच प्रतिबध्यतावच्छेदकं , प्रत्यक्षत्व मेवेति लाघवावतारात् ।

किञ्च यदवच्छेदेन यद्धर्मदर्शनं तत्सामानाधिकरण्येन त द्धर्मग्रहे उपनयस्य सामग्रीत्वं । अतः पर्वतो वह्निमानित्यनु-मितिः सिद्धिप्रत्यक्षरूपा नस्यात् । नन्ववच्छेदकदर्शनवत् व्याप्यदर्श

नमपि ज्ञानप्रत्यासत्ते र्नियामकमस्तु, तथाच कारणे फलेवा किमवच्छेदकोल्लेखेने ति चेत् ? तथाप्यनुमिति स्थले सत्यवच्छेदकपुरस्कारेणोपनीत प्रत्यक्षसामग्रीधूमाद्यवच्छेदकगदात् , अनुमितिस्तुनावच्छेदक गोचरा, नचान्यत्तदानीं तादृशज्ञानमस्तीति तादृशस्यावश्यमनुमिति सामग्र्या प्रतिबन्धो वाच्यः , तत्रच न प्रतिबध्यतावच्छेदकमनुमिति – भिन्नप्रत्यक्षत्वं गौरवात् , किन्तूपनीत प्रत्यक्षत्वं , तथाच स्वकार्यस्य स्वेनाप्रतिबन्धादनुमानं पृथक् । लिंगोपहित भानाभ्युपगमेऽपि प्रत्यक्षेण वह्निव्याप्यधूमस्य धूमाभावव्याप्यस्यच परामर्शे पर्वतो वह्निमानित्यनुमिति र्जायते , तत्र धूमाभावव्याप्य परामर्शेन धूमज्ञानासम्भवात् नोपनयनसामग्रीसम्भवः , एवं पित्तोपहतनयनस्य श्वेताश्वे पीतत्वभ्रमदशायां श्वैत्याभावव्याप्यत्वेन पीतत्वस्य पीतत्वाभावव्याप्यत्वेनच कस्यचित्परामर्शे श्वैत्याभावानुमिति र्जायते , तत्र पीतत्वाभावव्याप्यपरामर्शस्य सत्त्वेन पीतत्वस्य श्वैत्याभावानुमिति विषयत्वासंम्भवात् नोपनयसामग्रीत्यनुमान पार्थक्यं ।

वस्तुतस्तु अनुमितौ क्वापि न लिंगभानं, मानाभावात् । ननु पक्षतावच्छेदकावच्छिन्ने साध्यसिद्धिरनुमाने फलं , तत्रच पक्षतावच्छेदकं परामर्शविषयीभूत धर्ममात्रं नतु लिंगान्यत्व विशेषितं गौरवात् ; अतो लिंगभानमनुमिताविति चेन्न ;- धूमसामानाधिकरण्येन वह्नेस्सिद्धत्वेन सिद्धसाधनात , लाघवेन स्वसमानप्रकारकानुमितिं प्रत्येव सिद्धेः प्रतिबन्धकत्वात् । किंच पर्वतो वह्निव्याप्यवानिति शाब्दज्ञानादनुमिति दर्शना[illegible] वच्छेदकविशेषा ज्ञानादुपनयसामग्र्यभावादनुम[illegible] अनुमितेर्ज्ञानप्रत्यासत्ति जन्यत्वे परामर्शावि[illegible] सर्वं प्रतीयेत, चन्दने उपनीतसौरभ्य ज्ञा[illegible] दिविषयकत्व दर्शनात् ।

यदुक्तं – कैश्चिदनुमिते रुपनीतान्तर्वैलक्षण्[illegible]द्धं , तथा चानुमितिस्थले तादृशप्रत्यक्षानुत्पत्ति रनुमितिसामग्र्या प्रतिबन्धाद्वाच्या , तत्रानुमितिसामग्रीप्रतिबध्यतावच्छेदक- मुप

नीत प्रत्यक्षत्वं नत्वनुमिति भिन्नत्वविशेषितं गौरवा - त्; तथाचानुमिति सामग्र्यानुमितेः प्रतिबन्धा सम्भवात् - अनुमितिःप्रत्यक्षभिन्ने त्यनुमानं पृथगिति। तन्न, तयोर्हि वैलक्षण्यमनुमितित्वतदभावावेव, अन्यस्यादर्शनात्, तथाचानुमितित्वाभावविशिष्टप्रत्यक्षानुत्पत्ति रनुमितिसामग्र्याः परामर्शस्य सत्वात, विशेषसामग्रीसहिताया एव सामान्यसामग्र्या जनकत्वात; ततः किं प्रतिवन्धककल्पनया।

यच्चोच्यते - अनुमितित्वस्यानुभवत्वव्याप्य प्रत्यक्षत्वव्याप्यमानसत्व व्याप्यत्वकल्पनापेक्षया लाघवादनुभवत्वव्याप्यत्वमेव कल्प्यतामिति। तन्न, प्रत्यक्षत्वव्याप्यत्वाभावमानसत्वव्याप्यत्वाभावकल्पनापेक्षया तदनुभवव्याप्यत्वकल्पनस्यैव लघुत्वात्॥

यदप्युक्तं -- अप्रसिद्धाभावसाध्यके अयं वह्नित्वाभाववद्विशेष्यकोन दाहसमर्थप्रवृत्तिजनकत्वादित्यादिव्यतिरेकिणि साध्यस्य पूर्वाज्ञाततया उपनयनासम्भवात् पृथगनुमानमिति तन्न; साध्यस्याप्रसिद्धतया तद्विशिष्टानुमिते रसम्भवात्।

नच पक्षविशेषणिकैव सास्यादिति वाच्यम्; अनुमितेः पक्षविशेष्यकत्वनियमात्, अन्यथा वह्न्यनुमानेऽपि वह्निविशेष्यकवह्निविशेषणकोभयाकारानुमितिप्रसंगात। ननु दण्डविशिष्टप्रत्यक्षादिष्विव अदृष्टवशादेव प्रकारविशेष्यव्यवस्थेतिचेत्? प्रसिद्धसाध्यके सर्वत्र साध्यप्रका-

[illegible]तो [illegible]नुमितेः [illegible]दृष्टनियमकल्पनेमानाभावात। वेदान्ताचार्यास्तुन्यायपरिशु
[illegible]वारत्तिरि[illegible] चेन्न, प्रत्यक्षान्येन [illegible]त्रे" प्रकृतस्य व्यतिरेकित्वपरामर्शाभावे कथं
[illegible]ामग्रीसत्त्वे तज्ज्ञानोत्पत्ते स्ता[illegible] अनुगृह्णन्ति। तेषा मयमाशयः,- साध्यांशे
[illegible]तिप्रत्यक्षे [illegible]न्येव प्र[illegible]न्धिका तत्र [illegible]तिरेकव्याप्तिज्ञानंहि साध्यतावच्छेदक-
[illegible]विदिलाघवावतारा[illegible]। [illegible] एवंचाभावसाध्यके ष्वप्रामाण्याभावत्वादे रसा
[illegible]ध्यत[illegible]वच्छे[illegible] [illegible]प्रामाण्या भावाभावत्वेन व्यतिरेकव्याप्तिज्ञानमेवोपकारकं स्यात्, नत्वप्रामाण्यत्वेन, प्रकृतेचाप्रामाण्याभावाप्रसिद्धेः तादृशव्यतिरेकव्याप्तिज्ञानासम्भवान्नानुमितिरिति।

ननु तस्य साध्यांशे साध्यतावच्छेदकप्रकारकत्वमपि प्रयोजकमिति वाच्यम् । यत्र उष्णस्पर्शवदभावं स्तत्र धूमाभावइतिव्यतिरेकव्याप्तिग्रहेपि तेजस्त्वप्रकारकानुमित्यभावात् ।

नच यद्रूपेण व्यतिरेकव्याप्तिज्ञानं तदवच्छिन्नाभावत्वप्रकारकानुमिति रित्येव नियमः। तथाचा प्रामाण्यत्वे नव्यतिरेकव्याप्तिज्ञानादप्रासिद्धा प्रामाण्याभावत्वप्रकारकानुमिति र्युक्तेति वाच्यं,- तथासति यत्र वह्न्य भाव स्तत्र धूमाभावइति व्यतिरेकव्याप्तिज्ञानाद्वह्न्य भावाभावत्वप्रकारका नुमिति स्स्यात् , नतु वह्नित्वप्रकारिका; नचेष्टापत्तिः , इष्टतावच्छेदकाप्रकारकत्वेन वह्न्यर्थिप्रवृत्त्यनुपपत्तेः । नच वह्निमानित्यनुमानान्तरात्प्रवृत्तिः , तादृशप्रमाणाङ्गीकल्पने मानाभावात् । किंचान्वयव्यतिरेक्यनुमितौ वह्नित्वप्रकारकत्व मुभयसिद्धं , तत्रान्वयव्याप्ते र्व्यतिरेकव्याप्तिज्ञानप्रयोज्यवह्न्यभावाभावत्व प्रकारकानुमिति प्रतिबन्धकता कल्पनागौरवं स्यात् । किंच संयोगव्यक्तिविशेषानुमानं विभागविशेषेणव्यतिरेकव्याप्तिपुरस्कारेण नस्यात । तत्र नतत्संयोगाभावमात्रव्याप्ति रुपयोगिनी , तथासति तद्विभागविरुद्धसंयोगस्याप्यनुमानप्रसङ्गात् ; किन्तु प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्न संयोगाभावव्याप्तिः; तादृशसंयोगाभावाभावश्च नसंयोगः, संयोगाभावप्रदेशेऽपि प्रतियोगिवैयधिकरण्यावच्छिन्नसंयोगाभावस्याभावात् । इतरभेदानुमानंच न स्यात , भेदस्य तादात्म्याभावत्वाभावात् । तादात्म्याभावेन भेदानुमानस्याप्युक्तरीत्यैवासिद्धेः। येन रूपेण [illegible]
धिनोऽनुमितिः, अतो भेदस्याप्यनुमितिः [illegible]
रोधिविषयानुमितिमात्रं, उत विरोधित्वेना [illegible]
च्छेदकरूपेण । नाद्यः , प्रमाद्यत्राभिधेयत्वा [illegible]
व्याप्तिग्रहे प्रमेयत्वेना भिधेयत्वानुमानाभाव [illegible]
सिद्धसाध्यक व्यतिरेक्यसिद्धेः , अभावस्य [illegible]
च पूर्वज्ञातस्य प्रकारत्वादेव ह्यभावसाध्यकोऽप्रसिद्धसाध्य[illegible]पिसम्भवेत, तद्विरोधित्वंचज्ञातं नप्रकारईति नतत्प्रकारकाप्रसिद्धसाध्यकसम्भवः

न तृतीयः, व्याप्याभाववत् व्याप्यावच्छिन्नप्रतियोगिकभेदस्यापि सर्वत्र व्यतिरेकिणि सिद्ध्यापत्तेः; धूमस्य व्यतिरेकित्वदशायां वह्नित्ववह्न्यभावाभावत्व वह्न्यभाववद्भेदत्वत्रितयप्रकारकानुमित्यापातात्; गन्धात्यन्ताभावस्य पृथिवीत्वाभावव्याप्तिग्रहात् तत्र गन्धत्व तत्प्रागभावत्व तद्ध्वंसत्व गन्धाभाववद्भेदत्व गन्धात्यन्ताभावाभावत्व प्रकारकानुमिति प्रसंगाच्च; सुरभिधूमस्य चन्दनवह्निव्याप्तिग्रहे धूमाभावमात्रस्याप्यनुमानापत्तेः; यत्र नित्यद्रव्यत्वं तत्र समवेतत्वाभावइति व्याप्तिग्रहे समवेतत्वेन नित्यत्वाभावद्रव्यत्वाभावयोः स्सिद्धिप्रसंगाच्चेति।

किंच व्यतिरेक्यनुमाना सिद्धे नोक्तविधयानुमानपार्थक्य सम्भवः। तथाहि – व्यतिरेकसहचाराद्यत्रान्वय व्याप्ति गृह्यते सव्यतिरेकीत्येकं मतं, व्यतिरेकव्याप्त्यैवयत्रानुमिति स व्यतिरेकीत्यपरं मतं। तत्र नाद्यः, तत्सहचारस्य तद्व्याप्तिग्राहकत्वात्। ननु – प्रमेयत्वेन सहचारग्रहे व्याप्त्यग्रहात् यस्मिन्नधिकरणे सहचारो गृह्यते तन्निष्ठव्यभिचारज्ञानविरोधि सहचारज्ञानं व्याप्तिग्राहकं वाच्यं, तादृशंच व्यतिरेकसहचारज्ञानमपि, नचात्र तत्सहचारित्वमपि विशेषणं प्रवेश्यं गौरवादिति चेन्न; धूमस्यान्वयव्यतिरेकित्वानुपपत्तेः, वह्न्यभावधूमाभावयोः क्वचिद्ध्रदे तत्रैव धूमो भविष्यतीति वा भूतइति वा ज्ञानस्य अविरुद्धत्वात् व्यभिचारज्ञानाविरोधात्। ननु यत्का[illegible] सहचारग्रहः तत्कालीनतया व्यभिचारज्ञानविरोधित्वं वि-[illegible]नुमितेः प्रत्यक्षत्वे[illegible] [illegible] यत्र धूमस्तत्राग्निरिति कालाविषयस[illegible] चेन्न, प्रत्यक्षान्येन जानी[illegible] [illegible]ध्येत। किंच सहचारज्ञानेऽपि प्रमेयत्वेन[illegible]त्वे तज्ज्ञानोत्पत्ते स्तादृशानु[illegible] [illegible] कारणतावच्छेदकत्वं। नच व्यभिचार[illegible]न्येव प्रतिबन्धिका तत्रच प्रति[illegible]वं विशेषणं, प्रमेयत्वेन व्याप्तिज्ञानं प्रति [illegible]यवावतारा[illegible]। [illegible]च यद्व्याप्तिज्ञानविरोधि यद्व्यभिचारज्ञानं [illegible]त[illegible]च्छेदेन [illegible] तद्व्याप्तिग्रहे हेतुरिति वाच्यम्। अनुमित्यौपयिक[illegible]द्व्याप्तिज्ञानं तस्य विरोध्यनुमित्यौपयिक धर्माभावत्वेन व्यभिचारज्ञानं तद्विरोधिचानुमित्यौपयिक धर्मत्वेन सहचारज्ञानमि

ति तस्य तादृशव्याप्तिज्ञान हेतुत्वापत्तेः । नच व्याप्तिज्ञानेऽनुमिति जनकत्वं विशेषणं, फलोपधानस्य असार्वत्रिकत्वादनुमिति जननस्वरूप-योग्यत्वस्य विशेषणज्ञानत्वादिना नुमिति जनके तस्मिन्नपि सत्त्वात । अनुमितित्वावच्छिन्न जनकतावच्छेदकावच्छिन्नत्वं विवक्षितमिति चेन्न, अनुमित्यौपयिकधर्मवत्पक्षके परामर्शे विषयतया तत्सत्वात् ; तत्रानुमित्यौपयिक धर्मत्वेन व्याप्तेरवगाहनात तद्विरोधिव्यभिचार-ज्ञानविरोधि सहचारज्ञानत्वेन अनुमित्यौपयिकधर्मवानिति सहचार ज्ञानस्य हेतुत्वापत्तेः ।

एतेन यस्मिन् ज्ञाने यस्याव्याप्तेर्विषयतया अनुमिति जनकतावच्छेदकत्वं तद्व्याप्तिज्ञानविरोधि व्यभिचारज्ञानविरोधित्वं विवक्षितमिति निरस्तम्, व्याप्तेः पक्षतावच्छेदकतया तद्विषयताया अपि तत्रावच्छेदकत्वात । ननु-लिंगव्याप्तिप्रकारकत्वेन यज्ज्ञानमनुमिति हेतुः तद्विरोधित्वं व्यभिचारज्ञाने विवक्षितमितिचे द्व्याप्तिप्रकारकत्वस्य प्रमेयवानिति ज्ञानसाधारण्येना नवच्छेदकत्वात् । अतो व्याप्तौ व्याप्तित्वातिरिक्त धर्ममात्राप्रकारक व्याप्तिप्रकारकत्वेनानुमिति हेतु र्यद्व्याप्तिज्ञानं तद्विरोधित्वं वाच्यम् , तथाच सहचारत्वातिरिक्त धर्ममात्राप्रकारक तत्सहचारज्ञानंहेतुरस्तु लाघवात् । अवृत्तित्वव्याप्यतावच्छेदकयो रभावसामानाधिकरण्याभाव व्याप्यतावच्छेदकयोश्च सहचारज्ञाने त्वदुक्तावच्छेदकमति प्रसक्तम् । व्यतिरेकव्याप्त्यैवानुमिति रिति पक्षोप्ययुक्तः ; तन्निरूपितव्याप्तिज्ञानस्य तदनुमिति हेतुत्वात । नच प्रमेयत्वेन व्याप्तिज्ञाना दनुमित्यदर्शना द्व्यभिचारज्ञा[illegible] तच्च व्यतिरेकव्याप्तिज्ञानमपीति वा[illegible] व्यभिचारज्ञानसम्भवात् , धूमो यत्किञ्चि[illegible] तस्य व्यभिचारज्ञानाविरोधित्वात् । न[illegible] स्य विरोधीति विवक्षितं, वह्निव्याप्यइति[illegible] कारकज्ञानविरोधीति वाच्यम् , वह्न्यनुमि[illegible] वह्न्यनुमित्यौपयिकधर्मशून्यइत्याकार व्यभिचारज्ञा[illegible]न्यकारणमात्रेरका-गात । तस्मादनुमितौ साध्यं यदवच्छिन्नप्रकारताकं तदवच्छिन्नप्रकारत[illegible]

व्यभिचारत्वान्यधर्ममात्राप्रकारकंयत्तन्निरूपितव्यभिचारज्ञानं तद्विरोधिव्याप्तिज्ञानत्वेनानुगमो वाच्यः । तथाचानुमितौ साध्यं यदवच्छिन्नप्रकारताकं तत्साध्यांशे तदवच्छिन्नप्रकारताकं तन्निरूपितव्याप्तौव्याप्तित्वातिरिक्तधर्ममात्राप्रकारकं तन्निरूपितव्याप्तिज्ञानमनुमितिहेतुरस्तु लाघवात् । किंच-एवंसति पर्वतो वह्निव्याप्यवानिति परामर्शा दनुमित्यभ्युपगमविरोधः, तस्य व्यभिचारज्ञानाविरोधित्वात् । किञ्च व्यतिरेकिणि साध्यसन्देहस्य साध्याभावरूपव्याप्यसन्देहरूपत्वाद्धेतुनिश्चयस्य व्यापकाभावनिश्चयरूपत्वात् व्यभिचारसंशयाद्व्याप्त्यग्रहा दनुमित्यसम्भवात् । नच व्यतिरेकव्याप्तिग्रहेनेदं प्रतिबन्धकं, किन्त्वन्वयव्याप्तिग्रहएवेति वाच्यम् - धूमवह्निव्याप्तेरपि धूमवह्न्योः स्वाभावव्यतिरेकतया व्यतिरेकव्याप्तित्वा दन्वयव्याप्तावपि प्रतिबन्धकत्वाभावापत्तेः । नच व्यतिरेकत्वेन व्याप्तिग्रहं प्रति नप्रतिबन्धकत्व मन्यत्रतु प्रतिबन्धकत्वमिति वाच्यम्, तथा सति वह्न्यभावाद्धूमाभावानुमानं कृतकत्वेनानित्यत्वानुमानं चान्वयव्यतिरेकिनस्यात् । धूमत्वनित्यत्वत्वाभ्यां व्याप्तिग्रहाद्व्यतिरेकत्वेना ग्रहाद्व्यतिरेकव्याप्तिग्रहप्रतिबन्धात । नचैतदर्थं व्यतिरेकत्वेनैव व्यतिरेकव्याप्तिग्रहः कारणमिति वाच्यम्, तथा सत्यप्रसिद्धसाध्यकव्यतिरेक्यनुपपत्तेः । नच तत्र स्वरूपेणैवाप्रसिद्धसाध्याभावस्य व्याप्तिग्रहादनुमिति रिति वाच्यम्, तथा स त्यनुमानचातुर्विध्यप्रसंगात् । नच साध्याभावस्य यत्र व्याप्तिग्रहः स अनुमितेः प्रत्यक्षत्वे [illegible] साध्याभावत्वेनचेति नविशेषः अतो नचानु [illegible] चेन्न, प्रत्यक्षान्येन जानी[illegible] [illegible]धेयत्वाभाव स्तत्र प्रमेयत्वाभावइत्य [illegible] तज्ज्ञानोत्पत्ते स्तादृशानु[illegible] [illegible]त्वंभ्रमाद्व्याप्ति ग्रहादभिधेयत्वानुमान- [illegible]न्येव प्रतिबन्धिका तत्रच प्रति[illegible] [illegible]वं [illegible]ः । किंच यदि व्यतिरेकत्वेन व्या- [illegible] [illegible]वावतारा[illegible] । [illegible]च [illegible] तदा यत्र व्यतिरेकव्याप्तिपुरस्कारेण [illegible]च्छेदेन [illegible] [illegible]द्यते तत्र धूमाभावसंशये ऽपि धूमा- [illegible] [illegible]च्छेदकत्वान्न धू[illegible] [illegible]धूमत्वेना ग्रहणंच स्यात् । वस्तुतस्तु [illegible]साभावत्वेन व्याप्तिग्रहः व्यभिचार-

संशयाच्च नधूमत्वेन व्याप्तिग्रहइत्यनुमानमेव तत्र नस्यात । तस्मा दस्मदुक्तरीत्या नुमानपार्थक्यं नान्यथा ।

वेदान्ताचार्यैस्तु न्यायपरिशुद्धौ " नापिसंस्कारादिप्रत्यासत्त्या मानसते " ति मानसत्व माशंक्य, " बाह्येन्द्रियग्राह्येष्वपि तत्तत्प्रत्यासत्त्या मानसत्वप्रसंगात् । नचैतदिष्टं बाह्यान्तरप्रत्यक्षविभागायोगात्, बाह्यार्थेषुच मनस स्स्वातन्त्र्यादर्शनात् । यत्परतन्त्रता मनसः तत्पृथक्प्रमाणमित्युच्यते । " इति पार्थक्यं साधितं । तत्र शंकाग्रन्थे संस्कारादीत्यादिशब्दाज्ज्ञानप्रत्यासत्ति र्विवक्षिता । परिहारग्रन्थस्यायमाशयः, बाह्यप्रत्यक्षस्य मानसत्वप्रसंगपरिहारः चक्षुरादीनां मनः प्रतिसहकारित्वात् यदसाधारणं सहकार्यासाद्यमनोबहिर्गोचरप्रमांजनयति तदेव प्रमाणान्तरमितिन्यायाकार्थः; तदनु मानेपि तुल्यमिति । नचानेन प्रकारेणालोकस्यापिपृथक्प्रमाणतापत्तिः, प्रमाणान्तरमित्यनेन प्रमित्यन्तरकरणत्वस्य विवक्षितत्वात् । प्रमित्यन्तरमितिच मानसाभिन्नप्रमिति र्विवक्षिता । एवं न्यायानुगृहीतवचनमपि तत्रैव वेदान्ताचार्यै रुदाहृतम्- "तथाच-भगवता मनुनोक्तम् ' प्रत्यक्ष मनुमानं च शास्त्रं च विविधागमम् । त्रयं सुविदितं कार्यं धर्मसिद्धिमभीप्सता ॥ ' इति, शौनकेनाप्युक्तं -'दृष्टानुमानागमजंध्यानस्या लम्बनन्त्रिधा ' 'इति "इति ॥

यत्तु यत्रयदनुभूतं तत्रैवज्ञानं प्रत्यासत्तिर्भव[illegible] ण्डिनिदण्डवत्तया विज्ञातेऽपि पश्चात्सन्नि[illegible] गादिति । तदयुक्तम् - काव्यादिमूल[illegible] ष्टाभाव प्रत्यक्षादीनां विशेषणोपन[illegible] स्य प्रत्यासत्तित्वकल्पनात् ।

नचैवमुक्तातिप्रसंगः, तत्रावच्छे[illegible] न्वयव्यतिरेकाभ्यां सहकारित्वकल्पनात् । सामान्यकारणमात्रेकार्यानुत्पत्तिस्थले विशेषकारणकल्पनस्य युक्तत्वात् । अन्यथा त

वापि तत्रग्रहणस्मरणात्मक दण्डविशिष्टज्ञानप्रसंगात् , तदर्थमवच्छेदकज्ञानस्य स्मृतिसामग्रीसहकारित्वकल्पनस्य तवाप्यावश्यकत्वात् । अथवास्तु दोषएव प्रत्यासत्तिः । यदुक्तं दोषस्य प्रत्यासत्तित्वेन कारणत्वे अप्रामाण्यस्य परतस्त्वं नस्यात् , प्रत्यक्षसामान्यहेत्वतिरिक्तहेत्वभावात् , दोषान्वयव्यतिरेकयोः प्रत्यासत्ति विषयत्वेन दोषत्वेन कारणत्वकल्पने मानाभावात् , यथार्थरजतादिविशेषणांशज्ञाने तस्या जनकत्वाच्च नदोषः प्रत्यासत्तिरिति । तन्नदोषविधयापि कारणत्वान्नाप्रामाण्यस्य स्वतस्त्वापत्तिः ।

नच-तथाकारणत्वकल्पकाभावः, अनुमिति भ्रमादौ दोषस्य कारणत्वदर्शनात् , प्रमात्वाप्रमात्वयोरुभयोरपि स्वतस्त्वेज्ञानमात्रस्या प्रामाण्यप्रसंगाच्च दोषविधयापि कारणत्वावश्यम्भावात् ।

नच-यथार्थरजताद्यंशस्य दोषजन्यत्वानुपपत्तिः, रजतस्यशुक्तौबाधितत्वेन तदंशज्ञानस्या यथार्थत्वात् । नहि स्वरूपेण बाध्यं यत्तद्विषयत्वमयथार्थत्वं, तवापिपरोक्षभ्रमस्य दोषजन्यत्वानुपपत्तेः ।

एतेन सत्यरजतस्थले रजतांशज्ञानस्य दोषाजन्यत्वाद्व्यभिचारेण भ्रमेऽपि रजतांशज्ञानस्य नदोषजन्यत्वमितिनिरस्तं । किंच तवापि प्रमास्थलीयरजतस्य दोषाजन्यत्वा द्व्यभिचारेण भ्रमस्थलेऽपि दोषजन्यता नस्यात् । अप्रमात्वस्यैव दोषजन्यतावच्छेदकत्वा न्नोक्तव्यभिचारः, तच्चाप्रमात्वं [illegible]नुमितेः प्रत्यक्षत्वे[illegible] सति तत्प्रकारकत्वात्मकम् , तच्च प्रकारविशे[illegible] चेन्न, प्रत्यक्षान्येन जानी[illegible] [illegible]युक्तरूपांशत्रयसमुदायो दोषविधया दो[illegible] तज्ज्ञानोत्पत्ते स्तादृशानु[illegible] प्रत्येकं प्रत्यासत्तितया तज्जन्यौ, [illegible]न्येव प्र[illegible]न्धिका तत्रच प्रति[illegible]दिति विवेकः ।

[illegible]वतारा[illegible] ।

[illegible]च जनकजातीयस्यैव विशेष्यांशे सन्निकर्षत्व [illegible]च्छेदेन [illegible] [illegible]द्व्यैव सन्निकर्षत्वमिति कथं दोषः प्रत्यासत्ति[illegible] [illegible]कथा[illegible]जात्यस्यात्रापि सत्वात् । प्रत्यासत्तिनिष्ठविशेष कारणतावच्छेदकरूपेण साजात्यं विवक्षितम् , तच्च संयोगत्वदोषत्वादि-

कमितिचेन्न । - अप्रयोजकत्वात् , अन्यथा संयोगस्यैव प्रत्यासत्तित्वमित्यपि निर्बन्धो दुर्निवारस्स्यात् ।

यच्चोक्तमन्यथाख्यातिमते रजतएव प्रवृत्तिस्स्यात् नशुक्तौ, ज्ञानस्य स्वविषये प्रवर्तकत्वात् । ननु नरजतं विषयः शुक्तिरेवेतिचेत् ; अन्याकार ज्ञानमन्यालम्बनमिति संविद्विरोधइति । तन्न – रजताकारज्ञानस्य शुक्त्यालम्बनतया स्वविषयएवप्रवर्तकत्वात् । नच संविद्विरोधः,आकारशब्देन प्रकारविवक्षायां सप्रकारकज्ञानासिद्धिप्रसंगात । विषयविवक्षायामपि तथा । अन्यमात्रविषयत्वं त्वसिद्धं । एवंच नसंविद्विरोधः, नवा प्रवृत्त्यनुपपत्तिः, यत्रेष्टतावच्छेदकवैशिष्टयं विषयी क्रियते तत्र ज्ञानस्य प्रवर्तकत्वात् । नन्विदं रजतमिति ज्ञानं पुरोवर्त्तिनो रजतत्वविशिष्टाभेदं विषयीकरोति , नरजतत्वसंसर्गं, रजतमिति स्मृतावुपसर्जनस्य तस्यारोपासम्भवात् , स्वातन्त्र्येणानुपस्थितस्याप्यारोपे संसर्गाभावधीनियामकप्रतियोग्यारोपसमये तादात्म्यारोपप्रसंगइतिचेन्न ।–त्वया मया वारोपभेदस्याभावधीभेदनियामकत्वानंगीकारात् । किंचारोपहेतूपस्थितौ सत्यामपि तद्धेतुदोषाभावान्न स आरोपः, दोषस्य फलकल्प्यत्वात् । वस्तुतस्तु तादात्म्यसंसर्गकः प्रतियोग्यारोपएव अन्योन्याभावधीनियामकः, यदि तादात्म्यस्यैव संसर्गारोप स्तदा घटत्वात्यन्ताभावघटान्योन्याभावयो र्युगपत्प्रतीतिनियमापत्तिः , तन्नियमाभ्युपगमे भूतलनिष्ठाभ्यां घटान्योन्याभावघटात्यन्ताभावाभ्यां किमपराद्धं । तदुभयारोपेच दोषादेव व्यवस्था । ननु तथापि लाघवादिष्टज्ञानं स्व[illegible]

त्विष्टतावच्छेदकवैशिष्टयज्ञानं स्ववि[illegible]

रणतावच्छेदकयो गौरवात् , तस्माद्र[illegible]

स्स्यात्, रजताभेदारोपात्तु इष्टस्य पुरोव[illegible]

तिचेन्न । इष्टशब्देन किमिच्छाविषयो [illegible]

योवा? आद्ये न शुक्तौ प्रवृत्त्यनुपपत्तिः, [illegible]

तीये तवापि शुक्तौ प्रवृत्त्यनुपपत्तिः । रजतए[illegible] ति

चेन्न ।·अस्ति तावच्छुक्तौ रजतेच्छा जन्याप्रवृत्तिः रजतप्रकाश शु

क्तिविषय शुक्तौ प्रवर्तकत्वादित्यादिस्वोक्तिविरोधात् । किंच परोक्ष-भ्रमे तवाप्ययमतिप्रसंगस्समानः, तत्रान्यथाख्यात्यंगीकारात् । किञ्च दर्पणादिषु पृष्ठभागस्थरजतादिप्रतिबिम्बभ्रमदशायां विशेषादर्शनेसति पुरतः प्रवृत्ति र्नस्यात् । पृष्ठभागएवतुस्यात् । दूरस्थवनस्पत्यादे र्विप्र कृष्टपर्वतसंसर्गभ्रमे सति पर्वते प्रवृत्ति र्नस्यात् । किंच तवापि क-थं रजतस्मृतिमात्रान्नापणे प्रवृत्तिः । तत्स्थतया ज्ञानाभावादिति चेत्तुल्यं ममापि । किंच इष्टज्ञानस्य प्रवर्तकत्वे रजतभ्रमदशायां शुक्त्यर्थिनः शुक्तौ प्रवृत्त्यापत्तिः इष्टतावच्छेदकप्रकारकत्व मप्यपेक्षितमिति चेत्तर्हि रजतशुक्त्यो श्शुक्तिरजते इमे इति भ्रमेरजतभ्रमाविषयश्शुक्त्यंशे प्र वृत्यापत्तिः । इष्टतावच्छेदकप्रकारकज्ञानं तत्प्रकारांश विशेष्येष्टेप्रव र्तमिति चेन्न । कार्यतावच्छेदके इष्टप्रवेशेगौरवात् । वस्तुतस्त्विष्टसाध नता ज्ञानमिच्छाद्वारा प्रवृत्तिहेतुः, एवंचेदं रजतमंगुळीय कसाधनं रजतत्वादित्यनुमाने रजतज्ञानं पक्षज्ञानतयोपयुज्यते, तथाच शु-क्तौरजतत्वे ज्ञाते तेन हेतुना इष्टसाधनताज्ञानं तत्र सम्भवतीति-न तत्र प्रवर्तकतावच्छेदकचिन्तावकाशः ।

ननु शुक्तिरजतत्वसंसर्गस्य शून्यतया सन्निकर्षाभावात्, अ-पूर्वतया तस्य ज्ञानप्रत्यासत्तिविरहाच्च, तत्प्रतीतेरसिद्धे र्नान्यथा-ख्यातिसम्भवः । नैवं, सत्यस्यैव रजतत्वसम्बन्धस्य ज्ञानेन प्रत्यासन्नस्य प्रतीतिसम्भवात ।

[illegible]मतेः [illegible]स्यैव प्रतीतौ कथमन्यथाख्यातिः । तत्राविद्यमानस्य संस [illegible] चेन्न, प्रत्यक्षान्येन जानी[illegible]तिरिति चेत्; केयं तत्र प्रतीतिः, न-[illegible] तज्ज्ञानोत्पत्ते स्तादृशानु[illegible] तत्राविद्यमानस्य तत्र विद्यमानत्वासंभ [illegible]न्येव प्र[illegible]निन्धिका तत्रच प्रति[illegible]दिप्रतीतिः, संसर्गे विशेषणाप्रतीतेः । शुक्ति [illegible]वतारा[illegible] । [illegible]तीतौ रजतत्वसंसर्गस्सत्यएव संसर्ग-[illegible]स्य तस्मिन् शुक्तिलक्षणविशेष्ये ऽवि-[illegible]च्छेदेन [illegible]व चेन्न; समूहालम्बनमात्रस्य भ्रमत्वप्रस [illegible]कथा[illegible]ज हि घटरूप विशेष्याविद्यमानसंसर्गविषयमिति । [illegible], [illegible]विशिष्टज्ञाने तावद्विशेषणविशेष्यसम्बन्धानां भासमानता

सर्वलोकप्रसिद्धा दुरपह्नवा, एवं समूहालम्बने विशेषणादिव्यवस्था दृश्यते, किंचित्प्रत्येव किंचिद्विशेषणं नान्यं प्रतीति; इयमपि व्यवस्था सर्वप्रसिद्धा नापह्नवमर्हति । ततश्च घटपटसमूहालम्बने घटविशेष्यतावच्छेदेन घटत्वं विशेषणं, तत्सम्बन्धस्संसर्गः, घटत्व विशेषणकत्वावच्छेदेन घटो विशेष्यः । एतदुक्तं भवति - अस्ति तावज्ज्ञाने विषयितासर्वलोकप्रसिद्धा, साच विशेष्यविशेषण संसर्गनिरूप्या, घट विशेष्यिका घटत्वविशेषणिका तत्संसर्गिकाचेति । ततश्च विषयितांप्रत्येव विशेष्यताविशेषणताच, अतएव विशेषणविशेष्यभावोज्ञानकृत - एव नतु वस्तुकृतइत्युच्यते, एवंच विषयितांप्रति विशेषणविशेष्ययोः तादृशस्वभावनिबन्धनएव परस्परविशेषणविशेष्यभावव्यपदेशः, साच विषयिता समूहालम्बने विशेष्यभेदेन नाना, तत्र यत्र विषयितायां येषां विशेषणविशेष्यसंसर्गाणां निरूपकत्वं तेषामेवेदमस्यविशेषण-मित्यादिरूपेण परस्परसम्बन्धित्वं नान्येषां । किञ्चिद्विषयितायां विशेषणभूतं यदा समानाधिकरणसमानकालीनविषयितान्तरे विशेष्यं भवति तदा विशिष्टवैशिष्ट्यज्ञानव्यपदेशः, यज्ज्ञानविषयिताया विशेष्यावृत्तिर्विशेषणसम्बन्धो निरूपकः सान्यथाख्यातिः ।

ननु सिद्धान्ते ज्ञातु रेकस्य ज्ञानमेकमेव, विषयिता भेदादेव ज्ञानभेदव्यपदेशो वाच्यः, तत्र विषयिताभेदे कथं समूहालम्बनमेकं ज्ञानं । उच्यते, प्रसरणात्मिकावस्था एकाज्ञानैक्यव्यपदेशप्रयोजिका । नच परोक्षे प्रसरणाभावः, तत्राप्यान्तरस्य प्रसरणस्य [illegible] षयत्वमेवावस्था । नच समूहालम्बनासि[illegible] तामापन्नानां ज्ञानैक्यव्यपदेशनिबन्धन[illegible] देन एकज्ञानगततयेति । एवंच संसर्ग[illegible] प्रकारकत्वादन्यथा ख्यातिसिद्धिः ।

यत्तु -- विशिष्टज्ञानं वि[illegible] अभेदज्ञानंच स्वप्रकारीभूत धर्मद्वया[illegible] नियमात् कथं नासत्ख्यातिरिति । तत्र ; तादृश नियमे मा-

नाभावात् । विशिष्टज्ञानत्वंतु सप्रकारकत्वमेवेति नतदनुपपत्तिस्तत्र मानं । नन्विह प्रतीतस्य रजतस्यान्यत्र सत्त्वं विना नान्यथाख्याति सिध्यति, तच्च नभ्रान्त्या बाधेन वा सिद्ध्यति, तयो रिह सदसद्भावमात्रविषयत्वात् । नच भ्रान्तेः पूर्वजन्यत्वात अनुभवस्य देशान्तरे वाच्यत्वात् भ्रान्त्यनुपपत्त्या न्यत्र सत्त्वं सिद्ध्यति, भिन्न विषयादपि समानप्रकारकपूर्वानुभवात् भ्रान्त्युपपत्तेः । नचासतो निषेधायोगात् त्रैकालिकनिषेधविषयस्य चात्रसत्त्वायोगात् बाधानुपपत्त्या तत्सिद्ध्यति — तत्र रजतस्या प्यनु — भूयमानतया त्रैकालिक तदभावस्यैवा सिद्ध्या पातात् । सदसद्विलक्षणरजतस्य त्रैकालिकाभावेऽपि सत्त्वोपपत्ते श्चेति चेत्, न, रजतत्वस्यैव शुक्तौप्रतीयमानतया तस्यान्यत्रसत्त्वे आपण रजतानुभवस्यैव मानत्वात् । रजतस्य तत्र प्रतीयमानत्वेऽपि क्लृप्तविषयत्वकल्पने लाघवम् । तत्र रजतस्य विद्यमानत्वे सर्वैरुपलभ्येत । सामग्र्यभावाच्च नतत्र रजतसम्भवः । वह्निभ्रमादौ च दाहादिप्रसंगइत्यादि तर्कसहकृतेन शुक्तिप्रवृत्तिप्रयोजिका रजतबुद्धिस्सत्य रजतविषया रजतबुद्धित्वात्, संप्रतिपन्नवदित्यनुमानेन अन्यत्रसत्त्वसिद्धेः । ख्यातिबाधान्यथानुपपत्तिश्च तत्रमानं । ख्यात्यनुपपत्ते स्सत्त्वसिद्धिः, बाधान्यथानुपपत्ते स्तत्रासत्त्वसिद्धिः ।

नच-तत्र सत्त्वप्रतीतिबलात् त्रैकालिकाभावस्यैवासिद्धिप्रसंगः, [illegible]नुमितेः प्रत्यक्षत्वा[illegible] नि[illegible]प्रतीत्यपेक्षया तस्यादुर्बलत्वात् । अन्य[illegible] चेन्न, प्रत्यक्षान्येन जानी[illegible]ं रजतस्य मिथ्यात्वंच कथं सिध्ये[illegible] तज्ज्ञानोत्पत्ते स्तादृशानु[illegible]पि सदसद्विलक्षणप्रतियोगिनितत्रैवोप[illegible]न्येव प्र[illegible]निबन्धिका तत्रच प्रति[illegible]दी[illegible]वं[illegible]षणग्रासात् । तस्मात्त्रैकालिकनिषेध-[illegible]ावतारा[illegible] ।

[illegible] जन[illegible]न्मदीयमिदं रजतमितिभ्रमानन्तरं गेहं [illegible]स्थत[illegible] छिद्रेन [illegible]वात[illegible]द्दैव [illegible]तं मयातद्देशस्थतया ज्ञातमितिप्रतीतिः तत्रे[illegible]कथ[illegible]गेहेतिष्ठतीति भ्रमश्च तत्रमानं । "वाचंधेनुमुपासीते" त्यादिश्रुतिः " अधर्मं धर्ममिति यामन्यते तमसावृता" इत्या

दि स्मृतिश्चान्यथाख्यातौ प्रमाणं, अनिर्वचनीयख्यातौ च नमानं, भ्रमविषय रजतस्य सद्वैलक्षण्येमानाभावात् ।

यदाहुः सद्रजतमिति प्रत्यक्षं तत्रमानं । तत्र नतावद्रजतस्वरूपमेव सत्, सच्छब्दस्य पर्यायत्वेनाप्रसिद्धेः । सत्ताजातेस्सर्वत्रासिद्धेश्चैतन्यातिरिक्तसत्तायां मानाभावाच्च । बाधायोग्यतायाश्च सत्ताया आत्मनोऽन्यत्रमानाभावात् । तस्मादधिष्ठानसद्व्यक्तितादात्म्यमेवेदं ज्ञानं विषयीकरोति । तस्यचाभिन्नत्वेसत्यभिन्नसत्ताकत्वरूपतया सद्भेदघटितत्वात् सदन्यद्रजतं प्रत्यक्ष विषयइति । तन्न, सद्भेद विषयत्वे प्रवृत्त्यनुपपत्तेः ।

नचतादात्म्यस्य संसर्गविधयाप्रतीतेः प्रवृत्त्युपपत्तिः, संसर्गमर्यादयाभेदज्ञानस्य प्रवर्तकत्वे सदन्यद्रजतमिति प्रकारतयातज्ज्ञानात् प्रवृत्तिप्रसंगात् । इदं रजतं रजतत्वसमवायीतिज्ञानयो रविशेषेण प्रवर्तकत्वात् । संसर्गमर्यादया भानेसद्वैलक्षण्येनप्रतिपन्नंप्रति प्रमाणतया सद्रजतमिति प्रतीते रुपन्यासायोगाच्च ।

ननु तादात्म्यांशभूतं अभिन्नसत्ताकत्वं प्रत्यक्षविषयः, तस्य चांशान्तरमन्तरेणानुपपत्तेः सद्भिन्नत्वमपि सिध्यतीतिचेत् । किंते न सहैकसत्ताकं तदभिन्नसत्ताकं, उततदभिन्नसत्तायस्य तत्तदभिन्नसत्ताकं । आद्येसत्तादात्म्यानुपपत्तिः, सत्सम्बन्धसत्ताया असिद्धेः । द्वितीयेकार्यगुणादेः कारणगुण्यादितादात्म्यानुपपत्तिः । [illegible]जतमितिप्रतीते स्सत्ताधर्मोविषयः, सा[illegible]क्ताविद्यमानतैव, अस्तिविद्यत्योरेक[illegible]विषयोऽस्तु, आत्मनोऽन्यत्रसत्वाभावेऽ[illegible]णाभावश्चासिद्धः, सद्रजतमिति सत्ताम[illegible]

नच-रजते सद्बुद्धेर्ब्रह्मसत्तयान्यथ[illegible]तावन्यथाख्यातिप्रसंगात, सदभेदप्रतीताव[illegible] अनिर्वचनीयस्सदभेदोरजते उत्पद्यते, तत्प्रतीतिरेव सामानाधिकरण्य-

व्यवहार निमित्तमितिचेन्न; विशेषणद्वयसंसर्गस्यैवं नीलमुत्पल मित्यादौ सामानाधिकरण्यव्यवहारनिमित्तत्वदर्शनात् । तत्राप्यभेदएव-निमित्तमितिचेत्, तथापि विशेषणस्यैव तद्भेदाभावरूपतया तत्संसर्गस्यैव सामानाधिकरण्यव्यवहारनिमित्तत्वानपायात् । नह्यभेदइति नामकरणमात्रेणतत्कार्यसिद्धिः , तथासत्यपांवह्निनामकरणे ततो दाहप्रसंगात् । अन्यत्रक्लृप्तभेदाभावा विलक्षणतया तस्य नाममात्रमेव । लाघवेन सएवहिततद्भेदाभावः । भेदाविरोधित्वाच्च नायमभेदः । अंगीकृतोहि रजतस्य तद्वैलक्षण्यमंगीकुर्वतात्वया सद्भेदः ।

यदप्याहुः बाधान्यथानुपपत्तिः सद्वैलक्षण्येप्रमाणमिति, तत्रार्कि रजतस्यसद्वैलक्षण्यं विना नेह रजतमिति निषेधोऽनुपपन्नः, उत नेदं रजतमिहेति, अथवानेदं रजतमिति । नाद्यः, देशान्तरनिषेधस्य देशान्तरसत्त्वेन विरोधाभावात् । नद्वितीयः, तादृशस्य बाधस्यासिद्धेः । नतृतीयः, इदं पदार्थगतरजतान्यत्वस्य रजतसत्त्वेन विरोधाभावात्, नहि घटस्य पटान्यत्वं पटसत्त्वविरोधि । इदं रजतमेव नसदिति प्रतीतिस्तु बाधिका स्यात, सातु नास्त्येव । ननु बाधायोग्यत्वं सत्त्वं, तत्कथं बाधे स्यादिति चेत् । कोऽत्र बाधः यदयोग्यत्वं सत्त्वं । किं प्रतिपन्नोपाधौनिषेधः, उत स्वाधिकरणे निषेधः । आद्येपि किंप्रतिपन्नोपाधि रधिकरणतया प्रतिपन्नमुताधिष्ठानं । आद्येऽपि किं प्रतिपन्नाधिकरणे क्वापि निषेधायोग्यत्वं सत्त्वं, उत प्रतिपन्नाधिकरणे क्वचिन्निषेधायोग्यत्वं । नाद्यः, तस्य लोकरीत्या [illegible] सच्छब्दार्थत्वाभावात्, लोकेहि गेहे देवदत्तो वर्ततइति ज्ञा
[illegible]मितेः प्रत्यक्षत्वा[illegible] [illegible]त: प्रतिपन्नः तत्र नासौ किन्तु आपणे
[illegible] चेन्न, प्रत्यक्षान्येन जानाति [illegible] । लोकव्यवहारानुसारादेवास्माकमपि
[illegible] तज्ज्ञानोत्पत्ते स्तादृशानु[illegible] [illegible]क्यादिना क्वचिद्ब्रह्मणि प्रतीते स-
[illegible]न्येव प्र[illegible]नन्धिका तत्रच प्रति[illegible] [illegible] [illegible]तीयः, क्वचिन्निषेधायोग्यस्याप्यन्यत्र नि-
[illegible] [illegible] क्वचिन्निषेधा योग्यस्याप्यन्यत्र क्वचित्प्र
[illegible]वतार[illegible] । [illegible]जन[illegible] [illegible]
[illegible]स्वत[illegible] छेदेन [illegible] [illegible]त्रैव [illegible] । नद्वितीयः, अधिष्ठानं किं भ्रमे ध
[illegible] [illegible]कथा[illegible]हि [illegible]ध्यासाधिकरणं । नाद्यः, पूर्वोक्तरीत्या-
लोकरीत्यादिविरोधे नाधिकरणतया भ्रमाविषये निषधायोग्यत्वस्य सत्त्व-

रूपत्वाभावात् । द्वितीये एतत्सत्वाश्रयवैलक्षण्यं यद्बाधानुपपत्त्या सबाधः किं भ्रम विषया धिकरणे निषधधी मात्रम् , उता ध्यस्य मानाभिन्न तदधिकरणे निषेधधीः । नाद्यः, तत्र प्रतियोग्यधिकरणताया निषेधानुपपादकत्वात् । नाद्वितीयः , तथासति कल्पका सिद्धेः । स्वाधिकरणे निषेधोबाधइत्याद्यद्वितीयेपि कल्पकासिद्धिरेव ।

यदपि प्राक्कार्यस्य सत्त्वे कारकव्यापारवैयर्थ्यं, उपलम्भप्रसंगश्च, असत्त्वे निःस्वरूपत्वेन शशविषाणवदुत्पत्त्ययोगात् , सदसद्वैलक्षण्यासिद्धिरिति । तत्तुच्छं, प्रागसत्त्वंहि प्राक्कालीनाभावः, सच नकालान्तरसत्वविरोधी, स्वदेशे सत्येव घटे देशान्तरनिष्ठाभावप्रतियोगित्ववत् । दृष्टान्तासिद्धिश्च, गगनकुसुमे गगनारोपितं कुसुमंवा गगनकुसुमशब्दार्थः, तत्र चोत्पत्ति रस्त्येव । किञ्च पूर्वं विद्यमानत्वे सदसद्विलक्षणत्वे वा कारकव्यापारवैयर्थ्यं, तदभावेच खपुष्पवदेव नोत्पत्तिसम्भवइति त्वदभिमतासद्विलक्षणत्वविद्यमानत्वोत्सादप्रसंगः ।

यच्च विमतं सदन्यद्बाध्यत्वात्, व्यतिरेकेणात्मवदिति । तन्न, स्वाधिकरणे त्रैकालिकनिषेधप्रतियोगित्वप्रमाविषयत्वायोग्यान्यत्वं यदिसाध्यंतदा साध्याप्रसिद्धेः । स्वाधिकरणतया प्रतिपन्ने त्रैकालिकनिषेधप्रतियोगित्व प्रमाविषयत्वायोग्यान्यत्वे साध्ये सिद्धसाधनप्रसंगात् । एवमनिर्वचनीय ख्यातौ नकिञ्चित्साधकं । बाधकानिच भूयांसि । तथाहि बाधानन्तरमपि इह पूर्वं रजतमासीदिति धीप्रसंगः । नचाभावज्ञानेन प्रतिबन्धा प्रप्रति[illegible] योगिज्ञानमितिवाच्यम् । अर्थयोर्विरोधप्रयुक्तोहि[illegible] व्यधिकरणधर्मावच्छिन्नाभावप्रतीतावपि [illegible] नच त्वन्मतेऽर्थयो र्विरोधः । रजतज्ञ[illegible] तीते र्थ विषयत्वांगीकारेणाभावज्ञानास[illegible] रजताभावविरोधाच्च नतत्र प्रतियोगिस[illegible] विरोधात् सद्विलक्षणरजतस्य नाभा[illegible] प्रतियोगिनैव विरोधात् । घटाद्यभावानां प्र[illegible] पि प्रतियोगिसत्त्वस्य त्वया निरासात् । भ्र[illegible] स्स त्तातयैवाभावो विरुध्यतइति यदि तदा इहाप्यधिष्ठानात्मिकया रजत

सत्तया विरोधादेव नाभावसम्भवः। नन्वधिष्ठानसत्तातिरिक्तैव शुक्तिरजते घटादौच प्रातिभासिकी व्यावहारिकीच सत्ता, भावाभावयोश्च समानसत्ताकयो र्विरोधः, अतो रजततदभावयोः प्रातिभासिकव्यावहारिकयो र्नविरोधइतिचेत्; किं सत्ताभेदेपि विरोधाभावः क्वचिद्दृष्टस्त्वया। इहैव कल्पने किं सत्ताभेदकल्पनागौरवेण; सत्यैक्येप्यविरोधकल्पनोपपत्तेः, अव्याप्यवृत्ते र्भिन्नावच्छेदेना विरोधकल्पनव त्प्रतीतिबला देकावच्छेदेना प्यविरोधकल्पनस्य सम्भवात्। यत्तूच्यते अस्ति तावच्छुक्तौ रजतं, तच्च तत्रैव त्रैकालिकनिषेधप्रतियोगिप्रतीतं, रजतमिह नास्तीति तस्य त्रैकालिकनिषेधात; नच रजतस्य स्वात्यन्ताभाव सामानाधिकरण्यं विरुद्धमिति वाच्यम्, विषमसत्ताकयो र्भावाभावयो रविरोधात्, विषमसत्ताकत्वंच रजततदभावयोरनन्यथासिद्ध विधिप्रतिषेधप्रत्यक्षाभ्यामंगीव तंव्यम्। तत्रापि रजतस्येव तदभावस्य बाधाभावा त्सत्त्वमिति। तत्र यद्यभावबुद्धिर्बाधस्तदा रजतबुद्धिरपि बाधः प्रसजेत्। यदिविरहैकस्वभावस्य अभावस्य बुद्धिर्बाधः, यदिवाभावत्वेन बुद्धिः, तदाघटाभावप्रमानन्तरं घटबुद्धिर्बाधोनस्यात्। एतेन त्रैकालिकाभावधीर्बाध इतिनिरस्तं, घटस्य भूतलेत्रैकालिकत्वाभावात्। यदिच पश्चात्तनाभावबुद्धिर्बाधः। तदाघटप्रमोत्तरभावि घटाभावभ्रमेण घटप्रमायाबाधस्यात्। यदिचा भावप्रमाबाधः तदाप्रमात्वं यद्यबाधितार्थगोचरत्वं, [illegible] मितेः प्रत्यक्षत्वा[illegible] सत्[illegible] द्वितत्संसर्गवति तत्प्रकारकत्वं तदासिद्धेवान्यथाख्या[illegible] चेन्न, प्रत्यक्षान्येन जानीय[illegible] [illegible] निरुक्तप्रमात्वाभावे वाच्ये सप्रकारके त[illegible] तज्ज्ञानोत्पत्ते स्तादृशानु[illegible] [illegible]स्वरूपविशेषणाभाव ध्रौव्येण रजतत्व[illegible] [illegible]न्येव प्रतिबन्धिका तत्रच प्रति [illegible] कत्वपर्यवसानात। यदिच ज्ञानेन[illegible] [illegible] सत्त्वाभावेऽपि स्वकालेसत्त्वाभावः [illegible]वतार[illegible]। [illegible] जन[illegible] [illegible]स्य स्वकालेप्यसत्त्वं दृष्टमिष्टंवा, प्रत्युत [illegible] [illegible]ध्येत। ज्ञाननिवर्त्यस्य सद्विलक्षणत्वनिं [illegible] यदिच मिथ्यात्वबुद्धिर्बाधः, तदामिथ्यात्वस्य [illegible] स्वसमानाधिकरणात्यन्ताभाव प्रतियोगित्वरूपताया स्त्वदभिमतत्वात्

बाधस्यासिद्धिरेव । प्रमाणबलात्तत्सिद्धौ चाविशेषात् प्रतियोगितद्भावयोर्द्वयोरपि सत्यत्वं सिध्येत् । सत्ताभेदादविरोध इत्यपि न । यदि व्यवहारदशायां अबाध्यत्वं व्यावहारिकसत्त्वं प्रतिभासदशायामबाध्यत्वं प्रातिभासिकसत्त्वमिति रजततद्भावसत्त्वयो र्भेदोऽभिमतः, तदा रजतप्रतिभासदशायां तद्व्यवहारस्यापि सत्त्वात् तदानीमबाधितस्य कथं नव्यावहारिकत्वं । ब्रह्मज्ञानेतराबाध्यत्वं व्यावहारिकसत्त्वं प्रतिभासदशायाम बाध्यत्वं प्रातिभासिकसत्त्वमित्यपि न, बाध्यत्वस्य स्वाधिकरणवृत्त्यभावप्रतियोगित्वात्मकत्वे दशाविशेषणवैयर्थ्यात् । निवर्त्यत्वात्मकत्वेऽपि नाविरोधसिद्धिः, कालह्रासदैर्घ्यमात्रस्य अविरोधाहेतुत्वात् । तथासति ध्वंसप्रागभावाभ्यां पटादेरविरोधप्रसंगात् । सत्ताभेदमनादृत्य सत्त्वमिथ्यात्वाभ्यामेव विरोधपरिहारे आत्माश्रयः । स्वाधिकरणवृत्त्यभावप्रतियोगित्वेनैव अभावसामानाधिकरण्य रूपाविरोधसमर्थनात् ।

किंच क्लृप्तकारणाभावान्न रजतोत्पत्तिसम्भवः । ननु सत्यरजते यत्कार्यतावच्छेदकं रजतत्वं न तदिहास्तीति कथमसम्भवइति चेत्, तर्हि यदेव सत्यरजत गतं रजतत्वं तदवच्छेदेनेष्टसाधनत्वं गृहीतमिति तद्रहिते प्रातिभासिकरजते प्रवृत्ति र्न स्यात् । शुक्तिरजते तादृशरजतत्वासंसर्ग ग्रहाद्वा रजतयोर्भेदाग्रहाद्वा यदि प्रवृत्तिः तर्ह्यनिर्वचनीयख्या तिर्दत्तजलाञ्जलि स्स्यात् । शुक्तिरजतं सत्यरजततादात्म्ये नोत्पद्यत इति तत्तादात्म्यग्रहात् तत्र प्रवर्ततइति चेन्न, सत्यरजतावच्छिन्नसद
धिष्टानकत्वाभावेन तादात्म्यासिद्धेः । अभेदएव
चेत्; किं तेन, तस्येष्टसाधनतावच्छेद
स्यनुपपत्तेः । किंच ज्ञानकारणाभावा
हि ज्ञानात्प्रागविद्यमानेनार्थेन सन्निक
क्षात्तुत्पत्तिः । ननु - आविद्यावृत्ति
णवृत्तिः, अतो न सन्निकर्षापेक्षेति चेन्न;
रूपत्वे तदपेक्षा ध्रौव्यात् । तदभावेचान्यथा ... च
त्वात् । अनुभवविरोधकरणान्तर कल्पनाप्रसंगयोस्साम्यात् । किञ्चेय

मविद्यावृत्तिरन्यथाख्यातिरूपेति कुतो नेष्यते । तथासति ह्यर्थोत्प त्तिकल्पनागौरवं न प्रसज्येत् । अथ स्याद् ज्ञाक्ष्येव भ्रमः, सच्वाना दिरिति न सन्निकर्षापेक्षेति ; तन्न, इदमाकारवृत्त्यवच्छिन्न चैतन्यस्यै व रजताभासकत्वाभिमानात् तद्वृत्तेश्च जन्यतया तत्सन्निकर्षावश्यम्भा वात् । नन्वभिव्यक्तचैतन्याभेदोभिभासमानता, तस्यचेदमाकारवृ- त्त्यवच्छिन्न चैतन्याध्यासादेव सिद्धेः रजताकारवृत्तेरनपेक्षितत्वात् रजतावभासस्यान्यथासिद्धे र्नसन्निकर्षापेक्षेति चेत् । यद्येवं तद्विषयजन्यप्र त्यक्षस्य तत्सन्निकर्षजन्यत्वनियममनादृत्य अन्यथासिद्धिरवलम्ब्यते तर्हि दोषेणैवान्यथासिद्धिरस्तु, नियमसंकोचस्य उभयत्रतुल्यत्वात् ।

नच-चैतन्याभेदाभावे प्रकाशानुपपत्तिः । परोक्षवदुपपत्तेः । नह्य- तीतादौ तत्सम्भवः । रजतस्यापरोक्ष्यव्यवहारश्चा परोक्षधर्माभे- दाध्यवसाया दुपपन्न इति नापरोक्ष्यसिद्ध्यर्थमपि चैतन्याभेदसिद्धिः ।

वस्तुतस्तु परोक्षज्ञानाभेदो यथा नपारोक्ष्यनिमित्तं तथा अपरो- क्षज्ञानाभेदोपि नापरोक्ष्यनिमित्तं, किन्तुसामग्रीभेदएवेति । किंच यद्यु त्पद्यते रजतं नश्यति च तदुभयं प्रतीयेत । ननुरजतज्ञानमुत्पन्नं वि नष्टमिति प्रतीतिरेवरजतोत्पत्तिविनाशयोः प्रतीतिः, साक्षिरूपज्ञानस्य उत्प त्तिविनाशयो रसम्भवेन सविशेषणेहि विधिनिषेधौ विशेषणविशेष्य- यो रन्यतरबाधे एकतरमुपसंक्रामत इति न्यायेन तस्याः प्रतीते र मितेः प्रत्यक्ष[illegible]त्वादितिचेन्न;- तस्य न्यायस्य वाक्यविषयत्वा- चेन्न, प्रत्यक्षान्येन जानीय[illegible] तद्विषयाभावात्, अन्यथा इदं रजमिति तज्ज्ञानोत्पत्ते स्तादृशानु[illegible] विषयइतिगंगापदवत् व्याख्यानप्रसंगा [illegible]व प्रतिबन्धिका तत्रच प्रति[illegible] ज्ञानेउत्पत्त्यादिकं विषयीकुर्वदिदं ज्ञानं [illegible] रजतोत्पत्त्यादिप्रतीतौ च रजतमुत्पन्नं र- [illegible]वतारः । [illegible] । किंच यत्रचाकचक्यादियुक्तवस्तु ज्ञा [illegible] चिरकालं विलम्बसति अनन्तरंदोषात् रज- [illegible] तं इदपूर्वमेव बहुकालंतिष्ठति ममत्विदानी मेव तद्विषयज्ञानमुत्पन्नं इतिप्रतीतिर्दृश्यते, नचेयंप्रतीति र्विशेषणवि-

षयावस्तुं शक्या, रजतं प्रागेव वर्ततइतिज्ञाने विद्यमाने इदानीमेवोत्प-
न्नमिति तद्गोचरप्रतीते रसम्भवात्। किंच ज्ञानस्यानुत्पत्तिश्चनसम्भवति, इद
माकारवृत्त्यवच्छिन्नज्ञानस्यैववा अविद्यावृत्त्यवच्छिन्नज्ञानस्यैव वा रज
तभासकत्वेन त्वदभिमततया रजतज्ञानानुत्पत्तेः दुर्भणत्वात्। त्वयैवप्रातिभा
सिकविषयाविद्यावृत्तिभंगस्थले इदमाकारान्तःकरणविनाशादेव तदुपहि
तसाक्षिविनाशात् संस्कारोत्पत्ते र्नतदर्थमप्यविद्यावृत्तिरित्युक्तत्वाच्च। रज
तज्ञानस्याजन्यत्वाभिनिवेशे घटादिवच्चैतन्यमात्रेऽध्यासोवाच्यः, तथाचदे-
वदत्तस्य रजतभ्रमकाले यज्ञदत्तस्यापीदमाकारवृत्त्युत्पत्तौ इदमधिष्ठानचैत
न्यस्यदेवदत्त वृत्त्येव यज्ञदत्तवृत्त्यापि व्याप्ततया तस्य देवदत्तप्रमातृचैत
न्यत्ववत् यज्ञदत्तप्रमातृचैतन्यत्वस्यापि सत्त्वाद्रजतस्य देवदत्तप्रमा
तृचैतन्येनेव यज्ञदत्तप्रमातृचैतन्येनाप्यभेदाद्देवदत्तस्येव यज्ञदत्तस्या-
पि तद्रजतव्यवहारप्रसङ्गः। ननु वृत्तेः प्रत्यक्षरूपायास्सन्निकर्षस्सा-
मान्यसामग्री, तदाकारवृत्ते स्तत्सन्निकर्षो विशेषसामग्री, इहचेद
माकाराया वृत्तेरिदमर्थे न्द्रियसन्निकर्षसत्त्वात् नानुपपत्तिरितिचेत्।
उच्यते, शब्दजन्यापरोक्षवृत्तौ त्वन्मते सामान्यविशेषसामग्र्यो र्व्यभिचा
रान्नेदं युक्तं। नन्विन्द्रियजन्यप्रत्यक्षत्वस्य सन्निकर्षजन्यतावच्छेदकत्वा
त् न व्यभिचारइति चेन्न, उक्तव्यभिचारादेवेन्द्रियजन्यत्वेपि जन्यप्र-
त्यक्षत्वमात्रस्यानवच्छेदकतया सन्निकर्षजन्यप्रत्यक्षत्वस्य अवच्छेद
कत्वप्रसंगेन विनिगमकाभावेन अन्यतरस्यान्यतरानवच्छेदकत्वात्, अत
स्तत्संसृष्टतदाकारापरोक्षवृत्तौ तत्सन्निकर्षोहेतुः, [illegible]
त्वात् न विषयसंसृष्टमित्येवं वाच्यं, र[illegible]
ष्टतया सन्निकर्षापेक्षेति न हेत्वभावाद[illegible]
ननूक्तकार्यतावच्छेदकं दशमस्त्वमस[illegible]
श्शब्दाजन्यापरोक्षत्वमेवावच्छेदकं, [illegible]
लाघवेन बहिः प्रसृतत्वस्यैवा वच्छेद[illegible]
प्रत्यक्षदृष्टवह्नौ सिसाधयिषानुमितौ सत्त्वा[illegible]
त्वात्, शब्दानुमानानुपलब्ध्यजन्यत्वेन [illegible]र
त्यक्षाजन्यत्वस्य गुरुत्वात्, प्रत्यक्षपदस्य प्रत्यक्षप्रमाकरणाध्याज

शब्दस्यापि तथात्वेन शाब्दापरोक्षेऽप्रसंगतादवस्थ्याच्च । किञ्च यथा शब्दाजन्यत्वेन विशेष्यते तथा भ्रमान्यत्वेनापि विशेष्यतां, जन्यत्वापरोक्षत्वयोरिहापि - प्रतीत्य विशेषात । यदिचावच्छेदक लाघवादरेणार्थोत्पत्ति कल्पनया जन्य साक्षात्कारत्वबुद्धेरन्यथा सिद्धिक ल्पनं तदा शाब्दापरोक्षेऽपि अन्यथा सिद्धिप्रसंगः, स्वाप्नरथादिवदन्तः करणावच्छिन्न साक्षिणि घटाद्यर्थोत्पत्तिसम्भवात्, भ्रमस्थलीयज्ञानकारणानामिवज्ञानकारणत्वाभिमतशब्दादीनामर्थोत्पादकत्वसम्भवात्,यच्चक्षुषा द्राक्षन्तमेवेदानींशब्देन जानामीतिप्रत्यभिज्ञापि यद्रजतमापणेपूर्वमद्राक्षं तदेवात्रपश्यामीतिभ्रमस्थलीयप्रत्यभिज्ञावदुपपाद्यतां । किंच भ्रमान्यत्वेनैव संकोचोयुक्तः, अन्यथा वह्निजलपृथिवीभ्रमेषु अर्थोत्पत्तौ "वायोरग्निः। अग्नेरापः। अद्भ्यःपृथिवी"ति श्रुतिबाधप्रसंगात् । अतोरजतं नोत्पद्यते-नापिनिवर्तते। किंच रजतत्वव्यापकद्रव्यत्वाद्यभावात् कटकमकुटाद्ययोगाच्च नतत्रानिर्वचनीये रजतत्वमिति तत्रतत्प्रतीतावन्यथाख्यातिरनिवार्या।

ननुतत्रभावत्वद्रव्यत्वादिकमप्यस्त्येवेतिचेत्, नतावत्संसर्गःप्रातिभासिकः तत्प्रतीत्यसिद्धेः। नचव्यावहारिकः, तथासति द्रव्यत्ववदेवव्यावहारिकगुरुत्वप्रसंगेन तत्कार्यपतनाद्यापत्तेः। वह्न्यारोपेव्यावहारिकोष्णस्पर्शापत्त्यादाहाद्यापत्तेः। स्वाप्नार्थेषुतु श्रुत्यैव सत्यत्वप्रतिपत्तेः रथत्वाद्यव्यभिचरितं पृथिवीत्वादिकं सिध्यति मानान्तराविरोधात्। गुरुत्वादिव्याप्तिस्तु श्रुतिप्रत्यक्षाभ्यामेव संकोचमर्हति। नचेहरजते तादृशीश्रुति-
मितेः प्रत्यक्षत्वे [illegible] यताविरहेऽपि तद्बुध्यैवप्रवृत्तिरिति अनिर्वच
चेन्न, प्रत्यक्षान्येन जानीये [illegible] तिरिति। तद्योग्यतापि तत्रानिर्वचनीयो
तज्ज्ञानोत्पत्ते स्तादृशान्तु [illegible] लोपधानदर्शनात्तत्साधनतावच्छेदकद
न्यैव प्रतिबन्धिका तत्रच प्रति [illegible] ति कथं योग्यताप्रतीतिः। अवच्छेदकप्र
वतारा[illegible]। [illegible] जन [illegible] हि सत्यरजते यदवच्छेदकं गृहीतं-
[illegible] केन [illegible] नैव [illegible] दोषउक्तः।
[illegible] कथा [illegible] हि [illegible] तत्प्रतीतिर्नान्यथाख्यातिरिष्यते, त-
मेव [illegible] यादीनामुत्पत्तिश्रवणात्, अतएव तेषांनासत्वं, नापिस-

त्वबाधात् , अतस्तत्रानिर्वचनीयोत्पत्तिरंगीकार्या , अतः कथमनिर्वचनीय निरासः । उच्यते-स्वाप्नार्थास्सत्या एव । यदि सुप्तोत्थितो मया स्वप्ने दृष्टाः पदार्थालौकिकविजातीयाः क्षणिकाः-कार्यक्षमा नभवन्तीति जानाति तर्हि नपदार्थस्वरूपबाधः । यदितुपदार्थाएव नसन्तीति जानाति सतर्हि भ्रान्तएव । तथाहि- न तावदयमेवं प्रत्यक्षेणजानाति,अतीतत्वात् । किन्त्विदानीं दर्शनाभावादिना नुमानेन जानाति, तच्चानुमानं श्रुतिबाधितमिति ।

ननु 'नतत्र रथा' इतिश्रुत्यैवबाधात् कथं सत्त्वमितिचेन्न; 'अथरथा'इत्यनन्तरकाले सृष्ट्यभिधानेन प्राङ्नास्तितताया एवाभिधानात् । यदुक्तं मित्थ्या रजतमभादितितस्यमिथ्यात्वमनुसन्धीयते, नचतन्मित्थ्यात्वं सर्वदेशीयसर्वकालवृत्त्यत्यन्ताभावप्रतियोगित्वं तस्य बाधकप्रत्यक्षा विषयत्वादित्युक्तं; नापि विशेष्यनिष्ठात्यन्ताभावप्रतियोगित्वं, मित्थ्यारजतमभादित्यनुभूतधर्ममात्रतया तस्यानुसन्धानात्; देशान्तरीयादेस्तदसम्भवात्; अतस्स्वसमानाधिकरणसमानकालीनात्यन्ताभाव प्रतियोगित्वमेव तत्वमिति । नतावदिदं मित्थ्यात्वं भ्रान्तिदशायामनुभवितुं शक्यं, दोषेणप्रतिबन्धात् । तदनुभवेबाधदशायामिव रजतप्रतीत्यनुपपत्तेश्च । नापि बाधदशायां, तदानीं रजतानुभवाभावात् । बाधदशायां ग्रहणस्मरणात्मकमित्थ्यात्वज्ञानमितिचेत् ; घटनाशेसति यथापूर्वं घटःस्थितइति व्यवहारः तथापूर्वमिहरजतं स्थितमितिव्यवहारप्रसंगात् । [illegible] च्छुक्तीरजततया ज्ञातेतिप्रतीते स्नुप्रति [illegible] शब्दोभावप्रधानः मित्थ्यात्वं च विशेष्यनि [illegible] त्वापणस्थरजतं अपवरकनिष्ठतया [illegible] स्थ्यैव रजतमभादिति अपवरकनिष्ठा [illegible] त्थ्यात्वं रजतस्यैवोच्यत इतिरजत पदं [illegible] त्वाभाववत्त्वेसति रजतवदवभासमानमि [illegible] दौ मित्थ्यामृगो मायामृगइत्यादिप्रयोगः [illegible] र त्तिस्सम्भवति, कृत्रिमत्वपरिज्ञाने तदसम्भवात् । अतः प्रयोज

वतिमित्थ्यागोपदइत्यादिप्रयोगश्च । स्वानाधिकरणानधिकरणात्यन्ताभावप्रतियोगित्वमपि दुर्ज्ञेयमेव, अधिष्ठानमेवाध्यस्ताभावइतिस्त्वदीय प्रलपनं शृण्वतामेवं विधदुर्बुद्धेरसम्भवात । प्राक्तच्छ्रवणेपि ह्युन्मत्तः कोऽपि नैवमध्यवस्यति । बाधकज्ञानविषयोऽप्यभावः । बाधकज्ञानंच नेदं रजत मितिवा नात्ररजतत्वमिति वास्यात् । नतुनास्मिन्रजतमितिशुक्तौ रजताभावावगाहि, इदं रजतमिति भ्रमकालेऽपि विद्यमानस्य तस्य बाधकत्वायोगात् । एतेन स्वानधिकरणावृत्ति स्वाभावत्वंमिथ्यात्वमितिनिरस्तं तदनधिकरणावृत्तित्वतदभावत्वयोर्व्याघाताच्च ।

ननु संविदतिरिक्तस्यापरोक्षत्वाभावात् तदभेदादेवार्थस्यापरोक्ष्यं वाच्यम्, तत्रच संविदभेदमात्रस्य साधारणत्वात् अनावृतसंविदभेदोवाच्यः, सचानिर्वचनीयोत्पत्ता वेवस्तित्स्यतीतिचेन्न । अपरोक्षसंविदभिन्ने दमर्थाभिन्नतया वभासादेवरजतस्य आपरोक्ष्य व्यवहारोपपत्तेः रजतोत्पत्तिर्नकल्पनीया । किंच किमभेदशब्देन अभिन्नसत्ताकत्वं विवक्षितं, उताभेदएव । नाद्यः, अनयोस्सत्ताएकेति ज्ञानेखति समानाधिकरणव्यवहारादृष्टेः । भेदाग्रहसहिता सत्तैक्यधीस्स मानाधिकरणव्यवहारनिमित्तमितिचेत् । एवं तर्हि आवश्यकभेदाग्रहादेव समानाधिकरणव्यवहारोपपत्तौ किं व्यभिचरितेन सत्तैक्य ज्ञानेन । द्वितीयेप्रपंचस्यापरोक्ष्यंनस्यात्, व्यावहारिकसंविद्भेदस्य सत्वेन तत्समसत्ताकतदभावासम्भवात ।

सतः प्रत्यक्षत्वा[illegible] [illegible]र्थिकः, तथासति त्वदभिमत वस्त्वपरिचेन्न, प्रत्यक्षान्येन जानीये[illegible] [illegible] । प्रपंचस्य सत्यत्वे तद्भेदस्यापि तज्ज्ञानोत्पत्ते स्तादृशानु[illegible] [illegible]तया नन्त्यविरोधइति हिप्रपंचस्या सत्येव प्रतिबन्धिका तत्रच प्रति[illegible] [illegible]र्दि । नित्यापरोक्षे ब्रह्मणि आपरोक्ष्यस्य संवतारा[illegible] । [illegible] जन[illegible] स्वानधिकरणानधिकरणात्यन्ताभावप्रति[illegible] [illegible] [illegible]ष्टसंविद्भेदरूपे ब्रह्मणिप्रसंगाच्च ।

[illegible] प्रपंचस्य परमार्थः, जडाजडयोर्वास्तवैक्या मेव [illegible] त्वदुक्तिविरोधात, वस्तुविरोधाच्च । किंचा खण्डार्थ-

समर्थनेत्वयैव चन्द्रस्वरूपे प्रत्यक्षेणभासमानेऽपि नज्ञाननिवृत्तिः ; तस्य चन्द्रस्वरूपप्रत्यक्षस्य अनवधारणात्मकत्वात् , अतः कश्चन्द्र इति स्वरूपप्रश्नोपपत्तिरिति ज्ञाननिवृत्त्यभावेऽपि प्रत्यक्षमुक्तं कथमनावृ-तसंविद्भेदापरोक्ष्यम् । अपि च अनिर्वचनीयेविवदमानं प्रतिकथमनिर्व चनीयसंविद्भेदमुपजीव्यानिर्वचनीय समर्थनमिति नविद्मः ।

ननुप्रकारान्तरेणापरोक्ष्यासम्भवात् पारिशेष्यादनेनैव प्रकारे-णापरोक्ष्यं वाच्यमिति आपादनेन प्रातिभासिकोत्पत्ति स्समर्थितेति चेन्न; प्रातिभासिकसमर्थनदशायामेव प्रपंचस्यापि मिथ्यात्वसिद्धौ सि द्धसाधनप्रसंगात । नन्विदानीं ब्रह्माभेदमात्रमेव प्रपंचस्य सिध्यति नमिथ्या त्वमितिचेन्न;- ब्रह्मभिन्नतयासंप्रतिपन्नस्य तदभेदसाधनेतत्सिद्धेः । भिन्नस्या भेदसाधनमभेदमात्रमिथ्यात्वादपि उपपद्यतइति न प्रपंचमिथ्यात्व सि द्धिरितिचे त्तर्हिशुक्तिरजतस्यापिनमिथ्यात्वसिद्धिः, तत्रापि सत्यरजतस्यैव संविद्भेदारोपसिद्धेः ।

ननु रजताज्ञानस्या निवृत्तत्वेन अनावृतसंविद्भेदोना-स्तीतिचेत् ; न-भ्रमानन्तरं प्रमास्थलइव रजतज्ञानेन रजताज्ञानं नि वृत्तमित्यनुभवानुसारेण तत्राप्यज्ञाननिवृत्तेरेव कल्पनीयत्वात् , इहोत्प त्तिचायमनुभवो बाधते; त्वयास्य रजतस्य अज्ञानविषयत्वानं-गीकारात् भ्रमप्राक्काले रजता सिध्यात्तदावारकज्ञान निवृत्त्यसंभ-वाच्च । ननु सत्यरजतस्यतावत्पर्यन्तमन्तः [illegible]
प्रमातृचैतन्यादेरसिद्धेः कथं भानमिति [illegible]
रोक्ष्यंचा ज्ञाननिवृत्तेरुपपन्नमित्युक्तं । [illegible]
यतीति चेत् ; स्पृशन्तीषाकथं । नहि ल[illegible]
ङ्कुर्वन्ती निवर्तयति । ननु नहि तादृश[illegible]
रिष्यते, अतएव नाज्ञानसंबन्धापेक्षापि [illegible]
यसंबन्धो ज्ञानसंबन्धो वेष्यतइतिचेन्न ; [illegible] र
ज्ञाननिवृत्तौ अतिप्रसंगाभावात । अपिच [illegible]
क्षतिः, स्फटिकादेः चक्षुःप्रतीव सर्वस्य वृत्तिव्यवधायकत्वे[illegible]योज

पत्तेः। अतीतादौ कथमितिचेत्, तदुत्पत्तिवदिति ब्रूमः। नवयंतत्रातीता द्युत्पत्तिंब्रूमः किन्तुभ्रमस्थले किंचिदनिर्वचनीयं रजतमुत्पद्यते तत्रातीताभे दोऽपि तादृशउत्पद्यतइतिचेत्; तर्हि सर्वत्राभेदएवोत्पद्यतइति कल्प्यतां किंरजताद्युत्पत्तिकल्पनया। नन्वपरोक्षार्थविषत्वमेव वृत्तेरपरोक्षत्वं, अर्थस्य तु यद्यनावृतसंविद भेदएवापरोक्षत्वंतदानावरणस्य अपरोक्षवृत्त्यधीनत- याता परोक्ष्यवृत्त्या परोक्ष्ययोरन्योन्याश्रयापातात्, अतस्तत्प्रमातृचैतन्याभे दस्तं प्रत्यक्षापरोक्ष्यं, घटादिचैतन्यस्यच प्रमातृचैतन्याभेदोवृत्त्य वच्छेदाधीनइति विषयसबन्धोपेक्षितइतिचेत्; तथासति धर्माधर्मगु रुत्वादिकं अपरोक्षंस्यात्। अनावृतप्रमातृचैतन्याभेदोऽपरोक्षत्वमितिचेत; तर्हि घटादावनावरणस्य अपरोक्षवृत्त्यधीनत्वात सएवान्योन्याश्रयः। तस्मा द्वृत्तावपरोक्षत्वं विलक्षणकारणप्रयोज्यज्ञाननिवर्तकतावच्छेदकमन्यदेव, अ र्थस्यतु तत्प्रत्यनावृत संवित्तादात्म्यमापरोक्ष्यमितियुक्तं। वस्तुतस्तूक्तविध या ज्ञानापरोक्ष्यस्यार्था प्रयुक्तत्वात् नतदर्थमनिर्वचनीयोत्पत्ति रंगीकार्या। यच्चेदमुच्यते शुक्तिरजतं सोपादानं भावकार्यत्वात् संप्रतिपन्नवदिति सोपादानत्वे सिद्धे पारिशेष्याच्छुक्त्यज्ञाने सति रजतं नोचेन्नेत्य न्वयव्यतिरेक सिद्धकारणभाव मज्ञानमेवोपादानं, शुक्तिज्ञानेसति - नियमेन निवर्त्यमानरजतस्य नियमेन तन्निवर्तनीयाज्ञानोपादानकत्व स्यैव युक्तत्वाच्चेति - तन्न, रजतत्वेन पृथिव्युपादानकत्वस्यापि प्र- मतेः प्रत्यक्षा[illegible]व्यतिरेकप्रतीतिश्चा सिद्धैव। यदितु क्वचित्तथा- चेन्न, प्रत्यक्षान्येन जानीय[illegible]तः पश्चाद्रजतभ्रमेसति रजताज्ञानेसति शु- तज्ज्ञानोत्पत्ते स्तादृशान्[illegible]न्यथा सिद्धेः। ननु तत्रार्थोत्पत्तेर्बाधा त्तथा येव प्रतिबन्धिका तत्रच प्रति[illegible] रजतं नोत्पन्नमिति प्रतीत्या बाधित वतारा[illegible]। [illegible] जन[illegible]ता, ज्ञानं नोत्पन्नमिति प्रतीतेरभावात् [illegible]न्नमित्येव हि प्रतीतिः। यद्यपि तव ज्ञा- [illegible] नसा लौकिकप्रतीतिविरोधिनी, यस्या [illegible] न साविरोधिनी, यौक्तिक बुद्धेः मेव [illegible]रोधित्वात् । अन्यथातव प्रपंचानवभास प्रसंगात्,

अतो ज्ञानस्योत्पत्तिरस्तु वा मावा, सर्वथैवेयमन्वय व्यतिरेकप्रतीति र्ज्ञानोत्पत्तिविषयैव । तस्मादिहान्वयव्यतिरेक बुद्धौभ्रमत्वप्रमात्वयोरेव विप्रतिपत्तिः, न ज्ञानविषयत्वइति न सात्वदभिमतसाधिका । किंचेयं प्रतीतिश्शुक्तिज्ञानाभाव विषयैव, तत्त्वज्ञान प्रतिबन्धकत्वात् । न च दोषादिघटितसामग्रीकाले रजतोत्पत्तिनियमात् न तस्य प्रयोजकत्वं, सामग्रीकालीनकार्यानुत्पादप्रयोजकस्यैव प्रतिबन्धकत्वादिति वाच्यम् । तथासति दोषाभावादेव कार्याभावसम्भवात् स्व तन्त्रान्वयव्यतिरेकाभावात् भावरूपाज्ञानस्यापि कारणत्वासिद्धेः । किंच सादृश्यादिर्दोषः, सच तत्त्वज्ञाने प्यनुवर्तते, तदानीं च रजत भ्रमाभावश्शुक्तिज्ञानेन प्रतिबन्धादेववाच्यः । नन्वज्ञानस्य कारणत्वाभावानिश्चयात तत्रचाज्ञानस्याभावात सामग्रयास्सन्दिग्धत्वात कथं प्रतिबन्धकत्व सिद्धिरितिचेत, एवमप्यनन्यथा सिद्धत्वनिश्चयाभावात न कारणत्वावधारणसम्भवः । किंच तत्राज्ञानस्यापि सत्वात् कथं त्वदभिमतसामग्रयाअपि विरहः, बाधकज्ञानेनाविद्यानिवृत्तावपि तत्रैव अनन्तरदिने रजतभ्रमदर्शनात तत्राविद्यान्तरं तिष्ठतीतिहि – त्वदीयाकल्पना । अथ स्यात्, आवरणं भ्रमकारणं, भ्रमविद्यायां भ्रमकारणतावच्छेदकं वा, इहचावरणाभावात् सामग्री नेति चेन्न । - नदीतीरस्थवनस्पता वूर्ध्वाग्रत्वेन साक्षात्क्रियमाणएव जले प्रतिबिम्बिते तस्मिन्नर्थोग्रत्वदर्शनेन तत्र विक्षेपमात्रमेव नत्वावरणमिति त्वयैवावरणस्य विक्षेपप्रयोजकत्व [illegible] ग्यतात्विहापीति कथं सामग्रयभावः । किं[illegible] घटितसामग्रयास्सत्वात् शुक्तिज्ञानेन [illegible] किंच तत्र शुक्त्यविज्ञानस्य कारणत्व[illegible] बन्धकत्वकल्पनैव लघीयसी, अज्ञानस्य[illegible]

नच ज्ञानाभावस्य कार्यप्रयोजकत्व[illegible] भावरूपाज्ञानस्य कारणत्वकल्पनं लघ्विति[illegible]र वं प्रतियोगिनिरूप्यत्वात्, तच्चाज्ञानस्य भावरूपत्वेपि तुल्यमेव, प्रयोज

कत्वादप्यनन्यथासिद्धत्वगर्भ कारणत्वस्य गौरवं स्थितमेव । किंच कार्याभावप्रयोजकत्वं शुक्तिज्ञानस्यैव कल्पनीयं लाघवात्, नतु- शुक्त्यज्ञानाभावस्य गौरवात् । यदुक्तं शङ्खपीतभ्रमो विशेषादर्शनजन्यः कादाचित्कभ्रमत्वात् सम्प्रतिपन्नवत्, तच्च विशेषादर्शनन्नव्याप्य दर्शनाभावः, श्वैत्यव्याप्य शङ्खत्वज्ञानात्, नापि ग्राह्यनिश्चयाभावः तदनुमिते स्सत्वात्, नच ग्राह्यप्रत्यक्षाभावः-यस्य यस्मिन् शङ्खे कदापि न श्वैत्यप्र त्यक्षं तस्य तत्रपीतभ्रमे प्रतियोग्यप्रसिध्या भावासम्भवात्, अन्य- विशेष्यक श्वैत्यप्रत्यक्षाभावस्तु न भ्रमकालनियतः समानविषयकयो रेव भ्रमाज्ञानयोः कार्यकारणभावाच्चेति । तन्न, विशेषदर्शनस्येश्वरादौ प्र- सिद्धत्वात् । नच विशेषदर्शने सत्यपि पुरुषांतरीय विशेषदर्शनाभावा त्कार्यप्रसंगः, तस्यापि विशेषदर्शनस्य प्रतिबन्धकतया तदभावविर- हादेव कार्यविरहात् । अन्यथा व्यभिचारज्ञानानुपलब्धेः व्याप्तिग्रहा- भाव ज्ञानकारणता न स्यात् । तद्विशेष्यक व्यभिचारज्ञानस्य त्व- दुक्तरीत्या प्रसिद्धेः, अन्यविषयक व्यभिचार ज्ञानस्य तदानी- मपि सत्वात् । नच - तत्रापि भावरूपमेव तदज्ञानं हेतुः प- रोक्षव्यभिचारज्ञानेपि तत्सम्भवाद्व्याप्तिग्रहाप्रसंगात् । एवं वायौ- रूपाभावग्रहे रूपोपलब्ध्यभावमात्रं नहेतुः । घटरूपोपलब्धे स्सत्वात्, तदधिकरणीयरूपोपलब्धे स्त्वदुक्तरीत्याप्रसिद्धेः तदभावायोगात् । रूपावच्छिन्न वायुचैतन्याज्ञानस्य विषयाप्रसिद्ध्या अप्रसिद्धेः । अस्तु- मतेः प्रत्यक्ष[illegible] भ्रम हेतुत्वं, उपादानत्वन्तु कुतः । नच शुक्तिज्ञा चेन्न, प्रत्यक्षान्येन जानीथे [illegible] ज्ञानोपादनकत्वादेवेतिवाच्यम्, अ तज्ज्ञानोत्पत्ते स्तादृशानु[illegible] जीवेशभेदाध्यासादे स्तादधीन्यमात्रात् एव प्र[illegible]न्धिका तत्रच प्रति[illegible] रणविनाशा द्रजत विनाशस्यत्वया प्यु- क्तारा[illegible] [illegible]त्यप्ययुक्तम्-आत्मन एव सद्रजतमिति [illegible] भवात् । नन्वात्मनोऽधिष्ठानतयोपादानत्वे [illegible] त्वश्रुतिविरोधादितिचेत् रूपान्तरापत्तिः [illegible] यापि कल्पितरूपान्तरमविरुद्धमेव । समा नसत्ताकरूपान्तरापत्तिः परिणामइतिचेन्न, एतादृशपरिणाम्यपेक्षा नि

धर्मेनानाभावात, अज्ञानस्यापि तदसंभवाच्च । नह्यज्ञानं प्रातीतिकं, तथा त्वे प्रपंचोपादानभिन्नप्रातिभासिकाज्ञानस्य प्रतिभाया असिद्धया असिद्धेः। यदि च अधिष्ठानसत्तैव सर्वत्रसत्तेतिकल्प्यते नसत्ताभेदइतिमतं, तदासमा नसत्ताकोपादानकल्पने मानाभावादिति प्रागेवोक्तोदोषः । शुक्तीदमंशस्य चोपादानत्वमस्तु तस्यकार्यसमानसत्ताकत्वात्, इदं रजतमिति मृदइवकार्या नुवृत्तेश्च। नच सर्वकार्याननुवृत्तिर्दोषः, अधिष्ठानावच्छेदकतयानुगति सम्भ वात् । किंच नहि सर्वकार्यानुगतत्वमुपादनत्वे प्रयोजकं, निमित्तवदननुग तस्य उपादानत्वसम्भवात ; तथासति मृदादीनां अनुपादानत्व प्रसंगाच्च। अतएवानुगतसंभवे तदेवग्राह्यमितिनिरस्तं, मृदादीनामनुपादानत्वप्रसंगा-त्। तत्राप्यविद्याया अनुगतत्वात् कार्यानुवृत्तिस्तुल्या । मृदादीनामनुपा दानत्वेच " यथासोम्यैकेन मृत्पिण्डेन सर्वमृण्मयं विज्ञातंस्यादि"ति श्रु तिवैयर्थ्यं । किंच ज्ञानसामग्र्या अर्थोत्पादकत्वे चक्षुषारजतं पश्यामी त्यनुभवविरोधः । नन्विदमाकारचक्षुर्जन्य वृत्यभिव्यक्तसाक्षि भास्यत्वाद्रजतस्य तथा नुभवइतिचेत् । तर्हि चक्षुषानीलं नभः पश्यामीत्यनुभवोनस्यात , तत्राधिष्ठानाकाशगोचर चाक्षुषवृत्तेरभावा त् । यदुक्तं सर्वगताकाशे प्रसृतप्रकाशाकारान्तः करणवृत्त्यभि- व्यक्तसाक्ष्यवभास्य माकाशं प्रकाशाश्रयचैतन्यस्यैवा काशावच्छि- न्नत्वादिति । तन्न,, तद्देशस्थवायोरपि ग्रहप्रसंगात् ।

नच-गुरुत्वादिवदयोग्यत्वा तदप्रकाशः , [illegible] ग्यत्वात् । अतएवहितदाकारापरोक्षवृत्[illegible] शः कारणं नावृतत्वा द्रजते, तदा[illegible] वृतत्वात सोपि नप्रकाशेत । यदि[illegible] त्यादिभानेऽपि तत्प्रकाशप्रसंगः । [illegible] नदोषादिकं रजते हेतुः । यदुक्[illegible] त्वाद्रजतत्वं नअन्यतावच्छेदकमिति । त[illegible] भयजनकत्वस्या सत्यात्सत्यसिद्धिं वर्णय[illegible] ध्वंसप्रतिहेतुत्वाच्च, रंगरजते नकट[illegible]पत्वे रजतेन द[illegible]मुत्पद्य

तद्दतिप्रतीतेः । किंच स्वोचितत्वं यदितद्व्यक्तियोग्यत्वं तर्हि तदप्युक्तमेव । यद्यारोप्यजात्यवच्छिन्नकारणकत्वं तदामिथ्यारजतवृत्तेरतिप्रसक्तस्य रजतत्वस्य कटकजनकतावच्छेदकत्वात असम्भवएव । किंचशुक्तौ रजताभावोनकल्पितः समानस्वभावयोः प्रतियोग्यभावयोरेकत्राभावात् । नापि पारमार्थिकः, सत्सम्बन्धिकपदार्थस्य प्रतियोगिसमानस्वभावत्वनियमात । प्रतियोगिनश्च सद्विलक्षणत्वात् ।

अत्राह नवीनः -- प्रतियोगितावच्छेदकसमानस्वभावएवाभावः, प्रतियोगिसमानस्वभावत्वे श्रुतिप्रमितप्रपंचाभावस्य वास्तवत्वानुपपत्तेः । श्रुतेश्च तत्वावेदकत्वमौत्सर्गिकं । अत्रच सत्त्वमेव प्रतियोगितावच्छेदकं । नच - तस्यप्रतियोगिताव्यधिकरणत्वादवच्छेदकत्वासम्भवः , व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्याभ्युपगन्तव्यत्वात् । अन्यथागविशशशृंगंनास्तीति बुध्यनुपपत्तेः ।

नच - प्रतियोगितावच्छेदकविशिष्टप्रतियोगिप्रमाया अभावादभावधीसामग्रीविरहः, प्रतियोगिप्रतियोगितावच्छेदकयोर्ज्ञानस्यैव अभावधीहेतुत्वात । अस्तुवा प्रतियोगितावच्छेदकवैशिष्ट्यज्ञानमेवा भावधीहेतुः , प्रमात्वपर्यन्तस्य गुरुत्वात् , तच्च प्रकृते प्याहार्यं सम्भवति । तादृशाभावानभ्युपगमे यस्यकदापि रजतं नास्त्येव तस्यानाप्तवाक्यान्मदीयं रजतमितिज्ञाने आप्तवाक्यान्मदीयं रजतमतेः प्रत्यक्षत्वा[illegible]भवतीति ज्ञानंप्रमानस्यात ।

चेन्न, प्रत्यक्षान्येन जानीथ [illegible] निषेधः ; तस्य तत्रसत्वात , प्रतियो [illegible] तज्ज्ञानोत्पत्ते स्तादृशान्तु [illegible] एव नरजतत्वस्य निषेधः , मदीयत्वा[illegible]येव प्रतिबन्धिका तत्रच प्रति [illegible] मित्थमुक्तमिति जिज्ञासाभावप्रसंगाच्च । [illegible]वतारा [illegible] जन [illegible] नुस्तत्रतस्यैवा वश्यकत्वात । ननु - [illegible] नस्वाधिकरणे प्रतियोगिसत्त्वविरो- [illegible] स्य स्वाधिकरणे प्रतियोगिसत्त्वविरोधि [illegible] तावच्छेदकस्य प्रतियोगिसम्बन्धोऽपेक्षितः , त्वो[illegible] नतद्धर्मत्वमपि, अन्यथा घटत्वघटरूपादिनिषेधायोगात । अस्तिच

रजते अधिष्ठानसत्तावैशिष्ट्यं प्रतियोगिसमानस्वभावं, अतः प्रतियोगितावच्छेदकसमानस्वभावो रजताभावः परमार्थइति ॥

तदनुपपन्नं, लाघवेनाभावस्य प्रतियोगिसमानस्वभावत्वात् । नच श्रुतिप्रमितप्रपंचाभा वपारमार्थ्याय गुरुभूतमपि प्रतियोगितावच्छेदकसमानस्वभावत्वं कल्प्यमितिवाच्यम् ; एवं श्रौतप्रपंचमिथ्यात्वोपजीवनेन दृष्टान्तसमर्थनस्य व्यर्थत्वात् सिद्धसाधनात् । किंच श्रुतेस्तत्त्वावेदकत्वमौत्सर्गिकमित्येतदपिचिन्त्यं, तद्धतितत्प्रकारकत्वस्यैव बाह्यागमेषु बाधापोद्यस्य कर्मकाण्डसाधारणस्यौ त्सर्गिकत्वात् । किंचौ त्सर्गिकंहि बाधकापोद्यं, अतः क्लृप्तप्रतियोगिसमानसत्ताकस्वभावत्वानुपपत्याप्रपंचाभावश्रुतेस्तत्त्वावेदकत्वमेव त्यक्तुमुचितं । निरूपकसमसत्ताकस्वभावत्वमभावस्य, तथाच नगौरवं, निरूपकंच प्रतियोगितावच्छेदकमपीतिचेत्तथापि सप्रतियोगिकत्वस्वभावस्या भावस्य प्रतियोग्यसिद्धौस्वभावासिद्ध्या स्वरूपहाने र्दुर्वारत्वात् । किंच यत्किंचिन्निरूपक समसत्ताकत्व मधिकरणमादायैव सिद्धम् । सद्भ्यामभावो निरूप्यतइत्युक्तं । यावन्निरूपक समसत्ताकत्वंतु प्रतियोगिनोमिथ्यात्वान्नैव सम्भवतीति सर्वथा व्यधिकरणधर्मावच्छिन्न प्रतियोगिताकाभावानुसरण मनर्थकं । किंच प्रपंचस्येव प्रपंचाभावस्यापि ब्रह्मस्वरूपसत्तावच्छिन्न प्रतियोगिकाभावस्य ब्रह्मणिसत्वात्प्रपंचाभावस्य मिथ्यात्वमनिवार्यं । नन्वबाध्यत्वावच्छिन्न प्रति[illegible] योगित्वमेव मिथ्यात्वम् ; तच्च प्रपंचा[illegible] ध्यत्वादिति चेन्न; बाध्यत्वस्याबाध्यत्व[illegible] पारमार्थिकाभावांगीकारे सम्बन्धिखण्[illegible] सम्बन्धो मिथ्या , अद्वैतश्रुते रतत्वा[illegible] चानुपपन्नं, ब्रह्मप्रपंचाभावयोरिव तदुपप[illegible] रोक्षत्वं, अध्यस्तत्वेनापरोक्षतादात्म्याभा[illegible] न्दृश्यसम्बन्धखण्डन मनुपपन्नं । ननु प्रपं[illegible] इष्ट एव; नच - शुक्तिरजतनिषेधस्य प्रत्यक्षत्वाभावप्रसङ्गः, शुक्तिरजता-

भावस्य व्यावहारिकसत्त्वावच्छिन्न प्रतियोगिताकत्वात् ; व्यावहारिकत्वेनाध्यस्ततया ब्रह्मरूपापरोक्ष तादात्म्यमुपपद्यतइति चेन्न - तथासति ब्रह्मणस्सर्वज्ञत्व भंगप्रसंगात् । किञ्चात्र रजतमस्तीति भ्रमः किं व्यावहारिकसत्त्वविषयः उतप्रातिभासिक सत्त्वविषयः । आद्यत्वन्यथाख्यातिप्रसंगः । द्वितीये रजतनिषेधोपि प्रातिभासिकसत्त्वावच्छिन्नप्रतियोगिताका भावविषयएवेति कथं व्यधिकरणधर्मावच्छिन्नाभाव - विषयता । भ्रमाविषयधर्मावच्छिन्न प्रतियोगिताकाभाव विषयस्यापि - निषेधस्य बाधत्वे घटत्वावच्छिन्न रजतं नास्तीति बुद्धिरपि बाधः स्यात् । नन्वभावस्य प्रत्यक्षत्वाभाव इष्टएव, तस्यानुपलब्धिगम्यत्वात्, अतो ब्रह्मरूपसत्त्वमेव भ्रमगृहीतं तदवच्छिन्न रजताभावएव - निषेध विषय इति न भ्रमनिषेधयो भिन्नविषयत्वमिति चेन्न,- अभाव प्रतीतौ साक्षात्त्व बुद्धि विरोधात् । आपरोक्ष्ये सत्येव कारणांतरनात्रमनुपलब्धि स्स्यात् । परोक्षत्वे ऽ पि ब्रह्मप्रतिपारोक्ष्या सिद्धेः ब्रह्मणोसर्वज्ञत्व प्रसङ्गःस्थितएव । किञ्च रजतं नास्तीति प्रतीतेरजतत्वमपि प्रतियोगितावच्छेदकंवाच्यम्, ततश्च तस्यापि निरूपकत्वात् तत्समसत्त्वमप्यभावस्य प्रसज्यते । नचरजतत्वं प्रतियोगितावच्छेदकमेवनेतिवाच्यम् ; उपलब्धि विरोधात्, प्रत्युतसत्त्वस्यैवप्रतियोगितावच्छेदकत्व मुपलम्भविरोधादनुपपन्नं । नहि सद्रजतं नेति प्रतीयते किन्तु रजतं नास्तीति, तथाच यथा रजतमुत्कण्ठा मुत्पादयती तेः प्रत्यक्षत्वे [illegible] कारणतावच्छेदकं प्रतीयते तथा रजतं-
वेन्न, प्रत्यक्षान्येन जानीये[illegible] [illegible]तियोगितावच्छेदकं प्रतीयते । अतएवनेत्ये तज्ज्ञानोत्पत्ते स्तादृशानु[illegible] [illegible]ः । अतोनास्तीत्यंशो निषेधमात्रैव प्रतिबन्धिका तत्रच प्रति[illegible] [illegible]तावच्छेदकविषयः । अपिचेदं रजतमिति तारा[illegible] । [illegible] जन[illegible] [illegible] बाधिका, तत्रचेदमर्थे रजतत्व तदव-
[illegible] [illegible]प नभासते, अतोप्रतीतं सत्त्वं कथम [illegible] [illegible]मिति प्रतीते स्तत्र रजतत्वं विद्यते त- [illegible] विद्यतइति कथं सत्त्वं व्यधिकरणं । ब्र- ह्मगतसत्त्वभानाद्वैयधिकरण्ये अन्यथाख्यातिः । ननुसदभेदेन रजतं प्रती-

यते ननु सत्त्व प्रतीतिरस्ति तेननान्यथाख्यातिः, सद्भेदप्रतीतिं प्रत्य-
पि निषेधधियो विरोधित्वात बाधकत्वंच युज्यतइतिचेन्न;- सद्भेद-
स्य सद्भेदाभावरूपस्य सत्त्वात्मकत्वात् । व्यधिकरणधर्मावच्छिन्नाभाव-
श्चासिद्धः । यदुक्तं मदीयमिदं रजतं नभवतीति आप्तवाक्यजन्यज्ञाने
मदीयत्वावच्छिन्न रजताभावो विषयइति । तन्न, अन्यदीयरजतघतिविद्य
मानेपीह मदीय रजतवन्नास्तीति बुद्धेर्व्यधिकरणधर्मावच्छिन्नावच्छे
दकताकस्याप्यभावस्य सिद्ध्यापत्तेः । एवमेवोत्तरोत्तर व्यधिकरण
धर्मानादाय निषेधेऽनन्ताभाव वैजात्यकल्पनाप्रसंगः । तथाच प्रतियोगिता
वच्छेदकावच्छिन्न विरोधोऽपि भज्येत । यच्चाधिष्ठानात्मक सद्वैशिष्ट्यस्य
प्रतियोगिनिसत्त्वात् सत्त्वावच्छिन्न रजताभावः संसृष्टावच्छिन्न प्रतियोगि
कएवेति प्रतियोगितावच्छेदकसत्त्व समानस्वभावोभावः परमार्थइत्युक्तं ।
तदपि न, यथा प्रपंचाभाव पारमार्थिकत्वा नुपपत्ते र्लाघवा
त्कलृप्तमपि प्रतियोगिसमानस्वभावत्वं त्यज्यते तथा गुरोरव्यावर्तक
स्य प्रमेयघटत्व वदवच्छेदकत्वा योगेन सदभिन्न रजतत्वस्यावच्छे
दकत्वानुपपत्तेः प्रतियोगितावच्छेदक समानस्वभावत्वस्यापि कल्प
यितुमशक्यत्वात् । तत्कल्पनेऽपि क्लृप्तप्रतियोगि समानस्वभावत्व-
स्यात्यागे इष्टासिद्धेः । तत्त्यागेतु प्रतियोगितावच्छेदक समानस्वभाव
त्वाकल्पने पीष्टसिद्धेः । यच्चेदं मतं-शुक्तिरजताभावो रजतत्वावच्छिन्न
प्रतियोगिताकएव, सचपरमार्थः, अतः प्रतियोगिसमानसत्तानेति न-
तेन विरोधः; नच घटे सोऽप्यभावो [illegible]
च्यम्, रजतसादृश्यतद्भावात्मक वि[illegible]
वयो र्भेदात्; एवंच घटाभावः प्र[illegible]
कल्पितत्वे सप्रतियोगिकत्व स्वभाव[illegible]
त्रेण तदुपपत्तेः; प्रतियोगिकल्पितत्व[illegible]
ति । तन्न, प्रतियोगिनोऽभावा द्भिन्नस[illegible]
रूपयोः प्रयोजकत्ववत् विरोधेपि प्रयोज[illegible]
था सिद्धप्रतीतिबाधाभ्यां भिन्नसत्ताकत्व[illegible] कल्प-
नीयमितिचेन्न, अन्यथासिद्धे रुक्तत्वात् । विरुद्धधर्माध्यासादभाव

भेदइत्यपि तुच्छं, घटस्यापि पटत्वादेश्य तदभावाभ्यां भेदप्रसंगात् । अधिकरणभेदेन विरोधपरिहारश्चोभयत्र तुल्यः । घटादौ शुक्तिरजता-भावस्य प्रातिभासिकत्व मित्यप्ययुक्तं, अबाधा त्सत्यत्व सम्भवा-त् । नच समसत्ताकस्यैव विरोधित्वात्तदभावात्प्रतियोगिसत्व प्रसंगः , तवाप्यभाव प्रतीति दशायां घटे रजतसत्व प्रसंगात् । ननु कारणाभावादेव न तत्र रजतं तदभावोवा प्रातिभासिक इतिचे त्,- तर्ह्युभयसत्वप्रसंगः, परस्पराभावात्मकत्वात् उभयशून्यत्वा-भ्युपगमे रजताभावाभ्युपगमाच्च । यदपी दम्मतान्तरं- रजताभावो-नाधिष्ठाना द्भिद्यते अधिकरणभिन्नसत्ताक प्रतियोगिकाभावस्यैवा-धिकरणाद्भेदात् । नच लाघवादधिकरणभिन्नप्रतियोगिकत्वमेव तत्प्रयोजक मितिवाच्यम्, तत्वावेदका द्वैतश्रुतिविरोधात् । नचभावाद्वैतपरासा, संकोचकाभावात्; ब्रह्मणोऽनन्तत्वानुपपत्तेश्च । सत्याभावस्यचिद्विषयत्वे दृश्यत्वस्य व्यभिचारः, नचेद्ब्रह्मा सर्वज्ञं स्यात । अभावश्च न सिद्ध्येत । प्रतियोगिसमानस्वभावत्वा योगाच्च न विरहात्माभावः सत्यस्सम्भवति । प्रतियोगितावच्छेदकं सत्वं तत्समानस्वभावो भावइतिच गौरवं, रजतमिह नास्तीति स्वरूपतो निषेधविरुद्धंच । अतो रजतमिदमि ति सत्तैक्यानुभवात् अधिकरणैकसत्ताकस्य रजतस्याभावोधिकर-णात्मैव । घटादौ तूक्तभेद प्रयोजकसत्वात् प्रतियोगिसमानस्वभावोन्य-एव रजताभावः । नचाभावद्वै विध्यानुपपत्तिः, यथा घटात् घटभे तेः प्रत्यक्षत्वा[illegible]भावः तथात्रापि सम्भवात् । एवं ध्वंसोपि-त्वेन, प्रत्यक्षान्येन जानीये[illegible]मा, अन्यत्रतु तदर्थयत्नदर्शनेनाधिकर-तज्ज्ञानोत्पत्ते स्ताहशानु[illegible]कालीनत्वा सम्भवः, अधिष्ठानेतत्काली व प्र[illegible]निबन्धिका तत्रच प्रति[illegible]ध्वंसएव तथा नियमात् । प्रपंचान्योन्या तारा[illegible] । [illegible] जन[illegible]कर्यदोषः, क्वचित्तस्यप्रामाणिकत्वात् । [illegible]वात्यन्ताभावात्यन्ताभावत्वस्य परैरप्य-[illegible]निष्ठतया प्रमितो रजताभावो नाधिष्ठानात्म क[illegible]द्ध्येदिति । घटाभावे घटो नास्तीति बुद्धिवद्वै शिष्ट्यांशे भ्रमत्वेप्यभावस्वरूपे अभ्रमत्वात् । वस्तुतो भूतलादावपि घटाद्य

भावश्चैतन्यमेव, भेदेमानाभावात् । अन्यथा भूतले घटसत्वानुपपत्तेः तत्कालेपि तत्र तदभावस्यावश्यकत्वात् । अस्तिहि घटानयनात्पूर्वं भूतले तदभावः, सघटकालेपि तत्र वाच्यः, नित्यत्वाक्रियत्वाभ्यां गतिनाशयो रयोगात् । नच सम्बन्धस्तयो स्तदा नेति वाच्यं, पूर्वोत्तरकालयोरपि तदभावापातात् । जननविलयशील सम्बन्धस्याभावे ऽसम्भवात् । स्वरूपद्वयस्य सर्वदासत्वात् । एतेन समयविशेषमपेक्ष्य स्वरूपद्वयं सम्बन्धइति निरस्तं, स्वरूपयोः तत्समयाजन्यत्वा त्तदनपेक्षत्वात् । नच प्रतियोगिदेशान्यदेशत्वं सम्बन्धइति वाच्यम्, तस्याप्यभावात्मकतया कदाचित्सत्वे सर्वदा तत्र सत्वात् । घटदेशस्य तद्भेदायोगाच्च । अतएव भूतलाभावयोर्विशिष्टप्रतीति जननयोग्यत्वंसम्बन्ध इत्यपास्तम्, घटकालेपि यावद्वस्तुभाविन्यायोग्यताया स्सत्वात् । दुर्निरूपश्चाभावत्वं, विरहैकस्वभावत्वे चात्यन्ताभावःप्रागभावचत्प्रतियोगिकालीनो न स्यात्, अनित्यश्च स्यात्, जन्याभावप्रतियोगित्वस्य तत्पदार्थत्वात, स्वजन्यत्वघटितत्वे गौरवात्, नियता नन्यथासिद्धतया ऽत्यन्ताभावस्यापि जनकत्वसम्भवाच्च ।

ननु-ब्रह्मणोप्यत्यन्ताभावत्वे प्रतियोगिनोघटादेरपि तदभावत्वाजन्यत्वाच्चा नित्यतास्यादितिचे दारोपितस्य जन्याभावप्रतियोगित्वस्य नित्यमात्रे सुलभतया धर्मिसमसत्ताकस्यैवतस्या नित्यत्वात्मकत्वात् । तस्माद्विरहैकस्वभावशून्यंचैतन्यमेवा[illegible]
तिबुद्धे रेक ब्रह्मविषयत्वे लाघवाच्चनान[illegible]
त्वाविरोधिनो भावत्वस्य पारिभाषिक[illegible]
त्रैकालिकनिषेध स्तत्प्रतिबन्धके सत्य[illegible]
पि तस्योभयसमाधेयत्वात नदोषः । श्रु[illegible]
तःस्वप्रकाशमानन्दं शून्यमभवत्" "[illegible]
पंचाभावात्मत्वन्दर्शयति । तथाच [illegible]
भावप्रतियोगित्वं मिथ्यात्वं भवति । [illegible] सिद्धो
त्तिमतःस्वानधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वा[illegible] इत्यर्थः ।

मित्थ्याशब्दार्थत्वात् । अत्यन्ताभावप्रतियोगित्वमात्रं सत्यमतेप्यस्तीति द्वितीयानधिकरणविशेषणं । परमतेपि भवत्यन्ताभावेसिद्धसाधनतातः स्वानधिकरणपदं । नच स्वानधिकरणं स्वाभावः तदधिकरणकाभावश्च सएवेति तत्प्रतियोगित्वात् घटादे स्सिद्धसाधनमिति वाच्यम् , स्वानधिकरणाधिकरणकत्वाभावस्य विवक्षितत्वात् , घटाभावस्यच पटवृत्तित्वात् । स्वानधिकरणावृत्तित्वं वामित्थ्यात्वमस्मिन्मते ग्राह्यं । स्वाभावृत्तित्वं परमते घटाद्यभावेसिद्धमित्यवृत्तिविशेषणं । परमते गगनाद्यभावे सिद्धसाधनमित्यतः स्वानाधिकरणेति । पृथिवीत्व घटान्यत्वादिव्याप्तस्यर्थं द्वितीयस्वपदं । तदधिकरणपटाधिकरणस्य घटान्यत्वपृथिवित्वानियमादिति सिद्धान्तरहस्यंमिति ॥

तत्तथैव सदस्युक्तौ सद्भिरुपलम्भात् । तथाहि- नेह नानास्तीत्यभावाधिकरणतया ब्रह्मणः प्रतीते नांधिष्ठाननभावः । नचा द्वितीयश्रुतेः संकोचो दोषः, एतच्छ्रुत्यनुरोधा त्तस्य न्याय्यत्वात् । सप्तम्यर्थबाधादपिहि संकोचमात्रंन्याय्यं । वस्तुतस्तु नसंकोचः , नद्वितीयं यस्मिन्निति सप्तमीबहुव्रीह्याश्रयणे ब्रह्मणि द्वितीयं नास्तीति निषेधे एकत्वाविरोधात् प्रत्युततदाक्षेपात् । षष्ठीबहुव्रीहित्वेपि द्वितीयावधिप्रतियोगिविशेषे पेक्षिते एकमेवेति ननानाइतिच विहितस्याभावस्यैव प्रतियोगित्वेनान्वयात् । नचानन्त्यश्रुतिविरोधः, देतः प्रत्यक्ष[illegible]मात्रपरत्वात् । यच्च विरहैकस्वभावो भावः प्रति[illegible]त्वेन, प्रत्यक्षान्येन जानीथ[illegible]धिष्ठानमेवाभावइति । तन्न, ब्रह्मणोप्ये[illegible] तज्ज्ञानोत्पत्ते स्ताहशानुभ[illegible] विरहस्वभावोन्यस्वभावश्च तस्य क[illegible]व प्रतिनिन्धिका तत्रच प्रति[illegible]वरूपलाभः । नहि स्वभावान्तरमात्रे[illegible]तारा[illegible] । [illegible] जन[illegible]तस्य द्रव्यत्वादिस्वभावसत्वा द्वन्ध्यास्तु [illegible] त्प्रतियोगिनो विद्यमानता मा[illegible] [illegible] सत्यत्वंवा स्यात । प्रतियो[illegible] [illegible]चविरहत्वाभावोवा स्यात् । ब्रह्मणोपि क[illegible]स्वभावमेव ब्रह्मस्यात् ; निर्धर्मकत्वेन स्वभावा[illegible] शिष्टयांश[illegible]

तराभावात् स्वरूपाद्भेदाभावाच्च । किंच घटवति भूतले प्रातिभासिकघटाभावस्य विरहस्व भावत्वेपि न प्रतियोगिसमानस्वभावत्वम् । नच सत्ताभेदो नास्तीति वाच्यम्, सामानाधिकरण्यविरोधात् । एतेन प्रतियोगिस्वरूपाधीन स्वरूपसत्ताको भावः प्रतियोगिसमानस्वभावइति निरस्तम्, प्रतियोगिस्वरूपमात्रस्याभाव स्वरूप लाभप्रयोजकत्व सम्भवे अभावसमानस्वभाव प्रतियोगिस्वरूपस्य गुरुत्वेनाप्रयोजकत्वात । तस्माद्रजतावच्छिन्नाभावः पारमार्थिकएवाधिकरणात् भिन्नोंगीक्रियतां । एवं सति लाघवमधिष्ठान तदितरयोरेकत्वादभावस्य । इह रजतन्नास्तीति अधिष्ठाने प्रतीतिसत्वे तदनुग्रहश्च । तदभावेतु नाधिष्ठानस्वरूपस्यात्यन्ताभावस्य सिद्धिः ।

यच्चोक्तम् अधिकरणभिन्नसत्ताकप्रतियोगिकाभावोधिकरणाद्भिद्यते, अन्यस्त्वधिकरणात्मेति । - तन्न, भूतले रजतन्नास्तीति बाधावतारकालीन ज्ञानविषयस्याभावस्य भूतलभिन्नसत्ताक रजतप्रतियोगिकतया भूतलाद्भिन्नस्य विरहैकस्वभावतया प्रतियोगिसमान स्वभावस्य प्रातिभासिकत्वापत्याभूतले तद्रजततदभावबुद्ध्योः भ्रमत्वप्रमात्वविभागाभावप्रसंगात । शंखेश्वैत्याभावभ्रमे तस्या भावस्य शंखात्मत्वप्रसंगात्, गुणगुणिनोरभिन्नसत्वात । किंच

टादीनां ब्रह्मणि कल्पितत्वया तदभावोत्र

टादेरधिष्ठानब्रह्मसत्ताकत्वाभावात् ।

घटे घटाभावो नास्तीतिहि त्वदीयप्रल

भावोधिकरणा द्भिद्येत, घटाभावभिन्न

गौरवादेव न ध्वंसद्वैविध्यमपि । प्रति

ष्ठानं ध्वंसः । प्रपंचनिवृत्तेर्यत्नसाध्यत्व

देवनाधिष्ठानमन्योन्याभावः । सर्वत्राभा

। सिद्धौ

टेविद्यमानेतद्भावबुद्धेरभ्रमत्व प्रसंगात् । द्धेरिति व्याघातइत्यर्थः ।

यद्न्कथंऽनुमानीभवेत् , घटकालेपि तत्र घटाभावस्या वश्यकत्वा त्तस्य ब्रह्मातिरिक्तत्वे समानसत्ताकत्वेन घटासिद्धिप्रसंगात् । ब्रह्मस्वरूपमेवां भावइत्यनुपपन्नम् , घटदशायां तद्देशेघटाभावस्त्वे मानाभावात् , विपरीतमानसद्भावाच्च । न प्राक्तत्र स्थितस्य पश्चादप्यावश्यकता , अभावांतरपक्षे काळविशेषरूपाभावसम्बन्धाभावस्य-भावान्तरपक्षे काळविशेषसम्बन्ध रूपाभावस्य वक्तुं शक्यत्वात ।

नच-विरहैकस्वभावत्वे प्रागभाववत्प्रतियोगिकालीनत्वानुपपत्तिः, विरह-स्वभावत्वेपि तुल्यत्वात् । तद्विरहत्वमेव हिलाववात्तत्र प्रयोजकं । प्रमाणबलात्तत्परित्यागे ततएव विरहैकस्वभावत्वमपि नप्रयोजकम् । अत्र घटस्तत्रनेत्यबाधितप्रतीतेः । नापि विरहैकस्वभावत्वे प्रागभाववदनित्यत्व प्रसंगः , सर्वकाळसत्वरूपनित्यत्वस्य बाधाभावात् । पारिभाषिकानित्यत्वे प्यविरोधात् । स्वजन्याभावप्रतियोगित्वस्यैवा नित्यत्वरूपत्वाच्च । लोकानुसाराच्च गौरवं नदोषाय; प्रामाणिकत्वात् । अन्यथासिद्धत्वाच्च गन्धं प्रतिरूपप्रागभाववन्नात्यंताभावः प्रतियोगिजनकः । प्रपंचोपशमश्शिव इत्यत्र उपशमशब्दस्य लोक व्युत्पत्यनुसारे परत्वमेव, प्रतियोग्यसमानकालीन प्रतियोग्युत्तरकालीनाभावे व्युत्पत्ते र्ब्रह्मणितदभावात् । तदननुसारेचा भावत्वमेव
तः प्रत्यक्ष [illegible]
त्र, प्रत्यक्षान्येन जानीय [illegible]
तज्ज्ञानोत्पत्ते स्तादृशानु [illegible] करणात्यन्ताभाव प्रतियोगित्वम्मिथ्या-
व प्र[illegible]नन्धिका तत्रच प्रति [illegible] भावस्य स्वाधिकरणस्वावृत्त्याकाशरूपा
तारा[illegible] । [illegible] जन [illegible] र्गाकारात्तदविरोधित्वादर्थांतरं । ब्रह्मणि
[illegible] पयत्वात् , ब्रह्मणःस्वानधिकरणभूतस्वा
[illegible] कथं [illegible] प्रतियोगित्वादतिव्याप्तिः । संयोगसंब
क [illegible] त्वे चातिव्याप्तिः । अवृत्त्यभावमादायार्थांत-
शिष्टयांश [illegible]

स्त्वात्यन्ताभावाश्रयनिष्ठतया प्रतीयमानत्वरूपेण मिथ्यात्वं, तत्तन्निष्ठात्यन्ताभावप्रतियोगित्वमेव तस्यासत्त्वमिति यथालोकमभ्युपगमात् । किंच य एष विश्वं विचारासहमलीकमनिर्वचनीयं चेत्यादिरूपं व्याहतप्रतिज्ञानमाद्रियते , सकिं स्वपक्षं किंचित् स्थापयति नवा, स्थापनेपि प्रमाणतोऽप्रमाणतोऽपिवा । नेतिपक्षे परपक्षं दूषयतोऽयमेव

रंच । ननुब्रह्मव्यतिरिक्तोभावो वृत्तिमानेवेति नतमादायार्थान्तरं, ब्रह्मरूपाभाव प्रतियोगित्वसिद्धौ चेष्टसिद्धिरेवेति चेन्न ; ब्रह्मातिरिक्ताभावस्य वृत्तित्वनियमः कुतः । नचसंसर्गाभावत्वस्य वृत्तिमत्त्वव्याप्ति बलात्तन्नियमः, ब्रह्मणोप्येवमत्यन्ताभावत्वासिद्धेः । ननुब्रह्माधिकरणकतयैवब्रह्मातिरिक्तस्य कृत्स्नस्यश्रुत्यावगमात्ब्रह्मातिरिक्तावृत्त्यभावासिद्धिः बाधादेव न सम्भवतीति चेत्तर्ह्यनुमानमेव बाधितं स्यात् । ब्रह्मरूपाभावप्रतियोगित्वसिद्धौ नबाध इतिचेत्तर्हि बलप्रदार्थान्तरता, तत्सिद्धावपि सत्यत्वाविरोधात् । अप्रतियोगिनो भावरूपस्य ब्रह्मणः प्रपंचाध्यासाधिष्ठानत्वेनैवाभावत्वसिद्धिर्नान्यथेतिचेन्न;- अधिष्ठानताया- अभावत्वानुपपादकत्वात् । शुक्तौ रजताभावत्वं दृष्टमिति चेत् , काऽसौदृष्टिः । बाधदशायां नेह रजतमितिप्रतीतिरिति चेन्न , अस्या... शायां नेह रजतमितिप्रतीतेर्विशेषाभावा... त्ति स्वाभाववृत्तित्वम्मिथ्यात्वमिति ... न्तरेणैव निरस्तम् । अवृत्तिस्वभावस्य ... सत्यत्वाविरोधात् । किञ्च परैर्व्या... कपालाद्यवृत्ति स्वाभाववृत्तिगगनात्म... त्यत्वाविरोधादर्थान्तरमिति ।

(व्याहतप्रतिज्ञानमिति) साध्यस्य ... सिद्धौ पक्षहेत्वादीना मसिद्धिः, तेषां सिद्धौ साध्यासिद्धिरिति व्याघातइत्यर्थः ।

त्रिकल्पः । तत्र प्रमाणतइतिपक्षे तत्प्रमाणं तथात्वेन विचारसहं नवा । पूर्वत्र कथं विश्वमिथ्यात्वं । तस्यापि तदन्तर्भावात् उत्तरत्र कथं तत्प्रमाणं । प्रमाणताभ्रमेणेति चेत्तथापि किंतेन, अन्यथा हेत्वाभासाना मप्रतिक्षेपे सर्वसमयसाम्राज्यप्रसंगात् । लोकव्यवहारसिद्धमिति चेन्न ;

यदाह नवीनः , अविद्यातिरिक्त दोषाजन्यत्वं पक्षत्वादेः साधकत्वे प्रयोजकं , तेन कल्पितैरपि हेत्वादिभिर्मिथ्यात्वादि सिद्धिरिति । तन्न, शुक्तिरजतस्य दृष्टान्तत्वेन त्वयोक्तत्वात् , शुक्तिरजतं पक्षीकृत्य त्वया सोपादानत्वानुमानात्, तदेव-पक्षीकृत्य सत्त्वेन्नबाध्येते त्याद्यर्थापत्ति प्रवर्तनात् , तदेव पक्षीकृत्य -मिथ्यात्वसाधक व्यतिरेक्यनुमानाभिधानात , प्रतिबिम्बेन बिम्बानुमानस्य स्वाप्नार्थे शुभाशुभानुमानस्यच त्वत्कूटस्थैरभिधानात , गगनंदिगादिव्यावृत्तं रूपित्वादित्यनुमानसम्भवस्य त्वयाभिधानात् । यद्वा विचारासहत्वप्रतिज्ञयालीकत्वप्रतिज्ञानं व्याहतम् , विचार्यैवालीकत्व निर्णयात् । अलीकत्वेन निर्वचनादेव तदनिर्वचनीयत्व प्रतिज्ञया व्याहन्यते । तथा प्रथमेन मतमपि व्याहतम् , विचार-
तः प्रत्यक्षत्व [illegible] नात् । एवं व्याहतप्रतिज्ञादरोत्त्या स्वपक्ष
न्न, प्रत्यक्षान्येन जानीये [illegible] स्वपक्षस्थापनकोटे रप्रमाणेन परपक्ष
तज्ज्ञानोत्पत्ते स्तादृशानुभ [illegible] दूषणमयुक्तमिति शंका:निराक्रियते ।
व प्र[illegible]नन्धिका तत्रच प्रति [illegible] मसम्भावनेति भावः । तथात्वेन- प्रमा-
तारा [illegible] । [illegible] जन [illegible] ममात्रेणप्रमाणता अस्तुवा, तथापि न-
[illegible]) तादृशेनापि प्रयोजनसिद्धावित्यर्थः ।
[illegible] कथ [illegible] त्वेनाभिमतं प्रमाणत्वेन लोकव्यवहार
([illegible]
सिद्धं, ननु हेत्वाभासास्तथेत्यर्थः । (नेति) सपरिकरस्य प्रमाणस्य-

तस्य सपरिकरस्य परिग्रहे लोकस्थिरीकरणात । प्रमाणान्तराविरोधादे-श्च तत्परिकरत्वात्, अन्यथा लोकतोप्यसिद्धेः । त्रिचतुरकक्ष्या विमर्शात्र-स्थापितमिति चेन्न ; तथैवविश्वानुग्राहकप्रमाणाना मप्यवस्थापनात । त-त्तद्विमर्शबाधस्य विश्वद्वेषिण्यपि निवारकाभावात । तस्यतु प्रथमकक्ष्या यामेव स्फुटप्रतीतिव्याघातादिभि र्विलयइति विशेषइति । नचापच्छेद-निमित्तनैमित्तिकशास्त्रयोः प्रामाण्याविशेषइव अप्रामाण्याविशेषे ऽपि परत्वात्प्राबल्यं; नमित्थ्येत्यस्मदुक्ते स्ततोपि परत्वात् । अविश्रम स्तर्हीतिचे न्न;- स्वदोषस्य परत्रारोपात । परत्वमात्रेण प्राबल्यं ब्रुवत स्तवैवासौ दोषः । किंच यद्यप्रमाणं परं स्वविषयं नावस्थापयेत कथं प्र

परिग्रहे प्रमाणान्तराविरोधानुकूलतर्कादे स्तत्परिकरतया तादृशप्र माणेन प्रपंच सत्यत्वमेव सिद्ध्येत, प्रपंचमिथ्यात्वसाधक प्रमाणस्य प्रमाणान्तरविरोधादनुकूलतर्काभावाच्च तेन वि - श्वमिथ्यात्वं नसिद्ध्येदित्यर्थः (अन्यथेति) अपरिग्रहस्य परिग्रहे लोकतोपि नतस्य प्रामाण्यसिद्धिरित्यर्थः । यद्वा लोकव्यवहारासिद्धमित्यत्र लोकव्यवहारः किं सपरिकरः सा - धकपरिगृहीतो परिकरो वेति विकल्प[illegible] लोकव्यवहारस्येत्यर्थः (अन्यथेति [illegible] साधकत्वेन विवक्षितत्वे (अवस्थापि[illegible] श्वानुग्रहो विश्वसत्यत्वस्थापनम् । [illegible] श्यते , नतु मिथ्यात्वविचारस्येति [illegible] विश्वद्वेषिप्रमाणम् । उक्तदोषं परिहर[illegible] कल्पद्वयीं युगपदुत्थापयति(नचेति) अपच्छे[illegible] रित्यर्थः । परं स्वविषयं स्थापयति नवेति विकल्पमभिप्रेत्याह (किंचेति)

वलं, स्थापयतोवा कथमप्रामाण्यं । ननु प्रमाणत्वे कथं बाध्यत्वं तस्मिन् वा कथं तदित्यपच्छेदेपि प्रसज्यत इति चेन्न; अनियतविरोध पौर्वापर्यतया ऽन्यतरोदयसम्भावनयाच प्रयोगान्तरेषु प्रामाण्योपपत्तेः । किंच त्वदुक्तप्रमाणस्यापि दुष्टकारणप्रसूतत्वं त्वयैवाभ्युपगम्यतइति अदोषप्रसूततयापि न प्राबल्यदौर्बल्यविभागः । अन्यथा माध्यमिकयुक्तीनां सर्वसिद्धान्तजीवितापह्लादिनीनां सर्वतः परत्वेन प्राबल्यप्रसंगात्। तदेवं सिद्धं न कथंचिदपि विश्वमिथ्यात्वप्रतिज्ञानं शक्यमिति ।

दृश्यत्वंच किमभिप्रेतं; किंचाक्षुषत्वं, उतप्रत्यक्षज्ञानविषयत्वं, यद्वा ज्ञानविषयत्वमात्रं, उतदृग्व्यतिरिक्तत्वं, अथवान्यत्किंचिदिति । नाद्यः, भागासिद्धत्वात् । अतएव नद्वितीयः, व्यर्थविशेषणत्वाच्च । ब्रह्मव्यवच्छेदार्थं विशेषणं सार्थकमिति चेन्न; तस्य ज्ञानविषत्वानभ्युपगमात् । अभ्युपगमेवा योगिप्रत्यक्षादिविषयतया सन्मात्रग्राहिप्रत्यक्ष वर्णनाच्च हेतोस्तत्र वृत्तेः । नच तृतीयः, अनैकान्तिकत्वादेव । ज्ञानविषयत्वमात्रमपि

(अनियतेति) अनियतविरोधतयानियतपौर्वापर्यतया चेत्यर्थः । एकैकापच्छेदसम्भवा दनियतविरोधिता (अन्यतरोदयेत्यादि) युगपदपच्छेदे विकल्पेनानुष्ठेयत्वात तत्रान्यतरशास्त्रानुष्ठानसम्भवाद्...तेः प्रत्यक्षा[illegible] वदतापि दुष्टकारणजन्यत्वतदभावाभ्यां वैषम्य...त्र, प्रत्यक्षान्येन जानीये...[illegible]...भवतीत्याह (किंच त्वदुक्तेति) (अन्य... तज्ज्ञानोत्पत्ते स्तादृशानु[illegible]...थ्यात्वनिर्वचनासम्भवात् पक्षहेत्वादि...व प्रतिबन्धिका तत्रच प्रति[illegible]...नविश्वमिथ्यात्वप्रतिज्ञा शक्येत्युपसं...तारः । [illegible] जन[illegible]...त्वविशेषणं व्यर्थमित्यर्थः (ब्रह्मेति) [illegible]...त्यर्थः (अनैकान्तिकत्वादेवेति) [illegible] कथं [illegible]... दृश्यत्वं, तच्च ब्रह्मणि नास्त्येव, विषयत्वस्य भेदा[illegible]...नाभावाच्च । ब्रह्मजानामीत्यनुभवस्यावश्यकवृत्तिवि-

षयतयोपपत्तेः, व्यवहारस्यच स्वरूपात्मकप्रकाशादुपपत्तेः,अविद्यानिवृत्तेरपि स्वप्रकाशमात्रादुपपत्तेः, अविद्यासमानविषयप्रकाशाभावेपि समानविषयापरोक्षवृत्ते स्सहकारित्वेनातिप्रसंगनिरासात्, आत्मविषयकसंस्कारस्यापि वृत्त्यादिविशिष्टात्मरूपप्रकाशस्य वृत्त्यादिविनाशे विशिष्टरूपेण विनाशादेवोपपत्तेः, विज्ञातारमरेकेन विजानीयादिति श्रुतिः स्पष्टं साटोपमाह, तस्मान्नात्मास्वगोचरइति । इदमप्यनेन निरस्तम् तथाहि- संविन्नानात्वसमर्थनेन ब्रह्मस्वरूपान्यज्ञानस्य सत्वात्तद्विषयत्वप्रविरुद्धम् । मानं च ब्रह्मजानामीति प्रतीतिरेव घटादिवत् । नच- वृत्तिविषयतयान्यथासिद्धिः , घटादावपि तथा प्रसंगात् । वृत्त्यन्वयव्यतिरेकानुविधानस्य तुल्यत्वात् । जीवकर्तृकब्रह्मविषयकव्यवहारेपि मानं, ब्रह्मणः स्वप्रकाशत्वेपि तस्य जीवभेदस्यवा तत्समवायस्य वाभावेन जीवस्य तद्विषयज्ञाना भावेन तद्व्यवहारासम्भवात् । एवं जीवब्रह्मणो र्भेदादेवाविद्यानिवृत्तिसंस्कारावपि तत्र मानम् । किंच किंजीवब्रह्मज्ञानाना मभेदसमर्थन मुपजीव्य इदमनुमानं प्रवर्तते, उतानुपजीव्य । द्वितीये उक्तरीत्या व्यभिचारः तत्सन्देहोवा दुरपह्नवः । आद्ये सार्वलौकिकस्य श्रुतिप्रतिपन्नस्य भेदबाद्युक्तोपपत्तिसिद्धस्यच भेदस्य मिथ्यात्वसमर्थनं विना जीवब्रह्मविज्ञानाना मभेदासिद्ध्या मिथ्यात्वोपजीवनावश्यम्भावे आत्माश्रयो दुष्परिह[illegible] रमरे केनेत्यादिश्रुतौहि प्रत्यक्षश्रुत्युपप[illegible] प्रतीते विशुद्धमनोग्राह्यत्वोक्त्या को[illegible] दासस्वारस्याच्च दुष्टकरणग्राह्यत्व[illegible] तेति भेदमिथ्यात्वसमर्थनमन्तरेण [illegible] सिद्धिः । कल्पितभेद मादाय ज्ञानवि[illegible] चारः । तत्र यदुक्तं, स्वसमानसत्ताकभे[illegible] मिति, तत्र किं ब्रह्मणि ज्ञानप्रतियोगिकभेदस्य [illegible] सिद्धम्,

ब्रह्मणो नास्तीति चेन्न; "आत्मावारे द्रष्टव्यःश्रोतव्यो मन्तव्यो निदिध्यासितव्यः" "ब्रह्मवेदब्रह्मैवभवति" "अथातोब्रह्मजिज्ञासे" इत्यादिस्वपराभ्युपगत श्रुतिसूत्रादिविरोधात्, सन्मात्रग्राहिप्रत्यक्षमिति वादस्यापि प्रहाणप्रसंगाच्च । व्यावहारिकं ब्रह्मणो दृश्यत्वं नतु पारमार्थिकमितिचेत्? हन्तकिं प्रपंचदृश्यत्वं पारमार्थिकं, येन तस्मिन् मिथ्यात्वं सिध्येत् । तथाच सति पारमार्थिकं दृश्यत्वं ततएव दृश्यमपारमार्थिकमिति भ्रान्तजल्पितायेत । अतः प्रपंचस्यापि व्यावहारिकं दृश्यत्वमभ्युपेत्यं, तच्च ब्रह्मणोप्यविशिष्टमिति । तस्यापि मिथ्यात्वप्रसंगस्या विशेषेऽपि सत्यत्वे प्रपंचस्यापि सत्यत्वप्रसंगः । यदिच व्यावहारिकमपि दृश्यत्वं ब्रह्मणो नास्तीत्युच्येत तदा ब्रह्मविज्ञानान्मोक्षइति वेदान्तसिद्धान्तविरोधश्च । किंच ब्रह्मणो दृश्यत्वं नास्तीत्यत्र ब्रह्मशब्दः किं कस्यचिदप्यबोधकः, उताब्रह्मबोधकः, अथवा ब्रह्मबोधकइति । नाद्यः, ब्रह्मशब्दप्रयोग नैरर्थक्यप्रसंगात् । न द्वितीयः, अब्रह्मणस्तेनाभिधाने तस्यैव दृश्यत्वनिषेधात् ततः प्रपंचे हेतोरसिद्धेश्च । न तृतीयः, ब्रह्मणो दृश्यत्वस्य दुस्त्यजत्वात् ।

उतासिद्धम् । आद्ये प्रपंचे ज्ञानप्रतियोगिकभेदस्यापि भेदत्वाविशेषेणमिथ्यात्वसिद्ध्यास्वसमानसत्ताकत्वाय प्रपंचेपि मिथ्यात्वंसिद्धमितिसिद्धसा
[illegible]तः प्रत्यक्ष[illegible] [illegible]सन्दिग्धानैकान्त्यं । किंच किं चिद्विषयत्वं स्व-
[illegible]न्न, प्रत्यक्षान्येन जानीय[illegible] [illegible] उदचिद्भेदः, उताचिद्विषयत्वं । ना-
[illegible] तज्ज्ञानोत्पत्ते स्तादृशानुभ[illegible] [illegible]र्मासिद्धेः । नतृतीयः, ब्रह्मणि-
[illegible]व प्रतिबन्धिका तत्रच प्रति[illegible] [illegible] ब्रह्मचिद्विषयइति (भ्रान्तेति) धर्म्य
[illegible]तारा[illegible] । [illegible] जन[illegible] [illegible]हेतूच्छेदइतिभावः । दूषणान्तर
[illegible]ध्यत[illegible] [illegible] [illegible]वादितिभावः । ननु ब्रह्मणःस्वप्रका-
[illegible] कथ[illegible] [illegible] [illegible]श्यत्वं विवक्षितं, ब्रह्मपदेन चतदा-
कारवृत्युत्प[illegible]मात्र, [illegible]च्चैवमपि वाच्यत्वप्रसंगेनापसिद्धान्तः , लक्ष-

स्वयं प्रकाशस्य ब्रह्मणो यथाकथंचिल्लक्षणया ब्रह्मशब्देन प्रतिपादनमिति चेत् ? तथापि लक्षणया वृत्त्या शब्दजन्यप्रतीतिविषयत्वं सिद्धं, तावतैव दृश्यत्व मवर्जनीयं । ब्रह्मशब्देन ब्रह्मणो लक्षणाचानुपपन्नेत्यादावेवोक्तम् । एतेन सर्वशब्दागोचरत्वं ब्रह्मणो वदन् प्रत्युक्तः, ब्रह्म न शब्दप्रतिपाद्यमित्यत्र पूर्ववद्विकल्पदूषणयो रवर्जनीयत्वात् । "यतो वाचो निवर्तन्त" इत्यत्रापि यच्छब्देन ब्रह्मानुवादो ऽवर्जनीयः । उपहितमनूद्यत इति चेत्तथापि ज्ञानविषयत्वं सिद्धं । उपहितानुवादे नानुपहिते तन्निषेधश्चाशक्यः । एवमनुभूतिः स्वयं प्रकाशे त्यादिभिर्वेदान्त प्रतिपादनमपि तन्निरासमये निरस्तं द्रष्टव्यं । न चतुर्थः, पारमार्थिकव्यतिरेकस्य शुक्तिकारजतादौ प्रपंचेप्यनभ्युपगमेनं साधनविकलत्वासिध्यादिदोषात् । अपारमार्थिकव्यतिरेकस्य ब्रह्मण्यपिविद्यमानत्वेनानैकान्त्यादेव । अतएव प्रातिभासिकव्यतिरेक पक्षोपि निरस्तः । किंच घटोस्तिपटोस्तीत्यादिषु सत्त्वमनुभूतिविषयतयैव प्रतिभासते ।

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य

वेदान्ताचार्यस्य कृतिषु शतदूषण्यां दृश्यत्वानु

माननिरासः पंचदश[illegible] ॥

णांगीकारादिति शंकते (स्वयंप्रका[illegible]
क्तवृत्तौ मानाभावात लक्ष्यत्वेपि [illegible]
र्थः (प्रतिपाद्यमितीति) इत्यत्रेत्य[illegible]
स्यापि प्रवेशादित्यर्थः । यद्वा तथ[illegible]
नविषयत्वं सिद्धमित्यर्थः । ननु म[illegible]
रेकोहेतुः, अतोन पूर्वोक्तदोषइत्यत्राह ([illegible] कान्त्या
देवेत्यर्थः । (अनुभूतिविषयतयेति) घटोस्तीत्यादौ व्यवहारहेतु ज्ञानं

स्वप्रकाशं प्रति विषयभूतत्वेन सत्तारूपस्य ब्रह्मणः प्रातिभासाद्विषयत्वस्य च भेदगर्भत्वादिति भावः ।

वृत्तिविषयत्वस्योक्तदूषणेनैव निरासात् पंचमपक्षोनपृथक् दूषितः । तत्र यदुक्तं स्वसमानसत्ताकवृत्तिविषयत्वं दृश्यत्वमिति । तत्रापि कृत्स्नमिथ्यात्वसिद्धेः प्राक् ब्रह्मणिसन्दिग्धानैकान्त्यं दुर्निवारम् । साधनवैकल्यंच, रजत विषयवृत्ते स्त्वयानंगीकारात् । शुक्तिगोचरेदमाकारवृत्त्यवच्छिन्नचैतन्यमेव रजतप्रकाशइतिहि त्वत्प्रलापः । वृत्तिप्रतिफलितचैतन्यप्रकाश्यत्वमेव वृत्तिविषयत्वमिति विवक्षायामपि वृत्तेः प्रातिभासिकत्वाभावात् साधनवैकल्यं । सत्तात्रैविध्याभावपक्षेपि वृत्तिनिरासादेव साधनवैकल्यं । किंच वृत्तेर्मिथ्यात्वं सिद्धं नवा । आद्ये समानसत्ताकत्वाय प्रपंचेपि मिथ्यात्वसिद्धे र्वाच्यतया सिद्धसाधनम् । द्वितीये उक्तएव व्यभिचारः । किंच वृत्तौच नकिंचिन्मानं पश्यामः । ननु उत्पत्तिप्रतीति र्मानं, ज्ञानस्य नित्यतया इदानीं घटं जानामीति प्रतीते र्ज्ञानविषयत्वासम्भवात्, तस्मात् ज्ञानाभिन्नतया प्रतीय्यमानवृत्तिविषयैवोत्पत्तिप्रतीतिः । एवं ब्रह्मजानामीत्यनुभवोपि तत्र मानम् , ज्ञानाभिन्नस्य ब्रह्मणो भेदघटितविषयत्वासम्भवात् । मैवम् , इदानीं घटज्ञानामीति प्रतीते र्ज्ञाने घटविषयितोत्प[illegible]त्वेप्युपपत्तेः । एतेन ब्रह्मजानामीत्यनुभवोपि निर्व्यूढः । अभेदे [illegible] विरोधात् । विषयितयैवाविद्यानिवृत्तिसम्भ[illegible]

[illegible] :, वृत्तिपक्षेच करणविशेषेणापरो[illegible] न् परोक्षापरोक्षविभागः । नच करण[illegible] रोक्ष्यमिति वाच्यम्, ब्रह्मज्ञानस्या[illegible] त्र विषयितायाः शब्दजन्यतया इन्द्रियज[illegible] ात् । नच मनस एवापरोक्षहेतुता, तस्यानिन्द्रियत्वात् । वृत्तिपक्षे त्वपरोक्षार्थविषयत्वमेव वृत्ते रापरोक्ष्यं । अर्था

परोक्ष्यं चापरोक्षसंविदभेदात्। अत श्शब्दजन्याया ब्रह्मगोचरवृत्तेरपरोक्ष विषयत्वादापरोक्ष्योपपत्तिरिति ।

उच्यते । अपरोक्षज्ञान मज्ञान निवर्तकमिति परिभाषांगीकारेपि ज्ञान स्य स्वनिरूपितमापरोक्ष्यं स्वतइत्यस्तु। अन्यनिरूपितंत्वापरोक्ष्यमिन्द्रिया धीन मित्यस्तु। ब्रह्मापरोक्ष्ये स्वाभाविकेसत्यप्यविद्या निवृत्ते रदर्शनात् करणाधीनविषयिता सहकारित्वेनेप्यतां । घटाज्ञाननिवर्तके घटज्ञाने घटविषयत्वमापरोक्ष्यञ्च निवर्तकताप्रयोजकंदृष्टमिति तदुभयमपि ब्रह्मज्ञाने नाविद्यानिवृत्तावप्यपेक्षितमेव। इयांस्तु विशेषः, एकत्र तदुभयं कारणा-धीनमन्यत्रा न्यतरदिति ।

किंच यदि अपरोक्षसंविदभेदेनार्थस्यापरोक्ष्यं, तद्विषयतया-वृत्तेरापरोक्ष्यात् ब्रह्मविषयकापरोक्ष्य वृत्तिस्सम्भवतीति वृत्तिकल्पनं; तदात्माश्रयः, संविदभेदस्य मिथ्यात्वाधीनत्वात् । व्यवहारस्यापिं तथैव सिद्धेः न तदर्थमपि वृत्तिकल्पना ।

यदाह। अयं-घटइति ज्ञाने ज्ञानाकारता यथावगम्यते एवं जानामी तिज्ञानेपि ज्ञानाकारता वगम्यते, तदाकारत्वंच तद्विषयत्वमेवेति। - तन्न-इच्छां जानामि सुखं जानामि दुःखमनुभवामीत्यत्र वृत्त्यभावेन ज्ञान-स्य विषयत्वासम्भवात् स्वप्रकाशमात्रं यथा [illegible] विषयः तथैव सर्वत्रोपपत्तेः ।

यच्चोक्तम् - ज्ञानपदवाच्यत्वार्थ [illegible]
त्रस्य ज्ञानपदवत् सत्यादिवाक्यार्थ [illegible]
योगादिति । तदप्यखण्डार्थवादे ति [illegible]
निरस्तम् । किञ्च वृत्तिविशिष्टं [illegible]
इति हित्वत्प्रक्रिया, तत्र पदार्थस्य [illegible]
कदेशस्य वाक्यार्थत्वं कथमनुमन्यसे । [illegible] विशिष्टे ज्ञानपदशक्तिसम्भवात् किं वृत्तिकल्पनया ।

यदप्युक्तं जानामीति विशेषणविशेष्यभावो ह्यनुभूयते, तच्चैकस्य न सम्भवतीति वृत्तिकल्पनमिति। तन्न, विषयताविशिष्टस्य स्वरूपमन्तःकरणावच्छिन्नं प्रति वा विशेषणत्वात् ।

यदाह-घटं जानामीति ज्ञाने स्वविषयताप्रतीयते, स्वस्य स्वविषयत्वासम्भवात् अन्यंप्रति विषयतावाच्या, यदेवान्यत् सैव वृत्तिरिति। -नैतत्, घटं जानामीति घटस्य हि ज्ञानविषयतानुभूयते न ज्ञानस्य । ज्ञानविषयकव्यवहारस्य समानविषयकज्ञानाभावे असम्भवादवश्यं ज्ञानविषयतावाच्येति चेत्, समानविषयकज्ञानस्य व्यवहारहेतुत्वं क्व दृष्टमायुष्मता। घटज्ञानइति चेत्तर्हि यथा दर्शनं कल्पने ज्ञानमेव कल्पनीयम् - ननु तदसम्भवाद्वृत्तिः । नहीदमदृष्टार्थं, येन प्रतिनिधिरुपादीयेत । ज्ञानाभेदाज्ज्ञानकार्यं वृत्त्या भवतीति चेत्, आभ्यांतिका भेदमात्रात्तत्कार्यासम्भवात् तथात्वे शुक्तिकार्यप्रसंगात् । किञ्च वृत्तेर्हि घटादिगोचराया ज्ञानावच्छेदकत्वन्तवसिद्धान्तः , तस्याः कथं ज्ञानगोचरत्वं । तथात्वेपि वा इच्छां जानामि सुखं जानामि दुःखं जानामीति व्यवहारः कथं ? तत्रेच्छादिगोचरवृत्ते रभावात्। तत्र स्वप्रकाशादेव ज्ञानव्यवहारे घटज्ञानेन किमपराद्धम् ।

... श्रीनिवासाचार्य पादसेवासमधिगत ... वैभवेन तच्चरणपरिचरणपरायणेन ... न रामानुजदासेन विरचितायां ... ख्यातख्यायां दृश्यत्वानुमान ... नः स्कन्धः ॥



तेभ

तेः प्रत्यक्षत्वा

वेन्न, प्रत्यक्षान्येन जानीयो

तज्ज्ञानोत्पत्ते स्ताहशानुभ

िव प्रतिबन्धिका तत्रच प्रति

तारा ।

कथ

त्वान्तरि [illegible]

सामग्रीसत्त्वं तज्ज्ञानो[illegible]

ग्रीप्रत्यक्षं [illegible]न्यैव प्रतिनन्धिव[illegible]

मेवेति लाघवावतारा[illegible]।

किंच यदवच्छे[illegible]

[illegible]